॥ श्री मार्कण्डेयाय नमः ॥

॥ स्वस्ति श्री महाराजाधिराजेन्द्र श्रीम ॥

॥ हाराजा नरेन्द्रसाहिनृपतेः पुस्तकमिदं ॥

श्रीगणेशायनमः श्रीशारदायैनमः ॐनमोभगवतेवासुदेवाय दंष्ट्राग्रेणोद्धृतागौरुदधिपरिवृतापर्वतैर्निम्नगाभिर्दृतेमत्यिंडवद्योवहदुरुवपुषानंतरूपेणायेन॥
सोयंकंसासुरारिर्मुरनरकदशास्यांतकृत्सर्वसंस्थोविष्णुर्जिष्णुःसुरेशोदहतुममपुनादिदेवोवराहः॥श्रीसूतउवाच।तपःस्वाध्यायनिरतंमार्कंडेयंमहामु
निं।व्यासशिष्योमहातेजाजैमिनिःपर्यपृच्छत॥भगवन्भारताख्यानंव्यासेनोक्तंमहात्मना॥पूर्णमस्तमलैःशुभ्रैर्नानाशास्त्रसमुच्चयैः।जातिशुद्धसमा
युक्तंसाधुशब्दोपबृंहितं।पूर्वपक्षोक्तिसिद्धांतपरिनिष्ठासमन्वितं।त्रिदशानांयथाविष्णुर्द्विपदांब्राह्मणोयथा।भूषणानांचसर्वेषांयथाचूडामणिर्वरः॥यथायु
धानांकुलिशमिंद्रियाणांयथामनः।तथेहसर्वशास्त्राणांमहाभारतमुच्यते।अत्रार्थश्चैवधर्मश्चकामोमोक्षश्चवर्ण्यते।परस्परानुबंधश्चसानुबं्धश्च
तेपृथक्।कामशास्त्रमिदंश्रेष्ठमर्थशास्त्रमिदंपरं।मोक्षशास्त्रमिदंचाग्र्यंधर्मशास्त्रंतथोत्तमं।चतुराश्रमवर्णानामाचारस्थितिसाधनं।प्रोक्तमेतन्महाभागवे
दव्यासेनधीमता।तथातातकृतंतेनव्यासेनोदारकर्मणा।यथाव्यस्तमिदंशास्त्रंविरोधैर्नाभिभूयते॥व्यासवाक्यजलौघेनकुतर्कतरुहारिणा....दशैलाव
तीर्णेननीरजस्कामहीकृता॥कलशब्दमहाहंसंमहाख्यानवरांबुजं।कथाविस्तारसलिलंकार्ष्णवेदमहाह्रदं।तदिदंभारताख्यानंवह्वर्थंबहुविस्तरं।तत्त्वतो
ज्ञातुकामोहंभगवंतमुपस्थितः।कस्मान्मानुषतांप्राप्तोनिर्गुणोपिजनार्दनः॥वासुदेवोजगन्मूर्तिःस्थितिसंहारकारणं।कथंचपांडुपुत्राणामेकासाद्रुप
दात्मजा।पंचानांमहिषीकृष्णात्वत्रमेसंशयोमहान्।नेवजंब्रह्महत्यायावलदेवोमहावलः।तीर्थयात्राप्रसंगेनकस्माच्चक्रेहलायुधः।कथंचद्रौपदेयास्तेऽकृतदा॥
महारथाः।पांडुनाथामहात्मानोवधमापुरनाथवत्।एतत्सर्वंविस्तरतोममाख्यातुमिहार्हसि।भवंतोमूढबुद्धीनामववोधकराःसदा।श्रीसूतउवाच।इति
तस्यवचःश्रुत्वामार्कंडेयोमहामतिः।प्रत्युवाचमुनिःश्रेष्ठोजैमिनिंशंसितव्रतं।श्रीमार्कंडेयउवाच॥क्रियाकालोयमस्माकंसंप्राप्तोमुनिसत्तम।विस्तरे
णाभिवक्तव्येनैवकालःप्रशस्यते।येतुवक्ष्यंतिवक्ष्येऽहंतांस्तेजैमिनेतव।यथातेऽत्रहिसंदेहोनिर्मोहास्तेद्विजोत्तमाः।पिंगाक्षश्चविरोधश्चसुपुत्रःसुमुख

स्तथाद्रोणपुत्राःखगश्रेष्ठास्तत्त्वज्ञाःशास्त्रचिंतकाः।वेदशास्त्रार्थविज्ञानेयेषामव्याहतामतिः।विंध्यकंदरमध्यस्थास्तानुपास्यचपृच्छच।एवमुक्तस्तदामुनि
नामार्कंडेयेनधीमता।प्रत्युवाचर्षिशार्दूलोविस्मयोत्फुल्ललोचनः।जैमिनिरुवाच।अत्यद्भुतमिदंब्रह्मन्वीणावाणिवमानुषी।यत्पक्षिणस्ते....नमापु
रत्यंतदुर्लभं।तिर्यग्योनौयदिजन्मप्राप्तिस्तेषांज्ञानंकुतोऽभवत्।कथंचद्रोणतनयास्तेप्रोच्यंतेपतत्रिणः॥कथंद्रोणइतिख्यातोयस्यपुत्रचतुष्टयं।जातंगुणवतां
तेषांधर्मज्ञानंमहात्मनां।श्रीमार्कंडेयउवाच॥शृणुष्वावहितोभूत्वायद्वृत्तंनंदनेपुरा।शक्रस्याप्सरसांचैवनारदस्यचसंगमे।नारदोनंदनेपश्यत्पुरश्चरं
गणमध्यगं।शक्रंसुराधिराज्ञानंतन्मुखासक्तलोचनं।सतेनर्षिवरिष्ठेनदृष्टमात्रःशचीपतिः।समुत्तस्थौस्वकेचासेददौवासनमादरात्।तद्दृष्ट्वाक्लव
दृषमुत्थितंत्रिदशांगनाः।प्रणेमुस्तंचदेवर्षिंविनयावनताःस्थिताः।ताभिरभ्यर्चितःसोथउपविष्टःशतक्रतुः।यथार्हंकृतसंलापःकथाश्चक्रेमनोरमाः
ततःकथांतरेशक्रस्तमुवाचमहामुनिं।देह्याज्ञांनृत्यतामासांतवचाभिमतेनचे।रंभावाथमिश्रकेशीवाउर्वश्यथतिलोत्तमा।घृताचीमे....वापियत्रवा
भवतोऽभिरुचिः।एतच्छ्रुत्वाद्विजश्रेष्ठवाक्यंशक्रस्यनारदः।विचिंत्याप्सरसःप्राहविनयावनताःस्थिताः।युष्माकमपिसर्वेभ्योरूपौदार्य....न्वेता।आत्म
नंमन्यतेयुष्मासुःसानृत्यतुममाग्रतः।नृत्येनालंसरूपेणसिद्धिर्न्नास्त्यप्यरूपतः।चार्वंगिष्ठालवन्नृत्यंनृत्यमन्यद्विडंवनं।श्रीमार्कंडेयउवाच।तस्यात्द्ध
वचनंश्रुत्वासर्वाहर्षसमन्विताः।अहंगुणाधिकानत्वंनत्वंचान्याब्रवीदहं।तासांसंभ्रममालोक्यभगवान्पाकशासनः।पृच्छ्यतेनमित्याहवक्तायोवेंगुणा १॥
धिकां।शक्रच्छंदानुवृत्त्यास्तिःपृष्टस्ताभिःसनारदः।प्रोवाचयत्तदावाक्यंजैमिनेतन्निवोधमे।तपस्यंतंनगेंद्रस्थंयावःक्षोभयतेवलात्।दुर्वाससंमुनिश्रेष्ठंतांवो
मन्येगुणाधिकां।श्रीमार्कंडेयउवाच।तस्यतद्वचनंश्रुत्वासर्वाःकंपितकंधराः।अस्माभिःशक्यतेनैवदुर्वासाःक्षोभकारणं।तत्राप्सरोवपुर्नाम....कादोद्भू
तागर्विता।प्रत्युवाचाथयास्यामियत्रायंसंस्थितोमुनिः।तस्याघदेहयंतारंप्रमुच्येन्द्रियवाजिनं।स्मरशस्त्रगलद्रश्मिंकरिष्यामिकुसा....शंकु....जनार्द

Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

मार्कं ॥२॥ तो वापियदि वा नीललोहितः। तमप्यद्य करिष्यामि कामवाणहतातुरं। इत्युक्त्वा प्रजगामाथ प्रालेयाद्रिं वपुस्तदा। मुनेस्तपः... शांत... पदं... श्रमं। साधु
स्कोकिलमाधुर्या यत्रास्ते स महामुनिः। क्रोशमात्रस्थिता तस्माद्गायन्तवीरांगना। तच्छ्रुत्वा ध्वनिमाकर्ण्य मुनिर्विस्मितमानसः। जगाम तत्र यत्रास्ते स... चिरां व
गातां दृष्ट्वा प्राह चार्वङ्गीं मुनिः संस्तभ्य मानसं। दौर्जन्यायागतां ज्ञात्वा क्रोधामर्षसमन्वितः। उवाचेदं ततो वाक्यं महर्षिस्तां महातपाः। यस्माद्दुःखार्जितस्येह तपसो
विघ्नकारिणी। आगतासि मदोन्मत्ते मम दुःखाय खेचरि। तस्मात्सुपर्णगोत्रे त्वं मत्क्रोधकलुषीकृता। जन्म प्राप्स्यसि दुःप्रज्ञे यावद्वर्षाणि षोडश। निजरूपं परित्यज्य
पक्षिणीरूपधारिणी। चत्वारस्तत्र तनयाः प्रजास्यन्तेऽप्सरोधमे। अप्राप्य तेषु च प्रीतिं शस्त्रपूता पुनर्दिवि। वासमाप्स्यसि वक्तव्यो नोत्तरं तेऽकथं चन। इति वचनमसह्यं
कोपसंरक्तनेत्रश्चलत्कलवलयां तां भामिनीं श्रावयित्वा प्रथितगुणगणौघो गां परित्यज्य विप्रस्तरलतरतरंगां संप्रयातः सगंगां॥ ५६॥ इति श्रीमार्कण्डेयपुराणे
खण्डे प्रथमोध्यायः॥ १॥ श्रीमार्कण्डेय उवाच। अरिष्टनेमितनयो कश्यपस्यात्मजोऽभवत्। गरुडो नाम पक्षिराट्। गरुडस्याभवत्पुत्रः संपातिरि
तः। तस्यात्मजोऽतिविक्रान्तः शूरः सुपार्श्वो वायुविक्रमः। सुपार्श्वतनयः कुन्तिः कुन्तिपुत्रस्तु लोलुपः। तस्यापि तनयौ वास्तां कंकः कन्धरएव च। कंकः कैलासशिखरे विद्युद्रूपं निशाचरं ११
तं। ददर्श बुजपत्राक्षं रक्षसं धनदानुजं। आपानसक्तममलं श्रेष्ठाम्बरधारिणं। भार्यासहायमासीनं शिलापट्टे सुशोभने। तं दृष्ट्वा मानवः कंकेनरक्षः क्रोधसमन्वितः। प्रोवाच कं
स्मादायातो न वानरोऽण्डजाधम। स्त्रीसमेतिकमेकान्ते कस्मान्मां उपसर्पसि। नैष धर्मः सुबुद्धीनां मिथो निष्पाद्यवस्तुषु। कंक उवाच। साधारणोऽयं शैलेन्द्रो यथा तव तथा मम। अन्येषां
चैव जन्तूनां ममता नत्र तोऽद्य कः। श्रीमार्कण्डेय उवाच। ब्रुवाणमित्थं खड्गेन कंकं विच्छेद राक्षसः। क्षरत्क्षतजबीभत्सं विस्फुरन्तमचेतनं। कंकं निहतं श्रुत्वा कन्धरः
कोपमूर्च्छितः। विद्युद्रूपवधायाशु मनश्चक्रे खगेश्वरः। स गत्वा शैलशिखरं कंको यत्र स्थितो हतः। तस्य संकालनं चक्रे ज्येष्ठस्य खगसत्तमः। कोपामर्षविवृत्ताक्षो
नागेन्द्र इव निःश्वसन्। जगाम तत्र यत्रास्ते भ्रातृहा राक्षसाधमः। पक्षवातेन महता चालयन्भूधरान्बहून्। वेगात्पयोदजालानि विक्षिपन्... राक्षसान् ॥२॥
दलितपितशत्रुः स... कान्तभूधरः। पानासक्तमतिं तत्र तं ददर्श निशाचरं। आताम्रवक्त्रनयनं हेमपर्यंकमाश्रितं स्रक्माल्यपूरितशिरः... पत्रैः सुभूषितं।

केतकीगर्भपत्राभैर्दन्तैश्चीर्णाननं। वामोरुमाश्रितां तस्य ददर्शायतलोचनां। पत्नीं मदनिकां नाम पुंस्कोकिलकलस्वनां। ततो रोषपरीतात्मा कन्धरः कन्दरास्थितं।
तमुवाच सुदुष्टात्मन्नेहि युध्यस्व वै मया। यद्वधृतो मम भ्राता विश्रब्धो घातितस्त्वया। तस्मात्त्वां मदसंयुक्तं नेष्येऽहं यमसादनं। विश्रब्धघातिनां ... लोका
ये च स्त्रीबालघातिनां। यास्यसि निरयांस्तांस्त्वं ... एवं पतत्रीन्द्रेणोक्तः स्त्रीसन्निधौ तदा। राक्षसः क्रोधसंरब्धः प्रत्युवाच पतत्रिणं। यदि ते निहतो
भ्राता पौरुषं तं हि दर्शय। त्वामप्यद्य हनिष्यामि खड्गेनानेन खेचर। तिष्ठ क्षणं न मे जीवन्पतत्रिन्गमिष्यसि। इत्युक्त्वा जनपुञ्जाभं विमलं खड्गमाददे। ततः पतत्रि
राजस्य यक्षाधिपनरस्य च। बभूव युद्धमतुलं यथा गरुडशक्रयोः। ततः स राक्षसः क्रोधात्तु वक्रमाविध्य वेगवान्। चिक्षेप पतगेन्द्राय ... तूर्णं पतगेन्द्रश्च तं
खड्गं किंचिद्भुत्यस्य भूतलात्। चञ्च्वा गृह्य हतदा गरुडः पन्नगं यथा। चञ्चुपादप्रहारैस्तु नखाग्रैः क्रोधमथाण्डजः। तस्मिन्नुपरते ततः खड्गबाहुयुद्धमवर्तत। ततः पतगरा
जेन पद्भ्यां क्रम्य ... कर पादन विना शु शिरः। सा च वियोजितः। तस्मिन्विनिहते सा स्त्री खगं शरणमभ्ययात्। किंचित्संयातसंत्रासा सा च प्राह भार्या स्वयामिते
तामादाय खगश्रेष्ठः स्वकं गृहमगात्पुनः। गत्वा स तन्निष्कृतिं भ्रातुर्विद्युद्रूपनिपातनात्। कन्धरस्य वर्ती वेश्म प्राप्य ... रूपधारिणी। मेनकातनया सुभ्रूः सोपरीरूप
ददे। तस्यां स जनयामास तार्क्षीमिति श्रुतां तदा। मुनिशापाग्निसंभूतां वपुं चाप्सरसं वरां। तस्या नाम तदा चक्रे तार्क्षीमिति विहंगमः। मंदपालसुताश्चैव ... चत्वारो
तेजसः। जरितारिप्रमुखा ये द्रोणाद्या द्विजसत्तमाः। तेषां जघन्यो धर्मात्मा वेदवेदाङ्गपारगः। उपयेमे स तां तार्क्षीं कन्धरानुमते शुभां। कस्यचित्त्वथ कालस्य तार्क्षी ...
वापह। स सार्द्धत्रयमासिकाः प्रपद्यताहिते गर्भे कुरुक्षेत्रं जगाम सा। कुरुपाण्डवयोर्युद्धे वर्तमाने सुदारुणे। भावित्वाच्चैव कार्यस्य रणमध्ये विवेश सा। सापश्यत तदा
युद्धं भगदत्तकिरीटिनोः। निरन्तरं शरैर्व्याप्तमाकाशं शलभैरिव। पार्थकोदण्डनिर्मुक्त आसन्नो ह्यतिवेगवान्। तस्याश्चैव महाबाणस्त्वचं विच्छेद चोदरी। भिन्ने को
घे शशांकाभं भूमावण्डचतुष्टयं। आयुषः सावशेषत्वात्तूलराशाविवाऽभवत्। तत्पात समकालं च सुप्रतीकाद्गजोत्तमात्। घंटापपात महती बाणसंछिन्नबंधनात्।
समं समेतासंप्राप्ता विभिन्नधरणीतला। छादयन्ती खगाण्डानि स्थितानि पिशितोपरि। हते तस्मिन्नृपपतौ भगदत्ते नरेश्वरे। बहून्यहान्यभूद्युद्धं ... पाण्डवसेनयोः।

मार्कं
२

वर्त्ते युद्धे धर्मपुत्रे गते शान्तनवान्तिकं। नीवमस्य गदतो शीक्षानश्रोतुधर्मान्महात्मनः। घंटान्तर्गता विततिष्ठं तियत्रां जाति द्विजोत्तमः। आजगाम तमुद्देशं शमीको नाम संयं
यमी। सतत्र शब्दमशृणोत् चीचीकूचीतिवासतां। बाल्यादस्फुटवाक्यानां विज्ञातेपि परे सति। अथर्षिः शिष्यसहितो घंटामुत्पाद्य विस्मितः। अमातृपितृपक्षांस्ते। शि
शुकान् ददर्शह। तान्वै तत्र तथा भूमौ शमीको भगवान्मुनिः। दृष्ट्वा सविस्मयाविष्टः प्रोवाचानुगतान्द्विजान्। सम्यगुक्तं द्विजाग्रेण शुक्रेणोशनसा स्वयं। पलायन
परं दृष्ट्वा दैत्यसैन्यं सुरार्द्दितं। गतां तन्वीं निवर्त्तेथां कस्माद्गतकातराः। उत्सृज्य शौर्यं यशसी त्वकाभगाता नमरिष्यथ। नश्यतो युद्धतो वापि तावज्जीवति जीवितं। यावद्धाता सृज
त्पूर्वं नयावन्मनसेप्सितं। एके म्रियन्ते स्वगृहे पलायन्ते परे जनाः। भुंजतोन्नं तथैवापः पिबन्तो निधनं गताः। विलासिनस्तथैवान्ये कामयाना ह्यनामयं। अविद्धाङ्गाः शस्त्रैः
श्चपुत्तराजवशंगताः। अन्ये तपस्यभिरता नीताः प्रेतनृपानुगैः। योगाभ्यासरतास्त्वन्ये नैव प्रापुरमर्त्यतां। शंवराय पुरा क्षिप्तं वज्रं कुलिशपाणिना। हृदये निहतः सोपि
धापि तमृतोऽसुरः। तेनैव खलु वज्रेण तेनैवेन्द्रेण दानवाः। प्राप्तकाले तु निहतास्तत्क्षणान्निधनं गताः। विदित्वैवं न संत्रासः कर्त्तव्यो विनिवर्त्तत। ततो निवृत्ता स्ते दै
त्यास्त्यक्त्वा मरणजं भयं। इति शुक्रवचः सत्यं कृतमेभिः खगोत्तमैः। ये युद्धे पि न संप्राप्ताः पंचत्वमतिमानुषे। क्वांडानां पतनं भूमौ क्व यथा पतनं समं। क्व च मांसवसासृ
क्तैर्भूमेरास्तरणक्रिया। केप्येते सर्वथा विप्रा नैते सामान्यपक्षिणः। दैवानुकूलता लोके महत्माग्य प्रदर्शिनी। एवमुक्त्वा स तान्वीक्ष्य पुनर्वचनमब्रवीत्। निवर्त्तता
श्रमं यात गृहीत्वा पक्षिबालकान्। मार्जारमूषकभयं यत्र नैषां मुनिकुमारकाः। श्येनतो नकुलाद्वापि क्रियतां तत्र पक्षिणः। ८५। किं तु यत्नेन वा कार्यं द्विजाः कर्म
भिः स्वकैः। रक्ष्यन्ते वाखिलाजीवा यथैते पक्षिबालकाः। तथापि यत्नः कर्त्तव्यो नरैः सर्वेषु कर्मसु। कुर्वन्पुरुषकारं तु वाच्यतां याति नो सतां। इति मुनिवरनोदित
स्ततस्ते मुनितनयाः परिगृह्य पक्षिणस्तान्। तरुविटपसमाश्रितालिसंघं ययुरथ तापसरम्यमाश्रमं। सचानवृंदमनसाभिकामितं प्रगृह्य मूलं कुसुमं फलं कुशा ३
न्। चकार चक्रायुधरुद्रवेधसां सुरेंद्रवैवस्वतजातवेदसां। अपांपतेर्गोपतिवित्तरक्षिणाः समीरणस्यापि तथा द्विजोत्तमः। धातुर्विधातुस्त्वथ वैश्वदेवि
की। श्रुतिप्रसक्ताविविधास्तास्ताः क्रियाः। ८५। इति श्रीमार्कंडेयपुराणे पक्षिणामुत्पत्तिः। २। श्रीमार्कंडेयउ। अहन्यहनि विप्रेन्द्रः स तेषां मुनिसत्त

मः। चकाराहारपयसा तथा गुप्त्या च पोषणं। मासमात्रेण जग्मुस्ते भानोः स्यंदनवर्त्मनि। कौतूहलविलोलाक्षैर्दृष्टा मुनिकुमारकैः। दृष्ट्वा महीं सनगरां सांभोधि सरि
द्वरां। रथचक्रप्रमाणां ते पुनराश्रममागताः। श्रमक्लान्ततरात्मानो महात्मानो वियोनिजाः। ज्ञानं च प्रकटीभूतं तत्र तेषां प्रभावतः। कोपं शिष्यानुकंपार्थं नुव
तो धर्मनिश्चयं। कृत्वा प्रदक्षिणं सर्वे चरणावभ्यवादयन्। ऊचुश्च मरणाद्घोरात्त्वमोक्षिताः स्म त्वया मुने। आवासमन्नं पयसी त्वं नो दाता पिता गुरुः।
राम गर्भस्थानां मृता माता पित्रा नैवास्म पालिताः। त्वया नो जीवितं दत्तं शिशवो येन रक्षिताः। शीर्णवीक्षितं तेजास्त्वं कृमीणामिव शुष्यतां। गजघंटां समु
त्पाद्य कृतवान्दुःखविज्वरं। कथं वर्द्धेयुरबलाः खस्थान्द्रक्ष्याम्यहं कदा। कदा भूमेर्द्रुमं प्राप्तान्द्रक्ष्यैव द्रुमांतरं गतान्। कदा मे सहजा कांतिः पंशुनाशो
भयिष्यति। पक्षवायुसमुत्थेन मत्समीपविचारिणां। ९०। इति चिंतयता तात त्वया ते परिपालिताः। ते सांप्रतं प्रबुद्धाः स्म करवाम तवाद्य किं। इत्युक्तिर्वचनं तेषां श्रुत्वा
संस्कारवत्स्फुटं। शिष्यैः परिवृतः सर्वैः सह पुत्रेण शृंगिणा। कौतूहलपरोभूत्वा रोमांचपरिसंवृतः। उवाच तत्त्वतो ब्रूत प्रवृत्तेः कारणं गिरः। कस्य शापात्प्रयन्ताढिमव
द्भिर्विक्रिया यया। रूपस्य वचसश्चैव तन्मे वक्तुमिहार्हथ। पक्षिण ऊचुः। विपुलः स्वामिरितिख्यातः प्रागासीन्मुनिसत्तमः। तस्य पुत्रद्वयं जज्ञे सुकृशस्तुम्बुरुस्तथा।
सुकृशस्य वयं पुत्राश्चत्वारोऽमिततेजसः। तस्यर्षेर्विनयाचारभक्तिनम्राः सदैव हि। तपश्चरणसक्तस्य शाम्यमानेन्द्रियस्य च। यदस्माभिमतं तस्मा भिस्तथान स्या
ययादितं समित्पुष्पादिकं सर्वं यच्चैवाभ्यवहारिकं। एवं तत्राथ वसतां तस्यास्माकं च कानने। आजगाम महावर्ष्मा भिन्नपक्षो जरान्वितः। आताम्रनेत्रस्तत्ता
त्मा पक्षी भूत्वा सुरेश्वरः। सत्यशौचक्षमाचारमतीवोदारमानसं। जिज्ञासुस्तमृषिश्रेष्ठमस्मच्छापभवाय च। ९०। पक्ष्युवाच। द्विजेंद्रमां क्षुधाविष्टं परित्रातुमिहार्हसि।
भक्ष्यार्थिनो महाभाग गतिर्भव ममाधुना। विंध्यस्य शिखरेतिष्ठं पत्रिपत्रान्यविलोक्य तेनाहि। यातितोस्मि महाभाग श्वसनेनाति रंहसा। सोहं मोहसमाविष्टो नष्टमे स
माहमस्मृतिः। स्थितस्तत्तोष्टमं काल चेतनां प्राप्तवानहं। प्राप्तचेतः क्षुधाविष्टस्तवैतच्छरणं गतः। भक्ष्यार्थी विगतानंदो दूयमानेन चेतसा। सत्कुरुष्वामलमतेमत्त्राण
य चलां मतिं। प्रयच्छ मे संधि विप्रर्षे प्राणयात्रां हि मे मम। स एवमुक्तः प्रोवाच तमिंद्रं पक्षिरूपिणं। प्राणसंधारणार्थाय दास्याम्यन्नं यथेप्सितं। इत्युक्ते पुनरप्येनमपृच्छत्स द्विजोत्तमः।

मार्कं
५

आहारः कृतवार्थाय उपकल्प्यो भवेन्मया। स चाहं नरमांसेन तृप्तिर्भवति मे परा। ऋषिरुवाच। कौमारं ते व्यतिक्रान्तं अतीतं यौवनं च ते। वयसः परिणामस्ते वर्त्तते त्वन-
मंडज। यस्मिन्नृणां सर्वेषां अशेषेच्छा निवर्त्तते। कस्माद्वृद्धत्वभावेऽपि हा नृशंसात्मको भवान्। क्व मानुषस्य पिशितं क्व वयश्चान्तिमं तव। सर्वथा दुष्टभावानां प्रशमो नोपप-
द्यते। अथवा किं ममानेन प्रोक्तेनास्ति प्रयोजनं। प्रतिश्रुत्य सदा देयमिति मे भावितं मनः। इत्युक्त्वा तु स विप्रेन्द्रस्तथेति कृतनिश्चयः। शीघ्रमस्मान्समाहूय गुणतोऽनु प्रश-
स्य तान्। उवाचाक्षुब्धहृदयो मुनिर्वाक्यं सुनिष्ठुरं॥ विनयावनतान्सर्वान्भक्तिनम्रान्कृताञ्जलीन्। कृतात्मनो द्विजश्रेष्ठा ऋणैर्मुक्ता मया सह। जातं श्रेष्ठमपत्यं वो यूयं म-
म यथा द्विजाः। गुरुः पूज्यो यदि मतो भवतां नापरः पितुः। ततः कुरुत मे वाक्यं निर्व्यलीकेन चेतसा। तद्वाक्यसमकालं च प्रोक्तमस्माभिरादृतैः। यद्वक्ष्यति भवांस्तद्धि कृतमेवाव-
धार्यतां। ऋषिरुवाच। मामेष शरणं प्राप्तो विहगः क्षुत्तृषान्वितः। युष्मन्मांसेन येनास्य क्षणं तृप्तिर्भवत्विति। तृष्णाप्याशु च रक्तेन तथा शीघ्रं विधीयतां। ततो वयं प्रव्यथिताः
प्रकंपाद्भृतसाध्वसाः। कष्टं कष्टमिति प्रोक्ता नैतत्कुर्म इति ब्रुवन्। कथं परशरीरस्य हेतोर्देहं स्वकं बुधः। विनाशयेद्घातयेद्वा यथा ह्यात्मा तथा सुतः। पितृदेवमनुष्याणां या-
न्युक्तानि ऋणानि वै। तान्यपाकुरुते पुत्रो न शरीरप्रदः पितुः। तस्मान्नैतत्करिष्यामो नाचीर्णं यत्पुरातनैः। जीवन्भद्राण्यवाप्नोति जीवन्पुण्यं करोति च। मृतस्य देहनाशश्च
धर्मस्योपरमस्तथा। आत्मा तु सर्वतो रक्ष्य इति विदुर्धर्मविदस्तथा। इत्थं श्रुत्वा वचोऽस्माकं मुनिः क्रोधादिव ज्वलन्। कोपारक्तविवृत्ताक्षो धिक्शब्दपरुषं वदन्। प्रोवाच पुनर-
प्यस्मान्निर्दहन्निव लोचनैः। प्रतिज्ञाय वचो मह्यं यस्मान्नैतत्प्रकुर्वथ। तस्मात्पुत्रा दुरात्मानः पक्षियोनिमवाप्स्यथ। एवमुक्त्वा तदा सोऽस्मान्विहङ्गममथाब्रवीत्। अन्ते-
ष्टिमात्मनः कृत्वा शास्त्रतश्चौर्ध्वदेहिकं। भक्षयस्व सुविस्रब्धो मांसं मे द्विजसत्तम। आहारीकृतमेतत्ते मया देहमिहात्मनः। एतावदेव विप्रस्य ब्राह्मण्यं प्रचक्षते। यावत्पत
राजात्य[illegible]सत्यस्य परिपालनं [illegible] ङ्गैस्तत्पुण्यं प्राप्यते महत्। कर्मणान्येन वा विप्रैर्यत्सत्यपरिपालनात्। इत्थमेवं वचनं श्रुत्वा सोऽन्तर्विस्मितनिर्भरः। प्र-
त्युवाच मुनिश्रेष्ठं पक्षिरूपधरस्तदा। योगमास्थाय विप्रेन्द्र त्यजेदं स्वकलेवरं। जीवन्मांसं न विप्रेन्द्र भक्षयामि कथंचन। तस्य तद्वचनं श्रुत्वा योगयुक्तोऽभवन्मुनिः। तस्य ५
तं निश्चयं ज्ञात्वा शक्रः प्राह स्वदेहभृत्। भो भो विप्रेन्द्र बुध्यस्व बुद्धेर्बोध्यगुणात्मकः। जिज्ञासार्थं मयायं ते अपराधः कृतोऽनघ। तत्क्षमस्वामलम[illegible]का चेच्छा क्रिय-

तां तव। पालनात्सत्यवाक्यस्य प्रीतिर्मे परमा त्वयि। अद्य प्रभृति ते ज्ञानमैन्द्रं प्रादुर्भविष्यति। तपस्यथ तथा धर्मे नैते विघ्नो भविष्यति। इत्युक्त्वान्तर्हिते शक्रे पिता [illegible]मन्वितः। प्रण-
म्य शिरसास्माभिरित्युक्तो महामुनिः। बिभ्यतां मरणात्तात त्वमस्माकं महामते। क्षन्तुमर्हसि दीनानां जीवितप्रियकारिणां। त्वग्मांसास्थिसंघाते पूयशोणितपूरिते। [illegible] यत्रानरतिर्य-
न्न तत्रास्माकमियं रतिः। श्रूयतां च महाभाग यथा लोको विमुह्यति। कामक्रोधादिभिर्घोराशयप्रतिवारिभिः। प्रज्ञाप्राकारसंयुक्तमस्थिस्थूणं पुरं महत्। कर्मभित्तिमहारोधं मांस-
शोणितलेपनं। नवद्वारं महामायं सर्वतः स्नायुवेष्टितं। नृपश्च पुरुषस्तत्र चेतनावानवस्थितः। मन्त्रिणौ चैव बुद्धिश्च मनश्चैव विरोधिनौ। यतेते वै विनाशाय तावुभौ वि-
तिरेतरं। नृपस्य तस्य चत्वारो नाशमिच्छन्ति वै द्विजाः। कामः क्रोधस्तथा लोभो मोहश्चान्योऽस्ति मद्रिपुः। यदा तु स नृपस्तानि द्वाराण्यावृत्य तिष्ठति। [illegible]
[illegible] तुरा [illegible] नातिविविशुः [illegible]
[illegible] प्रविश्याथ स वै तत्र द्वारैरिंद्रियसंज्ञकैः। रागः स्नेहमा-
याति मनसा च सहेतरैः। इंद्रियाणि मनश्चैव वशे कृत्वा दुरासदः। द्वाराणि च वशे कृत्वा प्राकारं नाशयत्युत। मनस्तस्याश्रितं दृष्ट्वा बुद्धिर्नश्यति तत्क्षणात्। अमात्यरहि-
तस्तत्र पौरवर्गोज्झितस्तथा। रिपुभिर्लब्धविवरः स नृपो नाशमृच्छति। एवं रागस्तथा मोहो लोभः क्रोधस्तथैव च। प्रवर्त्तन्ते दुरात्मानो मनुष्यस्मृतिनाशकाः। रागा-
त्क्रोधः प्रभवति क्रोधाल्लोभोऽभिजायते। लोभाद्भवति संमोहः संमोहात्स्मृतिविभ्रमः। स्मृतिभ्रंशाद्बुद्धिनाशो बुद्धिनाशात्प्रणश्यति। एवं प्रणष्टबुद्धीनां रागलोभा-
नुवर्त्तिनां। जीविते च सलोभानां प्रसादं कुरु सत्तम। योऽयं शापो भगवता दत्तः स न भवेद्यथा। न तामसीं गतिं कष्टां व्रजेम मुनिसत्तम। ऋषिरुवाच। यन्मयोक्तं न तन्मि-
थ्या भविष्यति कदाचन॥ न च वागनृतं प्राह यावदद्येति पुत्रकाः। दैवमत्र परं मन्ये धिक्पौरुषमनर्थकं। अकार्यं कारितो येन बलादहमचिन्तितं। यस्माच्च युष्माभि-
रहं प्रणिपत्य प्रसादितः। तस्मात्तिर्यक्त्वमापन्नाः परं ज्ञानमवाप्स्यथ। ज्ञानदर्शितमार्गाश्च विधूतक्लेशकल्मषाः। मत्प्रसादादसंदिग्धाः परां सिद्धिमवाप्स्यथ। एवं
शप्तास्म भगवन्पित्रा दैववशात्पुरा। ततः कालेन महता योन्यन्तरमुपागताः। जाताश्च रणमध्ये वै भवता परिपालिताः। वयमित्थं द्विजश्रेष्ठ खगतां समुपागताः।

राम

मार्कं नास्त्यलाविहं संसारे यो न दिष्टेन बाध्यते। सर्वेषामेव जंतूनां दैवाधीनं हि जीवितं। श्रीमार्कंडेय उवाच। इति तेषां वचः श्रुत्वा शमीको भगवान् द्विजः। प्रत्युवाच महाभागाः
॥५॥ समीपस्थायिनो द्विजान्। पूर्वमेव मया प्रोक्तो भवतां सन्निधाविदं। सामान्यपक्षिणो नैते केप्येते द्विजसत्तमाः। येयुद्धेपि न संप्राप्ताः पंचत्वमतिमानुषे। ततः प्रीतम
नस्केनेऽनुतामहात्मना। अमुः शिखरिणां श्रेष्ठं विंध्यं द्रुमलतावृतं। यावदद्यास्थितास्तस्मिन्नचले तत्र पक्षिणः। तपःस्वाध्यायनिरताः समाधिकृतचेतसः। इ
ति मुनिवरलब्धपक्षिया ते मुनितनया विहगास्त्वमस्युयेताः। गिरिवरमहनेऽतिपुण्यतोये जितमनो निवसंति विंध्यपृष्ठे।८८॥ इति श्रीमार्कंडेयपुराणे पक्षिजन्म
कथनं॥ मार्कंडेय उ०। एवं ते द्रोणतनयाः पक्षिणो ज्ञानिनोऽभवन्। वसंति त्वचले विंध्ये तानुपास्य च पृच्छ च॥ इत्येवं वचनं श्रुत्वा मार्कंडेयस्य जैमिनिः। जगा
म विंध्यशिखरं यत्र ते धर्मपक्षिणः॥ तद्भूम्यासन्नेतूनस्य शुश्राव पठतां ध्वनिं। श्रुत्वा च विस्मयाविष्टश्चिंतयामास जैमिनिः। स्थानसौष्ठवसंपन्नजितश्वाससमवि
स्वरं। सुविस्पष्टमदोषं च पठ्यते द्विजसत्तमैः। वियोनिमपि संप्राप्तेतान्मुनिकुमारकान्। चित्रमेतदहं मन्ये न जहाति सरस्वती। बंधुवर्गस्तथा मित्रं यच्चान्यत्स्वमप
रं गृहे। त्यक्त्वा गच्छति तत्सर्वं न जहाति सरस्वती। इति संचिंतयन्नेव विवेश गिरिकंदरं। प्रविश्य च ददर्शासौ शिलापट्टगतान्द्विजान्। पठतस्तान्समालोक्य मुखदोष
विवर्जितान्। सोऽथ हर्षेण शोकेन सर्वानेवाभ्यभाषत। स्वस्त्यस्तु वो द्विजश्रेष्ठा जैमिनिं मां निबोधत। व्यासशिष्यमनुप्राप्तं भवतां दर्शनोत्सुकं। मन्युर्नैव तु कं
र्तव्यो यत्पित्रातीव मन्युना शप्ताः खगत्वमायन्ताः सर्वथा दिष्टमेव तत्। स्फीते द्रव्यकुले केचिज्जाताः किल मनस्विनः। द्रव्यनाशे द्विजेंद्राः सुबले ते सुसात्वि
ताः। दत्वा याचंति पुरुषाः दत्वा वध्यंति चापरे। पातयित्वा च यात्यंते तपएव वसंत्ययात्। एतद्दृष्टं हि बहुशो विपरीतं तथा मया। भावाभावसमुच्छेदैर्जगत्
व्याकुलं जगत्। इति संचिंत्य मनसा न शोकं कर्तुमर्हथ। ज्ञानस्य फलमेतावत् शोकहर्षैर्न बध्यते। ततस्ते जैमिनिं सर्वे पाद्यार्घ्याभ्यामपूजयन्। ऊचुःसमर्प्य च पु
प्रष्टुं [illegible] तोपत्य महामुनिं। अथोचुः खगमाः सर्वे व्यासशिष्यं तपोनिधिं। सुखोपविष्टं विश्रांतं पक्षानिलहतक्लमं। पक्षिण ऊचुः॥ अद्य नः सफलं जन्म जी ॥५॥
वितं [illegible] सुजीवितं। यत्पश्यामः सुरैर्वंद्यं त्वत्पादांबुजद्वयं। पितुः कोपाग्निरुद्भूतो योऽस्माकं देहे प्रवर्तते। सोऽद्य शांतिं गतो विप्र युष्मद्दर्शनवारिणा॥ कच्चित्ते कुश

ल[illegible]ते आश्रमे मुनिपक्षिषु। वृक्षेष्वथ लतागुल्मत्वक्सारतृणजातिषु। अथवा नैतदुक्तं हि सम्यगस्माभिरीदृशैः। भवतां संगमो येषां तेषामकुशलं कु
तः। प्रसादं च कुरुष्वैतं ब्रूह्यागमनकारणं। देवानामिव संसर्गो भवतोऽभ्युदयो महान्। येनास्मज्ञानगुरुणा आनीतो दृष्टिगोचरं। जैमिनिरु०। श्रू
यतां द्विजशार्दूलाः कारणं येन कंदरं। विंध्यस्य हृततोरम्यं रेवावारिकणोक्षितं। संदेहान्भारते शास्त्रे अप्रच्छमिहागतः। मार्कंडेयं महात्मानं
पूर्वं भृगुकुलोद्वहं। तमहं पृष्टवान्पूर्वं संदेहान्भारतं प्रति। स च पृष्टो मया प्राह संति विंध्ये महाचले। द्रोणपुत्रा महात्मानस्ते वक्ष्यंत्यर्थविस्तरं॥ तद्वा
क्यनोदितश्चैवमागतोऽहं महागिरिं। तन्मे शृणुध्वमशेषेण श्रुत्वा व्याख्यातुमर्हथ। पक्षिण ऊचुः। विषये सति वक्ष्यामो निर्विशंकः शृणुष्व तत्। क
थं तेन वदिष्यामो यदस्मद्बुद्धिगोचरं। चतुर्ष्वपि हि वेदेषु धर्मशास्त्रेषु चैव हि। समस्तेषु तथांगेषु यच्चान्यद्वेदसंमितं। एतेषु गोचरोऽस्माकं बुद्धेर्द्विजसत्त
म॥ प्रतिज्ञातुं समारोढुं तथापि न हि शक्नुमः। तस्माद्वदस्व विश्रब्धं संदिग्धं यद्धि भारते। वक्ष्यामस्तव धर्मज्ञ न चेन्मोहो भविष्यति। जैमिनिरु०। संदिग्धा
नीह वस्तूनि भारतं प्रति यानि मे। शृणुध्वममलास्तानि श्रुत्वा व्याख्यातुमर्हथ। कस्मान्मानुषतां प्राप्तः कृतकृत्योऽपि सर्वज्ञः। वासुदेवोऽखिलाधारः सर्वका
रणकारणं। कस्माच्च पांडुपुत्राणामेका सा द्रुपदात्मजा। पंचानां महिषी कृष्णा। अत्र नः संशयो महान्। भवजं ब्रह्महत्यायां बलदेवो महाबलः। ती
र्थयात्राप्रसंगेन कस्माच्चक्रे हलायुधः। कथं च द्रौपदेयास्तेऽकृतदारपरिग्रहाः। पांडुनाथा महात्मानो वधमापुरनाथवत्। एतत्सर्वं कथ्यतां नः संदिग्धं भारतं
प्रति। कृतार्थः संतु एवं येनाहं यं निजमाश्रमं। पक्षिण ऊचुः। नमस्कृत्य सुरेशाय विष्णवे प्रभविष्णवे पुरुषाय पुराणाय शाश्वतायाव्ययाय च। यज्ञो
गायाखिलांगाय वेदार्थैरीडिताय च। वरिष्ठाय गरिष्ठाय वरेण्यायामिताय च। चतुर्व्यूहात्मने तस्मै त्रिगुणायागुणाय च। यस्मादणुतरं नास्ति यस्मान्नास्ति तह
त्तरं। येन विश्वमिदं व्याप्तमजेन जगदादिना। आविर्भावतिरोभावदृष्टादृष्टविलक्षणं। वदंति यत्सृष्टमिदं तथैवांते च संहृतं। ब्रह्मणे चादिदेवाय नमस्कृत्य

समाश्रिता। अकस्मादच्युतिरत्र वेदैर्यः पुनाति जगत्त्रयं। पुरा पात्यतथैशानं एकवाणविनिर्हतैः। यस्याः सुरारयो यज्ञा विलुप्यंते न यज्विनां। प्रवक्ष्यामो मतं पुराणं
व्यासस्याद्भुतकर्मणः। येन त्वां तमुद्दिश्य धर्माद्याः प्रकटीकृताः। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अयनं तस्य ताः पूर्वं तेन नारायणः स्मृतः। स दे
वो भगवान् सर्वव्यापी नारायणो विभुः। चतुर्द्धा संस्थितो ब्रह्मन् सगुणो निर्गुणस्तथा। एका मूर्त्तिरनिर्देश्या शुक्लां पश्यंति तां बुधाः। ज्वालामालावनद्धांगी वि
श्वासा योगिनां परा। दूरस्था चांतिकस्था च विज्ञेया सा गुणातिगा। वासुदेवाभिधानासौ निर्ममत्वेन दृश्यते। रूपवर्णादयस्तस्या न भावाः कल्पनामयाः। अ
स्त्येव सा सदा शुद्धा सुप्रतिष्ठैकरूपिणी। द्वितीया पृथिवीं मूर्ध्ना शेषाख्या धारयत्यधः। तामसी सा समाख्याता तिर्यक्त्वं समुपस्थिता। तृतीया कर्म कुरु
ते प्रजापालनतत्परा। सत्त्वोद्रिक्ता तु सा ज्ञेया धर्मसंस्थानकारिणी। चतुर्थी जलमध्यस्था शेते पन्नगतल्पगा। रजस्तस्या गुणः सर्गं सा करोति सदैव हि। या तृ
तीया हरेर्मूर्त्तिः प्रजापालनतत्परा। सा हि धर्मव्यवस्थानं करोति नियतं भुवि। प्रोद्धतानसुरान् हंति धर्मव्युच्छित्तिकारिणः। पाति देवान्सतश्चान्यान्धर्म
रक्षापरायणा। यदा यदा हि धर्मस्य ग्लानिः समुपजायते। अभ्युत्थानमधर्मस्य तदात्मानं सृजत्यसौ। भूत्वा वाराहरूपेण योन्नेरापोनिरस्य चापके या
दंष्ट्रयोद्धृता येन नलिनीव वसुंधरा। वहद्वृतसटादंष्ट्राजटाजूटमंडिता। कृत्वा नृसिंहरूपं च हिरण्यकशिपुर्हतः। विप्रचित्तिमुखाश्चान्ये दानवा विनिपातिताः।
वामनादींस्तथा चान्यान्न संख्यातुमिहोत्सहे। अवताराश्च तस्येह माथुरः सांप्रतं त्वयं। इति सा सात्त्विकी मूर्त्तिरवतारं करोति वै। प्रद्युम्नेति समाख्याता र
क्षाकर्मण्यवस्थिता। भवत्याति तस्थौ नावं च वासुदेवेच्छया सदा। इति ते तन्त्रैः समाख्याता कृतकृत्यापि सप्रभुः। मानुषत्वं गतो विष्णुः शृणु चास्योत्तरं पुनः।।५२।।
इति श्रीमार्कंडेयपुराणे चतुर्व्यूहे। ।त्वष्टुः पुत्रे हते ब्रह्मन् पूर्वमिंद्रस्य तेजसा। ब्रह्महत्याभिभूतस्य यदा हानिरजायत। तदा धर्मो विवेशाथ शाक्रं तेजो ह ।।६।।
पचारतः। निस्तेजश्चाभवच्छक्रो धर्मतेजसि निर्गमात्। ततः पुत्रं हतं श्रुत्वा त्वष्टा क्रुद्धः प्रजापतिः। अवलुंच्य जटामेकां इदं वचनमब्रवीत्। पश्यंतु मे

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

वीर्यं च ये पालोकाः सदेवताः। स च पश्यतु दुर्बुद्धिर्ब्रह्महा पाकशासनः। स्वकर्माभिरतो येन मत्सुतो विनिपातितः। इत्युक्त्वा कोपरक्ताक्षो जटामग्नौ जुहाव तां। ततो वृत्रः
समुत्तस्थौ ज्वालामाली महासुरः। महाकायो महावीर्यो भिन्नांजनचयोपमः। इंद्रशत्रुरमेयात्मा त्वष्टुस्तेजोपबृंहितः। अहन्यहनि सोऽवर्द्धत इषुपातं महाबलः। वधाय चात्म
नो दृष्ट्वा वृत्रं शक्रो महासुरं। प्रेषयामास सप्तर्षीन् संधिमिच्छन् भयातुरः। सख्यं च कृत्वा तत्तस्य वृत्रेण समयं तथा। ऋषयः प्रीतमनसः सर्वभूतहिते रताः। समयस्थानमु
ल्लंघ्य वृत्रः शक्रेण घातितः। वृत्रहत्याभिभूतस्य तदा बलमशीर्यत। तच्छक्रदेहविभ्रष्टं बलं मारुतमाविशत्। सर्वव्यापिनमव्यक्तं बलस्याधिदेवतं। अहिल्यां च यदा
शक्रो गोतमं रूपमास्थितः। धर्षयामास देवेंद्रस्तदा रूपमशीर्यत। अंगप्रत्यंगलावण्यं यदतीव मनोरमं। विहाय दुःखदेवेंद्रो नासत्यावागतं तत्।।१३।। धर्मेण तेजसा
त्यक्तं बलहीनमरूपिणं। ज्ञात्वा सुरेशं दैतेयाः सर्वे ते चक्रुरुद्यमं। राज्ञामुद्रिक्तवीर्याणां देवेंद्रं विजिगीषवः। कुलेष्वतिबलं दैत्या अजायंत महाबलाः। कस्यचित्त्वथ काल
स्य धरिणी चार्त्तपीडिता। जगाम मेरुशिखरं। सदो यत्र दिवौकसां। तेषां सा कथयामास भूरिभारप्रपीडिता। तत्रजास्मत्वदैत्योत्थं वेदकारण[illegible]ततः। अंशेनोहि णधोहि
वद्भूरिभाराक्रांता प्रजास्यहे। तथा कुरुध्वं त्रिदशा यथा शांतिर्भवेन्मम। [illegible] तेजोभागैस्ततो देवा अवतेरुर्दिवो महीं। प्रजानामुपका[illegible]भूभारहरणाय च
यदिंद्रदेहजं तेजस्तन्मुमोच तदा वृषः। कुंत्यां जातो महातेजास्ततो राजा युधिष्ठिरः। बलं मुमोच पवनस्ततो भीमो व्यजायत। यदा शक्रांगतं तेजो रूपलावण्यजं हरेः। उत्पन्नौ
यमलौ माद्र्यां शक्ररूपौ महाद्युती। शक्रवीर्यार्द्धतश्चैव जज्ञे पार्थो धनंजयः। पंचधा चावनित्यं अवतीर्णः शतक्रतुः। तस्योत्पन्ना महाभागा पत्नी कृष्णा हुता
शनात्। शक्रस्यैकस्य सा पत्नी नैवान्यस्य कस्यचित्। योगीश्वराः शरीराणि कुर्वंति बहुलान्यपि। पंचानामेकपत्नीत्वमित्येतत्कथितं तव।।२६।। इति श्रीमार्कंडे
यपुराणे पंचेन्द्रोत्पत्तिः।। ।।पक्षिणऊचुः। एवं पार्थपरां प्रीतिं ज्ञात्वा कृष्णस्य लांगली। चिंतयामास बहुधा किं कृतं सुकृतं भवेत्। कृष्णेन हि विनानाहं यास्ये दुर्योधनं

मार्कं
॥७॥ तिकं॥ पांडवान्वा समाश्रित्य कथं दुर्योधनं नृपं। यामांतरं यतथा शिष्यं यातयिष्ये नरेश्वरौ। तस्मात्पार्थैस्तथा स्थास्यामि नापि दुर्योधनं नृपं। तीर्थेष्वाप्लावयिष्यामीति
वदात्मानमात्मना। कुरूणां पांडवानां च यावदंताय कल्प्यते। इत्यामंत्र्य हृषीकेशं पार्थं दुर्योधनावपि। जगाम द्वारकां शौरिः स्वसैन्यपरिवारितः। गत्वा द्वारवतीं रामो
हृष्टपुष्टजनाकुलां। श्वोगंतव्ये तु तीर्थेषु पपौ पानं हलायुधः। पीतपानो जगामाथ रैवतोद्यानमृद्धिमत्। हस्ते गृहीत्वा सुभगां रेवतीमप्सरोपमां। स्त्रीकदंबकमध्य-
स्थो ययौ मत्तः पदा स्खलन्। ददर्श स वनं वीरो मनोरममनुत्तमं। सर्वर्तुतरुपुष्पाढ्यं शाखामृगगणायुतं। पुण्यं पद्मवनोपेतं सपल्वलमहावनं। स शृण्वन्सुप्रीतिजनना-
न्वल्गून्मदकलाञ्छुभान्। श्रोत्ररम्यान्सुमधुराञ्छब्दान्खगमुखेरितान्। आम्रानाम्रातकान्भव्यान्नालिकेरान्सतिंदुकान्। वाजंबीरांश्च वनारंगान्
दाडिमान्वीजपूरकान्। पनसान्लकुचान्मोचान्। नीपांश्चातिमनोहरान्। पारावतांस्तथा कोलान्नालिकानम्लवेतसान्। भल्लातकानामलकांस्तिंदु-
कांश्च महाफलान्। इंगुदान्करमर्दांश्च हरीतक्यो विभीतकान्। एतानन्यांश्च स तरून्ददर्श यदुनंदनः। तथैवाशोकपुन्नागकेतकीवकुलांस्तथा। चंपकान्सप्त-
पर्णांश्च कर्णिकारान्समालतीन्। पारिजातान्कोविदारान्मंदारेंदीवरांस्तथा। पाटलीः पुष्पिता रम्याः देवदारुद्रुमांस्तथा। शालांस्तालांस्तमालांश्च निचुलान्वंज-
ुलांस्तथा। चकोरैः शतपत्रैश्च भृंगराजैस्तथा शुकैः। कोकिलैः कलविंकैश्च हारीतैर्जीवजीवकैः। प्रियपुत्रैश्चातकैश्च तथान्यैर्विविधैः खगैः। श्रोत्ररम्यं सु-
मधुरं कूजद्भिश्चाप्यधिष्ठितं। सरांसि च सपद्मानि मनोज्ञसलिलानि च। कुमुदैः पुंडरीकैश्च तथा कोकनदोत्पलैः। कल्हारैः कुसुमैश्चापि आचितानि समंततः। ॥७॥
कादंबैश्चक्रवाकैश्च तथैव जलकुक्कुटैः। कारंडवैः प्लवैर्हंसैः कूर्ममद्गुभिरेव च। एतैश्चान्यैश्च कीर्णानि तथान्यैर्जलचारिभिः। क्रमेणानुचरन्शौरिः प्रेक्षमाणो

मनोहरं। जगाम सानुगस्तत्र स्त्रीभिर्ललितागृहमनुत्तमं। स ददर्श द्विजांस्तत्र वेदवेदांगपारगान्। कौशिकान्भार्गवांश्चैव भारद्वाजान्सगौतमान्। विविधेषु च संभूतान्वंशे-
षु द्विजसत्तमान्। कथाश्रवणबद्धार्थानुपविष्टान्महत्सु च। कृष्णाजिनोत्तरीयेषु कुशेषु च वृषीषु च। सूतं च तेषां मध्यस्थं कथयानं कथाः स्फुटं। पौराणिकाः सुरर्षी-
णामाद्यानां चरिताश्रयः। दृष्ट्वा रामं द्विजाः सर्वे मधुपानारुणेक्षणं। मत्तोयमिति मन्वानाः समुत्तस्थुस्त्वरान्विताः। पूजयंतो हलधरं ऋते तं सूतवंशजं। ततः क्रोधस-
माविष्टो हली सूतं महाबलं। निजघान विवृत्ताक्षः क्षोभिताशेषबांधवः। अध्यासितं पदं ब्राह्म्यं तस्मिन्सूते निपातिते। निःक्रांतास्ते द्विजाः सर्वे वनात्कृष्णाजिनांबराः।
अवधूतं तथात्मानं मन्यमानो हलायुधः। चिंतयामास सुमहन्मया पापमिदं कृतं। व्यासासनगतो ह्येष यत्सूतो विनिपातितः। तथा ही मे द्विजाः सर्वे मामवे-
क्ष्य विनिर्गताः। शरीरस्य च मे गंधो लोहस्येवासुखावहः। आत्मानं चावगच्छामि ब्रह्मघ्नमिव कुत्सितं। धिग्मर्षं तथा मद्यं अभिमानसमीहितां। पै-
रोविष्टेनासुमहन्मया पापमिदं कृतं। अतोऽघघ्नं करिष्यामि व्रतं द्वादशवार्षिकं। स्वकर्मख्यापनं कुर्वन्प्रायश्चित्तमनुत्तमं। अस्य चैव समारब्धा तीर्थया-
त्रा मयाधुना। एतामेव प्रयास्यामि प्रतिलोमां सरस्वतीं। अथो जगाम रामोसौ प्रतिलोमां सरस्वतीं। अतः परं शृणुध्वं पांडवेयकथाश्रयं। ३६ ॥ इति
श्रीमार्कंडेयपुराणे बलदेवतीर्थयात्रा ॥ ॥पक्षिण ऊ०॥ हरिश्चंद्रोऽतिराजर्षिरासीत्त्रेतायुगे पुरा। धर्मात्मा पृथिवीपालः प्रोल्लसत्कीर्तिरुत्तमः। न दुर्भिक्षं
न च व्याधिर्नाकालमरणं नृणां। नाधर्मरुचयः पौरास्तस्मिन्शासति पार्थिवे। बभूवुर्न तथोन्मत्ता धनवीर्यतपोमदैः। नाजायंत स्त्रियश्चैव कांचिदप्राप्तयौ-
वनाः। स कदाचिन्महाबाहुररण्येऽनुसरन्मृगं। शुश्राव शब्दमसकृत्त्रायस्वेत्यथ योषितां। स विहाय मृगं राजा मा भैषीरित्यभाषत। मयि शासति दुर्मेधा
कोऽयमन्यायवर्त्तिमान्। यं चोदितानुसारी च सर्वारंभविघातकृत्। एतस्मिन्नंतरे रौद्रो विघ्नराडूसमचिंतयत्। विश्वामित्रोयमतुलं तप आस्थाय की

मार्कं ॥८॥

र्थ्यवान्। प्राणिनां ज्ञानवादीनां विद्यासाधयतिव्रती। साध्यमाना ह्यमा मौनाच्चित्तसंयमिना मुना। तावेलप्रार्तोः क्रंदंति कथं कार्यमिदं मया।
तेजस्वी कौशिकः श्रेष्ठो वयमद्य सुदुर्बलाः। क्रोशंत्येतास्तथा भीता दुःपारं प्रतिभाति मे। अथवायं नृपः प्राप्तो मा भैरिति वदन्मुहुः। इममेव प्रवि
श्यामुसाधयिष्याम यथेप्सितं॥ इति संचिंत्य रौद्रस्तु विघ्नराजेन वेनतः। तेना विघ्नततः। तेना विघ्नततः कोधादिदं वचनमब्रवीत्॥ कोयं वध्नाति वस्त्रांते पा
वैकं पाय कृत्वानः। वलोष्मतेजसा दीप्ते मयि पत्यावुपस्थिते॥ कोयं मत्कार्मुकाद्दीपविदीपितदिगंतरैः। शरैर्विभिन्नसर्वांगो दीर्घनिद्रां प्रवेक्ष्यति। विश्वामि
त्रस्ततः क्रुद्धः श्रावातन्नृपतेर्वचः। क्रुद्धे च षर्षिवरे तस्मिन्नेशुर्विद्याः क्षणेन ताः। स चापि राजा तं दृष्ट्वा विश्वामित्रं तपोनिधिं। भीतः प्रावेपतात्यर्थं सह
साश्वत्थपत्रवत्। स दुरात्मन्निति तिष्ठ दामुनिस्तिष्ठेति चाब्रवीत्। ततः स राजा विनयात्प्रणिपत्याभ्यभाषत। भगवन्नेष मे धर्मो नापराधो मम मुने
नांतक्रोद्धुमर्हसि मुने निजधर्मरतस्य मे। दातव्यं रक्षितव्यं च धर्मज्ञेन महीक्षिता। चापं चोद्यम्य योद्धव्यं धर्मः शास्त्रे सनातनः। विश्वामित्र उवाच। दातव्यं
कस्य के रक्ष्याः केर्योद्धव्यं वदेन्नृप क्षिप्रमेतन्ममाचक्ष्व यद्यधर्मभयं तव। राजा उ। दातव्यं विप्रमुख्येभ्यो ये चान्ये कृशवृत्तयः। रक्ष्या भीताः सततो युद्धं कर्त्तव्यं प
रिपंथिभिः। विश्वामित्र उ। यदि राजा भवान्सम्यक् राजधर्ममवेक्षते। निवेष्टुकामो विप्रोहं दीयतां मम दक्षिणाः। पक्षिण ऊचुः। एतद्राजा वचः श्रुत्वा यम
हृष्टेनांतरात्मना। पुनर्जातमिवात्मानं मेने प्राह च कौशिकं। उच्यतां भगवन्यत्ते दातव्यमविशंकितं। दत्तमित्येव तद्विद्धि यद्यपि स्यात्सुदुर्लभं। हिरण्यं
वा सुवर्णं वा पुत्रं पत्नीः कलेवरं। प्राणान्राज्यं पुरं लक्ष्मीं यदभिप्रेतमात्मनः। विश्वामित्र उ। राजन्प्रतिगृहीतोयं यस्ते दत्तः प्रतिग्रहः। प्रयच्छ दक्षि ॥८॥

णां तावद्दक्षिणां राजसूयकीं। राजा उ। ब्रह्मंस्तामपि दास्यामि दक्षिणां भवतो वयं। व्रियतां मुनिशार्दूल यस्तेवेष्टः प्रतिग्रहः। विश्वामित्र उ। ससागरवनो
पेतां ससूत्रां ग्रामपत्तनां। राज्यं च सकलं वीर रथाश्वगजसंकुलं। कोष्ठागारं च कोशं च यच्चान्यद्विद्यते तव। विना भार्यां शरीरं च तथा चोरसमात्मजं। धर्मं च स
र्वधर्मज्ञ यो यांते अनुगच्छति। बहुनात्र किमुक्तेन सर्वमन्यत्प्रदीयतां। पक्षिण ऊचुः। प्रहृष्टेनैव मनसा सोऽविकारमुखो नृपः। तस्यर्षेर्वचनं श्रुत्वा तथेत्याह
कृतांजलिः। विश्वामित्र उ। सर्वस्वं यदि मे दत्तं राज्यमुर्वीं बलं धनं। प्रभुत्वं कस्य राजर्षे राज्यस्थे तापसे मयि। हरिश्चंद्र उवाच। यस्मिन्नेव मया काले ब्रह्म
न्दत्ता वसुंधरा। तस्मिन्नेव भवान्स्वामी किमुतोऽद्य महीपतिः। विश्वामित्र उ। यदि नाम प्रतिहृता मम राजवरत्वया। यत्र मे विषये स्वाम्यं तस्मान्निः
क्रांतुमर्हसि। श्रुत्वा राजा तदा कंधवृज्य पार्श्वे समं मुनेः। मुहूर्त्तमासीन्निश्चेष्टो नाहमस्मीति चिंतयन्। मुहूर्त्तात्प्राप्य संज्ञां तु ब्रह्मशापभयातुरः। ज्ञात्वाव
शिष्टं जलजं सर्वत्यागे कृतोन्मतिः। पक्षिण ऊचुः। तथेति चोक्त्वा कृत्वा च राजा गंतुं प्रचक्रमे। स्वपत्न्या शैव्यया सार्द्धं बालकेनात्मजेन च। व्रजंतं स ततो ध्यानं
मुनिः प्रत्यस्यभावतां क्वयास्यसीत्यदत्त्वा मे दक्षिणां राजसूयकीं। राजा उ। भगवन्राज्यमेतत्ते दत्तं निहतकंटकं। अवशिष्टमिदं ब्रह्मन्नद्य देहत्रयं
मम। विश्वामित्र उ। अथापि खलु दातव्या राजन्मे यज्ञदक्षिणा। विशेषतो ब्राह्मणानां हंत्यदत्तं प्रतिश्रुतं। यावतो ब्राह्मण राजसूये ब्राह्मणानां जयेन्नृ
प। तावदेव तु दातव्यं दक्षिणा राजसूयकी। प्रतिश्रुत्य च दातव्यं योद्धव्यं चाततायिभिः। रक्षितव्यास्तथार्त्ताश्च त्वयैव वाक् प्रतिश्रुतं। राजा उ। भगव
न्सांप्रतं नास्ति दास्ये कालक्रमेण ते। प्रसादं कुरु विप्रर्षे राजधर्मरतस्य मे। विश्वामित्र उ। किं प्रमाणं प्रतीक्ष्यो मे कालो नृपति सत्तम। दिप्रमाचक्ष्व

मार्कं ॥९॥

शापाग्निनान्यथा त्वां प्रदहिष्यति। मासमात्रे गते ब्रह्मन्प्रदास्ये दक्षिणाधनं। सांप्रतं नास्ति मे वित्तं अनुज्ञां दातुमर्हसि॥ विश्वामित्र उवाच। गच्छ गच्छ नृ-
पश्रेष्ठ स्वधर्ममनुपालय। शिवश्चास्तेऽध्वा भवतु मा संतु परिपंथिनः। पक्षिण ऊचुः। अनुज्ञातः स गच्छेति जगाम वसुधाधिपः पद्भ्यामनुचिता गंतुमन्वगच्छ-
त्तं प्रिया। तं सभार्यं नृपश्रेष्ठं निर्यांतं स्वपुरात्पुरात्। दृष्ट्वा प्रचुक्रुशुः पौराः राजानं चानुयायिनः। हा राजन्किं जहास्यस्मान्नित्यार्त्तिपरिपीडितान्। त्वं ध-
र्मतत्परो राजा दीनानुग्रहकृत्तथा। नयास्मानपि राजर्षे यदि धर्ममवेक्षसे। मुहूर्त्तं तिष्ठ राजेंद्र भवतो मुखपंकजं। पिबामो नेत्रभ्रमरैः कदा द्रक्ष्यामहे पुनः। यस्य
प्रयातस्य पुरो यांति पृष्ठेऽन्यपार्थिवाः। तस्यानुयाति भार्येयं गृहीत्वा बालकं सुतं। यस्य भृत्याः प्रयातस्य यांत्यग्रे गजसंस्थिताः। स एष पद्भ्यां राजेंद्रो हरिश्चंद्रो-
ऽद्य गच्छति। हा राजन्सुकुमारं ते सुभ्रु सुनसमुन्नतं। पथि पांशुपरिक्लिष्टं मुखं कीदृग्भविष्यति। तिष्ठ तिष्ठ नृपश्रेष्ठ स्वधर्ममनुपालय॥ आनृशंस्यं परो धर्मः क्ष-
त्रियाणां विशेषतः। किं दारैः किं सुतैर्नाथ धनैर्धान्यैरथापि वा। सर्वमेतत्परित्यज्य छायाभूता वयं तव। हा नाथ हा महाराज हा स्वामिन्किं ज-
हासि नः। यत्र त्वं तत्र हि वयं तत्सुखं यत्र वै भवान्। नगरं तद्यत्र भवान्स स्वर्गो यत्र नो नृपः। इति पौरवचः श्रुत्वा राजा शोकपरिप्लुतः। अतिष्ठत्तदा मार्गे
तेषामेवानुकंपया। विश्वामित्रोऽपि तं दृष्ट्वा पौरवाक्याकुलीकृतं। रोषामर्षविवृत्ताक्षः समागम्य वचोऽब्रवीत्। धिक्त्वां दुष्टसमाचारमनृतं जिह्मभाष-
णं। मम राज्यं हि दत्त्वा यः पुनराक्रष्टुमिच्छसि। इत्युक्तः परुषं तेन गच्छामीति स वेपथुः। ब्रुवन्नेव ययौ शीघ्रमाकर्षंस्तद्दयितां करे। कर्षतस्तां तदा भार्यां सुकु-
मारीं श्रमातुरां। दंडकाष्ठेन सहसा ताडयामास कौशिकः। तां तथा ताडितां दृष्ट्वा हरिश्चंद्रो नरेश्वरः। गच्छामीत्याह दुःखार्त्तो नान्यत्किंचिदुदाहृतः॥ ॥९॥
अथ विश्वे तदा देवाः पंच प्राहुः कृपालवः। तदवस्थं कृतं दृष्ट्वा हरिश्चंद्रं नरेश्वरं। विश्वामित्रः सुपापोऽयं कान्लोकान्समवाप्स्यति। येनायं यज्विनां श्रेष्ठः

राम

स्वराज्यादवरोपितः। कस्य वा श्रद्धया पूतं सुतं सोममभिषवाध्वरे। पीत्वा वयं प्रयास्यामो मुदं मंत्रपुरःसरं। इति तेषां वचः श्रुत्वा कौशिकोऽतिरुषान्वितः।
शशाप तानमनुष्यत्वं सर्वे यूयमवाप्स्यथ। प्रसादितश्च तैः प्राह पुनरेव महामुनिः। मानुषत्वेऽपि भवतां नाविता वः संततिः(?)। न दारसंग्रहश्चैव भविता न
च मत्सरः। कामक्रोधविहीनाश्च भविष्यथ सुराः पुनः। पक्षिण ऊचुः। ततोऽवतेरुरंशैः स्वैः देवास्ते कुरुसद्मनि। द्रौपदीगर्भसंभूताः पंच वै पांडुनंदनाः।
एतस्मात्कारणात्ते च पांडवेया महाबलाः। न दारसंग्रहं प्राप्ताः शापात्तस्य महात्मनः। एतद्वः समाख्यातं पांडवेयकथाश्रयं। गीतं प्रश्नचतुष्कं ते किम-
न्यच्छ्रोतुमिच्छसि ॥ इति श्रीमार्कंडेयपुराणे द्रौपदेयानामुत्पत्तिः। जैमिनिरुवाच। भवद्भिरिदमाख्यातं यथाप्रश्नमनुक्रमात्। महत्कौतूहलं मेऽस्ति हरि-
श्चंद्रकथां प्रति। अहो महात्मना तेन व्याप्तं कष्टमनुत्तमं। किंचित्सुखमनुप्राप्तं तादृशे वा द्विजोत्तमाः। पक्षिण ऊचुः। विश्वामित्रवचः श्रुत्वा स राजा
प्रययौ शनकैः(?)। शैव्यया तथैवानुगतो भार्यया बालपुत्रया। स गत्वा वसुधापालो दिव्यां वाराणसीं पुरीं। नैषा मनुष्यभुक्तेति शूलपाणेः परिग्रहः। जगाम
पद्भ्यां दुःखार्त्तः सह पत्न्यानुकूलया। पुरीप्रवेशे ददृशे विश्वामित्रमवस्थितं। तं दृष्ट्वा समनुप्राप्तं विनयावनतोऽभवत्। प्राह चैवांजलिं कृत्वा हरिश्चंद्रो महामुनिं। इमे प्रा-
णाः सुतश्चायमियं पत्नी मुने मम। येनाते कृत्यमस्त्याशु गृह्यतामर्घ्यमुत्तमं। यद्वान्यत्कार्यमस्माभिस्तत्समाख्यातुमर्हसि। विश्वामित्र उवाच। पूर्णः स मासो
राजर्षे(?) दीयतां मम दक्षिणा। राजसूयनिमित्तं हि स्मर्यते वचनं यदि। राजोवाच। ब्रह्मन्नेवाद्य संपूर्णो मासो म्लानतपोबल। तिष्ठत्येतद्दिनार्द्धं यत्तत्प्रतीक्षस्व मा-
चिरं। विश्वामित्र उवाच। एवमस्तु महाभाग आगमिष्याम्यहं पुनः। शापं तव प्रदास्यामि न चेदद्य प्रदास्यसि। इत्युक्त्वा प्रययौ विप्रो राजा चाचिंतयत्तदा। कथमस्मै प्रदा-
स्यामि दक्षिणा या प्रतिश्रुता। कुतः पुष्टानि मित्राणि कुतोऽर्थः सांप्रतं मम। किं नु प्राणान्विमुंचामि कां दिशं यामि अकिंचनः। यदि नाशं गमिष्यामि अप्रदाय प्रतिश्रु-

॥मार्कं॥
॥१०॥

तं। ब्रह्मस्वहारकाभिः पापोऽत्र विद्यास्मि यमाधमः॥ अथवा प्रेष्यतां यास्येव मे वात्म विक्रियः। पक्षिणा उ॥ राजानं व्याकुलं दीनं चिंतयानमधोमुखं। प्रत्युवाच तदा प
त्नी वाष्पगद्गदया गिरा। त्यज चिंतां महाराज स्वसत्यमनुपालय। अग्निहोत्रमधीतं च दानाद्याः सफलाः क्रियाः। भवंति तस्य विफला यस्य सत्यमकारणं। सत्यमत्यंतमु
दितं धर्मशास्त्रेषु धीमतां। तारणायानृतं तद्वत्पातनायाकृतात्मनां। सप्ताश्वमेधानाहृत्य राजसूयं च पार्थिवः। कृतनामा च्युतः स्वर्गादसत्यवचनात्सकृत्। राजन्नजा
तमपत्यं मे सतां पुत्रफलाः स्त्रियः। मां विक्रीय राजेंद्र देहि विप्राय दक्षिणां। पक्षिणा उ। एतद्वाक्यमुपश्रुत्य ययौ मोहं महीपतिः। प्रतिलभ्य च संज्ञां च विललापातिदुःखि
तः। महद्दुःखमिदं भद्रे यत्त्वमेवं ब्रवीषि मां। किं तव स्मितसंल्लापा मम पापस्य विस्मृताः। हाहा त्वया कथं योग्यमेतदुक्तं शुचिस्मिते। दुर्वाच्यमेतद्वचनं कथं वक्ष्याम्यहं क
थं। इत्युक्त्वा स नरश्रेष्ठो धिग्धिगित्यसकृद्ब्रुवन्। निपपात महीपृष्ठे मूर्छयाभिपरिप्लुतः। शयानं भुवि तं दृष्ट्वा हरिश्चंद्रं महीपतिं। उवाचेदं सकरुणं राजपत्नी सुदुःखि
ता। हा महाराज कस्येदमपध्यानादुपागतं। यस्त्वं निपतितो भूमौ रांकवास्तरणोचितः। येनैव ज्ञानतो वित्तं विप्राणामपवर्जितं। स एकः पृथिवीनाथो भूमौ स्वपिति
मे पतिः। हा कष्टं किं तवानेन कृतं दैव महीक्षिता। यदींद्रोपेंद्रतुल्योऽयं नीतः पापामिमां दशां। इत्युक्त्वा सापि सुश्रोणी मूर्छिता निपपात ह॥ भर्तुर्दुःखमहाभारेणातीव
पीडिता। तौ तथा पतितौ भूमावनाथौ पितरौ शिशुः। दृष्ट्वात्यर्थं क्षुधाविष्टः प्राह वाक्यं सुदुःखितः। तात तात ददस्वान्नं ददस्वांबा भोजनं। क्षुन्मे बलवती जाता जिह्वाग्रं मे शु
ष्यते मम। पक्षिण ऊचुः। एतस्मिन्नंतरे प्राप्तो विश्वामित्रो महातपाः। कालकल्प इव क्रोधो धनं तं मार्गितुं तदा। दृष्ट्वा तदा हरिश्चंद्रः पपात भुवि मूर्छितः। स वारिणा स
मभ्युक्ष्य राजानमिदमब्रवीत्। उत्तिष्ठोत्तिष्ठ राजेंद्र तां ददस्वेष्टां दक्षिणां। ऋणं धारयतो दुःखमहन्यहनि वर्द्धते। आप्यायमानः स तदा हिमशीतेन वारिणा। अवा
प्य चैतनां राजा विश्वामित्रमवेक्ष्यत। पुनर्मोहं समापेदे ततः क्रोधं ययौ मुनिः। समाश्वास्य स राजानं वाक्यमाह द्विजोत्तमः। दीयतां दक्षिणा सा मे यदि धर्ममवेक्षसे। ॥१०॥
सत्येनार्कः प्रतपति सत्ये तिष्ठति मेदिनी। सत्यं चोक्तः परो धर्मः स्वर्गः सत्ये प्रतिष्ठितः। अश्वमेधसहस्रं हि सत्यं च तुलया धृतं। अश्वमेधसहस्राद्धि सत्यमेव विशिष्य

अथवा किं ममैतेन सान्त्वप्रोक्तेन कारणं। अनार्य पापसंकल्प क्रूरं चानृतवादिनि। मयि राजन्प्रवदतः सद्भावः श्रूयतां मम। अधमे दक्षिणां राजन्न दास्यसि चेत्तवा
नृपद्य। अस्ताचलमयात्यर्कः शप्स्यामि त्वां ततो ध्रुवं। इत्युक्त्वा स ययौ विप्रो राजा चासीद्भयातुरः। कांदिग्भूतो धनो नैःश्वो नृशंसमुनिनार्दितः। भार्यास्य नृपः प्राहे
दं क्रियतां वचनं मम। मा शापानलनिर्दग्धः पंचत्वमुपयास्यसि। स तया चोद्यमानस्तु राजपत्न्या पुनः पुनः। प्राह भद्रे करोम्येष विक्रयं तव निर्घृणः। नृशंसैरपि यत्कर्तुं
न शक्यं तत्करोम्यहं। यदि मे शक्यते वाणी वक्तुमीदृक्सुदुर्वचः। एवमुक्त्वा ततो भार्यां गत्वा नगरमातुरः। बाष्पपिहितकंठाक्षस्ततो वचनमब्रवीत्। भो भो नागरकाः सर्वे
शृणुध्वं वचनं मम। किं मां पृच्छथ कस्त्वं भो नृशंसोऽहममानुषः। राक्षसो वातिकठिनस्ततः पापतरोऽपि वा। विक्रेतुं दयितां प्राप्तो यो न प्राणांस्त्यजाम्यहं। यदि वः कस्यचित्कां
र्यं दास्या प्राणेष्टया मम। स ब्रवीतु त्वरायुक्तो यावत्संधारयाम्यहं। पक्षिण ऊ। अथ वृद्धो द्विजः कश्चिदागत्याह नराधिपं। समर्पयस्व मे दासीमहं क्रेता धनप्रदः। अस्ति
मे वित्तमस्तोकं सुकुमारी च मे प्रिया। गृहकर्म न शक्नोति कर्तुमस्मात्प्रयच्छ मे। कर्मण्यतावयोरूपशीलानां तव योषितः। अनुरूपमिदं वित्तं गृहाणार्पय मेऽबलां। एवमुक्तस्य
विप्रेण हरिश्चंद्रस्य भूपतेः। व्यदीर्यत मनो दुःखान्न चैनं किंचिदब्रवीत्। ततः स विप्रो नृपतेर्वल्कलांते दृढं यतः। बद्धा केशेष्वथादाय नृपपत्नीमकर्षत। रुरोद रोहिताश्वो
पि दृष्ट्वाकृष्टां तु मातरं। हस्तेन वस्त्रमाकर्षन्काकपक्षधरः शिशुः। तारालोवत्सुवाच॥ मुंचार्य मुंच मां तावद्यावत्पश्याम्यहं शिशुं। दुर्लभं दर्शनं तात पुनरस्य भविष्यति।
पश्येहि वत्स मामेवं मातरं दासतां गतां। मां मा स्प्राक्षी राजपुत्र अस्पृश्याहं तवाधुना। ततः स बालः सहसा दृष्ट्वा कृष्टां तु मातरं। समभ्यधावदंबेति वदन्साश्रुविलेक्षणः। ह
स्तेन वस्त्रमाकर्षन्काकपक्षधरः सबलात्। तमागतं द्विजः क्रोधाद्बालमभ्याहनत्तदा। वदंस्तथापि सोऽंबेति नैवामुंचत मातरं। राजपत्न्युवाच। प्रसादं कुरु मे नाथ क्रीणी
ष्वेमं च बालकं। क्रीतापि नाहं भवता विनैनं कार्मसाधिका। इत्थं ममाल्पभाग्यायाः प्रसादसुमुखो भव। मां संयोजय बालेन वत्सेनेव पयस्विनीं। ब्राह्मण उवाच। गृह्यतां वित्त
मेतद्दीयतां मम बालकः। स्त्रीपुंसोर्धर्मशास्त्रज्ञैः कृतमेव हि वेतनं। शतं सहस्रं लक्षं च कोटिमूल्यं तथापरैः। पक्षिण ऊचुः। तथैव तस्य तद्वित्तं बध्वोत्तरपटे ततः। प्रगृह्य

बालकं मात्रा सहैकस्थमवंधयत्॥ नीयमानौ तु तौ दृष्ट्वा भार्यापुत्रौ तु पार्थिवः॥ विललाप सुदुःखार्त्तो निःश्वस्योष्णं पुनः पुनः। यां न वायुर्न चादित्यो नेन्दुर्न
च पृथग्जनाः। दृष्टवंतः पुरा पत्नी सेयं दासत्वमागता॥ सूर्यवंशप्रसूतोयं सुकुमारकरांगुलिः। संप्राप्तो विक्रियं बालो धिग्मामस्तु दुर्मतिं॥ हा प्रिये हा शिशो
वत्स ममानार्यस्य दुर्नयैः। दैवाधीनां दशां प्राप्तो न मृतोस्मि तथापि धिक्॥ पक्षिण ऊचुः॥ एवं विलपतो राज्ञः सविप्रोंतरधीयत। वृक्षगेहादिभिस्तुंगैस्तावदाप
त्वरान्वितः॥ विश्वामित्रस्ततः प्राप्तो धनं स मार्गितुं तदा। तस्मै समर्पयामास हरिश्चंद्रोपि तद्धनं॥७१॥ तद्धिनं स्वल्पमालक्ष्य दारविक्रयसंभवं। शोकाभिभूतं राजा
नं कुपितः कौशिकोब्रवीत्। क्षत्रबंधो ममेमां त्वं सदृशीं यज्ञदक्षिणां। मन्यसे यदि तत्क्षिप्रं पश्य मे त्वं परं बलं। तपसः सुतप्तस्य ब्राह्मण्यस्यामलस्य च।
मत्प्रभावस्य चोग्रस्य शुद्धस्याध्ययनस्य च॥ राजोवाच॥ अन्यां दास्यामि भगवन्कालः कश्चित्प्रतीक्ष्यतां। सांप्रतं चास्ति विक्रीता यत्पत्नी पुत्रश्च बालकः॥ विश्वा
मित्र उ॥ चतुर्भागः स्थितो यो मे दिवसस्य नराधिप। एष एव प्रतीक्ष्यो मे वक्तव्यं नोत्तरं त्वया॥ विश्वामित्र उ॥ तमेवमुक्त्वा राजानं समघृणं निष्ठुरं वचः। तदादाय धनं
तूर्णं कुपितः कौशिको ययौ॥ पक्षिण ऊचुः॥ विश्वामित्रे गते राजा भयशोकाब्धिमध्यगः। सर्वाकारं विनिश्चित्य प्रोवाचोच्चैरधोमुखः॥ वित्तक्रीतेन यो ह्यर्थी मया प्रे
ष्येण मानवः। स ब्रवीतु त्वरायुक्तो यावत्तपति भास्करः॥ अथाजगाम त्वरितो धर्मश्चांडालरूपधृक्। दुर्गंधिर्विकृतो रूक्षः श्मश्रुलो दंतुरो घृणी॥ कृष्णो लंबोदर
स्निग्धरूक्षकरालः परुषाक्षरः। गृहीतपक्षिपुंजश्च शवमाल्यैरलंकृतः। कपालहस्तो दीर्घास्यो भैरवोभिवदन्मुहुः॥ श्वगणाभिवृतो घोरो यष्टिहस्तो विगर्हितः॥
चांडाल उवाच॥ अहमर्थी तथा शीघ्रं कथयस्वात्मवेतनं। स्तोकेन बहुना वापि येन वै लभ्यते भवान्॥ पक्षिण ऊचुः॥ तं तादृशमथालक्ष्य क्रूरदृष्टिं सुनिष्ठुरं। वदंत ॥११॥
मतिदुःशीलं कस्त्वमित्याह पार्थिवः॥ चांडाल उ॥ चंडालोहमिति ख्यातः प्रवीरेति पुरोत्तमे। विख्यातोऽवध्यवधको मृतकंबलहारकः॥ राजोवाच॥ नाहं चांडालदासत्व

मिच्छेयं सुविगर्हितं॥ वरं शापाग्निना दग्धो न चांडालवशंगतः॥ पक्षिण ऊ॥ तस्यैवं वदतः प्राप्तो विश्वामित्रो महातपाः। कोपामर्षविवृत्ताक्षः प्राह चेदं नराधिपं॥ चां
डालोयमनल्पं ते दातुं वित्तमिहागतः। कस्मान्न दीयते मह्यमशेषा यज्ञदक्षिणा॥ राजोवाच॥ भगवन्सूर्यवंशोत्थमात्मानं वेद्मि कौशिक। कथं चांडालदासत्वं गमि
ष्ये वित्तकामुकः॥ विश्वामित्र उ॥ यदि चांडालवित्तं त्वमात्मविक्रयजं मम। न दास्यसि काले त्वां शप्स्यामि त्वां न संशयः॥ पक्षिण ऊ॥ हरिश्चंद्रस्ततो राजा वृत्तावसि
तजीवितः। प्रसीदेति वदन्पादावृषेर्जग्राह विकुलः॥ दासोस्म्यार्त्तोस्मि भीतोस्मि त्वद्भक्तश्च विशेषतः। कुरु प्रसादं विप्रर्षे कष्टश्चांडालसंकरः। भवेयं वित्तशेषेण
सर्वकर्मकरोवशः। तवैव मुनिशार्दूल प्रेष्यश्चित्तानुवर्त्तकः॥ विश्वामित्र उ॥ यदि प्रेष्यो मम भवांश्चांडालाय ततो मया। दासभावमनुप्राप्तो दत्तो वित्तार्बुदेन वै॥
पक्षिण ऊ॥ एवमुक्ते तदा तेन श्वपाको हृष्टमानसः। विश्वामित्राय तद्द्रव्यं दत्वा बद्ध्वा नरेश्वरं। दंडप्रहारसंभ्रांतमतीव व्याकुलेंद्रियं। इष्टबंधुवियोगार्त्तमनयन्निजपक्कणं।
हरिश्चंद्रस्ततो राजा वसंश्चांडालपक्कणे। प्रातर्मध्याह्नसमये सायं चैतदगायत॥ बाला दीनमुखी दृष्ट्वा बालं दीनमुखं पुरः। मां स्मरत्यसुखाविष्टा मोक्षयिष्यति नौ नृपः।
उपात्तवित्तो विप्राय दत्वा वित्तमतोधिकं। न सा मां मृगशावाक्षी वेत्ति पापतरं कृतं। राज्यनाशः सुहृत्त्यागो भार्यातनयविक्रयः। प्राप्ता चांडालता चेयमहो दुःखपरंपरा। एवं
सन्निवसन्नित्यं संस्मरन्दयितं सुतं। भार्यां चात्मसमाविष्टो हृतसर्वस्व आतुरः। कस्यचित्त्वथ कालस्य मृतचेलापहारकः॥ हरिश्चंद्रोभवद्राजा श्मशाने तद्वशानुगः॥ चांडाले
नानुशिष्टश्च मृतचेलापहारिणा। इदानीं धनं देयं षड्भागं तु शवं प्रति। त्रयस्तु मम भागाः स्युर्द्वौ भागौ तव वेतनं। इति प्रतिसमादिष्टो जगाम शवमंदिरं। दिशं तु दक्षिणां यत्र
वाराणस्याः स्थितं तदा॥ श्मशानं घोरसंनादं शिवाशतसमाकुलं। शवमाल्यसमाकीर्णं दुर्गंधं बहुधूमकं। पिशाचभूतवेतालडाकिनीयक्षसंकुलं। गृध्रगोमायुसंकीर्णं श्व
वृंदपरिवारितं। अस्थिसंघातसंकीर्णं महादुर्गंधिसंकुलं। नानामृतसुहृन्नादमहाकल्लोलसंकुलं। महाभूतगणाक्रूररवकोलाहलायुतं। हा पुत्र मित्र हा बंधो भ्रातर्वत्स प्रिया
द्य मे। हा पते भगिनि मातर्हा मातुल पितामह। मातामह पितः पौत्र क्वासि गतोसि बांधव। इत्येवं वदतां तत्र ध्वनिः संश्रूयते महान्। यच्चैतेनेक्षिमिवैः शवाग्न्यर्चिषा निमी

डा. भाऊ दाजी
BHAU DAJI
MEMORIAL
११४

।मार्कं
॥१२॥

लिनैश्च तपैस्तद्विंतयेजनाः ॥११॥ ज्वलन्मांसवसामेदश्चमश्चमितिसंकुलं। अर्धदग्धशवाः श्मामाः विकाशद्दंतयंतरात्यः। हसंतीवाग्निमध्यस्था कायस्यैवं दशात्विति।
अनेकश्च स्वरा शब्दा वायसैः स्थितपक्षिषु। वायसाक्रदशात्कृष्णपुष्पसमुपैहवजः॥ गायतान्मृतवेतालपिशाचोरगराक्षसं। श्रूयते सुमहानूशब्दः कल्पांतश्वदारुणः।
महामहिषकारीषगोमांशकुनम्नसकुलं। तदेत्थसमाकृष्टश्चत्तंतमास्थितिरुच्चतैः। नानामहार्स्रवैरदामकाकविक्षोभसंकुलं। अनेकशब्दवहुलं स्मशानं नगरायते। स राजा
तत्र संप्राप्तो दुःखितः शोकसंकुलः। हा भृत्या मंत्रिणो विप्राः क्व तद्राज्यं विनिर्गतं। हा शैव्ये पुत्र मे वाल मांत्यक्त्वा मंदभाग्यकं। विश्वामित्रस्य दोषेण गताः कुत्रापि ते मम। इत्ये
वं चिंतयंस्तत्र चंडालोक्तं पुनः पुनः। मलिनो रूक्षसर्वांगः केशवान्दुर्गंधवान्ध्वजी। लगुडी कालकल्पश्च धावंस्तोऽपि इतस्ततः। अस्मिन्शव इदं मूल्यं प्राप्तं प्राप्स्यामि च
प्युत। इदं मम इदं राज्ञो मुख्यचंडालकेत्विदं। इति धावन्तथो राजा जीवन्थात्यंतरंगतः। जीर्णैकपटसुग्रंथिकृतकंथापरिग्रहः। चिताभस्मरजोलिप्तमुखवाहूदरांघ्रिकं।
नानामेदोवसामज्जालिप्तपर्दागुलिः श्वसन्। नानादध्योदनकृताहारतृप्तिपरायणः। तदीयमाल्यसंश्लिष्टकृतमस्तकमंडनः। न रात्रौ न दिवा शेते हा हेति च वदन्मुहुः। एवं
द्वादशमासास्तु नीता वर्षशतोपमाः। स कदाचिन्नृपश्रेष्ठः श्रांतो वंधुवियोगवान्। निद्राभिभूतो रूक्षांगो निश्चेष्टः सुप्त एव सः। तत्रापि शयनीये स ददर्श त्वद्भुतं महत्। स्मशा
नाभ्यासयोगेन दैवस्य वलवत्तया। अन्यदेहेन दत्त्वा तु गुरवे गुरुदक्षिणां। तदा द्वादशवर्षाणि दुःखदानोत्थनिष्कृतिः। आत्मानं स ददर्शाथ पुष्कसागर्भसंस्थितं। तत्र स्थस्या
प्यसौ राजा चिंतयदिदं तदा। इतो निष्क्रांत एवाहं दानधर्मं करोम्यहं। अनंतरं स जातस्तु तदा पुष्कसवालकः। स्मशाने मृतसंस्कारकरणे सुसदोद्यतः। प्राप्ते तु सप्तमे वर्षे
स्मशाने तु मृतो द्विजः। आनीतो वंधुभिर्दृष्टस्तेन तत्राधनो गुणी। मूल्यार्थिना तु तेनापि परिभूता द्विजोत्तमाः। ऊचुस्ते ब्राह्मणास्तत्र विश्वामित्रस्य चेष्टितं। पापिष्ठ समुत्क
र्मकृत्त्वं पापकारकः। हरिश्चंद्रः पुरा राजा विश्वामित्रेण पुष्कसः। कृतः पुण्यविनाशेन ब्राह्मणस्वापनाशनात्। यदा न क्षमते तेषां तैः स शप्तो रुषा तदा। गच्छ त्वं नरके घोरं मधुनै
व तो धमा॥ इत्युक्तमात्रे वचने स्वप्नस्थः स नृपस्ततः। अपश्यद्यमपाशहस्तान्यमदूतान्भयावहान्। तैः संगृहीतमात्मानं नीयमानं तदा वलात्। अपश्यत्स भृशं खिन्नो ॥१२॥

हा मातः पितरश्चेति। एवं वादी स नरके तैलद्रोण्यां निपातितः। क्रकचैः पाद्यमानश्च क्षुरधाराप्लुचाप्यधः। अंधे तामसि दुःखार्त्तः पूयशोणितभोजनः। सप्तवर्षमृतं तत्र आत्मानं
स ददर्श ह। दिने दिने तु नरकैः पच्यते दह्यतेऽन्यतः। छिद्यते भिद्यतेऽन्यत्र चूर्ण्यते क्लिद्यतेऽन्यतः। क्वाथ्यते दीप्यतेऽन्यत्र शीतवातहतोऽन्यतः। एकं दिनं वर्षशतं प्रमाणं नरके तव
तास्थौ वर्षशतं यावन्यातितो नरकेष्टैः। ततो निपतितो भूमौ विष्ठाशी श्वा व्यजायत। अथापश्यत्स्वं देहं हस्तिनं वानरं पशुं। छागं विडालकं कंकं गां स्त्रियं मक्षिकां कृमिं।
मत्स्यं कूर्मं कच्छपं च श्वाविधं कुक्कुटं शुकं। सारिकां स्थावरांश्चैव सर्पमन्यांश्च देहिनः। दिवसे दिवसे जन्म प्राणिनः प्राणिनस्तदा। अपश्यत्स दुःखसंतप्तो दिनं वर्षशतं यथा। एवं
वर्षं तथा सोऽद्य गतेतस्य कुयोनिषु। अपश्यत्कदाचित्स राज्यं तस्य कुलोद्भवं। तत्रस्थितस्य तस्याथ राज्यं द्यूतेन हारितं। भार्या हृता तु पुत्रस्तु स चैकाकी वनं गतः। तत्रापश्यत्समि
हं त्यादितास्यं भयावहं। विसृतोपि क्षुमायातं संरंभेण सकादितः। पुनश्च भक्षितः सोऽपि भार्यां शोचितुमुद्यतः। हा शैव्ये क्व गतासि त्वं मां विहाय सुदुःखितं। अथ पश्यत्पुनरेवापि
भार्यां तां सहपुत्रकां। त्रायस्व त्वं हरिश्चंद्र किं द्यूतेन तव प्रभो। पुत्रे त्वे शोच्यतां प्राप्तो भार्या शैव्या यथा सह। स तानापश्यत्पुनस्तौ पिधावन्नपि पुनः पुनः। अथापश्यत्पुनश्चापि स्व
र्गस्थः स नराधिपः। नीयते मुक्तकेशी सा नग्ना विवसना वलात्। हा हा वाक्यं प्रमुंचती त्राहि त्राहि समुद्रस्व मां। अथापश्यत्पुनस्तत्र धर्मराजस्य शासनात्। आक्रंदत्यंतरिक्ष
स्था आगच्छ त्वं नराधिप। विश्वामित्रेण विज्ञप्तो यमो राजा ▪ न वार्थितः। इत्युक्त्वा सर्पपाशैस्तु नीयते वलवन्निपुः। तत्रापि तस्य विख्यातिर्नो धर्मो त्याग्यवर्द्धत। एताः सर्वा दशास्तस्य
याः स्वप्ने संप्रदर्शिताः। सर्वास्तास्तेन संभुक्ता यावद्वर्षाणि द्वादश। द्वादशे पक्षशेषे तु नीयमानोऽभ्य दैवलात्। यमं संपश्यत तदा उवाच च नराधिपं। विश्वामित्रस्य कोपोयं दुर्निवार्यो म
हात्मनः। पुत्रस्यैते मृत्युमपि प्रदास्यति च कौशिकः। गच्छ त्वं मानुषं लोकं दुःखशेषं तु भुंक्ष्व वै। गतस्य तस्य राजेंद्र श्रेयस्तत्र भविष्यति। पतिते द्वादशे वर्षे दुःखस्यांते जनाधिप।
अंतरिक्षाच्च पतितो यमदूतैः प्रणोदितः। पतितो यमलोकाच्च विबुद्धो भयसंभ्रमात्। अहो कष्टमिति ध्यात्वा क्षते क्षारावसेचनं। स्वप्ने दृष्टं महद्दुःखं यस्यांतो नोपपद्यते। क्व
तेपद्धगुदुःखार्त्तः पुष्कसोस्तत्र संभ्रमात्। न जानामीव यं राजन्नेवमावाऽपरेवुवन्। किं त्वाभिजानतदादुःखी देवान्शरणमेयवान्। स्वस्तिं कुर्वंतु मे देवाः शैव्यायै वालकस्य चान

मार्कं ॥१३॥

मोघर्मामप्यसहितेनमः कृष्णायवेधसे। एवमुक्त्वाथराजातुयुक्तः पुष्कसकर्मणि। शवानांमूल्यकारोपुरानैऋत्यस्थितिर्विभुः। मलिनोजटिलः कृष्णोलगुडीविक
लोनृपः। नैवपुत्रोनजायाचनतस्यैवस्मृतिगोचरा। नष्टोत्साहाराज्यनाशात्तस्माद्वातेऽस्य वैसत्तदा। अथाजगामस्वसुतंमृतंमादायलापिनी। भार्यातस्य
नरेंद्रस्यसर्पदष्टंहिवालकं। हापुत्रहाशिशोवदंतीतिमुहुर्मुहुः। कृशाविवर्णामलिनापांशुध्वस्तशिरोरुहा। हाराजमत्तीतुहाराजन्नद्यवालंत्वंपुरुष्यसमुंसमहीत
लेभ्रमन्तंपुरेदृष्ट्वादुष्टकालाहिनामृतं। तस्याविलापशब्दंतमाकर्ण्यनराधिपः। जगामत्वरितस्तत्रनविनामृतकंवलः। सतांचरुदतींनार्यांनोव्यजा
नातपार्थिवः। चिरप्रवासंतप्तांपुनर्जातामिवाश्रवलां। सापितंचारुकेशांतपुराद्दृष्ट्वाजटालकं। नाभ्यजानात्नृपसुतंशुष्कवृक्षोपमत्वचं। सोपिकृष्णपरंवाले
दृष्ट्वाशीविषपीडितं। नरेंद्रलक्षणोपेतंचितामापुनरीश्वरः। तस्यतच्चाननेकेशांतंमुखंरम्यंसमुन्नतं। नीलाःकेशाःसंकुचिताःसमादीर्घास्तरंगिणाः। राजी
वनेत्रयुगलोविंवोष्ठपुटसंयुतः। चतुर्दंष्ट्रश्चतुःकिष्कुदीर्घास्यादीर्घवाहुकः। चतुर्लेखंपकोमत्स्ययवच्छत्रोकपद्मकः। शिरालयादोगंभी। सुदक्षस्त्रिस्त्रिव
लीधरः। अहोकष्टंनरेंद्रस्यकस्याप्यस्यकुलेशिशुः। जातोनीतःकृतांतेनकामथाशादरात्मना। एवंपतेदृष्ट्वाहिमवालेमातुरुत्संगसीयिनी। स्मृतिम
स्यागतोवालोरोहितासवेव्यलोचनः। सयातामवस्तोमेवयोऽवस्थामुपागतः। नीतोयदिनघोरेणकृतांतेनात्मनोवशं। राजपत्न्युवाच। हावत्सक
स्यपापस्यअपध्यानादिदंमहत्। दुःखमापतितंघोरंयस्यांतोनोपपद्यते। हानाथराजन्नजयताममनाश्वास्यदुःखितां। क्वापिसंतिष्ठतास्याननिश्चं
स्थीयतेकथं। राज्यनाशःसुहृत्त्यागोभार्यातनयविक्रयः। हरिश्चंद्रस्यराजर्षेःकिंविधनकृतंत्वया। इतितस्यावचःश्रुत्वाराजास्थानतश्च्युतः। प्रत्यभिज्ञा
यदयितांपुत्रंचनिधनंगतं। कष्टंममैवपत्नीयंवालकश्चापिमेसुतः। ज्ञात्वारुरोदसंतप्तोमूर्छामपिजगामह। साचतंप्रत्यभिज्ञायतामवस्थामुपागता। ॥१३॥

तिश्रेष्टानिपपातार्ता मूर्छितायधरणीतले। चेतःसंप्राप्यराजेंद्रोराजपत्नीचतौसमं। विलेपतुःसुसंतप्तौशोकभारावपीडितौ। राजोवाच। हावत्ससुकुमारं
तेवक्त्रंसुभ्रुनासिकालकं। पश्यतोमेमुखंदीनंहृदयंकिंनदीर्यते। तातताततिमधुरंब्रुवाणंस्वयमागतं। उपगूह्यकदावक्ष्येवत्सवत्सेतिसौहृदात्। कस्यजानु
प्रणीतेनपिंगेनक्षितिरेणुना। ममोत्तरीयमुत्संगस्तथांगंमलमेष्यति। अंगप्रत्यंगसंभूतममोहृदयनंदनं। मयाकुपित्रासात्पुत्रविक्रीतोयेनव
स्तुवत्। हत्वाराज्यमशेषंमेसवांधवधनंमहत्। दैवाहिनाकृशंसेनदष्टोमेतनयस्ततः। अहंदैवाहिदष्टस्यपुत्रस्याननपंकजं। निरीक्षन्नपिघोरेणाविषे
णांधीकृतोऽधुना। एवमुक्त्वातमादायवालकंवाष्पगद्गदः। परिष्वज्यचनिश्चेष्टोमूर्छयानिपपातह। राजपत्न्युवाच। अयंसपुरुषव्याघ्रस्वरेणोपलक्ष्यते। विद्वज्जन
मनश्चंद्रोहरिश्चंद्रोनसंशयः। तथास्यनासिकातुंगाअग्रतोऽधोमुखंगता। दंताश्चमुकुलप्रख्याःख्यातकीर्तेर्महात्मनः। श्मशानमागतःकस्मादद्यायंसनराधि
पः। अपहायपुत्रशोकंसापश्यत्पतितंपतिं। प्रहृष्टाविस्मितादीनाभर्तृपुत्राधिपीडिता। वीक्ष्यंतीसातदापश्यद्भर्तृदंडंजुगुप्सितं। श्वपाकार्हमनोमोहंजगा
मायतलोचना। प्राप्यचेतश्चशनकैःसगद्गदमभाषत। धिक्त्वांदैवातिकरुणंदुर्मर्यादंजुगुप्सितं। येनायममरप्रख्यानीतोराजाश्वपाकतां। राज्यनाशःसुहृ
त्त्यागोभार्यातनयविक्रयः। प्रापयित्वापिनोमुक्तश्चंडालोयंकृतोनृपः। हाराजन्नाद्यसंतापामित्थंमांधरणीतलात्। उत्थाप्यनाद्यपर्यंकमारोहितुंकिमु
च्यते। नाद्यपश्यामितेछत्रंभृंगारमपिवापुनः। चामरंव्यजनंवापिकोयंविधिविपर्ययः। यस्यहिव्रजतःपूर्वंराजानोभृत्यतांगताः। स्वोत्तरीयैःप्रकुर्वंतिनीरज
स्कंमहीतलं। सोयंकपालसंलग्नेघटीघटनिरंतरे। मृतनिर्माल्यसूत्रांतलग्नकेशसुदारुणे। वसानिर्यासंसंशुष्कमहीपृष्ठकमंडिते। भस्मांगारार्द्धदग्धास्थि
मज्जासंघातभीषणे। गृध्रगोमायुनादार्तनष्टक्षुद्रविहंगमे। चिताधूमावलिकृतनीलीकृतदिगंतरे। कुणपास्वादनमुदासंप्रहृष्टनिशाचरे। चरत्य

१४

मेध्ये दुःखार्त्तः स्मशाने न्यसत्तमः। एवमुक्त्वा समाश्लिष्य कंठं राज्ञो महात्मनः। कष्टं शोकप्रतापाद्या विललापार्त्तया गिरा। राजपुत्र्युवाच। राजन्स्वप्नोनु तथ्यं वा यदेतन्मन्यते
भवान्वद तन्मे महाभाग मनो वै मुह्यते मम। यद्येतदेव धर्मज्ञ नास्ति धर्मे सहायता। तथैव विप्रदेवादिपालने प्रजने पि वा। नास्ति धर्मः कुतः सत्यं नार्जवं नानृ
शंसता। यत्र त्वं धर्मपरमः स्वराज्यादवरोपितः। इति तस्या वचः श्रुत्वा निश्वस्योष्णं पुनः पुनः। कथयामास तन्वंग्यै यथा प्राप्तः श्वपाकतां। रुदित्वा सा पि सुचिरं
निःश्वस्योष्णं पुनः पुनः। कथयामास तत्सर्वं वृत्तांतं सुदुःखिता। स्वपुत्रमरणं भीरु यथावृत्तं न्यवेदयत्। श्रुत्वा राजा तथा वाक्यं निपपात महीतले। मृतस्य
पुत्रस्य तदा जिह्वया लेलिहन्मुखं। राजोवाच। प्रिये न रोचये दीर्घकालं क्लेशमुपासितुं। नात्मायत्तश्च तन्वंगि पश्य मे मंदभाग्यतां। १८। चांडालेनाननुज्ञातः प्रवे
क्ष्ये ज्वलनं यदि। चंडालदासतां यास्ये पुनरप्यन्यजन्मनि। नरके च पतिष्यामि कीटकः कृमिभोजनः। वैतरण्यां महापूयवसासृक्स्नायुपिच्छिले। असिप
त्रवनं प्राप्य छेदं प्राप्स्यामि दारुणं। तापं प्राप्स्यामि वा प्राप्य महारौरवरौरवौ। मग्नस्य दुःखजलधौ पारः प्राणवियोजनं। एकोपि बालको योयं आसीद्वंशवि
वर्द्धनः। मम दैवाबुवेगेन स्कृतः सोपि बलीयसा। कथं प्राणान्विमुंचामि परायत्तोस्मि दुर्गतः। अथवा नार्त्तिसंक्लिष्टो नरः पापमवेक्षते। तिर्यक्त्वे नास्ति त
दुःखं नासिपत्रवने तथा। वैतरण्यां कुतस्तादृक्यादृशं पुत्रविप्लवे। सोहं सुतशरीरेण दीप्यमाने हुताशने। निपतिष्यामि तन्वंगि क्षंतव्यं दुःकृतं मम। अनु
ज्ञाता च गच्छ त्वं विप्रवेश्म शुचिस्मिते। मम वाक्यं च तन्वंगि निबोधादृतमानसः। यदि दत्तं यदि हुतं गुरवो यदि तोषिताः। परलोके न संयोगो मम त्वया पुत्रे
ण च त्वया। इह लोके कुतस्त्वेतावद्भविष्यति मम वले। त्वया सह मम श्रेयो गमनं पुत्रमार्गणे। यन्मया सहताः किंचिद्रहस्ये कास्मि चिस्मिते। अश्लीलमु ।।१४।।
क्ता तत्सर्वं क्षंतव्यं मम याचतः। राजपत्नीति गर्वेण नावज्ञेयः स ते द्विजः। सर्वयत्नेन संतोष्यः स्वामी दैवतवच्छुभे। राजपत्न्युवाच। अहमप्यत्र राजर्षे

दीप्यमाने हुताशने। दुःखभारसहा दैवं यास्यामि सह वै त्वया। सह स्वर्गं च नरकं सह वै वां विभुंक्ष्वहि। श्रुत्वा राजा तदोवाच एवमस्तु पतिव्रते। पद्धिणाकृत्वात
तः कृत्वा चितां राजा आरोप्य तनयं स्वयं। भार्यया सहितश्चासौ बद्धांजलिपुटस्ततः। चिंतयन्परमात्मानमीशं नारायणं हरिं। हृत्कोटरगुहासीनं वासुदेवं सुरे
श्वरं। अनादिनिधनं ब्रह्म कृष्णं पीतांबरं प्रभुं। तस्य चिंतयमानस्य सर्वे देवाः सवासवाः। धर्मं प्रमुखतः कृत्वा समाजग्मुस्त्वरान्विताः। आगम्य सर्वे प्रोचुस्ते
भो राजन्शृणु प्रभो। अयं पितामहः साक्षाद्धर्मश्च भगवान्स्वयं। साध्याः सविश्वमरुतो लोकपालाः सचारणाः। नागाः सिद्धाः सगंधर्वा रुद्राश्चैव तथाश्विनौ।
एते चान्ये च बहवो विश्वामित्रस्तथैव च। धर्मउवाच। राजन्मा साहसं कार्षीर्धर्मोहं त्वामुपागतः। तितिक्षादमसत्याद्यैस्त्वद्गुणैः परितोषितः। इंद्रउवाच। हरिश्चंद्र मह
राजप्राप्तः शक्रोस्मि तेंतिकं। त्वया सभार्यपुत्रेण जिता लोकाः सनातनाः। आरोह त्रिदिवं राजन्भार्यापुत्रसमन्वितः। सुदुःप्रापं नरैरन्यैर्जितमात्मीय
कर्मभिः। पक्षिण ऊचुः। ततोमृतमयं वर्षमपमृत्युविनाशनं। इंद्रः प्रासृजदाकाशाच्चितामध्यगतं प्रभुः। पुष्पवर्षं सुमहद्दुंदुभिः स्वनमेव च। तत स्तत्र
वर्तमाने समाजे देवसंकुले। समुत्तस्थौ ततः पुत्रो राज्ञस्तस्य महात्मनः। सुकुमारतनुः स्वस्थः प्रसन्नः प्रीतमानसः। ततो राजा हरिश्चंद्रः परिष्वज्य समं ततः। जाय
यास्वश्रिया युक्तो दिव्यमाल्यांबरान्वितः। स्वस्थः संपूर्णहृदयो मुदा परमया युतः। बभूव तत्क्षणादिंद्रो भूयश्चैनमभाषत। सभार्यस्त्वं सपुत्रश्च स्वर्लोकं सद
तिं परां। समारोह महाभाग निजानां कर्मणां फलं। हरिश्चंद्रउवाच। देवराजाननुज्ञातः स्वामिना श्वपचेन वै॥ अकृत्वा निःकृतिं तस्य नारोक्ष्ये हं सुरालयं। धर्मउवाच। तवैवं भा
विनं क्लेशमवगम्यात्ममायया। आत्मा श्वपाकतां नीतो दर्शितं तच्च पक्कणं। इंद्रउवाच। प्रार्थ्यते यत्परं स्थानं समस्तैर्मनुजैर्भुवि तदारोह हरिश्चंद्र संप्राप्तं निजकर्म
णा। हरिश्चंद्रउवाच। शक्रसंभुक्तेन्यो राज्यं प्रजाजावेनकुहुविनां। यजते च महायज्ञैः पूर्वं कर्म करोति च। देवराज नमस्तुभ्यं वाक्यं चैतन्निबोध मे। प्रसादसुमुखो यद्देवन्ने

मार्कं ।।१५।। मिप्रश्रयाद्विधतः॥ सदोकामरतमनसः कोशलेन्द्रीजनाः॥ तिष्ठंति तावतयास्येवकर्पयास्याम्यहं दिवं। ब्रह्महत्या गुरोर्घातो गोवधः स्त्रीवधस्तथा। तुल्यमेभिर्महापापं
भक्तत्यागाद्रुदाहृतं॥ भजंतं भक्तमत्याज्यमदुष्टं त्यजतः सुखं। नेहनामुत्रपश्यामि तस्माच्छक्रदिवं व्रज। यदि ते सहिताः स्वर्गं मयायांति सुरेश्वर। ततोहमपि यास्यामि
नरकं चापि तैः सह॥ इंद्र उवाच॥ बहूनि पुण्यपापानि तेषां भिन्नानि वै पृथक्। कथं संघातभोज्यत्वं कथं स्वर्गमवाप्स्यसि॥ हरिश्चंद्र उवाच॥ शक्र भुंक्ते नृपो राज्यं प्रभावेन
कुटुंबिनां। यजते च महायज्ञैः पूर्तं कर्म करोति च। तच्च तेषां प्रभावेन मया सर्वमनुष्ठितं। उपकारिणो न संत्यक्ष्ये तानहं स्वर्गलिप्सया। तस्माद्यन्मम देवेश किंचि
दस्ति सुचेष्टितं। दत्तमिष्टमथो जप्तं सामान्यं तैस्तदस्तु नः। बहुकालोपभोज्यं च फलं यन्मम कर्मणः। तदस्तु दिनमप्येकं तैः समं त्वत्प्रसादतः॥ पक्षिण ऊचुः॥ ए १८
वमस्त्विति तेनोक्त्वा शक्रस्त्रिभुवनेश्वरः। प्रसन्नचेता धर्मश्च विश्वामित्रश्च गाधिजः। गत्वा तु नगरं सर्वे चातुर्वर्ण्यसमन्वितं। हरिश्चंद्रस्य निकटे प्रोवाच विबुधाधि
पः॥ आगच्छंतु जनाः शीघ्रं स्वर्गलोकं सुशोभनं। धर्मप्रसादात्संप्राप्तं सर्वैर्युष्माभिरेव तु। विमानकोटिसंबाधं आस्वलोकान्महीतले। गत्वायोध्याजनं प्राह देवमारो
हतामिति। पक्षिण ऊचुः॥ तदिंद्रस्य वचः श्रुत्वा प्रीत्या तस्य च भूपतेः। समानयत्पुत्रदारांस्ते दिवमारुरुहुर्जनाः। पदे पदे विमानानि विमानेन गमन्तगाः॥ तदा संप्रीतहृ
ष्टास्ते हरिश्चंद्रश्च नृपतिः। राज्येऽभिषिच्य तनयं हरिश्चंद्रो महामनाः। अयोध्याख्ये पुरे रम्ये रोहिताश्वं प्रियं सुतं। सहदेवैश्च मुनिभिः सिद्धैश्च नरनायकः। राजा सह तदा स
र्वैरुह्यमानः सुहृज्जनैः। संप्राप्य भूतिमतुलां विमाने समहीपतिः। आसांचक्रे पुराकारे वप्रप्राकारतोरणे। ततस्तस्य समृद्धिं तां लोके श्लोकमाचौशना जगौ। दैत्याचार्यो महा
भागः सर्वशास्त्रार्थतत्त्ववित्। उशनोवाच॥ अहो तितिक्षामाहात्म्यमहो दानफलं महत्। यदागतो हरिश्चंद्रः पुनः शक्रत्वमाप्तवान्॥ पक्षिण ऊचुः॥ एतत्ते सर्वमाख्यातं ।।१५।।
हरिश्चंद्रस्य चेष्टितं। यः शृणोति सुदुःखार्तः स सुखं प्राप्नुयात्पुनः। स्वर्गार्थी प्राप्नुयात्स्वर्गं सुतार्थी प्राप्नुयात्सुतं। भार्यार्थी प्राप्नुयाद्भार्यां राज्यार्थी राज्यमाप्नुया

त्। अतः परं कथ्यमानं श्रूयतां द्विजसत्तम॥ विपाको राजसूयस्य पृथ्वीक्षयकारकः॥ तद्विपाकनिमित्तं च युद्धमाडीबकं महत्॥ इति श्रीमार्कंडेयपुराणे हरिश्चंद्रो
पाख्यानं समाप्तं॥ पक्षिण ऊचुः॥ राज्यात्प्रच्युते हरिश्चंद्रे गते च त्रिदशालयं। निश्चक्राम महातेजा जलवासात्पुरोहितः। वशिष्ठो द्वादशाब्दांते गंगाकार्ये विनिर्गतो मुनिः
शुश्राव च समस्तं तद्विश्वामित्रस्य चेष्टितं। हरिश्चंद्रस्य नाशं च राज्यस्योदारकर्मणः। चंडालसंप्रयोगं च जायातनयविक्रयं। श्रुत्वा ततस्तु महाभागः प्रीतिमानवनी
पतौ। चुकोप तेजस्वी विश्वामित्रमृषिं प्रति। वशिष्ठ उ॥ मम पुत्रशतं तेन विश्वामित्रेण घातितं। तत्रापि नाभवत्कोपो यत्तादृशो यादृशोद्य मे। श्रुत्वा नराधिपमिमं स्वरा
ज्याद्व्यवरोपितं। महात्मानं महाभागं देवब्राह्मणपूजकं। यस्मात्स सत्यवाक्शांतः शत्राववि विमत्सरः। अनागाश्चापि धर्मात्मा अप्रमत्तो मदाश्रयः। सपत्नीभृत्यपुत्रस्तु
प्रापितोऽन्त्यां दशां नृपः। स्वराज्याच्च्यावितोऽनेनैव कृशश्च खलीकृतः। तस्माद्दुरात्मा ब्रह्मविद्विड्ज्ञानमवरोपितः। मच्छापोपहतो मूढः स बकत्वमवाप्स्यति॥ पक्षि
ण ऊचुः॥ श्रुत्वा शापं महातेजा विश्वामित्रोपि कौशिकः। त्वमप्याडिर्भविष्यतीति प्रतिशापमयच्छत। अन्योन्यशापात्तौ प्राप्तौ तिर्यक्त्वं परमद्युती। वशिष्ठः सुमहातेजा
विश्वामित्रश्च कौशिकः। अन्यजातिसमायोगं गतौ तावमितौजसौ। युयुधातेऽतिसंरब्धौ महाबलपराक्रमौ। योजनानां सहस्रे द्वे प्रमाणेनाडिरुत्थितः। बकस्त्वथ त्रिकं च त्र
यं सहस्रं वितयं बकः। तौ तु पक्षप्रहारैर्घोरैरन्योन्यस्याभिविक्रमौ। प्रहारान्संयतौ वै प्रजानां चक्रतुस्तदा। विधुन्वन्पत्रवातेन गिरीन्सकाननान्। आडिरप्युन्नत
ग्रीवो बकं पद्भ्यामताडयत्। तयोः पक्षानिलापास्ताः प्रपेतुर्गिरयो भुवि। गिरिप्रपातनिर्घाता चकंपे च वसुंधरा। चकंपे मानाजलधी रुरुहुर्वृक्षकाननानामचे
कंपा पृथ्वी पातालगमनोन्मुखी। केचिद्गिरिनिपातेन केचिदंभोधिवारिणा। केचिच्च महीसंचलनात्प्रययुः प्राणिनः क्षयं। इति सर्वं परित्रस्तं हाहाभूतमचेतनं॥ जग
दासीत्तु संभ्रांतं पर्यस्तक्षितिमंडलं। हा वत्स हा कांत शिशो प्रलयो वाद्य स्मि संस्थितः। हा प्रिये कांत शैलोयं पतत्याशु पलायतः। इत्याकुले काले लोके संत्रासवि

मार्क
॥१८॥

सुखेन तदा। सुरैः परिवृतः सर्वैराजगाम पितामहः। प्रत्युवाच विशिष्टश्च शान्तात्मा युध्यतीकौ पितौ। युद्धं वां विरमैत्येव तल्लोकाः स्वास्थ्यं व्रजंतु च। श्रुत्वापि तौ ताव
पितौ वाक्यं ब्रह्मणोऽव्यक्तजन्मनः। कोपामर्षसमाविष्टौ युयुधाते न तस्थतुः। ततः पितामहो देवस्तद्दृष्ट्वा लोकसंक्षयं। तयोश्च हितमन्विच्छंस्तिर्यक्त्वाव
सुपानुदत्। ततस्तौ पूर्वदेहस्थौ महादेवः प्रजापतिः। व्युदस्तौ नामसंज्ञावे वसिष्ठकौशिकावेतौ। ब्रूहि वत्स वसिष्ठ त्वं च कौशिकसत्तम। तमसा तामसेनाव
माविश्य ईदृक् युद्धं विकीर्षितं। राजसूयविपाकोऽयं हरिश्चंद्रस्य भूपतेः। युवयोर्विग्रहश्चायं पृथिवीक्षयकारकः। न चापि कौशिकश्रेष्ठ तस्य राज्ञोऽ
पराध्यति। स्वर्गप्राप्तिकरो ब्रह्मन्नुपकारपदे स्थितः। तपोविघ्नस्य कर्तारौ कामक्रोधवशं गतौ। परित्यजत भद्रं वो ब्रह्म हि प्रचुरं बलं। एवमुक्तौ तदा तेन
लज्जितौ तावुभावपि। क्षमयामासतुः प्रीत्या परिष्वज्य परस्परं। ततः सुरैः स्तूयमानो ब्रह्मलोकं निजं ययौ। वसिष्ठोऽप्यात्मनः स्थानं कौशिकोऽपि स्वमाश्र
मं। एतदाडीबकं युद्धं हरिश्चंद्रकथां तथा। कथयिष्यंति ये मर्त्याः सम्यक् श्रोष्यंति चैव ये श्रावयो। तेषां पापापनोदं तु श्रुतं ह्येतत्करिष्यति। न चैव विघ्न
कार्याणि न विघ्यंति कदाचन।३३। इति श्रीमार्कंडेयपुराणे आडिबकं नाम। जैमिनिरुवाच। संशयद्विजशार्दूलाः प्रवृत्तमम पृच्छतः। आविर्भावतिरोभा
वौ भूतानां यत्र संस्थितौ। कथं संजायते जंतुः कथं वा स विवर्द्धते। कथं चोदरमध्यस्थस्तिष्ठत्यंगनिपीडितः। निःक्रांतिः सुदरात्प्राप्य कथं वा वृद्धिमृच्छति।
उत्क्रांतिकाले च कथं चिद्भावेन वियुज्यते। कस्यात्र तत्तथाप्नाति उभे सुकृतदुःकृते। स्त्री कोऽयत्र जीर्य्यते तु अन्नानि निःसु गुरूण्यपि। चाद्व्याशित
चनो जंतुर्जीर्य्यते कथमल्पः। एतन्मे ब्रूहि सकलं संदेहात्क्रोधिवर्जितं। तदेतत्परमं गुह्यं यत्र मुह्यंति जंतवः। पक्षिण ऊचुः। प्रश्नभारोऽयमतुलस्त्वयाऽस्मासु निवे ॥१८॥
शितः। दुर्वाच्यः सर्वजंतूनां नानावस्थासमाश्रितः। तं शृणुष्व महाभाग यथाप्राह पितुः पुरा। पुत्रः परमधर्मात्मा सुमतिर्नाम नामतः। ब्राह्मणोऽर्णवः कश्चित्सुतमाह

रम

DR. BHAU DAJI MEMORIAL

महामुनिः। कृतोपनयनं शांतं सुमतिं जडरूपिणं। वेदानधीष्व सुमते यथानुक्रममादितः। गुरुशुश्रूषणे व्यग्रो भिक्षान्नकृतभोजनः। ततो गार्हस्थ्यमास्थाय इष्ट्वा
यज्ञाननुक्रमात्। इष्टमुत्पादयापत्यमाश्रयेथा वनं ततः। ततो वनस्थस्त्वं ततो वत्स परिव्राड् निःपरिग्रहः। एवमाप्स्यसि तद्ब्रह्म यत्र गत्वा न शोचसि। यदि
णा ऊचुः। इत्येवमुक्तो बहुशो जडत्वान्नाह किंचन। पितापि तं सुबहुशः प्राह प्रीत्या पुनः पुनः। इति पित्रा सुतस्नेहात्प्रोक्तोऽतिमधुराक्षरं। स तं प्राह हसन्बहुशः
प्राह सम्यगथाब्रवीत्। तातैतद्बहुशोऽभ्यस्तं यत्त्वयाद्योपदिश्यते। तथैवान्यानि शास्त्राणि शिल्पानि विविधानि च। पुत्रमित्रकलत्राणां वियोगाः संगमास्त
था। मातरो विविधा दृष्टाः पितरो विविधास्तथा। अनुभूतानि सौख्यानि दुःखानि च सहस्रशः। बांधवा बहवः प्राप्ताः पितरश्च पृथग्विधाः। विण्मूत्रपिच्छिले स्त्री
णां तथा कोष्ठे मयोषितं। गर्भदुःखान्यनेकानि बालत्वे यौवने तथा। वृद्धतायां तथा प्राप्तानि तानि सर्वाणि संस्मरे। ब्राह्मणक्षत्रियविशां शूद्राणां चापि योनि
षु। पुनश्च पशुकीटानां मृगाणामथ पक्षिणां। तथैव राजभृत्यानां राज्ञामाहवशालिनां। समुत्पन्नोऽस्मि गेहेषु यथैव तव वेश्मनि। भृत्यतां दासतां चैव गतोऽस्मि
बहुशो नृणां। स्वामित्वमीश्वरत्वं च दरिद्रत्वं तथा गतः। हतं मया हतश्चान्यैर्हतो मे घातितस्तथा। दत्तं ममान्यैरन्येभ्यो मया दत्तमनेकशः। पितृमातृसु
हृद्भ्रातृकलत्रादिकृतेन च। हृष्टोऽस्मि कृतदैन्यादश्रुधौतानने मतः। एवं संसारचक्रेऽस्मिन् भ्रमता तात संकटे। तात मे यन्मया प्राप्तं मोक्षप्राप्तिका। के
विज्ञाते यत्र सर्वोऽयं ऋग्यजुःसामसंज्ञितः। क्रियाकलापो विगुणो न सम्यक्प्रतिभाति मे। तस्मादुत्पन्नबोधस्य वेदैः किं मे प्रयोजनं। घट्टप्रकाशं क्रिया
दुःखैः सुखहर्षरसैश्च यत्। गुणैश्च वर्जितं ब्रह्म प्राप्स्यामि परमं पदं। रागहर्षभयोद्वेगक्रोधामर्षजरागुणैः। विज्ञातपूर्वजन्म प्राप्तिसंगा ज्ञानाकुल
। तस्मात्त्यास्याम्यहं तात त्यक्त्वेमां दुःखसंततिं। त्रयीधर्ममधर्माढ्यं किंपाकफलसन्निभं। तस्मात्तद्वचनं श्रुत्वा हर्षविस्मयगद्गदा। पिता प्राह महा

ज्ञानत्वमुतं दृष्ट्वा मानसः। पितोवाच। किमेतद्ध ममेवत्स कुतस्ते ज्ञानसंभवः। केन ते जडता पूर्वमिदानीं च प्रबुद्धता। किं स शापविकारोयं मुनिदेवकृतस्तवा यत्रे ज्ञा
नं तिरोभूतं आविर्भूतिमुपागतं। पुत्र उ। शृणु तात यथावृत्तं ममैतं सुखदुःखदं। यश्चाहमासमन्यस्मिन् जन्मन्यस्मात् परं तु यत्। अहमासं पुरा विप्रो न्य
स्तात्मा परमात्मनि। आत्मविद्याविचारेषु पराकाष्ठामुपागतः। सततं योगयुक्तस्य सततं चाभ्यासमार्गतः। सत्संयोगात् स्वभावाच्च सद्विचारविशोधनात्
। ३६। तस्मिन्नेव परा प्रीतिर्ममासीत् संगतः सदा। आचार्यतां च संप्राप्तः शिष्यसंदेहहृत्तमः। ततः कालेन महता ह्येकांतित्वमुपागतः। अज्ञानातिप्रसङ्गात्तो वि
पन्नश्च प्रमादतः। उत्क्रांतिकालादारभ्य स्मृतिलोपो न मे भवेत्। यावद्वर्षायुतं चैव जन्मनां स्मृतिमागतं। पूर्वाभ्याससमेतेनैव सोहं तात जितेंद्रियः। यति
ष्यामि तथा कर्त्तुं न भविष्यं यथा पुनः। ज्ञानदानफलं ह्येतत् यज्जातिस्मरणं मम। न ह्येतत्प्राप्यते तात त्रयीधर्माश्रितैर्नरैः। सोहं पूर्वाश्रमादेव निष्ठाध्यम
मुपाश्रितः। ऐकांतित्वमुपागम्य यतिष्याम्यात्ममोक्षणे। तद्ब्रूहि त्वं महाभाग यत्ते संशयिकं हृदि। एतावता पितः प्रीतिमुत्पाद्यानृण्यमाप्नुयां। पक्षिण ऊ
चुः। पिता प्राह ततः पुत्रं श्रद्दधानोऽस्य तद्वचः। भवता यद्वयं पृष्टाः संसारगहनाश्रयं। पुत्र उ। शृणु तात यथाह्येतदनुभूतं मया सकृत्। संसारचक्रमजरं स्थि
तिर्यस्य न विद्यते। अनुज्ञा नि पेन दत्तानि अज्ञापूतेन चेतसा। सो पितॄन्प्रिमवाप्नोति विनाप्यन्येन वै तदा। येनान्नतानि नो ज्ञाति प्रीतिभेदः कृतो न च। आर्ति
कः श्रद्दधानश्च स सुखं मृत्युमृच्छति। देवब्राह्मणपूजायां येरताश्चानसूयवः। अवदान्या ह्रीमंतस्ते नराः सुखमृत्यवः। यो न कामान्न संरम्भान्न द्वेषा
द्धर्ममुत्सृजेत्। यथोक्तकारी सौम्यश्च सुसुखं मृत्युमृच्छति। आगारदाहिनो दाहं तृषं चान्नदायिनः। प्राप्नुवंति नरा लोके तस्मिन्मृत्यावुपस्थिते। शीतजा ॥१७॥
यंति येन दातारिंधनं कदापि नः। प्राणिनामावेदनाकष्टं ये चाप्युद्वेगकारिणः। मोहज्ञानप्रदातारः प्राप्नुवंति महत्तमः। कूटसाक्षी मृषावादी यश्चासदनुशा

स्ति वै। ते मोहमृत्यवः सर्वे तथा ये वेदनिंदकाः। विभीषणाः पूतिगंधाः कुंडमुद्गरपाणयः। आगच्छंति दुरात्मानो यमस्य पुरुषास्तदा। प्राप्तेषु दृग्प
थं तेषु जायते तस्य वेपथुः। क्रंदत्यविरतं सोथ भ्रातृमातृसुतांस्तथा। सा स्यं वागस्फुटा तात एकवर्णा विभाष्यते। दृष्टिर्विभ्राम्यते त्रासात् श्वासाश्च शु
ष्यति चाननं। ततः स वेदनाविष्टः स्वशरीरं विमुंचति। वायवग्रसादि नडु पदेहमन्यं प्रपद्यते। तत्कर्मजं यातनार्थं न मातापितृसंभवं। तत्प्रमाणव
योवस्थासंस्थानैः प्राग्भवं यथा। ततो दूतो यमस्याशु पाशैर्बध्नाति दारुणैः। दंडप्रहारसंभ्रांतं कर्षते दक्षिणां दिशं। कुशकंटकवल्मीकशंकुपाषाणकर्क
शे। तथा प्रदीप्तज्वलने क्वचित् श्वभ्रशतोत्कटे। प्रदीप्तादित्यतप्तेच दह्यमानस्तदंशुभिः। कृष्यते यमदूतैश्च शिवासंनाददारुणैः। प्रविकृष्यमाणस्तैर्घो
रैर्भक्ष्यमाणश्च नायसैः। प्रयाति दारुणो मार्गे पापकर्मा यमक्षयं। छत्रोपानत्प्रदातारो ये च वस्त्रप्रदा नराः। ते यांति मनुजा मार्गे तं सुखेन तथान्नदाः
। विमानैः सोज्वलैर्यांति भूमिदानप्रदानराः। एवं क्लेशाननुभवन्नवशः पापपीडितः। नीयते द्वादशाहेन प्रेतो धर्मपुरं नरैः। कलेवरे दह्यमाने महा
न्तं दाहमृच्छति। ताड्यमाने तथैवार्तिं छिद्यमाने च दारुणां। क्लिद्यमाने चिरं जंतुर्दुःखमवाप्नुयात्। स्वेन कर्मविपाकेन देहांतरगतोपि सन्। तत्र
यद्बांधवास्तोयं प्रयच्छंति तिलैः सह। यच्च पिंडं प्रयच्छंति नीयमानस्तदश्नुते। तैलाभ्यंगो बांधवानामंगसंवाहनं च यत्। तेन चाप्याप्यते जंतुर्यच्चा
श्नंति स्वबांधवाः। भूमौ स्वपद्भिर्नात्यर्थं क्लेशमाप्नोति बांधवैः। दानं ददद्भिश्च ततो जंतुराप्यायते मृतः। नीयमानः स्वकं गेहं द्वादशाहं स प्रेक्ष्य
ति। उपभुंक्ते तदा दत्तं तोयपिंडादिकं भुवि। ७१। द्वादशाहात् परं रौद्रे आयासं जाबरूणा कृतिः। यों मध्यपथं पश्यत्यथो जंतुः कृष्यमाणस्ततस्ततः। स तमाप्नोति
रक्तात्तेभिन्नांजनचयप्रभं। मृत्युकालांतकादीनां मध्ये पश्यति वै यमं। दंष्ट्राकरालवदनं भ्रुकुटीदारुणाकृतिं। विरूपैर्भीषणैर्वक्रैर्वृतं व्याधि

मार्कं
॥१८॥ शातैः प्रचंडैः दंडाशनिमहावाहुः पाशहस्तः सुभैरवः ॥ तन्निर्दिष्टां ततो याति गतिं जंतुः शुभाशुभां ॥ रौरवे कूटसाक्षी तु याति यश्चानृतो नरः ॥ तस्य स्व
रूपं वदतो रौरवस्य निशामय ॥ योजनानां सहस्रे द्वे रौरवो हि प्रमाणतः ॥ जानुमात्रप्रमाणश्च ततः श्वभ्रः सुदुस्तरः ॥ तत्रांगारचयो येन कृ
तं तद्धरणीसमं ॥ याज्वल्यमानास्तीव्रेण तापिता वह्निना ॥ तन्मध्ये पापकर्माणं पादन्यासं च गच्छति ॥ एवं सहस्रविस्तीर्णे योजनानां विमुच्य
ते ॥ ततोन्यत्पापशुद्ध्यर्थं तादृक्निरयमृच्छति ॥ ततः सर्वेषु निस्तीर्णः पापी तिर्यक्त्वमश्नुते ॥ कृमिकीटपतंगेषु श्वापदे मशकादिषु ॥ गजद्रुमा
जाद्येषु गोष्वश्वेषु तथैव च ॥ अन्यासु चैव पापासु दुःखदासु च योनिषु ॥ मानुष्यं प्राप्य कुब्जो वा कुत्सितो वामनोपि वा ॥ चंडालपुल्कसाद्यासु न
रो योनिषु जायते ॥ अवशिष्टेन पापेन पुण्येन च समन्वितः ॥ ततश्चारोहणीं योनिं शूद्रवैश्यनृपादिकां ॥ विप्रदेवेंद्रतां वापि कदाचिदवरोहिणीं ॥२३॥ राम
एवं तु पापकर्माणो नरकेषु मतंत्यधः ॥ यथा पुण्यकृतो यांति तन्मे निगदतः शृणु ॥ ते यमेन विनिर्दिष्टां यांति पुण्यां गतिं नराः ॥ प्रगीतगंधर्वगणान्नृ
त्ताप्सरसां वराः ॥ हारनूपुरमाधुर्यशोभितान्यतुलानि तु ॥ प्रयांत्याशु विमानानि नानादिव्यस्रगुज्ज्वलाः ॥ तस्माच्च प्रच्युता राज्ञामन्येषां च महात्मनां ॥
जायंते निरुजा गेहे सद्वृत्तपरिपालकाः ॥ भोगान्संप्राप्नुवंत्यग्र्यान्यथायोग्यमन्यथा ॥ अवरोहिणीं वा संप्राप्ताः पूर्ववद्यांति मानवाः ॥ एतत्ते सर्वमा
ख्यातं यथा जंतुर्विपद्यते ॥ अतः शृणुष्व विप्रर्षे यथा गर्भः प्रपद्यते ॥२४॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे ॥ ॥पुत्र उ० ॥ निषेके मानवे स्त्री
णां बीजे प्राप्ते रजस्यथ ॥ मुक्तमात्रो पि नरकात्स्वर्गाद्वापि प्रपद्यते ॥ तेनाभिभूतं तत्स्थैर्यं याति बीजद्वयं पितः ॥ कललत्वं बुद्बुदत्वं च ततः पेशित्वमेव चा ॥ पे
श्यां यथांकुरो बीजस्य अंकुरस्तद्वदुच्यते ॥ अंगानां च तथोत्पत्तिः पंचानामनुपागशः ॥ उपांगान्यंगुलीनेत्रनासाश्रवणानि च ॥ प्ररोहं यांति चांगेभ्य ॥१८॥

स्तद्वत्तस्योनखालकाः ॥ समांसवृद्धिमायाति तेनैवेह च कोशकः ॥ नालिकेरीफलं यद्वत्सकोशं वृद्धिमृच्छति ॥ तद्वत्तस्यात्मसौ वृद्धिं सकोशोधोमुखः स्थितः ॥ एवं वृ
द्धिं क्रमाद्याति जंतुः स्त्रीगर्भसंस्थितः ॥ तलौ तु जानुपार्श्वाभ्यां करयोर्न्यस्य वर्द्धते ॥ अंगुष्ठौ चोपरिन्यस्तौ जान्वोरग्रे करांगुली ॥ जानुपृष्ठे तथा नेत्रे जानुमध्ये
च नासिका ॥ स्फिजौ पार्ष्णिद्वयस्थौ च बाहू जान्वोर्बहिः स्थितौ ॥ एवं वृद्धिं क्रमाद्याति जंतुः स्त्रीगर्भसंस्थितः ॥ अन्यासु चोदरे जंतुर्यथारूपं यथास्थितिः ॥ काठि
न्यमग्निना याति भुक्तपीतेन जीवति ॥ पुण्यापुण्याशयमयी स्थितिर्जंतोस्तथोदरे ॥ नाडी चाप्यायनी नाम नाभ्यां तस्य निबध्यते ॥ स्त्रीणां तथांत्रशुषिरे सा निबद्धा
प जायते ॥ क्रामंति भुक्तपीतानि स्त्रीणां गर्भोदरे तथा ॥ तैराप्यायितदेहोसौ जंतुर्वृद्धिमुपैति वै ॥ स्मृतिस्तत्र प्रयांत्यस्य बहुः संसारभूमयः ॥ ततो निर्वेदमायाति पीड्य
मानइतस्ततः ॥ पुनर्नैवं करिष्यामि मुक्तमात्र इहोदरात् ॥ तथा तथा यतिष्यामि गर्भं नाप्स्याम्यहं यथा ॥ इति चिंतयति स्मृत्वा जन्मदुःखशतानि वै ॥ यानि पूर्वानु
भूतानि दैवभूतात्मजानि वै ॥ ततः कालक्रमाज्जंतुः परिवर्तत्यधोमुखः ॥ नवमे दशमे वापि मासि संजायते ततः ॥ निःक्रामन्मारुतेनापि प्राजापत्येन पीड्यते ॥ निःक्रा
म्यते च विलपन्हृदि दुःखनिपीडितः ॥ निःक्रांतश्चोदरान्मूर्च्छामसह्यां प्रतिपद्यते ॥ प्राप्नोति चेतनां चासौ वायुस्पर्शसमन्वितः ॥ ततस्तं वैष्णवी माया समास्कंदति
मोहिनी ॥ तया विमोहितात्मासौ ज्ञानभ्रंशमवाप्नुयात् ॥ भ्रष्टज्ञानो बालभावं ततो जंतुः प्रपद्यते ॥ ततः कौमारकावस्थां यौवनं वृद्धतामपि ॥ पुनश्च मरणं
तद्वज्जन्म चाप्नोति मानवः ॥ ततः संसारचक्रेस्मिन्भ्राम्यते घटियंत्रवत् ॥ कदाचित्स्वर्गमाप्नोति कदाचिन्निरयं नरः ॥ निरयं चैव स्वर्गं च कदाचिच्च समश्नुते ॥ कदा
चिदत्रैव पुनः स्वकर्मफलमश्नुते ॥ कदाचिद्भुक्तकर्मा च स्वल्पेनागच्छति ॥ कदाचिदल्पशेषेण जायतेत्र शुभाशुभैः ॥ स्वर्लोके नरके चैव भुक्तप्राये द्विजोत्तम ॥ नर
केषु महद्दुःखमेतद्यत्स्वर्गवासिनः ॥ दृश्यंते तात मोहं नो यांत्यमानेन तेन वै ॥ स्वर्गेपि दुःखमतुलं यदारोहणकालतः ॥ प्रभृत्यहं पतिष्यामीत्येतन्मनसि वर्त्त

मार्कं
।।१८।।

तोनारकांश्चैवसंप्रेक्ष्यमहद्दुःखमवाप्नुते।एतांगतिमहंगांतेत्यहर्निशमतिर्वृतः।गर्भवासेमहद्दुःखंजायमानस्ययोनितः।जातस्यबालभावेचवृद्धत्वेदुःखमेवच।कामे
र्ष्याक्रोधसंबद्धंयौवनेचातिदुःसहं।दुःखप्रायावृद्धताचमरणेदुःखमुत्तमं।कृष्यमाणस्ययाम्यैश्चनरकेषुचमात्मनः।पुनश्चगर्भेजन्माथमरणंनरकास्तथा।एवं
संसारचक्रेस्मिन्जंतवोघटियंत्रवत्।भ्राम्यंतेप्राकृतैर्बंधैर्बध्यंतिचासकृत्।नास्तितातसुखंकिंचिदत्रदुःखशताकुले।तस्मान्मोक्षायपततःकथं
सेव्यामयात्रयी।।३२।।इतिश्रीमार्कंडेयपुराणेपितापुत्रसंवादे।।पितोवाच।साधुवत्सत्वयाख्यातंसंसारगहनंपरं।ज्ञानप्रदानसंभूतममाश्रित्यमहाफलं।त
त्रतेनरकाःसर्वेपितैश्चैरौरवास्तथा।वर्णितास्तन्ममाचक्ष्वविस्तरेणमहामते।पुत्रउवाच।रौरवस्तेमयाख्यातःप्रथमोनरकोमहान्।महारौरवसंज्ञंतुशृणुष्व
नरकंपितः।योजनानांसहस्राणिसप्तपंचसमंततः।तत्रताम्रमयीभूमिरधस्तस्याहुताशनः।तत्रापतप्तासासर्वाप्रोद्यदिंदुसमप्रभा।विज्ञायतेमहारौद्रादर्श
नस्पर्शनादिषु।तस्यांबद्धकराघ्रिश्चपद्भ्यांचैवयमानुगैः।मुच्यतेपापकृन्मध्येलुठमानःसगच्छति।काकैर्बकैर्वृकोलूकैर्मशकैर्वृश्चिकैस्तथा।भक्ष्यमाणस्त
थाराष्ट्रैर्गतोमार्गेविद्रुत्यतेदश्यमानः।पितर्मातर्भ्रातस्तातेतिचाकुलः।वदत्यसकृदुद्विग्नोनशांतिमधिगच्छति।एवंतस्मान्नरैर्मोक्षोलभ्यतेकोटिवाप्यतोवर्षा
युतायुतैःपापैर्यैःकृतंदुष्टबुद्धिभिः।अथान्यस्तमोनामसोतिशीतःस्वभावतः।महारौरववद्दीर्घस्तथैवतमसावृतः।शीतार्त्तास्तत्रधावंतोनराःस्तमसिदारुणे।प
रस्परंसमासाद्यपरिरभ्याश्रयंतिच।दंताश्चैषांचभज्यंतिशीतार्त्ताःपरिकंपिताः।क्षुत्तृषातिबलातातत्तथैवान्येप्युपद्रवाः।हिमखंडवहोवायुर्भिनत्त्यस्थीनिदारुणः।
मज्जास्रक्गलितंतस्माद्श्नंतिचक्षुधान्विताः।आलेह्यमानाभ्राम्यंतेपरस्परसमागमे।एवंतत्रापिसुमहान्क्लेशस्तमसिमानवैः।प्राप्यतेब्राह्मणश्रेष्ठयावद्दुःकृ ।।१८।।
तसंक्षयः।निकृंतनइतिख्यातस्तथान्योनरकोमतः।तस्मिन्कुलालचक्राणिभ्राम्यंतेविरतंततः।तेष्वारोप्यनिकृत्यंतेकालसूत्रेणमानवाः।यमानुगांगुलि

णस्तमसिदारुणे।परस्परंसमासाद्यपरिरभ्याश्रयंतिच।दंताश्चैषांचभज्यंतिशीतार्त्ताःपरिकंपिताः।क्षुत्तृषातिबलातातत्तथैवान्येप्युपद्रवाः।हि
मखंडवहोवायुर्भिनत्त्यस्थीनिदारुणः।मज्जास्रक्गलितंतस्माद्श्नंतिचक्षुधान्विताः।आलेह्यमानाभ्राम्यंतेपरस्परसमागमे।एवंत
त्रापिसुमहान्क्लेशस्तमसिमानवैः।प्राप्यतेब्राह्मणश्रेष्ठयावद्दुःकृतसंक्षयः।निकृंतनइतिख्यातस्तथान्योनरकोमतः।तस्मिन्कु
लालचक्राणिभ्राम्यंतेविरतंततः।तेष्वारोप्यनिकृत्यंतेकालसूत्रेणमानवाः।यमानुगांगुलिस्थेनआपादतलमस्तकं।नतेषांजी
वितभ्रंशोजायतेद्विजसत्तम।छिन्नानितेषांशतशःखंडान्यैक्यंव्रजंतिच।एवंवर्षसहस्राणिछिद्यंतेपापकर्मिणः।तावद्यावदशेषंवैतत्पापं
संक्षयंगतं।अप्रतिष्ठंचनरकंशृणुष्वगदतोमम।यत्रस्थैर्मानवैर्दुःखमसह्यमनुभूयते।तान्येवतत्रचक्राणिघटीयंत्राणिचान्यतः।दुःखस्यहेतु
भूतानिपापकर्मकृतांनृणां।चक्रेष्वारोपिताःकेचिद्भ्राम्यंतेतत्रमानवाः।यावद्वर्षसहस्राणितेषांस्थितिर्निरंतराः।घटीयंत्रेषुचैवान्येबद्धा
स्तोयघटीघटी।भ्राम्यंतेमानवारक्तमुद्गिरंतःपुनःपुनः।अंत्रैर्मुखविनिःक्रांतैर्नेत्रैरस्रावलंबिभिः।दुःखानिप्राप्नुवंतीहयान्यसह्यानिजं
तुभिः।असिपत्रवनंनामनरकंशृणुचापरं।योजनानांसहस्रंवैज्वलदग्न्यास्तृतावनिः।तत्रसूर्यकरैश्चंडैर्यत्रातीवसुदारुणैः।प्रपतंतिसदातत्रप्रा
णिनोनरकौकसः।तन्मध्येचवनंशीतंस्निग्धपत्रंविभाव्यते।पत्राणियत्रखड्गानिफलानिद्विजसत्तम।श्वानश्चात्रशबलाश्चरंत्ययुतशो
भितुः।महावक्त्रामहादंष्ट्राव्याघ्राइवभयानकाः।ततस्तद्वनमालोक्यशिशिरच्छायमग्रतः।प्रयांतिप्राणिनस्तत्रक्षुत्तृषापरिपीडिताः।हामातस्तात
तातेतिरुदंतोतीवदुःखिताः।दह्यमानांघ्रियुगलाधरणिस्थेनवह्निना।तेषांगतानांतत्रासीद्यत्रयातीसमीरणः।प्रयातितेनपात्यंते

मार्कं
॥२०॥ तेषां खड्गास्त्यथोपरि छिन्नाः पतंति ते भूमौ ज्वलत्पावकसंचये। लेलिह्यमाने चातीव व्याप्ताशेषमहीतले। सारमेयास्ततः शीघ्रं शातयंति शरीरतः।
तेषां खंडानि रुदतां अनेकान्यतिदारुणाः। असिपत्रवनं नाम मयैतत्कीर्तितं तव। अतः परं तु मत्तस्त्वं तप्तकुंभं निबोध मे। समंततस्तप्तकुंभाः वह्नि-
ज्वालासमावृताः। ज्वलदग्निचयोद्भूतविलायःपूर्णपूरिताः। तेषु दुःकृतकर्माणो याम्यैः क्षिप्तास्त्वधोमुखाः। क्वाथ्यंते विस तद्गात्रस्थचलन्मज्जा
जलाविलाः। स्फुटत्कपाटनेत्रास्ता   गृध्रैरुद्घमाना विजीर्णाः। गृध्रैः सद्यमुच्यंते पुनस्तेषु वेगिभिः। पुनः शिमिशिमायंते तैलेनैक्यं व्रजंति च।
द्रवीभूतः। शिरोगात्रस्नायुमांसत्वगस्थिभिः। ततो याम्यैर्नरैराशु दर्व्या घट्टनघट्टिताः। क्वाथ्यंते तैर्महातैले क्वाथ्यंते पापकर्मिणः। एवं ते विस्तरेणोक्त-
स्तप्तकुंभो मया पितः। इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे। ।पुत्र उ। अहं वैश्यकुले जातो जन्मन्यस्मात्तु सप्तमे। समतीतेऽगवां रोधे निपाने
कृतवान्पुरा। विपाकात्कर्मणस्तस्य नरकं भृशदारुणं। संप्राप्तोस्म्यग्निशिखाघोरमयोमुखखगाकुलं। यंत्रपीडोतवक्रास्रकृप्रवाहोद्भूतकर्दमं।
विशस्यमानदुःकर्मिध्वनिनादरवाकुलं। पात्यमानस्य मेऽत्र साग्रं वर्षशतं गतं। तत्राह्लादकरः सद्यः पवनः सुखशीतलः। करंभवालुकाकुंभम-
ध्यस्तस्य समागमः। तत्संपर्काच्छेषाणां अभवद्यातनान्तरं। ममस्यापि यथास्वर्गे स्वर्गिणां निर्वृतिः परा। किमेतदिति चाह्लादविस्तारिस्तिमि-
तलोचनैः। दृष्टमस्माभिरासन्नं नररत्नमनुत्तमं। याम्यश्च पुरुषो घोरो दंडहस्तोऽसितप्रभः। पुरतो दर्शयन्मार्गं इत एहीति वादयन्। ततस्तज्जनितवःस-
र्वेमत्वात्तद्दर्शनात्सुखाकेतुःफ्राजलयोन्नृपंचाणमात्रस्थिरो भवात्। त्वत्कृत्रसंगी पवनो अस्माकं सुखकारकः। ततस्तौ नरकात्पार्श्वे उपाविष्टः
कृपान्वितः। पुरुषैः सतदा दृष्ट्वा यातनाशतसंकुलं। नारके प्राहतं याम्यं किंकरं कृपयान्वितः। पुरुष उ। भो याम्य पुरुषाचक्ष्व किं मया पातकं कृ- ॥२०॥

तं। येनेदं यातनात्यंतं संप्राप्तोस्मि नरकं परं। विपश्चिदिति विख्यातो जनकानामहं कुले। जातो विदेहविषये सम्यक्मनुजपालकः। चातुर्वर्णं स्व-
धर्मस्थं कृत्वा संरक्षितं मया। धर्मतो धर्मकल्पेन मनुना न यथा पुरा। यज्ञैर्मयेष्टं बहुभिर्धर्मतः पालिता मही। नोत्सृष्टः संग्रामो नातिथि-
विमुखो गतः। पितृदेवर्षिभृत्याश्च न चापचरिता मया। महत्पापमिति त्रस्य तद्भावाद्दाहदि तस्य च। सर्वस्य जीवजातस्य कृतं त्राणं मया सदा। कृ-
तास्पृहा न च मया परस्त्रीविन्नपादिषु। पर्वकालेषु पितरस्तिथिकालेषु देवताः। पुरुषं स्वयमायांति निपानमिव धेनवः। तेयस्य विमुखा या-
ति निःश्वस्य गृहमेधिनः। तस्मादिष्टंच पूर्तंच धर्मो द्वावपि नश्यतः। पितृनिःश्वासविध्वस्तं सप्तजन्मार्जितं शुभं। त्रिजन्मप्रभवं दैवो निःश्वा-
सोहंत्यसंशयं। तस्माद्दैवे च पैत्र्ये च नित्यमेवादतो भवेत्। सोहं कथामिमं प्राप्तो नरकं भृशदारुणं ॥२१॥ इति श्रीमार्कंडेयपुराणे पितापुत्रसंवादे।
॥पुत्र उवाच। इति पृष्टस्तदा तेन शृण्वतां नो महात्मना। उवाच पुरुषो याम्यो घोरोपि प्रश्रितं वचः। किंकर उ। महाराज यथात्थ त्वं तथैवात्र न संश-
यः। किंतु स्वल्पं कृतं पापं भवतास्मरयामि तत्। वैदर्भी तव या पत्नी पीवरा नाम नामतः। ऋतुमत्या ऋतुर्वंध्यस्त्वया तस्याः कृतः पुरा। सुशोभनायां कै-
केय्यामासक्तेन ततो भवान्। ऋतुव्यतिक्रमात्ते प्राप्तो नरकं घोरमीदृशं। होमकाले यथा वह्निराज्यपातमवेक्षते। अतो प्रजापतिस्तद्वद्बीजपात-
मवेक्षते। यस्तत्सुलंघ्य धर्मार्थं कामाशक्तिमान्भवेत्। अनुपेत्या ऋणात्पापं अवाप्य नरकं पतेत्। एतावदेव ते पापं नान्यत्किंचन विद्यते।
तदेहि गच्छ पुण्यानामुपभोगाय पार्थिव। एतच्छ्रुत्वा तु राजर्षिः क्षपयाजनको ब्रवीत्। राजा उ। यास्यामि देवानुन्या यत्र मां त्वं नयिष्यसि। किंचि-
त्प्रष्टुमितत्स्मि तत्र यथावद्वक्तुमर्हसि। वज्रतुंडास्त्वमी काकाः पुंसां नयनहारिणः। पुनः पुनश्च नेत्राणि नद्देषां भवंति हि। किं कर्म कृतवंत-

मार्कं ॥२९॥

अवाङ्मुखमेतत्तु गुप्तिं तां हन्येवं तथा जिह्वां जायमानां पुनः पुनः। काप्येन पाच्यंते तस्मादेते सुदुःखिताः। करंभवालुकाह्येते पच्यंते ते
लगोचराः। अयोमुखैः खगैश्चैते छिद्यंते किं द्विधा वद। विभिन्नदेहबंध्यार्त्ति महाराववीराविणः। आग्रस्तचुनिपाते नखैर्यश्च ह्यते दुः
खिताः। किमेतन्नाविध कर्त्ता स्वक छ्यते हर्निशं नराः। एतास्त्वान्याश्च दृश्यंते यातनाः पापकर्मिणां। येन कर्मविपाकेन तन्ममाशेषतो वद। य
म किंकर उ। यन्मां पृच्छसि भूपाल पापकर्मफलोदयं। तत्तेऽहं संप्रवक्ष्यामि संक्षेपेन यथा यथा। पुण्यापुण्ये हि पुरुषः पर्यायेण समश्नुते। भुं
जतश्च क्षयं याति पुण्यं पापमथापि वा। न तु भोगादृते किंचित् पुण्यं वा कर्म मानवाः। पापकं वा पुनान्या क्षुद्रयो भोगान्न जायते। दन्ति
न्यादेवदर्शितं क्लेशाह्लं शंसयाद्धयां मृत्युस्थः प्रभ्रुत्वा यांति दीर्घाः पापकारिणः। गतिं नानाविधां यांति जंतवः कर्मबंधनात्। उत्सवादुत्सवं यांति स्व
र्गात्स्वर्गं सुखात्सुखं। श्रद्दधानाश्च दांताश्च धनाढ्याः शुभकारिणः। व्याघ्रकुंजरदुर्गाणि सर्पचोरभयानि तु। हत्वा वायेन गच्छंति प्राणिनः। किं मतः परं। स्व
गंधमाल्यसद्वस्त्रं सौधुपानासनाशनाः। त्वनमार्गैः सदा यांति पुण्याः शून्याटवीष्वपि। अनेकशतसाहस्रं जन्मसंचयसंचितं। पादन्यासकृतं दुःखं पुण्य
पुण्यं कृतं तद्वत्सुखदुःखांकुरोद्भवं। २६। यथा हि बीजं भूपाल पयांसि समवेक्ष्यते। पुण्यापुण्यं तथा काले देशयतकर्मकारणं। स्वल्पं पापं कृतं पुंसा
देशकालोपपादितं। पादन्यासकृतं दुःखं कंटकोत्थं प्रयच्छति। तत्प्रभूततरं स्थूलं शंकुकीलकसंभवं। दुःखं यच्छति तद्वच्च शिरोरोगादिदुःखदं। अपथ्यभे
नशीतोष्णश्रमतापादिकारकं। तथान्यान्यपथ्यवेक्ष्यंते पापानि फलसंगमे। एवं महांति पापानि दीर्घरोगादिविक्रियाः। तद्वच्छस्त्राग्निदृष्टानि बंधनादि
फलाय वै। स्वल्पं शुभं गंधतैलवातः प्रयच्छति। स्पर्शं चाप्यथवा शब्दं रसं रूपमथापि वा। चिरात्तु रूपं तद्वत्तन्महांतमपि कालजं। एवं च सुखानि पुण्यानि पु ॥२९॥

रम

DR. BHAU DAJI MEMORIAL

रोपद्रवाणि च। भुंजानो नैकसंसारे संभवानीह तिष्ठति। जातिदेशविरुद्धानि तत्त्वज्ञानहतानि च। तिष्ठंति तत्र यत्कानि लिंगमात्रेण तानि। चपवाम्भु
नसा वाचा न कदाचित्क्वचिन्नरः। अकुर्वन् पातकं कर्म पुण्यं वाप्यवतिष्ठते। यद्यद्याप्नोति पुरुषः दुःखं सुखमथापि वा। प्रभूतमथवा स्वल्पं वि
क्रियाकारि चेतसः। यावता तावता तस्य पुण्यं वाप्यथवेतरत्। उपभोगाद्धि यं याति भुज्यमानमिवाशनं। एवमेते महापापा यातनाभिरहर्निशं। स्व
पयंति नरा घोरे नरकान्तरवर्तिनः। तथैव राजन् पुण्यानि स्वर्गलोके नरैः सह। गंधर्वसिद्धाप्सरसां राजन् यातनाः पापकर्मिणां। केन केनेति पापे
न तत्ते वक्ष्याम्यशेषतः। दुष्टेन चक्षुषा ये हि दृष्टाः परदारान् गुधर्मैः। मानसेन च दुष्टेन परद्रव्यं च सस्पृहैः। वज्रतुंडाः खगास्तेषां हरंत्येते विलोचने। पु
नश्च संभवंति स्त्रोणि तेषां नवंत्यथा। यावंतो निमिषास्तेन पापमस्मिन्नरैः कृतं। तावद्वर्षाणि नेत्रार्त्तिमेते प्राप्स्यंत्यवारितां। असच्छास्त्रो
पदेशाश्च ये दत्ता येश्च निर्मिताः। सम्यक्कायश्चैव विनाशाय रिपूणामपि मानवैः। येऽशास्त्रमन्यथा प्रोक्तं वै रसद्वा गुदाहृता। वेददेवद्विजाती
नां गुरुनिंदाच येः कृता। हरंति तेषां जिह्वाश्च जायमानाः पुनः पुनः। तावंतो वत्सरान्नेते वज्रतुंडाः सुदारुणाः। मित्रभेदस्तथा पित्रा पुत्रस्य स्व
जनस्य वा याज्योपाध्याययोर्मातुः सुतस्य सहचारिणः। भार्यापत्योश्च ये केचित् तद्भेदं चक्रुर्नराधमाः। ते इमे पश्य पाट्यंते करपत्रेण याथि
व। परोपतापका ये च ये चाल्हादनिषेधकाः। तालवृंतानिलस्थाने चंदनोशीरहारिणः। अत्यंतस्याश्च ये केचिन्मिथ्यादोषान्किंतु तु गाः।
प्राणांतिकं दुःखदं स्वापे अदुष्टानां च ये धमाः। करंभवालुकामध्यास्ते दुर्मपापभागिनः। भुंक्ते श्राद्धे तु योऽन्यस्य नरोऽभ्यर्हति मंत्रितः। दैवे वा
प्यथवा पित्र्ये स द्विधा छिद्यते खगैः। मर्माणि यस्तु साधूनां तुदन्वाग्भिर्निकृंतति। तमेव तु दमाना स्त्रे खगास्तिष्ठंत्यवारिताः। यः करोति तु पै

मार्कं
॥२४॥

श्रुत्यं अन्यथा वाक्कुरुदुर्मतिः।पाट्यते हि द्विधा जिह्वा तस्येत्थं निशितैः क्षुरैः।मातापित्रोर्गुरूणां च येऽवज्ञां चक्रुरुद्धताः।त इमे पूयवि-
ण्मूत्रगर्त्ते मज्जंत्यधोमुखाः।देवतातिथिभृत्येषु भूतेष्वागतेषु च।अभुक्तवत्सु येऽश्नंति तदन्नपित्रादिनिपैदोषु।दुष्टास्तु पूयनिर्या-
सं तु जेः अश्नीमुखास्त्विमे।जायंते गिरिवर्ष्माणः प्रपश्येत्तान्दृशान्नराः।करास्त्वेषां प्रयाता येभिः स्वमन्नाथिनं नराः।अपाच्य वाजमश्नंति त इमे
श्लेष्मभक्तो जिनः।गोब्राह्मणाग्नयः स्पृष्टा येरुच्छिष्टैर्नरेश्वर।येषामेते निकुंभेषु प्रज्वलत्सु वादिताः कराः।सूर्येन्दुतारका दृष्टा येरुच्छिष्टैर्ये-
स्तु कामतः तेषां याम्यैर्नरैर्नेत्रे न्यस्तो वह्निः समिध्यते।गावो वह्निर्जननं विप्रो ज्येष्ठो भ्राता पिता तथा।जामयो गुरवो वृद्धा यैः स्पृष्टाश्च पदा
न्नृभिः।बद्धांघ्रयस्ते निगडैर्लोहैरग्निप्रतापितैः।अंगारराशिमध्यस्थास्तिष्ठंत्याजानुदेहिनः।पायसकृसराच्छागदेवान्नानि च पानि वै।भुक्तानि
ये रसंस्कृत्य तेषां मंत्राणि पापिनां।निपातितानां च भूपे उद्धृत्यास्त्विनिरीक्षतां।संदंशैः पश्य कृष्यं नेत्रे यैर्मध्ये मुखान्ततः।गुरुदेवद्विजातीनां देवानां च नरा-
धिपः।निंदा निशामिता ये च पापानामपि निंदतां।तेषामयोमयान्कीलानग्निवर्णान्पुनः पुनः।कर्णेषु प्रवेशयंत्येता याम्या विलपितामपि।यैः प्रपादेववि-
प्रौकोदेवालयश्रुभाः सभाः।भंक्त्वा विध्वंसमानीताः क्रोधलोभानुवर्तिभिः।तेषामेते शितैः शस्त्रैर्भृशं विलयन्तां त्वचं।पश्य कुर्वंति वै याम्याः शरीरादतिदारुणाः।
गोब्राह्मणार्कमार्गेषु ये च मेहंति मानवाः।तेषामेते निकृष्यंते गुदेनांत्राणि वायसैः।दत्त्वा कन्यां य एकस्मै द्वितीयाय प्रयच्छति।स त्वेवं नैकधा छिन्नः क्षारन-
द्यां प्रवाह्यते।स्वपोषणपरो यस्तु परित्यजति मानवः।पुत्रभृत्यकलत्रादिबंधुवर्गमकिंचनं।दुर्भिक्षे संभ्रमे वापि सोप्येवं यमकिंकरैः।सुकृत्तये प्रयच्छंति
यावज्जीवं कृतं नराः।ते पिष्यंते शिलापेषैर्यथैते पापकर्मिणः।स्वासापहारिणो बद्धाः सर्वगात्रेषु बंधनैः।कृमिवृश्चिककाकोलैर्भुज्यंतेऽहर्निशं नराः।दुश्चा ॥२४॥

राम

मा स्म कृतघ्ना जिह्वास्तालवो वदनातुराः।दिवा मैथुनिनः पापाः परदारतुजश्च ये।तस्यैव कंटकैर्दीर्घैरायासैः पश्य शाल्मलीं।आरोपिता विनुन्नांगाः प्रसू-
ताः सृक्स्रवाकुलाः।मूषायामपि पश्यैतान्ध्मायमानान्यमानुगैः।पुरुषैः पुरुषव्याघ्र परदाराभिमर्शिनः।उपाध्यायमधः कृत्वा स्तब्धो योऽध्ययनं नरः।
गृह्णाति शिलामध्यवास्यैवं शिरसा शिलां।विक्त्वा न्विक्लेशमेवाप्नोति यममार्गेऽग्निपीडितः।।क्षुत्क्षामोऽहर्निशं भारपीडापोथितमस्तकः।मूत्रश्लेष्मपु-
रीषाणि यैरुत्सृष्टानि वारिणि।त इमे श्लेष्मविण्मूत्रदुर्गंधं नरकं गताः।परस्परं स्वमांसानि भक्षयंति क्षुधार्दिताः।येनरास्त्वमांसानि भक्षयंते परस्परं।
संदंशैः कृष्यते जिह्वा संदंशांतरकस्थिताः।शुक्रमातिथ्यविधिना पूर्वमेभिः परस्परं।अपविद्धास्तु यैर्वेदा वह्नयश्चाहिताग्निभिः।त इमे शैलतुंगाग्रा-
त्पात्यंतेऽधः पुनः पुनः।पुनर्भूपतयो ये च कामलोभवशानुगाः।इमे कृमित्वमापन्ना भक्ष्यंते च पिपीलकैः।पतितात्प्रतिग्रहादाना द्याजनान्नित्यसेव-
नात्।पाषाणमध्ये कीटत्वं नरः संततमश्नुते।पश्यतो भृत्यवर्गस्य मित्राणामतिथेस्तथा।एको मिष्टान्नमश्नाति ज्वलदंगारसंचये।वृकैर्भयंकरैः स्पृष्टं नि-
त्यमस्य पभुज्यते।षण्मासं नयते ह्यपि लोकस्य वर्जितं।अंधोऽथ बधिरो मूकोऽप्यामयंते यद्धुधातुरः।अकृतज्ञोऽधमः पुंसां उपकारेषु वर्तते।अयं
कृतघ्नो मित्राणां उपकारी सुदुर्मतिः।तप्तकुंभे विलपति ततो यास्यति शोषणं।करंभवालुकातस्मात्ततो यंत्रावपीडनं।असिपत्रवनं तस्मात्करपत्रेणाया-
तनं।कालसूत्रे तथा छेदमनेकश्चैवं यातनाः।प्राप्स्यति कृतिमेतस्मान्नवेद्मि कथमेष्यति।श्राद्धसंगतिनो विप्राः समुपेत्य परस्परं।दृष्ट्वा स्तकेन स-
तिफेनं सर्वे गोर्च्यः पिबंति वै।सुवर्णस्तेयी विप्रघ्नः सुरापो गुरुतल्पगः।अधश्चोर्ध्वं च दीप्ताग्नौ दह्यमानाः समंततः।निवृत्य बहुसहस्राणि सुबहूनि ततः
परं।जायंते मानवाः कुष्ठक्षयरोगादिचिन्हिताः।मृताः पुनश्च नरकं पुनर्जातास्तथादृशीं।व्याधिं प्रकृति पारिम्यानंत नराधिप।गोघ्ना ब्राह्मणनरे यांति नरके

मार्क
॥२३॥ पुविजन्मनि। तथोपपातकानां च सर्वेषामिति निश्चयः। नरकप्रच्युता यांति येयैरहह पातकैः। आयांति योनिजातानि तानि मे गदतः शृणु। ९८। इति श्री
मार्कंडेयपुराणे पितापुत्रसंवादे। पतितात्प्रतिगृह्याथ खरयोनिं व्रजेद्द्विजः। नरकात्प्रतिमुक्तस्तु कृमिः पतितयाजकः। उपाध्यायव्यलीकं तु कृत्वा
श्वा भवति द्विजः। तज्जायां मनसा वांछन् तद्द्रव्यं चाप्यसंशयं। गर्दभो जायते जंतुः पितृश्चाप्यवमानकः। मातुः पितरमाकुश्य सारिका संप्रजायते। तावेवपी
डयित्वा तु कच्छपत्वं प्रपद्यते। भर्तृपिंडं समश्नन्यस्तद्द्विषं चैव सेवते। सोपि संमोहवसापन्नो जायते वानरो मृतः। न्यासापहर्ता नरकाद्विमुक्तो जायते कृ
मिः। ५। असूयकश्च नरकान्मुक्तो भवति राक्षसः। विश्वासहर्ता च नरो मीनयोनौ प्रजायते। धान्यं यावान् तिलान्माषान् कुलत्थान् सर्षपांश्चणान् कला
यान् कलमान्मुद्गान् गोधूमानतसीं तथा। सस्यान्यन्यानि यो हत्वा मोहाज्जंतुरचेतनः। संजायते महावक्त्रो मूषको बभ्रुसन्निभः। परदाराभिमर्शाच्च
वृको घोरोभिजायते। श्वा शृगालो बको गृध्रो व्यालः कंकस्तथा क्रमात्। भ्रातुर्भार्यां तु दुर्बुद्धिर्यो [illegible] पापकृत्। पुंस्कोकिलत्वमाप्नोति सच
पि नरकाच्युतः। सखिभार्यां गुरोर्भार्यां राजभार्यां च पापकृत्। प्रधर्षयित्वा कामात्मा शूकरो जायते नरः। यज्ञदानविवाहानां विघ्नकर्ता भवेत्कृमिः। पुनर्दानाच्च
कन्यायाः कृमिरेवोपजायते। देवतापितृविप्राणामदत्त्वा योन्नमश्नुते। प्रमुक्तो नरकात्सोपि वायसः संप्रजायते। ज्येष्ठं पितृसमं चापि भ्रातरं योवमन्य
ते। नरकात्सोपि विभ्रष्टः क्रौंचयोनौ प्रजायते। शूद्रश्च ब्राह्मणीं गत्वा कृमियोनौ प्रजायते। तस्यामपत्यमुत्पाद्य काष्ठांतःकीटको भवेत्। सूक
रः कृमिको मद्गुश्चांडालश्च प्रजायते। अकृतज्ञोऽधमः पुंसां विमुक्तो नरकान्नरः। कृतघ्नः कृमिकः कीटः पतंगो वृश्चिकस्तथा। मत्स्यस्तथालसः कू
र्मः पुष्कसो जायते ततः। अशस्त्रपुरुषं हत्वा नरः संजायते खरः। कृमिः स्त्रीवधकर्ता च बालहंता च जायते। भोजनं चोरयित्वा तु मक्षिका जायते नरः॥ ॥२३॥

तत्राप्यस्ति विशेषो वै भोजनस्य शृणुष्व तत्। हत्वा दुग्धं समार्जारो जायते नरकाच्युतः। तिलपिण्याकसंमिश्रं अन्नं हृत्वा तु मूषकः। घृतं हत्वा च नकु
लः काको मद्गुरजामिषं। मत्स्यमांसापहृत्काकः श्येनो मार्गामिषापहृत्। चीरी पाकस्यपहृते लवणे दधि च कृमिः। चोरयित्वा पयश्चापि बलाका संप्रजा
यते। यस्तु चोरयते तैलं तैलपायी स जायते। चोरयित्वा तु निष्पावान् जायते गृहगोधकः। आसवं चोरयित्वा तु तित्तिरत्वमवाप्नुयात्। अ
यो हृत्वा तु पापात्मा वायसः संप्रजायते। हृते कांस्ये च हारीतः कपोतो रौप्यभाजने। हृत्वा कांचनभांडं च कृमियोनौ प्रजायते। पत्रोर्णां चोरयित्वा
तु चकोरत्वमवाप्नुते। कोशकारश्च कौशेये हृते वस्त्रेभिजायते। दुकूले शार्ङ्गकः पापो हृते चैवांशुके शुकः। आयापट्टाविकं हृत्वा वस्त्रं क्षौ
मं प्रजायते। कार्पासिके हृते क्रौंचो वह्निहर्ता बकः खरः। मयूरो वर्णकान्हृत्वा शाकपत्रं प्रजायते। जीवंजीवकतां याति रक्तवस्त्रापहन्नरः।
शाकहर्ता च हारीतः तोयहर्ता च चातकः। भूहर्ता नरकान्याति रौरवादीन्सुदारुणान्। वृषस्य वृषणौ छित्त्वा षंडत्वं प्राप्नुयान्नरः। परिहत्य
तथान्ययोजन्मान्येकोनविंशतिं। तृणगुल्मलतावल्लीत्वक्सारतरुतां क्रमात्। प्राप्य क्षीणाल्पपापस्तु नरो भवति वै ततः। कृमिः कीटः पतंगो
थ पक्षी तोयचरो मृगः। गोलं प्राप्य च चंडालः पुष्कसादिजुगुप्सितः। पंगुरंधश्च बधिरः कुष्ठी यक्ष्मणा च प्रपीडितः। मुखरोगाक्षिरोगैश्च गुदरो
गैश्च बाध्यते। अपस्मारी च भवति मूढत्वं यदि गच्छति। एष एव क्रमो दृष्टो गोसुवर्णादिहारिणां। विद्यापहारिणां चोग्रा योनिः क्रूरपरिशिता गु
रोः। जायामन्यस्य पुरुषः पारक्यां प्रतिपादयन्। प्राप्नोति षंढतां मूढो यातनाभ्यः परिच्युतः। यः करोति नरो होमं समाभिद्धे हुताशने। सो
जीर्णवाधदुःखार्त्तो मंदाग्निरभिजायते। परनिंदा कृतघ्नत्वं परमर्मावघट्टनं। नैष्ठुर्यं निर्घृणत्वं च परदारोपसेवनं। परस्वहरणं शौच

मार्कं ॥२५॥ देवतानां च कुर्वतां नित्यमेवं च वर्त्तमानानां कार्प्पण्यं पंचवर्णानां वधः ॥ यानि च प्रतिषिद्धानि तत्प्रवृत्तिश्च संतता । लिंगानि तानि जानीया
न्मुक्तानां नरकाद्नु दयान्मृतेषु सद्भावः परलोकप्रतिक्रिया । सत्यं च भूतहितोक्तिश्च वेदप्रामाण्यदर्शनं । गुरुदेवर्षिसिद्धार्षिपूजनं सा
धुसंगमः ॥ सत्क्रियाभ्यसनं मैत्री मिति बुध्येत पंडितः ॥ अन्यानि चैव सद्धर्मक्रियाभूतानि यानि वै । स्वर्गच्युतानां लिंगानि पुरुषाणा
मपापिनां ॥ एतदुद्दिष्टतो राजन् भवतः कथितं मया । स्वकर्मफलभोक्तॄणां पुण्यानां पापिनां तथा ॥ तदेह्यन्यत्र गच्छामो दृष्टं सर्वं त्वया
धुना । त्वयाहि दृष्टो नरकस्तदेह्यन्यत्र गम्यते ॥ पुत्र उ । ततस्तमग्रतः कृत्वा स राजा गंतुमुद्यतः ॥ ततश्च सर्वैरुत्क्रुष्टं यातनास्थायिभिर्नृभिः ॥
प्रसादं कुरु भूपेति तिष्ठ तावन्मुहूर्त्तकं । त्वदंगसंगी पवनो मनो ह्लादयते हि नः ॥ परितापं च गात्रेभ्यः पीडाबाधाश्च कृत्स्नशः ॥ अपहंति न
रव्याघ्र दयां कुरु महीपते । एतच्छ्रुत्वा वचस्तेषां स याम्यं पुरुषं नृपः ॥ पप्रच्छ कथमेतेषामाह्लादो मयि तिष्ठति ॥ किं मया कर्म तत्पुण्यं म
र्त्यलोके महत्कृतं । आह्लाददायिनी पुष्टिर्ययेयं तदुदीरय ॥ पुरुष उ । पितृदेवातिथिप्रेष्यशिष्टेनान्नेन ते तनुः ॥ पुष्टिमभ्यागता यस्मा
त्तद्गतं ते मनो यतः ॥ ततस्त्वद्गात्रसंसर्गी पवनो ह्लाददायकः । पापकर्मकृतां राजन् यातना न प्रबाधते ॥ अश्वमेधादयो यज्ञास्त्वयेष्टा
विधिवद्यतः । ततस्त्वद्दर्शनाद्याम्या यंत्रशस्त्राग्निवायसाः ॥ पीडनच्छेददाहादिमहादुःखस्य हेतवः । मृदुत्वमागता राजंस्तेजसा
परिहतास्तव ॥ राज उ । यदि मत्सन्निधावेषां यातना न प्रबाधते । ततो भद्रमुखात्राहं स्थास्ये स्थाणुरिवाचलः ॥ पुरुष उ । एहि राजन्
प्रयास्यामो निजपुण्यसमार्जितान् । भुंक्ष्व भोगानपास्येह यातनास्थानमादरात् ॥ राजा उ । न स्वर्गे ब्रह्मलोके वा तत्सुखं प्राप्यते ॥२५॥

नरैः । यदार्त्तजंतुनिर्वाणदानोत्थमिति मे मतिः ॥ तस्मात्कृत्वा वद्यास्यामि यावदेते सुदुःखिताः । मत्संनिधानात्सुखिनो न यंतु नाकौक
सः । धिक्तस्य जीवितं पुंसः शरणार्थिनमातुरं । यो नार्त्तमनुगृह्णाति वैरिपक्षमपि ध्रुवं ॥ यज्ञदानतपांसीह परत्र च न भूतये । भवंति तस्य
यस्यार्त्तपरित्राणे न मानसं ॥ नरस्य यस्य कठिनं मनो बालातुरादिषु वृद्धेषु च न तं मन्ये मानुषं राक्षसो हि सः ॥ एतेषां सन्निकर्षाद्यद्दु
ग्निपरितापजं । तथोग्रगंधजं वापि दुःखं नरकसंभवं । क्षुत्पिपासाद्भवं दुःखं यच्च मूर्च्छाप्रदं महत् ॥ एतेषां त्राणदानं तु मन्ये स्वर्गसुखा
त्परं । प्राप्स्यंत्यार्त्ता यदि सुखं मदार्त्ते दुःखितेऽपि मयि । किं तु प्राप्तं मया न स्यात्तस्मात्त्वं व्रज मा चिरं ॥ पुरुष उ । एष धर्मश्च शक्रश्च त्वां नेतुं सम
पागतौ । अवश्यमस्माद्गंतव्यं तस्मात्पार्थिव गम्यतां ॥ राजोवाच । नरके मानवा धर्म पीड्यंते भूरिसहस्रशः । त्राहीति वार्त्ताः क्रंदंति मां
मत्तो न व्रजाम्यहं ॥ इंद्र उ । कर्मणा नारकप्राप्तिरेतेषां पापकर्मिणां । स्वर्गस्त्वयापि गंतव्यो नृप पुण्येन कर्मणा ॥ राजोवाच । यदि जाना
सि धर्मत्वं त्वं वा शक्र शचीपते । मम यावत्प्रमाणं तु पुण्यं तद्वक्तुमर्हतः ॥ धर्म उ । अब्बिंदवो यथांभोधौ यथा वा दिवि तारकाः ॥ यथा वा वर्षतो
धारा गंगायां सिकता यथा । असंख्येया महाराज यथा वा बिंदवोंऽभसः ॥ तथा तवापि पुण्यस्य संख्या नैवोपपद्यते ॥ अनुकंपामिमामद्य
नारकेष्विह कुर्वतः । तदेव शतसाहस्रीं संख्यामुपगतं तव ॥ तद्गच्छ त्वं नृपश्रेष्ठ तद्भोक्तुममरालयं ॥ एतेऽपि पापं नरके क्षपयंतु स्वकर्मजं ॥ १२
राजा उ । कथं स्पृहां करिष्यंति मत्संपर्केषु मानवाः । यदि मत्सन्निधावेषामुत्कर्षो नोपजायते ॥ तस्माद्यत्सुकृतं किंचिन्ममास्ति त्रिदशाधिप । तेन
मुच्यंतु नरकात्पापिनो यातनां गताः ॥ इंद्र उ । एवमूर्द्ध्वतरं स्थानं त्वया व्याप्तं महीपते । एतांश्च नरकात्पश्य विमुक्तान्पापकारिणः ॥ पुत्र उ । ततोऽपतत्पुष्प

वृष्टिस्तस्योपरिमहीपतेः।विमानंचाधिरूप्येनंस्वर्लोकमनयद्द्विजः।अहंचान्येचयेतत्रपातनान्यःपरिच्युताः।स्वकर्मफलनिर्दिष्टंनरतोयोन्यं
तरंगताः।एवमेतत्समाख्यातंनारकंद्विजसत्तम।येनयेनचपापेनयांयांयोनिमुपैतिवै।तत्तत्सर्वंमयाख्यातंयथादृष्टंमयापुरा।पुरानुभवजंज्ञा
नमवाप्याविलशंतव।अतःपरंमहाप्राज्ञकिमन्यत्कथयामिते।८१।इतिश्रीमार्कंडेयपुराणेपितापुत्रसंवादे। ।पितोवाच।कथितंमेत्वयावत्स
संसारस्यव्यवस्थितं।स्वरूपंअतिहेयस्यघटीयंत्रवदव्ययं।तदेवमेतदखिलंमयावगतमीदृशं।किंमयावदकर्त्तव्यमेवमस्मिन्व्यवस्थिते।पु
त्रउवाच।यदिमद्वचनंतातश्रद्दधास्यशंकितः।तत्परित्यज्यगार्हस्थ्यंवानप्रस्थपरोभव।तत्रानुष्ठायविधिवत्विध्यायाग्निपरिग्रहं।आत्मन्या
त्मानमाधायनिर्द्वंद्वोनिःपरिग्रहः।एकांतशीलीवश्यात्माभवभिक्षुरतंद्रितः।तत्रयोगपरोभूत्वाबाह्यस्पर्शविवर्जितः।तत्रप्राप्स्यसितंयोगंदुःख
संयोगभेषजं।मुक्तिहेतुमतःपरंयेनभूतैरहंभूयोनेदृक्दुःखमवाप्नुयां।।यत्रासक्तिपरस्यात्मा ममसंसारबंधनैः।नेतियोगमयोगायपितःयोगमथ
नावद।संसारादित्यतापार्त्तिविप्लुष्टदेहमानसं।ब्रह्मज्ञानाम्बुशीतेनसिंचमांवाक्यवारिणा।अविद्याकृष्णसर्पेणदष्टंतद्विषपीडितं।स्ववाक्या
मृतपानेनमांजीवययुतमृतं।पुत्रदारगृहक्षेत्रममत्वनिगडार्दितं।मामोचयेष्टसद्भावविज्ञानोद्घाटनेत्त्वरात्।पुत्रउ।शृणुतातयथायोगोदत्ता
त्रेयेणधीमता।अलर्कायपुराप्रोक्तःसम्यक्पृच्छतेतविस्तरात्।पितोउ।दत्तात्रेयःसुतःकस्यकथंवायोगमुक्तवान्।कस्यालर्कोमहाभागोयोयोगं
परिपृष्टवान्।पुत्रउ।कौशिकोब्राह्मणःकश्चित्प्रतिष्ठानेभवत्पुरा।सोन्यजन्मकृतैःपापैःकुष्टरोगातुरोभवत्।तंतथाव्याधितंभार्यापतिं
देवमिवार्चयत्।पादाभ्यंगांगसंवाहस्नानाछादनभोजनैः।श्लेष्मसूत्रपुरीषासृक्प्रवाहक्षालनेनच।रहस्येवोपचारेणप्रियसंभाषणेनच।सत

याभूज्यमनोपिसदाविनीतया।अतीवतीव्रकोपत्वान्निर्भर्त्सयतिनिष्ठुरः।तथापिप्रणताभार्यातंममन्यतदैवतं।तंतथाप्यतिबीभत्संसासर्वश्रेष्ठमम
न्यत।अचंक्रमणशीलोपिकदाचित्सद्विजोत्तमः।प्राहभार्यांनयस्वेतित्वंमांतस्यानिवेशने।यासौवेश्यामयादृष्टाराजमार्गेगृहेस्थिता।तांमांप्रापयधर्मज्ञे
हृदिवर्त्तते।दृष्टासूर्योदयेबालारात्रिश्चेयमुपागता।दर्शनानंतरंसामेहृदयान्नापसर्पति।यदिसाचारुसर्वांगीपीनश्रोणिपयोधरा।नोपगूहति
तन्वंगीतन्मांद्रक्ष्यसिवैमृतं।वामःकामोमनुष्याणांबहुभिःप्रार्थ्यतेचसा।ममाशक्तिश्चगमनेसंकुलंप्रतिभातिमे।तत्तदावचनंश्रुत्वाभर्तुःकामातु
रस्यसा।सत्पत्नीसुकुलोत्पन्नामहाभागापतिव्रता।गाढंपरिकरंबध्वाशुल्कमादायचाधिकं।स्कंधेभर्तारमारोप्यजगाममंदगामिनी।।निशिमेघ
संछन्नेव्योम्निचलद्विद्युत्प्रदर्शिते।राजमार्गेप्रियंभर्तुश्चिकीर्षंतीद्विजांगना।पथिशूलेतथाप्रोतंअचोरंचोरशंकया।मांडव्यमतिदुःखार्त्तं
रेध्यसद्विजः।पत्नीस्कंधसमारूढश्चालयामासकौशिकः।पादावमर्शनात्क्रुद्धोमांडव्यस्तमुवाचह।येनाहमेवमत्यर्थंदुःखितश्चालितःपदा
घ्रामनुप्राप्तःसपापात्मानराधमः।सूर्योदयेऽवशःप्राणैर्वियोक्ष्यतिनसंशयः।भास्करालोकनादेवसविनाशमवाप्स्यति।तस्यभार्याततःश्रुत्वा
तंशापमतिदारुणं।प्रोवाचव्यथितासूर्योनैवोदयमुपैष्यति।ततःसूर्योदयाभावादभवत्संततानिशा।बहून्यहःप्रमाणानिततोदेवाभयंययुः
निःस्वाध्यायवषट्कारंस्वधास्वाहाविवर्जितं।कथंनुखल्विदंसर्वंनगच्छेत्संक्षयंजगत्।अहोरात्रव्यवस्थाविनामासर्त्तुसंक्षयः।तत्संक्षयाच्च[illegible]
ज्ञायतेदक्षिणायनं।विनाचायनविज्ञानात्कालःसंवत्सरःकुतः।पतिव्रतायावचसानोद्गच्छतिदिवाकरः।सूर्योदयंविनानैवस्नानदानादिकं[illegible]
मः।नाग्नेर्विहरणंचैवक्रतुभावश्चलक्ष्यते।नैवाध्ययनमस्माकंविनाहोमेनजायते।वयमप्यायनामर्त्यैर्यज्ञभागैर्यथोचितैः।वृष्ट्यादिना

मार्कं
॥२६॥

नुगृह्णीमो मर्त्यांनुसस्यादिसिद्धये। निष्पादिताश्चौषधीषु मर्त्या यज्ञैर्यजंति नः। तेषां वयं प्रयच्छामः कामान्यज्ञादिपूजिताः। अधो हि वर्षा
म वयं मर्त्याश्चोर्द्ध्वप्रवर्षिणः। तोयवर्षेण हि वयं हविर्वर्षेण मानवाः। येऽस्माकं न प्रयच्छंति नित्यनैमित्तिकीः क्रियाः। क्रतुभागं दुरात्मानः स्वयं
चाश्नंति लोलुपाः। विनाशाय वयं तेषां तोयसूर्याग्निमारुतैः। क्षितिं च संदूषयामः पापानामपकारिणां। दुष्टतोयादिजोगेन तेषां दुःकृतका
रिणां। उपसर्गाः प्रवर्त्तंते मरणाय सुदारुणाः। ये त्वस्मान्प्रीणयित्वानुभुंजते शेषमात्मना। तेषां पुण्यान्वयं लोकान्विदध्मो मह
त्मनां। तन्नास्ति सर्वमेवैतद्विशेषध्वस्तसंस्थितं। कथं नु दिनसर्गस्यादन्योन्यमवस्तुनः। तेषामेवं समेतानां यज्ञव्युच्छित्तिशंकि
देवानां वचनं श्रुत्वा प्राह देवः प्रजापतिः। तेजः परं तेजसैव तपसा च तपस्तथा। प्रशाम्यत्यमरास्तस्माच्छृणुध्वं वचनं मम। पतिव्र
या माहात्म्यान्नोद्गच्छति दिवाकरः। तस्यानुदयात्तु हानिर्मर्त्यानां भवतां तथा। तस्मात्पतिव्रतामत्रेरनसूयां तपस्विनीं। प्रसादय
वै पत्नीं भानोरुदयकाम्यया। पुत्र उ। तैः सा प्रसादिता गत्वा प्राह यद्व्रियतामिति। अयाचंत दिनं देवा भवत्विति यथा पुरा। अनसूय
उ। पतिव्रताया माहात्म्यं न हीयेत कथं त्विति। संमान्य तस्मात्तां साध्वीं अहः स्रक्ष्याम्यहं सुराः। यथा पुनरहोरात्रसंस्थानमुपजायते।
यथा च तस्याः स पतिर्न साध्व्या नाशमेष्यति। पुत्र उ। एवमुक्त्वा सुरांस्तस्या गत्वा सा मंदिरं शुभा। उवाच कुशलं दृष्ट्वा धर्मं भर्तुस्तथा पु
नः। कच्चिन्नंदसि कल्याणि स्वभर्तुर्मुखदर्शनात्। कच्चिच्चाखिलदेवेभ्योऽभ्यधिकं मन्यसे पतिं। भर्तृशुश्रूषणादेव मया प्राप्तं महत्फलं। सर्व
कामफलावाप्त्या प्रत्यूहा यनिवर्हिताः। पंच ऋणानि मनुष्येण साध्वि देयानि सर्वदा॥ तथा स्ववर्णधर्मेण कर्तव्यो धनसंचयः। आपश्चा ॥२६॥

Dr. BHAU DAJI MEMORIAL

र्थं सत्पात्रे विनियोज्यो विधानतः। क्रियास्तु शास्त्रनिर्दिष्टा रागद्वेषविवर्जिताः। कर्तव्या अहरहः श्रद्धापुरस्कारेण शक्तितः। स्वजातिविहिता ये
वं लोकान्प्राप्नोति मानवः। क्लेशेन महता साध्वि प्राजापत्यादिकान्क्रमात्। स्त्रियस्त्वेवं समस्तस्य नरैर्दुःखार्जितस्य वै। पुण्यस्यार्धापह
राः पतिशुश्रूषयैव हि। नास्ति स्त्रीणां पृथग्यज्ञो न श्राद्धं नाप्युपोषितं। भर्तृशुश्रूषयैवैता लोकानिष्टान्व्रजंति हि। तस्मात्साध्वि महाभागे प
तिशुश्रूषणं प्रति। बुद्धिरेवं सदा कार्या यतो भर्ता परा गतिः। यद्देवेभ्यो यच्च पित्र्यागतेभ्यः कुर्याद्भर्ताभ्यर्चनं सत्क्रियाश्च। तस्याप्यर्द्धं केवलानन्यचित्ता
नारी भुंक्ते भर्तृशुश्रूषयैव। पुत्र उ। तस्यास्तद्वचनं श्रुत्वा संप्रपूज्य तथादरात्। प्रत्युवाचात्रिपत्नी तामनसूयामिदं वचः। धन्यास्म्यनुगृहीतास्मि देवै
रप्यवलोकिता। यन्मां प्रकृतिकल्याणि श्रद्धां वर्द्धयसे पुनः। जानाम्येतन्न नारीणां काचित्पतिसमा गतिः। सत्प्रीतिश्चोपकाराय इह लोके परत्र च। प
तिप्रसादादिह च प्रेत्य चैव यशस्विनी। नारी सुखमवाप्नोति नार्या भर्ता हि देवतं। सा त्वं ब्रूहि महाभागे प्राप्तायाम मम मंदिरे। आर्यापायन्या
या कार्यं तथार्येण पिवा श्रुते। अनुसूया उ। एते देवाः सहेंद्रेण मामुपागम्य दुःखिताः। त्वद्वाक्यापास्तसत्कर्मदिननक्तानिरूपणाः। या
चंतेऽहर्निशासंस्थां यथावदविखंडितां। अहं तदर्थमायाता शृणु चैतद्वचो मम। दिनाभावात्समस्तानां अभावो यागकर्मणां। तदभा
वात्सुरा पुष्टिं नोपयांति तपस्विनि। अह्नश्चैव समुच्छेदादुच्छेदः सर्वकर्मणां। तदुच्छेदादनावृष्ट्या जगदुच्छेदमेष्यति। तत्त्वमिच्छसि चेदेतज्
जगदुद्धर्तुमापदः। प्रसीद साध्वि लोकानां पूर्ववद्वर्ततां रविः। ब्राह्मण्युवाच। मांडव्येन महाभागे शप्तो भर्ता ममेश्वरः। सूर्योदये विनाशं
त्वं प्राप्यास्यसीत्यतिमन्युना। अनसूयोवाच। यदि ते रोचते भद्रे ततस्त्वद्वचनादहं। करोमि पूर्ववद्देहं भर्तारं तेन वै पुनः। मया हि सर्वथा स्त्रीणां माहा

Dr. BHAU DAJI MEMORIAL

मार्कं
॥२७॥

त्वंमं वरं वरवर्णिनि। पतिव्रताना माहात्म्यमिति तं मानयामि ते॥ पुत्र उ। तथेत्युक्ते तया सूर्यमाजुहाव तपस्विनी। अनुसूयार्घमुद्यम्य दशरा
त्रे तदा निशि॥ ७८॥ ततो विवस्वान्भगवान्फुल्लपद्मारुणाकृतिः। शैलराजानमुदयमारुरोहांशुमंडली॥ समनंतरमेवास्या भर्त्ता प्राणैर्वियु
ज्यत। पपात च महीपृष्ठे पतंतं जगृहे च सा॥ अनुसूयाउ। न विषादस्त्वया भद्रे कर्त्तव्यः पश्य मे बलं। पतिशुश्रूषयाप्तेन तपसः किं चिरेणा
ते। यथा भर्तृसमं नान्यमपश्यं पुरुषं क्वचित्। रूपतः शीलतो बुद्ध्या वाङ्माधुर्यादिभूषणैः। तेन सत्येन विप्रोऽयं व्याधिमुक्तः पुनर्युवा। प्राप्नो
तु जीवितं भार्यासहायः शरदां शतं। यथा भर्तृसमं नान्यदहं पश्यामि दैवतं। तेन सत्येन विप्रोऽयं पुनर्जीवत्वनामयः। कर्मणा मनसा वाचा भर्त्तुराराधनं
प्रति। यथा ममोद्यमो नित्यं तथायं जीवतां द्विजः। पुत्र उवाच। ततो विप्रः समुत्तस्थौ व्याधिमुक्तः पुनर्युवा। स्वभाभिर्भासयन्वेश्म वृंदारक इवा
जरः। ततोऽपतत्पुष्पवृष्टिर्देववाद्यादिनिस्वनः। लेभिरे च मुदं देवाः अनुसूयामथाब्रुवन्। देवा ऊचुः। वरं वृणीष्व कल्याणि देवकार्यं महत्कृतं त्व
या यस्मात्ततो देवा वरदास्ते तपस्विनि। अनुसूयाउ। यदि देवाः प्रसन्ना मे पितामहपुरोगमाः। वरदा वरयोग्या च यद्यहं भवतां मता। तथा तु म
म पुत्रत्वं ब्रह्मविष्णुमहेश्वराः। योगं च प्राप्नुयां भर्त्रा सहिता क्लेशमुक्तये। एवमस्त्विति तां देवा ब्रह्मविष्णुशिवादयः। प्रोच्याजग्मुर्यथान्यायम
नुमान्य तपस्विनीं। ततः कालेन कृतिथे द्वितीयो ब्रह्मणः सुतः। स्वभार्यां भगवानत्रिरनुसूयामपश्यत। आत्तस्नातां शुचांगीं शोभनीयतमा
कृतिं। स कामो मनसा भेजे तस्यां मैत्रेः प्रजापतिः। पुत्रः समस्तसत्वानामायुराधार एव च। तुष्टेन विष्णुना जज्ञे तस्यां मैत्रेः प्रजापतिः। पुत्रः समस्तसत्वा
नामायुराधार एव च। तुष्टेन विष्णुना जज्ञे दत्तात्रेयो महात्मना। स्वशरीरात्समुत्पाद्य सत्वोद्रिक्तो द्विजोत्तमा दत्तात्रेय इति ख्यातः सोऽनुसूयास्तनं पपौ॥

विष्णुरेवावतीर्णोऽसौ द्वितीयोऽत्रेः सुतोऽभवत्। सप्ताहात्प्रच्युतो मातुरुदरात्कुपितो यतः। हैहयेंद्रमुदावृत्तमपराध्यंतमुद्धतं। दृष्ट्वा तं कुपितः
सद्यो दग्धुकामः स हैहयं। गर्भवाससमुत्पन्नदुःखामर्षसमन्वितः। दुर्वासोऽस्तमसा युक्तो रुद्रांशः समजायत। इति पुत्रत्रयं तस्या जज्ञे ब्रह्मेशवै
ष्णवं। सोमो ब्रह्माभवद्विष्णुर्दत्तात्रेयो व्यजायत। दुर्वासाः शंकरो जज्ञे वरदानाद्दिवौकसां। सोमः स्वरश्मिभिः शीतैर्वीरुधोषधिमानवान्। आप्याययन्स
दा स्वर्गे वर्त्तते स प्रजापतिः। दत्तात्रेयः प्रजापालीर्दुष्टदैत्यनिवर्हणात्। शिष्टानुग्रहकृद्योगी ज्ञेयश्चांशः स वैष्णवः। निर्दहत्यवमंतॄन्दुर्वासास्त
वानजः। रौद्रं समाश्रित्य वपुर्दृष्टमनोवाग्भिरुद्धतः। सोमत्वं भगवानत्रेः पुत्रश्चक्रे प्रजापतिः। दत्तात्रेयोऽपि विषयान्योगस्थो बुभुजे हरिः। दुर्वा
सा पितरं त्यक्त्वा मातरं चोत्तमं व्रतं। उन्मत्ताख्यं समाश्रित्य परिवव्राम मेदिनीं। मुनिपुत्रवृतो योगी दत्तात्रेयोऽपि संगितां। अभीप्समानः सरसि
निममज्ज चिरं विभुः। तथापि तं महात्मानमतीव प्रियदर्शनं। तत्यजुर्न कुमारास्ते सरसस्तीरसंश्रिताः। दिव्ये वर्षशते पूर्णे यदा ते न त्यजंति तं। तत्प्री
त्या सरसस्तीरं सर्वे मुनिकुमारकाः। ततो दिव्यांबरधरां चारुपीनायतस्तनीं। नारीमादाय कल्याणीमुत्ततार जलान्मुनिः। स्त्रीसन्निधिर्विरणे हि
तेऽपरित्यक्ष्यंति मामिति। मुनिपुत्रास्ततो संगी स्थास्यामीति चिंतयन्। तथापि तं मुनिसुता न त्यजंति यदा मुनिं। ततः सह तया नार्या मद्यपा
नमथापिबत्। सुरापानरतं ते सहभार्यं ततस्त्यजुः। गीतवाद्यादिवनितासंभोगसंसर्गदूषितं। मन्यमाना महात्मानं तुल्याः सर्वे ह्यविक्रिया। नाच
परोधं योगीशो वारुणीं स पिबन्नपि। अंत्यावसायिवेश्मांतर्मातरिश्वा वहन्निव। सुरां पिबन्सपत्नीकस्तपस्तेपे स योगवित्। योगीश्वरोऽभि
ध्यमानो [illegible]। कस्यचित्त्वथ कालस्य कृतवीर्यात्मजोऽर्जुनः। कृतवीर्ये दिवं याते मंत्रिभिः सपुरोहितैः। पौरै राज्याभिषे

मार्क
॥२८॥

कार्त्ये समाहूतो ब्रवीदिदं। राज्यं नाहं करिष्यामि मंत्रिणो नरकोत्तरं। यदर्थं गृह्यते शुल्कं तदनिष्पादयन्वृथा। पण्यानां द्वादशं भागं भूप-
लाय वणिग्जनः। दत्वाध्वनि रक्षितो याति दस्युतः। गोपाश्च घृततक्रादेः षड्भागं च कृषीवलाः। दत्वान्यद्भुंजेद्यदि भू-
पतोधिकं। पण्यादीनामशेषाणां वणिजो गृह्णतः ततः। इष्टापूर्त्तविनाशाय तद्राज्ञश्चौरधर्मिणः। यदन्यैः पाल्यते लोकस्तद्वृत्तं नर-
प्तितः। गृह्णतो बलिषड्भागं नृपतेर्नरको ध्रुवः। निरूपितमिदं राज्ञः पूर्वैस्त्राणवेतनं। अरक्षंश्चौरतश्चौरस्तदेनो नृपतेर्भवेत्। तस्मात्
यदि तपस्तप्त्वा प्राप्तो योगित्वमीप्सितं। भुवः पालनसामर्थ्ययुक्त एको महीपतिः। पृथिव्यां शस्त्रधृग्वरान्यो अहमेवर्द्धिसंयुतः। ततो
न विघ्नो नात्मानं करिष्ये पापभागिनं। तस्य तन्निश्चयं ज्ञात्वा मंत्रिमध्यस्थितोब्रवीत्। गर्गो नाम महाबुद्धिर्मुनिर्नृपवरोतिगः।
यद्येवं कर्तुकामस्त्वं राज्यं सम्यक्प्रशासितुं। ततः शृणुष्व मे वाक्यं कुरुष्व च नृपात्मज। दत्तात्रेयं महाभागं सह्यद्रोण्यां कृताश्र-
यं। तमाराधय भूपाल पाति यो भुवनत्रयं। योगयुक्तं महाभागं सह्यद्रोण्यां कृताश्रयं। तमाराधय भूपाल पाति यो भुवनत्रयं। योग-
युक्तं महाभागं सर्वत्र समदर्शिनं। विष्णोरंशं जगद्धातुरवतीर्णं महीतले। यमाराध्य सहस्राक्षः प्राप्तवान्पदमात्मनः। हृतं दुरात्मभि-
र्दैत्यैर्जघान च दितेः सुतान्। राजोवाच। कथमाराधितो देवैर्दत्तात्रेयः प्रतापवान्। कथं चापहृतं दैत्यैरिंद्रत्वं प्राप वासवः। गर्ग उ। देवा-
नां दानवानां च युद्धमासीत्सुदारुणं। दैत्यानामीश्वरो जंभो देवानां च शचीपतिः। तेषां च युध्यमानानां दिव्यः संवत्सरो गतः। ततो दे-

वाः पराभूता दैत्या विजयिनोभवन्। विप्रचित्तिमुखैर्देवा दानवैस्ते पराजिताः। पलायनकृतोत्साहा निरुत्साहा द्विषां जये। बृहस्पतिमुपागम्य
दैत्यसैन्यवधेप्सवः। अमंत्रयंत सहिताः वालखिल्यैस्तथर्षिभिः। बृहस्पतिरु। दत्तात्रेयं महात्मानमत्रेः पुत्रं तपोधनं। विनीताश्चराराध्य
तं तोषयत मा हेश्या। स वो दैत्यविनाशाय वरं दास्यते वरं। ततो हनिष्यथ सुराः सहितान्दैत्यदानवान्। गर्ग उ। इत्युक्तास्ते तदा जग्मुर्दत्तात्रे-
याश्रमं सुराः। ददृशुस्तं महात्मानं ते ते लक्ष्म्या समन्वितं। उपगीयमानं गंधर्वैः सुरपानरतं मुनिं। ते तस्य गत्वा प्रणतिं प्रवदं शादिसाधनं। चक्रु-
स्तथोपजह्रुश्च भक्ष्यभोज्यस्रगादिकं। तिष्ठंतमनुतिष्ठंति यांति यांतं दिवौकसः। आराधयामासुरथ स्थितास्तिष्ठंतमासने। स प्राह प्रणतान्दे-
वान्दत्तात्रेयः किमिष्यते। मत्तो भवद्भिर्येनेयं शुश्रूषा क्रियते मम। देवा ऊचुः। दानवैर्मुनिशार्दूल जंभाद्यैर्भूर्भुवादिकं। हृतं त्रैलोक्यमाक्रम्य क्रतुभागो-
श्च कोस्त्वशः। तद्वधे कुरु बुद्धिं त्वं परित्राणाय चानघ। त्वत्प्रसादमतो प्राप्ताः पुनः प्राप्तुं त्रिविष्टपं। दत्तात्रेय उ। मद्यासक्तोहमुच्छिष्टो न चैवाहं जितेंद्रियः।
कथमिच्छथ मत्तोपि देवाः शत्रुपराभवं। देवा ऊचुः। अनघस्त्वं जगन्नाथ न लेपस्तव विद्यते। विद्याक्षालनशुद्धांतर्निविष्टज्ञानदीधितेः। दत्तात्रेय उ। सत्य-
मेतत्सुरा विद्या ममास्ति समदर्शिनः। अस्यास्तु योषितः संगादहमुच्छिष्टतां गतः। स्त्रीसंभोगो हि दोषाय सातत्येनोपसेवितः। एवमुक्तास्ततो देवाः पुन-
र्वचनमब्रुवन्। अनघेयं द्विजश्रेष्ठ जगन्माता न दुष्यति। यथासौ विद्या न विद्यते सर्वज्ञस्य हृदि स्थिता। यथांशुमाला सूर्यस्य द्विजचंडालसंगिनी। ग-
र्ग उ। एवमुक्तस्ततो देवैर्दत्तात्रेयोब्रवीदिदं। प्रहस्य त्रिदशान्सर्वान् यद्येतद्भवतां मतं। तदाहूयासुरान्सर्वान्युद्धाय सुरसत्तमाः। इहानयत मद्दृष्टे

मार्क
॥२५॥

णोच्चं मा विलंबत मा मद्दृष्टिपातकृतशुकप्रक्षीणबलतेजसः। येन ताशमशेषास्ते प्रयांति ममदर्शनात्॥ ३०॥ तस्य तद्वचनं श्रुत्वा देवैस्ता महाब
लाः। आहवाय समाहूता जग्मुर्दैवतगणा रुषा। ते तु न्यमाना दैत्यैर्देवाः शीघ्रं जयातुराः। दत्तात्रेयाश्रमं जग्मुः समेताः शरणार्थिनः। तमेव विवि
शुर्दैत्याः कालयंतो दिवौकसः। ददृशुश्च महात्मानं दत्तात्रेयं महाबलम्। वामपार्श्वस्थितां भिद्यामशेषजगतः शुभां। जायां चास्य सुचार्वंगीं ल
क्ष्मीमिंदुनिभाननां। नीलोत्पलाभनयनां पीनश्रोणिपयोधरां। सहर्षां मधुरालापां सर्वैर्योषिद्गुणैर्युतां। ते तां दृष्ट्वा ततो दैत्याः साभिलाषा मनो
भवं न शेकुः रुद्धं तं धैर्यमनसा वोढुमातुराः। त्यक्त्वा देवान्स्त्रियं तां तु हर्तुकामा हतौजसः। तेन पापेन मुह्यंतश्चासक्तास्ते ततोब्रुवन्। स्त्रीमे
तत्त्रैलोक्यसारं नो यदि वै स्यात्तदा। कृतकृत्यास्ततः सर्वे इति नो न च वितं मनः। तस्मात्सर्वे समुत्क्षिप्य शिबिकायां सुरार्दनाः। आरोप्यैनामधिष्ठानं नया
म इति निश्चिताः॥ ३४॥ मानुरागास्ततस्ते तु प्रोक्ताः स्थे वै परस्परं। तस्मात्तां योषितं साध्वीं समुत्क्षिप्य सुरार्दनाः। शिबिकायां समारोप्य सहिता दैत्यदानवाः। शिरस्युपि
विकां कृत्वा स्वस्थानानि मुखं ययुः॥ ३५॥ दत्तात्रेयस्ततो देवान्विहस्येदमथाब्रवीत्। दिष्ट्या वर्द्धयवर्द्धत्या नाम श्रीमाल्लक्ष्मी शिरोगताः। सप्तस्थानानि
क्रामताल यमन्यमुपेष्यति। देवा ऊचुः। कथयस्व जगन्नाथ केषु स्थानेषु वा स्थिता। पुरुषस्य फलं किं वा प्रयच्छत्यथ नश्यति। दत्तात्रेय उ। नृणां पादस्थि
ता लक्ष्मी निलयं संप्रयच्छति। सक्थ्नोः संस्थिता वस्त्रं रत्नं नानाविधं वसु। कलत्रदा गुह्यसंस्था क्रोडस्था धीतिदायिनी। मनोरथान्पूरयति पुरुषस्य
हृदि स्थिता। लक्ष्मीर्लक्ष्मीवतां श्रेष्ठा कंठस्था कंठभूषणं। अभीष्टबंधुदारैश्च तथा श्लेषं प्रवासिभिः। मृष्टान्नवाक्यलावण्यमाज्ञामवि
ध्यां तथा। मुखसंस्था कवित्वं च यच्छत्युदधिसंभवा। स्वशिरोगता संत्यजति ततोन्यं याति संश्रयं। सेयं शिरोगता दैत्यान्परित्यजति सं

। प्राग्हन्मारणि वध्यं तान्तस्मादेते सुरारयः। नरैत्तव्यं न शं चैते मयात्तितेजसः कृताः। परदाराभिमर्शाच्च दग्धपुण्या हतौजसः॥ ४१॥ ततस्ते विविधैः शस्त्रैर्वध्य
मानाः सुरारयः। मूर्द्धि लक्ष्म्या समाक्रांता विनेशुरिति नः श्रुतं। लक्ष्मीश्चोत्पत्य संप्राप्ता दत्तात्रेयं महामुनिं। संस्तूयमाना सा सुरैर्दैत्यनाशान्मुदान्विते
जयकृद्भिर्जगन्मध्ये दैत्यनाशकरप्रदा। नारायणाच्युतानंत वासुदेवाद्भयाजरा। त्वत्प्रसादान्सुखं लक्ष्मीराज्यं लब्धं जनार्दन। शार्ङ्गधन्वन्चक्र
पाणे मत्कांतां नित्यवल्लभ। प्रणिपत्य ततो देवा दत्तात्रेयं मनीषिणं। नाकपृष्ठमनुप्राप्ता यथापूर्वं गतज्वराः। तथा त्वमपि राजेंद्र यदीच्छसि तथेप्सितं। प्रा
प्नुमैश्वर्यमतुलं तूर्णमाराधयस्व तं। इति श्रीमार्कंडेयपुराणे। ॥ पुत्र उ। इत्यवंविधवचनं श्रुत्वा कार्त्तवीर्यो नरेश्वरः। दत्तात्रेयाश्रमं गत्वा तं भक्त्या
समपूजयत्॥ पादसंवाहनाद्यैश्च मध्वाद्याहरणेन च। स्रक्चंदनगंधांबुफलाद्यानयनेन च। परितुष्टो मुनिस्तस्य तमुवाच तथैव सः। तथैवोक्ताः पु
रा देवा मद्यभोगादिकुत्सनं। स्त्री चेयं मम पार्श्वस्था त्यनेन भोगाच्च कुत्सितः। सदेवाहं न मामेवमुपरोद्धुं त्वमर्हसि। अशक्तमुपकाराय शक्तमारा
धयस्व वै। जड उ। तेनैवमुक्तो मुनिना स्मृत्वा गर्गस्य च वचस्ततः। प्रत्युवाच प्रणम्यैनं कार्त्तवीर्यार्जुनस्तदा। देव त्वं हि पुराणानां वेत्त्वा मायां समुपाश्रि
तः। अनघस्त्वं तथैवेयं देवी सर्वजवारणी। इत्युक्तः प्रीतिमान्देवस्ततस्तं प्रत्युवाच ह। कार्त्तवीर्यं महावीर्यं वशीकृतमहीतलं। वरं वृणीष्व गुह्यं
मे त्वया नाम प्रवदीरितं कीर्त्तितं। तेन तुष्टिः परा जाता त्वय्यद्य मम पार्थिव। ये च मां पूजयिष्यंति गंधमाल्यादिभिर्नराः। मांसमद्योपहारैश्च मृष्टान्नैश्च
लक्ष्मीसमेतं गीतैश्च ब्राह्मणानां तथार्च्चनैः। वाद्यैर्मनोरमैर्वीणावेणुशंखादिभिस्तथा। तेषामहं परां पुष्टिं पुत्रदारधनादिकं। प्रदास्या
म्यवधूतश्च हरिष्याम्यवमान्यतां। स त्वं वरय भद्रं ते वरं यन्मनसेप्सितं। प्रसादसुमुखस्तेहं गुह्यनाम्ना प्रकीर्त्तनात्। कार्त्तवीर्य उ। यदि देव प्रसन्नस्त्वं त

३१

मार्कं ॥३०॥

त्वयच्छर्द्धिमुत्तमां। यथा प्रजाः पालयेयं न चाधर्ममवाप्नुयां। अपरानुस्मरणं ज्ञानं अप्रतिद्वंद्वतां रणे। सहस्रमिच्छया वाहूनां लघिमा गुणाः। अस्त
मागतयः संतु शैलाकाशांबुभूमिषु। पातालेषु च सर्वेषु वधश्चाभ्यधिकान्नरात्। तथोन्मार्गप्रवृत्तस्य चास्तु मे स्यान्मार्गदेशिकः। संतु मेऽतिथयः श्लाघ्या
वित्तं दाने च द्यायतस्था। ॥ अनष्टद्रव्यता राष्ट्रे ममानुस्मरणेन च। त्वयि भक्तिः सदैवास्तु विनयमव्यभिचारिणी। दत्तात्रेय उवाच। ये त्वेते कीर्तिताः सर्वे त्व
रान्समवाप्स्यसि। मत्प्रसादाच्च चक्रवर्ती त्वमीश्वरः। जडउ। प्रणिपत्य ततस्तस्मै दत्तात्रेयाय सोऽर्जुनः। आनाय्याः प्रकृती रस्य राज्ये अभिषेक
मगृह्णत। आघोषयामास तदा स्थितो राज्ये स हैहयः। दत्तात्रेयात्परामृद्धिमवाप्याति वलान्वितः। अद्यप्रभृति यः शस्त्रमामत्तोऽन्यो ग्रहीष्यति। ह
तव्यः स मया दस्युर्दर्शयेद्वा पराक्रमं। स एव ग्रामपालोऽभूत्पशुपालः स एव च। क्षेत्रपालः स एवासीद्द्विजातीनां च रक्षिता। तपस्विनां पालयिता
सार्थपालश्च सोऽभवत्। दस्युकालाग्निशस्त्रादि नये मग्नानिमज्जतां। अन्यासु चैव मग्नानां मम प्रत्युत्पत वीरहा। स एव संस्मृतः सद्यः समुद्ध
र्त्ताभवेन्नृणां। अनष्टद्रव्यता चासीत्तस्मिन् शासति पार्थिवे। तेनेष्टं बहुभिर्यज्ञैः समाप्तवरदक्षिणैः। तेनैव च तपस्तप्तं संग्रामेष्वथ चेष्टितं। त
स्यर्द्धिमहिमानं च दृष्ट्वा प्राह गिरा मुनिः। न नूनं कार्तवीर्यस्य गतिं यास्यंति पार्थिवाः। यज्ञैर्दानैस्तपोभिर्वा संग्रामे चातिचेष्टितैः। दत्तात्रेयाद्दिने
यस्मिन् संप्राप्तोर्द्धिं नरेश्वरः। तस्मिन् तस्मिन् दिने यागं दत्तात्रेयस्य सोऽकरोत्। तथैव च प्रजाः सर्वास्तस्मिन्नहनि भूपतेः। तस्यर्द्धिं परमां दृष्ट्वा
यागं चक्रुः समाधिना। इत्येतत्तस्य माहात्म्यं दत्तात्रेयस्य धीमतः। तथैव जन्म चाख्यातं अलर्कं कथयामि ते। यथा च योगः कथितो दत्तात्रे
णतस्य वै। पितृभक्तस्य राजर्षेरलर्कस्य महात्मनः। इति श्रीमार्कंडेयपुराणे दत्तात्रेयीयं समाप्तं। ।अतः परं मदालसोपाख्यानं। ।मुन ॥३०॥

तिजडउवाच। प्राग्बभूव महावीर्यः शत्रुजिन्नाम पार्थिवः। तुतोष यस्य यज्ञेषु सोमेनाव्याप्य पुरंदरः। तस्यात्मजो महावीर्यो वभूवातिसुदारुणः। बुद्धिविक्र
मलावण्यैर्गुरुशक्राश्विभिः समः। स समानवयोबुद्धिसत्त्वविक्रमचेष्टितैः। नृपपुत्रो नृपसुतैर्नित्यमास्ते समावृतः। कदाचिदेस्वः सं[illegible]
श्चयः। कदाचित्काव्यसंलापगीतनाटकसंभवैः। तथैवाक्षविनोदैश्च शस्त्रास्त्रविनयेन च। योग्या ज्ञातियुद्धनागाश्वस्यंदनानां समंततः। रेमे नरेंद्रपुत्रोऽसौ
नेकृत्तयेः सह। यथैव हि दिवा नक्तं एवमपि मुदायुतः। तेषां तु क्रीडतां तत्र द्विजभूपविशां सुताः। समानवयसः प्रीत्या रंतुमाययुरन्यकेशः॥ कस्यचित्त्वथ
कालस्य नागलोकान्महीतले। कुमारावागतौ नागौ पुत्रावश्वतरस्य तु। ब्रह्मरूपप्रतिच्छन्नौ तरुणौ प्रियदर्शनौ। तौ तेन नृपसुतेः सार्द्धं तथैवान्यैर्द्विजात्मजैः
विनोदैर्विविधैस्तत्र तस्थतुः प्रीतिसंयुतौ। सर्वे च ते नृपसुतास्ते च ब्रह्मविशां सुताः। नागराजात्मजौ तौ च स्नानसंवाहनादिकां। वस्त्रगंधानसप्रमु[illegible]च
क्रुर्भोजनादिक्रियां। अहन्यहन्यनुप्राप्तौ नागराजकुमारकौ। आजग्मतुर्मुदा युक्तौ प्रीत्या सूनोर्महीपतेः। स च ताभ्यां नृपसुतः परां निर्वाणमाप [illegible]
न्। विनोदैर्विविधैर्हास्यैः सल्लापादिभिरेव च। विना ताभ्यां न वुभुजे न सस्नौ न पपौ मधु। न रेमे न जगौ हशस्त्रास्त्राण्यात्मगुप्तये। सा तले च तौ रात्रि
विना तेन महात्मना। निःश्वासपवनो नीत्वा जग्मतुस्तद्दिने दिने। मर्त्यलोके महाप्रीतिर्न वर्तौ केन पुत्रकौ। सहेति पप्रच्छ पिता उभौ तौ नागदारकौ। दृष्टयोर
त्र पाताले वहूनि दिवसानि मे। दिवा रजन्यां मे चौ न पश्यामि प्रियदर्शनौ। जडउ। इति पुत्रौ स्वयं पृष्टौ प्रणिपत्य कृतांजली। प्रत्यूचतुर्महाभागा उरगाधि
पतेः सुतौ। पुत्रावूचतुः। सुतः शत्रुजितस्तात नाम्ना ख्यातऋतुध्वजः। रूपवानार्जवोपेतः शूरो मानी प्रियंवदः। अनाचक्षकथो वाग्मी विद्वान्मैत्रो गु
णाकरः। मान्यमानयिता धीमान् ह्रीमान्विनयभूषणः। तस्योपचारसंप्रीतिसंयोगापहृतं मनः। नागलोके तवालोके न रतिं विंदते पितः। तद्वि

मार्क

॥३१॥ गेन तस्तात निशायाता लसीतला। परितापयतस्तं गाङ्गादायः विंदिवा। पिता उ। पुत्रः पौत्रवतो धन्यः स्य यस्यैवं प्रवदन्ति धीः परोक्षस्यापि गुणिभिः
क्रियते गुणकीर्त्तनं। सन्ति शास्त्रविदः शीलाः सन्ति मूर्खाः सुशीलिनः। शास्त्रशीले समेमस्य पुत्रो धन्यस्य तिष्ठतः। यस्य मित्राणि गुणानुचित्रानमित्राश्च
पराक्रमं। कथयन्ति सदा सम्यक् पुत्रवांस्तेन वै पिता। तस्योपकारिणः किंचिदुपकृत्वाप्यमत्र वांछितं। किंचित्त्रिष्यादितं वत्सौ परितोषायचेतसः। सुध
न्यो जीवितं तस्य तस्य जन्म सुजन्मनः। यस्यार्थिनो न विमुखा मित्रार्थी यो न दुर्बलः। सुहृदे यस्तु वर्णादि रत्नवाहन मासनं। यश्चान्यस्य प्रीतये
तस्य तद्देयमविशंकया। धिग्जन्म तस्य जीवितं पुंसो मित्राणामुपकारिणां। प्रतिरूपमकुर्वन्यो जीवो मीत्यवगच्छति। उपकारं सुहृद्वर्गे यो ऽपकारं
च शत्रुषु। नृणां मेघोववर्षति प्राज्ञास्तस्येच्छन्ति सदोन्नतिं। पुत्रावूचतुः। किं तस्य कृतकृत्यस्य कार्तुमुपकृते न केनचित्। यस्य सर्वार्थिनो गेहे सर्वैः कामैः सदा
र्चिताः। यानि रत्नानि तत्रैव पाताले नागिनः कुतः। वाहनासननिर्याणानि भूषणान्यंबराणि च। विज्ञानं यच्च तत्रास्ति तदन्यत्र न विद्यते। प्रज्ञानाम
प्यसौ तात सर्वसंदेहकृत्तमः। एवं तस्यास्ति कर्तव्यमसाध्यं तस्य नो मतं। हिरण्यगर्भगोविंदशर्वादीनां वरात्कृते। अश्वतर उ। तथापि श्रोतुमिच्छा
मि तस्य तत्कार्य्यमुत्तमं। असाध्यमथवा साध्यं किं वा साध्यं विपश्चितां। देवत्वममरेशत्वं च तत्पूज्यत्वं च मानवः। प्रयान्ति वांछितं
चान्ये दृढं ये व्यवसायिनः। नाविज्ञातं न चागम्यं नाप्राप्यं दिवि चेह वा। उद्युक्तानां मनुष्याणां जितचित्तेन्द्रियात्मनां। योजनानां सहस्राणि गच्छ
न्याति पिपीलकः। अगच्छन्वैनतेयो ऽपि पदमेकं न गच्छति। क्व भूतलं क्व च प्रोक्तं स्थानं यत्प्राप्तवान् ध्रुवः। उत्तानपादनृपतेः पुत्रः सन् भूमिगोचरः।
तत्कथ्यतां महाप्राज्ञाः कार्यं वा तस्य पुत्रकौ। तत्तु भूपालसुतः साधु येनानृण्यं व्रजेत् वां। पुत्रावूचतुः। तेनाख्यातमिदं तात पूर्ववृत्तं महात्मना। को ॥३१॥

मार्कण्डेय उवाच। तस्य वृत्तं सहद्वृत्तशालिनः। तस्य शत्रुजितस्तात पूर्वं कश्चित् द्विजोत्तमः। गालवो ऽभ्याययौ धीमानुपाहीत्वा तुरगोत्तमं। प्रस्तुत्वा चवर रा
जन् समुपेत्याश्रमं मम। कोपि दैत्याधमो राजन् विध्वंसयति पापकृत्। तं त्वं तु रूपं समास्थाय सिंह द्वीप नगवारिणां। अन्येषां चाल्पकायानां अह
र्निशमकारणं। समाधिध्यान युक्तस्य मौनव्रतरतस्य च। तथा करोति विघ्नानि यथा चलति मे मनः। दग्धुं कोपाग्निना सद्यस्तं वयं नायु
। दुःखार्जितस्य तपसो व्ययमिच्छाम पार्थिव। एकदा तु मया राजन्नतिनिर्विण्णचेतसा। तत्क्लेशितेन निश्वासो निरीक्षिता बरमुत्क्षिप्ततो।
वरं तलात्समुत्पतितो ऽयं तुरगोत्तमः। वाक्चायशरीरिणी प्रोक्ता नभसा श्रुणुष्व तां। अश्वो ऽतः सकलं भूमिवलयं तुरगोत्तमः। समर्थः क्रान्तुमर्केण तव
यं प्रतिपादितः। पातालांबरतोयेषु न चास्य विहता गतिः। समस्तदिक्षु व्रजतो नगेषु पर्वतेषु च। यतो भूवलयं सर्वमश्वो ऽतो यं चरिष्यति। अतः कु
वलयो नाम स्याति लोके प्रयास्यति। कृत्वा तं निशंपापो यदिवोदानवाधमः। तमप्येनं समारुह्य द्विजश्रेष्ठ हनिष्यति। शत्रुजिन्नाम भूपालस्तस्य
पुत्रो ऽतुल्यजः। प्राप्येतदश्वरत्नं च ख्यातिमेतेन यास्यति। सो ऽहं त्वामनुसंप्राप्तस्तपसो विघ्नकारिणां। तन्निवारय भूपाल नात्र लोके पतिर्यतः। तदेत
दश्वरत्नं ते मया भूप निवेदितं। पुत्रमाज्ञापय तत्र तथा धर्मो न लुप्यते। स तस्य वचनाद्राजा तं वै पुत्रमृतध्वजं। तदश्वरत्नमारोप्य कृतकौतुक
मंगलं। अप्रेषयत्तु धर्मात्मा गालवेन समं तदा। स्वमाश्रमपदं सोपि तमादाय ययौ मुनिः। ८७। इति श्रीमार्कण्डेयपुराणे पितापुत्रसंवादे कुवलया
श्वीयो नाम॥ ।पिता उ। गालवेन समं गत्वा नृपपुत्रेण तेन यत्। कृतं तत्कथ्यतां पुत्रो विचित्रा युवयोः कथा। पुत्रावूचतुः। समगालवाश्रमे रम्ये तिष्ठ
न्भूपालनंदनः। सर्वविघ्नोपशमनं चकार ब्रह्मवादिनां। धीरं कुवलयाश्वं तं वसंतं गालवाश्रमे। मदावलेपो मदनो नो जानन्दानवाधमः। ततस्त्वं

३१

मार्कं गालवं विप्रं संध्योपासनतत्परं। शौकरं रूपमास्थाय प्रधर्षयितुमागतः। मुनिशिष्यैरथोत्कृष्टे शीघ्रमारुह्य तं हयं। अन्वधावद्धातैनं नृपपुत्रः
॥३२॥ शरासनी। आजघान च बाणेन चंद्रार्द्धाकारवर्चसा। आकृष्य चलवच्चापं चाशु चित्रोपशोभितं। बाणाभ्याहतः शीघ्रमात्मत्राणपरो मृगः। गिरि
पादपसंबाधां सोऽप्यक्रामन्महाटवीं। तमप्यन्वधावद्वेगेन तुरगो मनोजवः। नोदितो राजपुत्रेण पितुरादेशकारिणा। अतिक्रम्याथ वेगेन यो
जनानां सहस्रशः। धरण्या विवरे गर्त्ते पपात लघुविक्रमः। तस्यानंतरमेवाश्वः सोप्यश्वी तत्पतः सुतः। तिमिरे पातालगर्त्ते तिमिरे ह्यसमावृते॥
ततो नादृश्यत मृगः स तस्मिन्राजसूनुना। प्रकाशं च समापातालमपश्यत्तत्र चार्थिवात्मजः। ततोपश्यत्स सौवर्णप्रासादशतसंकुलं। पुरंदरपुरप्रख्यं
पुरप्राकारशोभितं। तत्र विश्य स तापश्यत्तत्र कंचिन्नरं पुरे। भ्रमता च ततो दृष्टा तत्र योषित्त्वरान्विता। सा पृष्टा तेन तन्वंगी प्रस्थिता क
स्यका। नोवाच किंचित्तत्प्रासादमारुरोह च भामिनी। सोप्यश्वमेकतो बध्वा तामेवानुससार वै। विस्मयोत्फुल्लनयनो निःशंको नृपतेः
सुतः। ततोपश्यत्स विस्तीर्णे पर्यंके सर्वकांचने। निषण्णां कन्यकामेकां काममुक्तां रतिमिवापरां। सुमुखीं सुभ्रु पीनश्रोणिपयोधरां। वि
वोष्ठीं तन्वंगीं नीलोत्पलविलोचनां। शशांकलेखाश्वामामद्रुताम्रकाणिकां। कारोः सुदर्शनां तां सुस्मितां स्थिरोलकां। तां द
ष्ट्वा चारु सर्वांगीं अनंगां गगनात्तामिव। सोऽवमत्यत पार्थिवसुतस्तां। सा ललदेवतां। सा च दृष्ट्वा तं बाला नीलकुंचितमूर्द्धजं। पीनोरस्कं पृथ
स्कंधं तां मन्मथमदनं शुभा। उत्तस्थौ चमत्कारसा चित्ते ऽथ समवाप्य सा। लज्जाविस्मयदैन्यानां सद्यस्तन्वी पदं गता। कोयं देवो नु यक्षो नु ॥३२॥

गंधर्वो वोरगोपि वा। विद्याधरो वा संप्राप्तः कृतपुण्यां मतिर्नरः। एवं विचिंत्य वत्र्यातिः श्वसन्ती च महीतले। उपविष्टा ततो मोहं जगामोर्द्ध्वं म
दिरेक्षणा। सोपि कामशराघातमवाप्य नृपतेः सुतः। तां समाश्वासयामास न भेतव्यमिति ब्रुवन्। सा च स्त्री या मदा दृष्टा पूर्वं ते
न महात्मना। तालवृंतमुपादाय पर्यवीजयदाकुला। समाश्वस्तां तदापृच्छत्तेन सा मोहकारणं। किंचिल्लज्जान्विता बाला तस्याः सख्य
न्यवेदयत्। सा चास्मै कथयामास तत्पुत्राय विस्तरात्। मोहस्य कारणं सर्वं तद्दर्शनसमुद्भवं यथा। तया समाख्यातं तदुक्तं शृणु
मानदा। सख्युवाच। विश्वावसुरिति ख्यातो दिवि गंधर्वराट्प्रभो। तस्येयमात्मजा सुभ्रूर्नाम्ना ख्याता मदालसा। वज्रकेतोः सुतश्चो
ग्रो दानवोऽरिविदारणः। पातालकेतुरिति ख्यातः पातालांतरसंश्रयः। तेनेयमुद्यानगता कृत्वा मायां तमोमयीं। अपहृत्य समानीता
बाले यं दुष्टबुद्धिना। आगामिन्यां त्रयोदश्यां उद्वक्ष्यति किलासुरः। स तु तां हेति चार्वंगीं शूद्रो वेदश्रुतीमिव। अनेनैव च दिने बाला मात्म
व्यापादनोद्यता। सुरभिश्चाह नायं त्वां प्राप्स्यते दानवाधमः। मर्त्यलोकमनुप्राप्य य एनं योत्स्यते शरैः। स ते भर्त्ता महाभागे अ
चिरेण भविष्यति। अहं चास्याः सखी नाम्ना कुंडला नाम नामतः। सुता विंध्यवतः पत्नी वीरपुष्करमालिनः। हते तस्मिन्नरिशुंभेन ती
र्थात्तीर्थमनुव्रता। चरामि दिव्यया गत्या परलोकार्थमुद्यता। पातालकेतुर्दुष्टात्मा वाराहं वपुरास्थितः। केनापि विद्धो बाणेन मु
नीनां त्राणकारणात्। तेनाहं त्वरिता विघ्नत्वरिता पुनरागता। सत्यमेव सखे नोपि ताडितो दानवाधमः। स्वीच मूर्छामगा मन्ये एतत्तके

मार्कं
॥३३॥

रणंश्रुत्वा।त्वयिप्रीतिमतीबालादर्शनादेवमानद।देवपुत्रोपमेत्वारूपौदार्यादिगुणशालिनि।भार्याचान्यस्यविहितायेनविद्धःसदान
वः।एतस्मात्कारणान्नाहंमहांतमियममागता।यावज्जीवंवनेत्वंगीदुःखमेवोपपत्स्यते।त्वय्यस्याहृदयंगमितंतोचान्याम
विष्यति।यावज्जीवंगतोदुःखमुत्स्यात्तान्यथावचः।अहंत्वस्याःप्रेम्णःप्रीत्यादुःखिताचसमागता।यतोविशेषोनैवास्तित्वसखीनिज
देहयोः।यद्येषाग्निमतंवीरपतिमाप्नोतिशोभना।तदात्वहंततःकुर्य्यांनिर्वृतलोकेनचेतसा।त्वंतुकोवाकिमर्थंवासंप्राप्तोत्रमहामते।
देवोदैत्योनुगंधर्वःपन्नगःकिन्नरोपिवा।नह्यत्रमानुषीगतिर्नचेदंमानुषंवपुः।तत्त्वमाख्याहिकथितंतथैवावितथंमया।।कुवलयाश्व
उवाच।यन्मांपृच्छसिधर्मज्ञेकस्त्वंकिंवासमागतः।तच्छृणुष्वामलप्रज्ञेकथ्यमानंमयादितस्तव।राज्ञःशत्रुजितःपुत्रःपित्रासंप्रेषितःशुभे।मुनि
रक्षणमुद्दिश्यगालवाश्रममागतः।कुर्वतोममरक्षांचमुनीनांधर्मचारिणां।विघ्नार्थमागतःकोपिशूकररूपमास्थितः।।मयासविद्धो
बाणेनचंद्रार्द्धाकारवर्चसा।अपक्रांतोतिवेगेनतमस्म्यनुगतोहयी।पपातसहसागर्त्तेसकोघोश्वश्चमामकः।सोहमश्वसमारूढस्तमे
स्यकःपरिभ्रमन्।प्रकाशमासादिवानपश्यंचभवतीमया।पृच्छ्यमानचमेकिंचित्त्वमवत्यादत्तमुत्तरं।त्वांचैवानुप्रविष्टोहमिमंप्रासादमुत्तम
इत्येतत्कथितंसत्यंनदेवोहंनदानवः।पन्नगोनचगंधर्वःकिंनरोनशुचिस्मिते।समस्ताःपूज्यपक्षेवैदेवाद्याममकुंडले।मानुषोस्मिवि
शंकातेनकर्त्तव्याचकर्हिचित्।पुत्रावृवाचतु।ततःप्रहृष्टासाकन्यासखीवदनमुत्तमं।लज्जाजडंवीक्ष्यमाणाकिंचिन्नोवाचमानिनी।सास
खीपुनरप्येनंप्रहृष्टाप्रत्युवाचा।यथाकथितंतेनसुरम्यावचनानुगं।कुंडलाउ।वीरसत्यमसंदिग्धंत्वंचता।निहितंवचः।नान्यत्रहृदयं ॥३३॥

ह्यस्याःदृष्टाप्रत्यर्थंप्रयास्यति।चंद्रमेवाधिकाकांतिःसमुपैतिरविंप्रभाः।भूतिर्द्धन्यमतिर्यारद्धांतिरस्येतिचोत्तमां।त्वय्येवविदितंसंदिग्धंसपापोदा
नवाधमः।सुरभिःसगवांमाता।कथंमिथ्यावदिष्यति।तदुर्न्ययंसंप्राप्ताचैवत्वंवयंसमेत्यवै।कुरुष्वीरयुक्तायंविधिमेवसमाहितः।करवा
णहमित्याहराजपुत्रात्सतांप्रतिः।साचतंचिंतयामाससनुतुरुंतत्कुलेगुरुं।सचापितत्क्षणात्प्राप्तःप्रगृहीतसमित्कुशान्।मदालसायाःस
प्रीत्याकुंडलागौरवेणच।प्रज्वाल्यपावकंकृत्वामंत्रवित्हुतमंगलं।वैवाहिकंविधिंकृत्वाप्रतिपद्ययथागतं।जगामतपसेधीमान्स्वमाश्रमपदंततदासा
चाहतांसखींबालांकृत्वाश्मिवराननेःसंयुक्तासमधुनादृष्टात्वामहंरूपशालिना।तपस्तप्स्येहमतुलंनिर्व्यलीकेनचेतसा।तीर्थांबुधूतपापाचनविनेद्ध
शीयथा।तंचाहराजपुत्रंसाप्रश्रयावनताततदा।गंतुकामानिजसखींस्नेहविक्लवभाषिणी।पुंभिरस्यमितप्रज्ञनोपदेश्यात्वद्विधैः।दातव्यःकिंसुतस्त्वीभिरतो
नोपदिशामिते।किंत्वस्यांतनुमध्यायांस्नेहाकृष्टेनचेतसा।त्वयाविश्रंभिताचास्मिस्मारयाम्यरिसूदन।यदाभार्याचभर्त्ताचपरस्परवशानुगौ।तदा
धर्मार्थकामानांत्रयाणामपिसंगतं।कथंभार्याम्रतेधर्मःकथंवापुरुषंप्रति।प्राप्नोतिकाममर्थंचतस्यांत्रितयमाहितं।तथैवभर्त्तारमृतेभार्याध
र्मार्थ्यंसाधनेनसमर्था।त्रिवर्गोयंदंपत्योःसमुपाश्रितः।देवतापितृभृत्यानामतिथीनांचपूजनं।नपुंभिःशक्यतेकर्तुमृतेभार्यांनृपात्मज।प्राप्तोपि
चार्थोमनुजैरानीतोपिनिजंगृहं।क्षयंयातिविनाभार्यांसंश्रयेकुभार्यासंश्रयेपिवा।कामस्तस्यनैवकःकंस्यास्तिप्रत्यक्षेणोपलक्ष्यते।पुत्राणांयानिर
त्याविनान्यतोभार्ययाविना।पितृन्पुत्रैस्तथैवान्नसाधनैर्निधोनपि।पूजान्विरयगंस्तद्वन्माध्वीभार्याभवेद्यदा।स्त्रियश्चापिविनानाद्वीधर्मका
मार्थसंततिं।नैवतस्मात्समालोक्यदांपत्यमधिगच्छति।एतन्मयोक्तंयुवयोर्गमिष्यामियथेप्सितं।वर्द्धत्वमनयासार्द्धंधनपुत्रसुखायुषा।इत्युक्त्वा

मार्कं
।।३४।।

संपरिषज्यस्वसखींतांनमस्यचा।जगामदिव्यमागत्याययथानिर्वृतमात्मनः॥सोपिशत्रुजितःपुत्रस्तामारोप्यतुरंगमं।निर्गंतुकामःपातालाद्विज्ञातो
दनुसंभवैः।ततस्तेःसहसाक्रुद्धाह्रियतेह्रियतेतिवै।कन्यारत्नयदानीतंदिवःपातालकेतुना।ततःपरिघनिस्त्रिंशगदाशूलशरायुधं।दानवानांबलंप्रा
पसहपातालकेतुना।तिष्ठतिष्ठेतिजल्पंतस्तेतदादानवोत्तमाः।शरवर्षैस्तदाशूलैर्ववृषुर्नृपनंदनं।सचशत्रुजितःपुत्रस्तेनस्त्राण्यतिवीर्यवान्।
चिच्छेदशरजालानिप्रहसन्निवलीलया।क्षणेनपातालतलमसिशक्त्यृष्टिसायकैः।छिन्नैःसंछिन्नमत्यर्थंशत्रुध्वजशरीरकैः।ततोस्त्रंत्वाष्ट्रमा
दायचिक्षेपप्रतिदानवान्।तेनतेदानवाःसर्वेसहपातालकेतुना।ज्वालामालातितीव्रेणस्फुरदस्थिचयाःकृताः।निर्दग्धाःकापिलंतेजसमासाद्यैव
सागराः।ततःसराजपुत्रोश्वोनिहत्यासुरसत्तमान्।स्त्रीरत्नेनसमंतेनसमागच्छत्पितुःपुरं।प्रणिपत्यचतत्सर्वंसतुपित्रेन्यवेदयत्।पातालगमनंचै
वकुंडलायाश्चदर्शनं।तद्वन्मदालसाप्राप्तिंदानवैश्चापिसंगरं।वधंचतेषामस्त्रेणपुनरागमनंतथा।इतिश्रुत्वापितातस्यचरितंचारुचेतसः।प्री
तश्चप्रणम्याश्चेदंपरिष्वज्याहचात्मजं।सत्पुत्रेणत्वयापुत्रतारितोहंमहात्मना।भयेभ्योब्राह्मणास्त्रातायेनसद्धर्मचारिणा।मत्पूर्वैःख्यातिमा
नीतमयाविस्तारितंपुनः।यशःक्षितितलेवीरत्वयातद्बहुलीकृतं।यदपात्रंयशःपित्राधनंवीर्यमथापिवा।तद्वर्त्तितंतथायस्तुसनरोमध्यमः
स्मृतः।तद्वीर्याभ्यधिकंयस्तुपुनरन्यत्स्वशक्तितः।निष्पादयतितंप्राज्ञावदंतिनरमुत्तमं।यःपित्रासमुपात्तानिधनवीर्ययशांसिवै।न्यूनतां
नयतिप्राज्ञास्तमाहुःपुरुषाधमं।तन्मयाब्राह्मणत्राणंकृतमासीद्यथात्वया।पातालगमनंयच्चयच्चारिपुविनाशनं।एतदभ्यधिकंवैतत्
तेनत्वंपुरुषोत्तमः।तद्धन्योसियथावान्नत्वमहंभवगुणाधिकः।त्वत्पुत्रमीदृशंप्राप्यश्लाघ्यःपुत्रवतामपि।नसपुत्रकृतांप्रीतिमनुप्राप्नोतिमा

नवः।पुत्रेणख्यातिमायातियःप्रज्ञादानविक्रमैः।धिक्तस्यजन्मयःपित्रालोकेविज्ञायतेनरः।यःपुत्रात्ख्यातिमभ्येतितस्यजन्मसुज
न्मनः।आत्मनाज्ञायतेधन्योमध्यःपितृपितामहैः।२।मातृपक्षेणमात्राचख्यातिंयातिनराधमः।तत्पुत्रवर्द्धवीर्येणत्वंविवर्द्धस्वसुखेन
चा।गंधर्वतनयाचेयंनावियुज्यतुवैत्वया।इतिपित्रावहुविधंप्रियमुक्तःपुनःपुनः।परिष्वज्यचमावासंसमाप्यःसविसर्ज्जितः।सतयाभार्य
यासार्द्धंरेमेतत्रपितुःपुरे।अन्येषुचतथोद्यानवनपर्वतसानुषु।स्वश्रूंश्वशुरयोःपादौप्रणिपत्यचसाशुभा।प्रातःप्रातस्तेनसहरेमेसुतनुमध्य
मा।ततःकालेवहुतिथेगतेराजापुनःसुतं।प्राहगच्छाशुविप्राणांत्राणायचरमेदिनीं।अश्वमेनंसमारुह्यप्रातःप्रातर्दिनेदिने।आवाधार्थद्विज
मुख्यानामन्वेष्ट्व्यासदैवहि।दुर्वृत्ताःसंतिशतशोदानवाःपापयोनयः।तेभ्योनस्याद्यथावाधामुनीनांत्वंतथाकुरु।सयथोक्तस्तथापि
त्रातस्याचक्रेनृपात्मजः।परिक्रम्यमहींकृत्स्नांववंदेचरणौपितुः।अहन्यहन्यनुप्राप्तेपूर्वाह्णेनृपनंदनः।ततश्चशेषंदिवसंतयासौम
सुमध्ययारेकदातुचरन्सोथददर्शयमुनातटे।पातालकेतोरनुजंतालकेतुंकृताश्रमं।मायावीदानवःसोथमुनिरूपंसमास्थितः।सप्राह
राजपुत्रंतंपूर्ववैरमनुस्मरन्।राजपुत्रब्रवीमित्वांतत्कुरुष्वयदीच्छसि॥नचतेप्रार्थनाभंगःकार्य्यःसत्यप्रतिश्रवः।यक्ष्येयज्ञेनधर्मा
यकर्त्तव्याश्चमयेष्टयः।चितिस्तत्रचकर्त्तव्यानास्तिमेदक्षिणायतः।ततःप्रयच्छमेवीरहिरण्यार्थंस्वभूषणं।यदेतत्कंठलग्नंते
रक्षचेमममाश्रमं।यावदंतर्जलेदेवंवरुणंयादसांपतिं।वेदिकैर्वारुणैर्मंत्रैःप्रजानांपुष्टिहेतुकैः।अभिष्टूयत्वरायुक्तःसमभ्येमि
तिवादिनं।तंप्रणम्यततःप्रादात्सतस्मैकंठभूषणं।प्राहचैवंवचोयातुनिर्व्यलीकेनचेतसा।स्थास्याम्यामितावदत्रैवतवाश्रमे

मार्क ॥३५॥

समीपतः। त्वया देशान्महाभाग यावदागमनं तव। नतेत्र कश्चिदाबाधां करिष्यति मयि स्थिते। विश्रब्धश्चात्वरन्नत्र कुरुष्व त्वं ग
तागतं। एवमुक्तस्ततस्तेन सममज्जन्नदीजले। ररक्षापि च तस्यैव मायया विहितमाश्रमं। गत्वा जलाशयात्तस्मात्तालकेतुः पितुः पु
रं। मदालसायाः प्रत्यक्षमन्येषां चैतदुक्तवान्। वीरः कुवलयाश्वोसौ मम आश्रमसमीपतः। केनापि दुष्टदैत्येन कुर्वन्रक्षां तपस्वि
नां। युध्यमानो यथाशक्ति विघ्नन्दुष्टान्द्विजद्विषः युधि। मायामाश्रित्य पापेन निर्भिन्नः शूलेन वक्षसि। म्रियमाणेन तेनेदं दत्तं मे कं
ठभूषणं। प्रापितश्चाग्निसंयोगं स वने तत्र तापसैः। हृत्वाश्वं हेषमाणं च भयाच्चैस्तैः ततः साश्रुविलोचनैः। नीतः सोश्वश्च तेनैव दान
वेन दुरात्मना। एतन्मया नृशंसेन दृष्टं दुःखितकारिणा। यदत्रानन्तरं कार्यं कुरुध्वं तत् कोलिको हृदयाश्वासनं चैतत्गृह्यतां कं
ठभूषणं। नास्माकं हि सुवर्णेन कृत्यमस्ति तपस्विनां। इत्युक्त्वोत्सृज्य तद्भूमौ स जगाम यथागतं। निपपात जनः सोथ शोका
र्तो मूर्छयातुरः। चुक्रोश नैव तत्रां प्राप्य सर्वास्तान् पयोधितः राजपत्न्यश्च राजा च विलेपुरतिदुःखिताः। मदालसा तु तद्दृष्ट्वा तदीयं
कंठभूषणं। तत्याज सुप्रिया प्राणान् श्रुत्वा च निहतं पतिं। ततः पुरे महाक्रंदः पौराणां समवर्तत यथैव तस्य नृपतेः स्वगे
हे समवर्तत। राजा च तां मृतां दृष्ट्वा विना भर्त्रा मदालसां। प्रत्युवाच जनं सर्वं विमृश्य स्वस्थमानसः। नरोदितव्यं पश्यामि भवता
मात्मनस्तथा। सर्वेषामेव संचिन्त्य संबंधानामनित्यतां। किं नु शोचामि तनयं किं नु शोचाम्यहं स्नुषां। विमृश्य कृतकृत्यत्वात् ॥३५॥
मन्ये शोच्यावुभावपि। मच्छुश्रूषुर्मद्वचनात् द्विजरक्षणतत्परः। प्राप्तो मे यः सुतो मृत्युं कथं शोच्यः स धीमतां। अवश्यं याति यो देहः स

राम

द्विजानां रक्षते यदि। मम पुत्रेण संयुक्तो नन्वस्युदयकारितत्। इयं च सत्कुलोत्पन्ना भर्तर्येवमनुव्रता। कथं शोच्या अथ नारीणां भर्तुरन्यन्न दैवतं॥
अस्माकं बांधवानां च तथान्येषां दयावतां। शोच्या ह्येषा भवेदेवं यदि भर्त्रा वियोगिनी॥ या तु भर्तुर्वधं श्रुत्वा तत्क्षणादेव भाविनी। भर्तारमनुया
तेयं न शोच्या तो विपश्चितां। ताः शोच्या या वियोगिन्यः सहभर्त्रा कुलांगनाः। भर्तुर्वियोगस्त्वनया नानुभूता कृतज्ञया। दातारं सर्वसौख्यानां
मिहामुत्र चो नयोः। लोकानां का हि भर्तारं नारी मन्येत मानुषं। न सेशोच्या न चैवाहं नाहं तज्जननी तथा। त्यजता ब्राह्मणार्थाय प्राणान्सर्वे वयं
तारिताः। विप्राणां मम धर्मस्य नातः सस्मु महामतिः। आनृण्यं मदत्यक्तं स्यत्यागात् देहस्य मे सुतः। मातुः सतीत्वं सद्वंशे वैमल्यं शौर्यमात्मनः। न संग्रामे
संत्यजन्प्राणान्सो विंदद्द्विजरक्षणात्। ततः कुवलयाश्वस्य माता तत्रागता ततः। श्रुत्वैतद्वधं सोदकप्राक्षेपं तु तं पतिं। न मे माता नमे स्वसा प्रा
प्राप्तप्रीतिर्नेदृशी। श्रुत्वा मुनिपरित्राणान् हतं पुत्रं यथा मया। शोचतां बांधवानां ये निःश्वसन्तोतिदुःखिताः। म्रियन्ते व्याधिना क्लिष्टास्तेषां माता वृथा
प्रजाः। संग्रामे युध्यमाना ये गोद्विजत्राणकारणात्। समाः शस्त्रैर्विपद्यन्ते त एव भुवि मानवाः। अर्थिनां मित्रवर्गस्य विद्विषां च पराङ्मुखाः। यो न याति
पिता तेन पुत्री माता च वीरसूः। गर्भक्लेशः स्त्रियो मन्ये सफलो जायते तदा। यदारिविजयी वा स्यात्संग्रामे वा हतः सुतः। पुत्रो वृत्तयुः। ततः स राजा संस्का
रं पुत्रपत्न्या मलं नयत्तु निर्गत्य बहिः स्नातो ददौ पुत्राय चोदकं। तालकेतुश्च निर्गम्य तथैव यमुनाजलात्। राजपुत्रमुवाचेदं प्रणयात् मधुरं वचः
गच्छ भूपालपुत्र त्वं कृतार्थोहं कृतस्त्वया। तन्मया साधितं सर्वं यन्ममासीदभीप्सितं। कार्यं यथा त्रिलेखितं त्वयि वा विचलस्थिते। प्रणिप
त्य सोपि प्रायाद्राजपुत्रः स पितुः। समारुह्य तमेवाश्वं सुपर्णानिलविक्रमं॥ ५६॥ इति श्रीमार्कंडेयपुराणे कुवलयाश्वविप्रलंभो नाम

मार्कं ध्यायः ॥ ।पुत्र उवाच ॥ स राजपुत्रः संप्राप्य वेगाद्गत्वा स्वपुरं ततः । पित्रोर्ववंदिषुः पादौ दिदृक्षुश्च मदालसां । स ददर्श तदुद्विग्नमप्रहृष्टमुखं
॥३६॥ पुरं । पुनश्च विस्मिताकारं स प्रहृष्टवदनं पुनः । अन्यत्र चोत्फुल्लनयनं दिष्ट्या दिष्ट्येति वादिनं । परिष्वजंतमन्योन्यमतिकौतूहलान्वितं । चिरंजीवी स
कल्याण हतास्ते परिपंथिनः । पित्रोः प्रह्लादय मनस्तथास्माकमकंटकः । इत्येवं वादिभिः पौरैः पुरः पृष्ठे च संवृतः । तत्क्षणप्रभवानंदः प्रविवे
श पितुः पुरं । पिता च तं परिष्वज्य माता चान्ये च बांधवाः । चिरंजीवेति कल्याणीं ददुस्तस्मै तदाशिषं । प्रणिपत्य ततः सोथ किमेतदिति विस्मि
तः । पप्रच्छ पितरं चाथ सोस्मै तद्वृत्तमुक्तवान् । स भार्यां तां मृतां श्रुत्वा हृदयेष्टां मदालसां । पितरौ च पुरो दृष्ट्वा लज्जाशोकाब्धिमध्यगः । चिंतया
मास बालां तां श्रुत्वा च निधनं गतां ॥ तत्याज जीवितं साध्वी धिग्मां निष्ठुरमानसं । नृशंसोहमनार्योहं विना तां मृगलोचनां मत्कृते निधनं
प्राप्तां यज्जीवाम्यतिनिर्घृणः । पुनः स चिंतयामास परिसंस्तभ्य मानसं । मोहोद्भ्रममपास्यैव निःश्वस्योच्छ्वस्य चातुरः । मृतेति सा मन्निमि
त्तं त्यजाम्यपि यदि जीवितं । किं मयोपकृतं तस्याः श्लाघ्यमेतत्तु योषितां । यदि रोदिमि वा दीनं हा प्रियेति वदन्मुहुः । तथापि श्लाघ्यमेत
न्नो वयं हि पुरुषाः किल । अथ शोकजडो दीनो मृजाहीनो मलान्वितः । विपक्षस्य भविष्यामि ततः परिभवास्पदं । मयारिशातनं कार्यं रा
ज्ञः शुश्रूषणं पितुः । जीवितं तस्य चायत्तं त्यजाम्यहं कथं । किंतु सर्वथा । मयान्नशोणंपि कर्त्तव्यं नोपकार्युपकारिका । या मदर्थं त्यजत्प्राणान्नृत
दर्थेल्पमिदं मम । इति कृत्वा मतिं सोथ निष्पाद्योदकदानिकं । क्रियाश्चानंतरं कृत्वा प्रत्युवाच ऋतुध्वजः । यदि सा मम तन्वंगी न स्या
द्भार्या मदालसा । अस्मिन्नजन्मनि नान्या मे भवित्री सहचारिणी । तां मृगशावाक्षीं गंधर्वतनयामहं । नत्यक्ष्ये योषितं कांश्चित्तइ ॥३८॥

तिसृत्यं मयोदितं । मुक्त्वैवं सर्वं परित्यज्य स्त्रीभोगान्न तान्सर्वदा । क्रीडन्नास्ते स समं तुल्यैर्वयस्यैः शीलसंपदा । एतत्तस्य परं कार्यं तात तत्केन शक्यते । का[illegible]
न्यथो दुष्प्रापमीश्वरैः किमुतेतरैः । इति वाक्यं तयोः श्रुत्वा विमर्शमगमत्पिता । विमृश्य प्राह तौ पुत्रौ नागराट् प्रहसन्निव । अयं ह्यशक्यमिति इ[illegible]थो
न करिष्यति मानवाः । कस्य वाप्युद्यममुद्योगहान्या हानिस्ततः परा । प्रारभेत नरः कर्म स्वपौरुषमहापयन् । निष्पत्तिः कर्मणो दैवे पौरुषे च व्यवस्थि
ता । तस्मादहं तथा यत्नं करिष्ये पुत्रकावुत । तपश्चर्यां समास्थाय यथैतल्लप्स्यते चिरात् । जड उ । एवमुक्त्वा स नागेन्द्रः प्लक्षावतरणं गिरेः । तीर्थं
हिमवतो गत्वा तपस्तेपे सुदुश्चरं । तुष्टाव गीर्भिस्ततस्तत्र देवीं सरस्वतीं । तन्मना नियताहारो भूत्वा त्रिषवणाप्लुतः । अश्वतर उवाच । जगद्धा
त्रीमहं देवीमाराधयिषुः शुभां । स्तोष्ये प्रणम्य शिरसा ब्रह्मयोनिं सरस्वतीं । सदसद्देवि यत्किंचिन्मोक्षवच्चार्थवत्पदं । तत्सर्वं त्वय्यसंयोगयो
गवद्देवि संस्थितं । त्वमक्षरं परं देवि यत्र सर्वं प्रतिष्ठितं । अक्षरं परमं ब्रह्म विश्वमेतत्क्षरात्मकं । दारुण्यवस्थितो वह्निर्भौमाश्च परमाणवः । तथा त्व
यि स्थितं ब्रह्म जगच्चेदमशेषतः । ॐकाराक्षरसंस्थानं यत्तद्देवि स्थिरास्थिरं । तत्र मात्रात्रयं सर्वमस्ति यद्देवि नास्ति च । त्रयो लोकास्त्रयो वेदास्त्रैविद्यं
पावकत्रयं । त्रीणि ज्योतींषि वर्गाश्च त्रयो धर्मादयस्तथा । त्रयो गुणास्त्रयः शब्दास्त्रयो दोषास्तथाश्रमाः । त्रयः कालास्तथावस्थाः पितरोहर्निशा
दयः । एतन्मात्रात्रयं देवि तव रूपं सरस्वति । विभिन्नदर्शिनामाद्या ब्रह्मणो हि सनातनाः । सोमसंस्था हविःसंस्थाः पाकसंस्थाश्च सप्त याः । तास्त्व
दुच्चारणाद्देवि क्रियंते ब्रह्मवादिभिः । अनिर्देश्यं तथा चान्यत् अर्द्धमात्राश्रितं परं । अविकार्यक्षयं दिव्यं परिणामविवर्जितं । तवैतत्परं रूपं
यन्न शक्यं मयेरितुं । न चास्येन च वा जिह्वाताल्वोष्ठादिभिरुच्यते । इंद्रोपि वसवो ब्रह्मा चंद्रार्कौ ज्योतिरेव च । विश्वावासं विश्वरूपं विश्वेशं परमे

मार्कं
॥३७॥ ख्यं।सांख्यवेदांतवेदोक्तंबहुशाखास्थिरीकृतं।अनादिमध्यनिधनंसदसन्नसदेवतु।एकंत्वनेकंनाप्येकंभवभेदसमाश्रितं।अनाख्यं
षड्गुणाख्यंचवर्गाख्यंत्रिगुणाश्रयं।नानाशक्तिमतामेकंशक्तिवैभाविकंपरं।सुखासुखंमहासौख्यंरूपंतत्त्वविभाव्यते।एवंदेवि
त्वयाव्याप्तंसकलंनिष्कलंचयत्।अद्वैतावस्थितंब्रह्मयच्चद्वैतेव्यवस्थितं।येर्थानित्यायेविनश्यंतिचान्येयेर्थाःस्थूलायेचसूक्ष्म
तिसूक्ष्माः।येवाभूमौयेंतरिक्षेन्यतोवातेषांत्वत्तएवोपलब्धिः।यच्चामूर्तंयच्चमूर्तंसमस्तंयद्वाभूतेष्वेकमेकंचकिंचित्।यद्दिव्यस्ति
क्ष्मातलेखेन्यतोवात्वत्संबद्धंतत्त्वदीयैर्व्यंजनैश्च।एवंस्तुतातदादेवीविष्णोर्जिह्वासरस्वती।प्रत्युवाचमहात्मानंनागमश्वतरंततः।स
रस्वत्युवाच।वरंतेकंबलभ्रातःप्रयच्छाम्युरगाधिप।तदुच्यतांप्रदास्यामियत्तेमनसिवर्तते।अश्वतरउ०।सहायंदेहिदेवित्वंपूर्वंकंबलमे
वच।समस्तस्वरसंबद्धंउभयोःसंप्रयच्छच।सरस्वत्युवाच।सप्तस्वराग्रामरागाःपन्नगसत्तम।गीतकानिचसप्तैवतावतीश्चैव
मूर्छनाः।तानाश्चैकोनपंचाशत्तथाग्रामत्रयंचयत्।एतत्सर्वंभवान्गाताकंबलश्चैवतेनघ।ज्ञास्यतेमत्प्रसादेनभुजगेंद्रापरंत
था।चतुर्विधंपदंतालंत्रिःप्रकारंलयत्रयं।यतित्रयंतथातोद्यंमयादत्तंचतुर्विधं।एतद्भवान्मत्प्रसादात्पन्नगेंद्रापरंचयत्।अस्यांतर्ग
तमायत्तंस्वरव्यंजनयोश्चयत्।तदशेषंमयादत्तंभवतःकंबलस्यच।यथानान्यस्यभूर्लोकेपातालेवापिपन्नग।प्रणेतारौभवंतौचसर्व
स्यास्यभविष्यतः।पातालेदेवलोकेचभूर्लोकेचैवपन्नगौ।इत्युक्त्वासातदादेवीसर्वजिह्वासरस्वती।जगामादर्शनंसद्योनागस्यकम
लेक्षणा।तयोश्चतद्यथावृत्तंभ्रात्रोःसर्वमजायत।विज्ञानमुभयोरग्र्यंपदतालस्वरादिकं।ततःकैलासशैलेंद्रशिखरस्थितमीश्वरं। ॥

गीतकैःसप्तभिर्गीतैस्तंत्रीलयसमन्वितैः।आरराधयिषूदेवंअनंगांगहरंहरं।प्रवृत्तौतुपरंयत्नंउभौसंहतवाक्करौ।प्रातर्निशायांम
ध्याह्नेसायंचैवतदगायतां।ततःकालेनमहताभूयमानोवृषध्वजः।तुतोषगीतकैस्तौचप्राहसंगृह्यतांवरः।ततःप्रणम्याश्वतरःकंबलेनस
मंतदा।व्यज्ञापयन्महादेवंशितिकंठमुमापतिं।यदिनौभगवान्प्रीतोदेवदेवत्रिलोचन।ततोयथाभिलषितंवरमेनंप्रयच्छतौ।मृताकु
वलयाश्वस्यपत्नीदेवमदालसा।तेनैववयसासद्योदुहितृत्वंप्रयातुमे।जातिस्मरायथापूर्वंतद्वत्कांतिसमन्विता।योगिनीयोगमाताचम
द्गेहेजायतांतुवा।ईश्वरउ०।यथोक्तंपन्नगश्रेष्ठसर्वमेतद्भविष्यति।मत्प्रसादादसंदिग्धंशृणुचेदंभुजंगम।श्राद्धेतुसमनुप्राप्तेपिबेथाःमध्य
मंपिंडमात्मना।भक्षयेतंफणिश्रेष्ठशुचिःप्रयतमानसः।भक्षितेचततस्तस्मिन्जायतेमध्यमात्फणात्।समुत्पत्स्यतिकल्याणी
तथारूपायथामृता।कामंचैवमनुध्यायकुरुत्वंपितृपूजनं।एतत्श्रुत्वाततस्तौतुप्रणिपत्यमहेश्वरं।रसातलंपुनःप्राप्तौपरितोषस
मन्वितौ।तथाचकृतवान्श्राद्धंसनागःकंबलानुगः।पिंडंचमध्यमंतद्वद्यथावदुपभुक्तवान्।तमभिध्यायतःकामंततःसातनुमध्यमा।जज्ञे ॥राम॥
निश्वसतःसद्यस्तद्रूपमध्यमात्फणात्।नचापिकथयामासकस्यचित्सभुजंगमः।अंतर्गृहेतांसुदतींस्त्रीभिर्गुप्तामधारयत्।तौचानुदिनमागत्यसुतौ
नागपतेःसुखं।ऋतध्वजेनसहितौविक्रीडातेऽमराविव।एकदातुसुतौप्राहसनागोऽश्वतरोमुदा।यन्मयापूर्वमुक्तंतुक्रियतेकिंनतत्तथा।सराजपुत्रो
युवयोरुपकारीममोत्तिकं।कस्मान्नानीयतेवत्सौउपकारीयमानदः।एवमुक्तौपुनस्तेनपित्रास्नेहवतासुतौ।गत्वातस्यपुरंसख्युरेमातेतेनधीमता।त
तःकुवलयाश्वेनकृत्वाकिंचित्कथांतरं।अब्रूतांप्रणयोपेतंस्वगेहगमनंप्रति।तावाहनृपपुत्रोसौतदिदंभवतोर्गृहं।धनवाहनवस्त्रादियन्मदी

मार्क ॥३८॥

यं तदेव वांछ्यं यस्य वांछितं दातुं धनं रत्नमथापि वा। तद्दीयतां द्विजसुतौ यदि वां प्रणयो मयि। एतावताहं देवेन वंचितोऽस्थ्रदुरात्मना। यद्भवद्भ्यां ममत्वं
नोम दीयेन्नयते गृहे। यदि वां मत्प्रियं कार्यं श्रनुग्राह्यो ऽस्मि वा यदि। तद्वृत्ते मम कोहे च ममत्वमनुकल्प्यतां। युवयोर्यन्मदीयं तन्मत्तस्तेनायुवयोः
स्वकं। एतत्सत्यं विजानीतं मत्स्वं प्राणो बहिश्चरः। पुनर्नैवं विभिन्नार्थं वक्तव्यौ हंद्विजोत्तमौ। मत्प्रसादपरौ प्रीत्या शापितौ हृदयेन मे। ततः स्नेहा
द्रवदनौ तावुभौ नागनंदनौ। ८३। ऊचतुर्नपतेः पुत्रं किंचित्प्रणयकोपितं। ऋतुध्वज न संदेहो यथैवाहं भवानिदं। तथैव चास्मन्मनसि नात्र चिं
त्यमतोऽन्यथा। किं चावयोः स्वयं पित्रा प्रोक्तमेतन्महात्मना। द्रष्टुं कुवलयाश्वं तमिच्छामीति पुनः पुनः। ततः कुवलयाश्वोसौ समुत्थाय वरासनात्।
यथाह तात इत्युक्त्वा प्रणाममकरोद्भुवि। कुवलयाश्व उवाच। धन्योहमतिपुण्योहं कोन्योस्ति सदृशो मया। यत्तातो मामभिद्रष्टुं करोति प्रवणं मनः।
तदुत्तिष्ठथ गच्छामस्तातताज्ञां क्षणमप्यहं। नउ उवाच। एवमुक्त्वा ययौ सोथ सह ताभ्यां नृपात्मजः। प्राप्य चश्वगोमतीं पुण्यां निर्गम्य नगराद्बहिः। ते
स्म ध्येन ययुस्ते वै नागेंद्रतनयौ दनाः। मेने च राजपुत्रोसौ पारे तस्यास्तयोर्गृहं। ततश्चाकृष्य पातालं तौ त्याताते नृपात्मजः। पाताले ददृशे
चोभौ सपन्नगौ कुमारकौ। फणामणिकृतोद्योतौ व्यक्तस्वस्तिकलक्षणौ। विलोक्य तौ सुरूपांगौ विस्मयोत्फुल्ललोचनः। विहस्य चाब्रवीत्प्रे
म्णा साधु मो द्विजसत्तमौ। कथयामासतुस्तौ च पितरं पन्नगेश्वरं। शांतमश्वतरं नाम माननीयं दिवौकसां॥ ॥रमणीयं ततोऽपश्यत्पातालं सरु
पात्मजः। कुमारैस्तरुणैर्वृद्धैर्नागै रूपशोभितं। तथैव नागकन्याभिः क्रीडंतीभिरितस्ततः। चारुकुंडलहारिभिस्तारासिगगनं यथा। गीतशब्दैस्त ॥३८॥
थाऽन्यत्र वेणुवीणास्वरानुगैः। मृदंगपणवानोद्यहारि वेश्मशताकुलं। वीक्षमाणः स पातालं ययौ शत्रुजितः सुतः। सहताभ्याममत्रीच्छाभ्यां पन्नगो

भ्याममरिंदमः। ततः प्रविश्य ते सर्वे नागराजनिवेशनं। ददृशुस्ते महात्मानमुरगाधिपतिं स्थितं। दिव्यमाल्यांबरधरं मणिकुंडलभूषणं। स्वच्छमुक्ताफ
ललताहारिहारोपशोभितं। केयूरिणं महाभागमासने सर्वकांचने। मणिविद्रुमवैदूर्यजालांतरितरूपके। सताभ्यां दर्शितस्तस्य ततोसा कुमसाविति।
वीरः कुवलयाश्वोयं पित्रे चासौ निवेदितः। ततो ननाम चरणौ नागेंद्रस्य ऋतुध्वजः। तमुत्थाप्य बलात्कंठं सनागः परिषस्वजे। मूर्ध्नि चैवमुपाघ्राय
चिरंजीवीत्युवाच ह। निहतामित्रवर्गश्च पित्रोः शुश्रूषणं कुरु। वत्स धन्यस्य ते कथ्यते परोक्षस्यापि ते गुणाः। नवतो मम पुत्राभ्यां श्लाघ्यायो मनिवे
दितः। तदेतैर्ववर्द्धथाः मनोवाक्कायचेष्टितैः। जीवितं गुणिनः श्लाघ्यं जीवन्नपि मृतोऽगुणः। गुणवान्निवृतिं पित्रोः शत्रूणां हृदये ज्वरं। करोत्या
त्महितं कुर्वन्विश्वासं च महासुने देवताः पितरो विप्राः मित्रार्थिविकलादयः। बांधवाश्च तथैच्छंति जीवितं गुणिनश्चिरं। परिवादनिवृत्तानां दुर्गते भु
दयावतां। गुणिनां सफलं जन्म संश्रितानां वियद्गतैः। पुत्र उवाच। एवमुक्त्वा स तं वीरं पुत्रावदमथाब्रवीत्। पूजां कुवलयाश्वस्य कर्तुकामो भुजंगमः
मः। स्नानादिकं कृत्संकृत्वा सर्वमेव यथाक्रमं। मधुपानादिसंयोगमाहारं च यथेप्सितं। ततः कुवलयाश्वेन हृदयात्स्वगृहे नया कथ्यपास्त्वल्पकं का
लं स्वाप्यमाहृष्टचेतसः। अनुमेने च तन्मौनी वचः शत्रुजितः सुतः। तथाचकारत्र्च पतिः पन्नगानामुदारधीः। समेत्य ते राजसूपनंदनैर्महोरगा
णामधिपः स सत्यवाक्। मुदायुतोऽन्नानि मधूनि चात्मवान्यथोपजोषं बुभुजे सहोरगः॥ ८५॥ इति श्री मार्कंडेयपुराणे ऋतुध्वजपातालगम
नं नाम। ।सुमतिरु॥ कृत्वाहारे महात्मान मधिपे पवनाशिनां। उपासांचक्रिरे पुत्रौ नृपालतनयस्ततः। कथाभिरनुरूपाभिः स महात्मा भुजंगमः
प्रीतिं संजनयामास पुत्रसख्युरुवाच ह। नवनंद्युर्स्वब्रूहि गेहमस्यागतस्य च। कर्तव्यमुस्थिजनशंकां पितरीवसुतो मयि। हिरण्यं वा सुवर्णं वा वस्त्रं वा ल

मार्कं
॥३९॥

मासनं। यस्याभिमतमत्यर्थं दुर्लभं तद्वृणुष्व मे। कुवलयाश्व उ। त्वत्प्रसादाद्भगवन्सुवर्णादि गृहे मम। पितुरस्ति ममाद्यापि न किंचित्कार्यमी
दृशैः। तातेन वर्षसहस्राय शासति मां वसुंधरां। तथैव त्वयि पातालं न मे याचत्स्वो मम वं मनः। ते सभाग्याः सपुण्याश्च येषां पितरि जीवति। तरुणा का
ल मे वित्तं तारुण्याद्वित्तकोटिषु। मित्राणि तुल्यशीलानि तद्वद्देहसमाननं जने। दृष्टो विद्यते वित्तं यो वनं किं तु नास्ति मे। असत्यर्थे नृणां यां चा
णां जायते मनः। सत्यर्थे कथं यांचा मम जिह्वा करिष्यति। न जानंति धनं किंचिद्गृहे संति नास्ति वा। पितृवाहुतरुच्छायां संश्रिताः सुखिनो दि
वो ये तु बाल्यात्प्रभृत्येव विना पित्रा कुटुंबिनः। ते सुखास्वादविभ्रंशात्तुमन्ये धात्रेव वंचिताः। न वयं त्वत्प्रसादेन धनरत्नादिसंचयात्। पितृस
क्तान्प्रयच्छामः कामतो नित्यमर्थिनां। तत्सर्वमिह सं … नप्राप्तं यदियुगलं तव। मत्कुंडमणिना मत्कं यच्चांगस्पर्शमाप्नवान्। सुमति
इत्येवं प्रश्रितं वाक्यमुक्तः पन्नगसत्तमः। प्राह राजसुतं प्रीत्या पुत्रयो रूपकारिणां। यदि रत्नसुवर्णादि मत्तो वाप्नुतते मनः। मदन्तमनतेः प्रीत
तद्दुहितं ददाम्यहं। कुवलयाश्व उ। भगवंस्त्वत्प्रसादेन प्राप्तं सर्वं गृहे मम। सर्वमस्ति विशेषेण संप्राप्तं तव दर्शनात्। कृतकृत्योऽस्मि चैतेन सफलं जी
वितं च मे। यदंगसंस्पर्शमितस्त्वं देवस्य मानुषः। ममौत्तमांगे त्वत्पादरजसा यदि हासदं। तेन वतत्प्राप्तं सर्वं मे किं मया पन्नगेश्वर। यदि त्ववश्यंदात
व्यो वरो मम यथेप्सितं। नत्पुण्यसंस्कारो हृदयान्मापयेतु मे। सुवर्णमणिरत्नादि वाहनं गृहमासनं। स्त्रियोऽन्नपानं पुत्राश्च चारु माल्यानुले ॥३९॥
पनं। ते ते च विविधाः कामा गीतवाद्यादिकं च यत्। सर्वमेतन्ममाभिमतं फलं पुण्यवनस्पतेः। तस्मात्तन्मूले सेके यत्नः कृतात्मना। कर्तव्यः पुण्य
सक्तानां न किंचिद्भुवि दुर्लभं। अश्वतर उ। एवं न विद्यते प्राज्ञ तव धर्माश्रिता मतिः। सत्यं चैतत्फलं सर्वं धर्मस्योक्तं यथा त्वया। तथाप्यवश्यं मद्गेह

मानतेन त्वयाधुना। मानुष्ये यत्सुदुष्प्राप्यं लोके दुःप्राप्यं भवतो मतं। जड उ। तस्य तद्वचनं श्रुत्वा स तदा नृपनंदनः। मुखावलोकनं चक्रे पन्नगेश्व
र पुत्रयोः। ततस्तौ प्रणिपत्योचतू राजपुत्रस्य यन्मतं। तत्पितुः सकलं वीरौ कथयामासतुः स्फुटं। तातास्य पत्नी दयिताभूत्वे मे विनिपाति
ता। अस्य जनदयिता तत्प्राणानां विपुले धाद्दुरात्मना। केनापि कृत वैरेण दानवेन दुरात्मना। गंधर्वराजस्य सुता नाम्ना ख्याता मदालसा।
कृतज्ञोऽयं ततस्तात प्रतिज्ञां कृतवानिमां। नान्या भार्या भवित्रीति वर्जयित्वा मदालसां। द्रष्टुं तां चारुसर्वांगीमयं वीरो ऋतुध्वजः। तात वांछ
ति यदि हि तत्क्रियतां ता … तं भवेत्। अश्वतर उ। भूतेर्वियोगिनो योगस्त्वादृशैरेवतादृशः। कथमेतद्विना स्वप्नं मायां वा शंवरोदितां। पुत्र उ।
ऋणाय त्वत्सुजनेशः पुत्रः शत्रुजितस्ततः। प्रत्युवाच महात्मानं प्रेमलज्जासमन्वितं। मायामयीमपि धुना मम तातमदालसां। यदि दर्शयते
मन्ये परं कृतमनुग्रहं। अश्वतर उ। तस्मात्पश्येयवत्स त्वं मायां चेद्दृष्टुमिच्छसि। अनुग्राह्योऽभवद्देहे वालोऽप्यस्य गतो गुरुः। पुत्र उ। आन
यामास नागेंद्रो गेहे गुप्तां मदालसां। दर्शयामास च तदा राजपुत्राय तां प्रभु सां। तेषां संमोहनार्थाय जजल्प च ततः स्फुटं। सेयं न वेत्ति ते त्वा
यो राजपुत्र मदालसा। पुत्र उ। स तां दृष्ट्वा तदा तन्वीं तत्क्षणाद्विगतत्रपः। प्रियेति तामभिमुखं ययौ वाचमुदीरयन्। निवारयामास वं नागा
श्वाश्वतरं त्वरन्। अश्वतर उ। मायेयं मा सुत प्राक्षीः प्रागेव कथितं तव। अंतर्धानमुपेत्याशु मायासंस्पर्शनादिभिः। ततः पपात मेदिन्यां सतु
मूर्च्छापरिप्लुतः। हा प्रियेति वदन्सोऽथ चिंतयामास भामिनीं। मोहा मम मायं नेवेति नालं प्रत्ययवानहं। येनाहं यातनारीणां विनाशस्त्वं नि

MEMORIAL
MEMORIAL

मार्कं
॥५०॥

पातितः। मायेति दर्शिता तेन मिथ्या मायेति वा स्फुटं॥ वाध्यं वै तेजसा भूमेराकाशस्य च चेष्टया॥ पुत्र उ॥ ततः कुवलयाश्वस्तु समाश्वास्य
भुजंगमः। कथयामास तत्सर्वं मृतसंजीवनादिकं॥ ततः प्रहृष्टः प्रतिलभ्य कांतां प्रणम्य नागान्निजमाजगाम। सो हृष्यमानः स्वपु
तमश्वमारुह्य सचिंतितमस्य मेते॥ ४४॥ इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने। ॥पुत्र उवाच॥ आगम्य स्वपुरं सोथ पि
त्रोः सर्वमशेषतः। कथयामास तन्वंगी यथा प्राप्ता पुनर्मया॥ ततो नामसाधुचरणौ स्वश्रूः श्वशुरयोः शुभा। स्वजनं च यथा पूर्वं वंद
नाश्लेषणादिभिः। ददौ गवां सहस्रं तु शतं राजा ऋतुध्वजः। हिरण्यं मणिरत्नानि ब्राह्मणानां महर्षितः। ततो वपरपात्रत्या सर्वोथ्वैव
कांतेंजलिः पूजयामास तन्वंगी यथा न्यायं यथा वयः। ततो मदालसा रेजे पौराणां नत्रवै पुरे। ऋतुध्वजश्च सुचिरं तया रेमे सु
मध्यया। निर्झरेषु च शैलानां निम्नगापुलिनेषु च। काननेषु च रम्येषु वनेषूपवनेषु च। पुरायहर्म्ये वोद्धमानः सोपि कामोपभो
गतः। स हृते नाति कांता सुरे मेरुप्यासु भूमिषु। ततः कालेन महता शत्रुजित्स नराधिपः। सम्यक्प्रशास्य वसुधां कालधर्ममुपेयिवा
न्॥ ततः पौरा महात्मानं पुत्रं तस्य ऋतुध्वजं। अभ्यषिंचत राजानं सदाराचारचेष्टितं। सम्यक्पालयतस्तस्य प्रजाः पुत्रानिवौर
सान्। मदालसायाः संजज्ञे पुत्रः प्रथमजस्तदा। तस्य चक्रे पिता नाम विक्रांत इति धीमतः। तुतुषुस्तेन वै भृत्या जहास च मदालसा॥
सा वै मदालसा पुत्रं बालमुत्तानशायिनं। उल्लापनच्छलेनाह रुदमानमविस्वरं। शुद्धोसि रे तात न तेस्ति नाम कृतं हि ते कल्पनया
धुनैव। पंचात्मकं देहमिदं न तेस्ति नैवास्य त्वं रोदिषि कस्य हेतोः। न वै भवान् रोदिति विश्वजन्मा शब्दोयमासाद्य महीशसूनुं ॥५०॥

विकल्प्यमानो विविधैर्गुणार्थैर्गुणाश्च भौताः सकलेंद्रियेषु। भूतानि भूतैः परिदुर्बलानि वृद्धिं समायांति यथेह पुंसः। अन्नांबु
प्रदानादिभिरेककस्य न तेस्ति वृद्धिर्न च तेस्ति हानिः। त्वं कंचुके शीर्यमाणे निजेस्मिन् तस्मिंश्च देहे मूढतां मा व्रजेथाः। शुभाशुभैः कौ
मैर्देहमेतन्मदादिमूढैः कंचुकस्ते पिनद्धः। तातेति किंचित्तनयेति किंचिदंबेति किंचिद्दयितेति किंचित्। ममेति किंचिन्न म
मेति किंचित्त्वं भूतसंघं बहु मानयेथाः। दुःखानि दुःखोपशमाय भोगान् सुखाय जानाति विमूढचेताः। तान्येव दुःखानि पुनः सु
खानि जानाति विद्वानविमूढचेताः। हासोस्थिसंदर्शनमक्षियुग्ममत्युज्ज्वलं तर्जनमंगनायाः। कुचादिपीनं पिशितं घनं तत्स्था
नं रतेः किं नरकं न योषित्। यानं क्षितौ यानगतं च देहो देहेपि चान्यः पुरुषो निविष्टः। ममत्वमुर्व्यां न तथा यथा स्वे देहेतिमात्रं च
त मूढतैषा॥ २०॥ इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने। जड उवाच। वर्धमानं सुतं सा तु राजपुत्री दिने दिने। तमुल्लापादिना
बोधमनयन्निर्ममात्मकं। यथा यथा बलं लेभे यथा लेभे मतिं पितुः। तथा तथात्मबोधं च सोवाप मातृभाषितैः। इत्थं तया स त
नयो जन्मप्रभृति बोधितः। चकार न मतिं प्राज्ञो गार्हस्थ्यं प्रति निर्ममः। द्वितीयोस्य सुतो जज्ञे तस्य नाम करोत्पिता। सुबाहुरय
मित्युक्तः हासाजहास मदालसा। तमप्येवं यथापूर्वं बालमुल्लापवादिनी। प्राह बाल्यात्प्रभृति स तत्प्राप्य बोधं महामतिः। ततस्तृतीयं
तनयं जातं स राजा शत्रुमर्दनः। यदाह तेन सा सुभ्रूर्जहासातिचिरं पुनः। तथैव सापि तन्वंगी बालत्वादेव बोधितः। क्रियाश्च कारितः
कामान्न किंचिदुपकारकं। चतुर्थस्य सुतस्याथ चिकीर्षुर्नाम भूमिपः। ददर्श तां शुभाचारां ईषद्धासां मदालसां। तां माह राजा सस्मितां

मार्कं चित्तौ तु हसा मस्मित्याननः। क्रियमाणे ऽपि तु तन्नाम्नि कं ध्यातामहं तस्य कारणं। विक्रान्तश्च सुबाहुश्च तथान्यः शत्रुमर्द्दनः। शो।
॥४१॥ भनानि नीतिनामानि तानि मन्ये कृतानि वै। यो यानि तत्र वं धृतानि गर्भाद्यो पयुतानि। असंस्थानानि वा मन्ये युदि तेमनसि स्थितं।
तदस्य क्रियतां नाम चतुर्थस्य सुतस्य मे। मदालसा उ। मया ज्ञातवतः कार्यमिह राजन्यथा त्वया। तथा नाम करोम्याशु चतुर्थस्य
सुतस्य ते। अलर्क इति धर्मज्ञः ख्यातिं लोके प्रयास्यति। कनीयानेष पुत्रो मे मतिमांश्च भविष्यति। पुत्र उ। तत्श्रुत्वा नाम पुत्रस्य कृतं राम
मात्रा महीपतिः। अलर्क इत्यसंबद्धं प्रहस्येदमथाब्रवीत्। न च त्वया यदिदं नाम मत्पुत्रस्य कृतं शुभे। किमीदृशमसंबद्धं अर्थः को ऽस्य मदाल
से। मदालसा उ। कल्पनेयं महाराज कृता संव्यवहारिकी। त्वत्कृतानां तथा नाम्नां शृणु भूपते निरर्थतां। वदंति पुरुषाः प्राज्ञा व्यापिनं पुरुषं य
तः। क्रांतिश्च गतिरुद्दिष्टा देशाद्देशांतरं तु या। सर्वगो न च यात्येव हि व्यापी देहस्य यतः। ततो विक्रांतसंज्ञेयं मतानमम निरर्थका। सुबाहुरि
ति या संज्ञा कृता न्यस्य सुतस्य ते। निरर्थ्या साप्यमूर्तत्वात्पुरुषस्य महीपते। पुत्रस्य यत्कृतं नाम तृतीयस्यारिमर्दनः। मन्ये तच्चाप्यसंब
द्धं शृणु चाप्यत्र कारणं। एक एव शरीरेषु सर्वेषु पुरुषो यदा। तदास्य राजन् कः शत्रुः को वा मित्रमिहेष्यते। भूतैर्भूतानि मृद्यंते अमूर्तो मर्द
नं कथं। क्रोधादीनां पृथक्त्वाद्वा न कल्प्यते ऽर्थता। यदि संव्यवहारार्थमसन्नाम प्रकल्प्यते। नाम्नि कस्मादलर्काख्ये नैरर्थ्यं भ
वतो मतं। एवमुक्तस्तया साधु महिष्या स महीपतिः। करोति किमिदं मूढे ममानाम्नायसम्मतो। दुष्टो च बोधदानेन यथा पूर्वसुतेषु मा। ॥४१॥

यदि ते मत्प्रियं कार्यं यदि ग्राह्यं वचो मम। तदेनं तनयं मार्गे प्रवृत्तेः संनियोजय। कर्ममार्गः समुच्छेदं नैवं देवि गमिष्यति पितृपिंडनिवृत्तिश्च नैवं साध्वि
भविष्यति। पितरो देवलोके ये तथा तिर्यक्त्वमागताः। यद्वन्मनुष्यतां याता भूतवर्गे च ये स्थिताः। तान्स्वपुण्यानपुण्यांश्च क्षुद्व्याप्तानात्मनः
स्तुतान्। पिंडोदकप्रदानेन नरः कर्मण्यवस्थितः। श्रद्धया यजते सुभ्रू तद्वद्देवातिथीनपि। देवैर्मनुष्यैः पितृभिः प्रेतैर्भूतैः सगुह्यकैः। वयोभिः
कृमिभिः कीटैर्नर एवोपजीव्यते। तस्मात्त्वं तन्वि पुत्रं मे यत्कार्यं द्वावयोर्वितोः। ऐहिकामुष्मिकायालं तत्कर्म प्रतिपादय। तेनैवमुक्ता सा प
त्नी विरं नारी मदालसा। अलर्कं नाम तनयमुवाचोल्लापवादिनी। पुत्र वर्द्धस्व मद्भर्तुर्मनो नंदय कर्मभिः। ऐहिकामुष्मिकायालं तत्सम्यक्प्रति
पादय। मित्राणामुपकाराय दुर्हृदां नाशनाय च। धन्यो ऽसि रे त्वं वसुधामशत्रुरेकश्चिरं पालयिता ऽसि पुत्र। तत्पालनादस्तु सुखोपभोगो धर्मा
त्फलं प्राप्स्यसि चामरत्वं। यज्ञैरनेकैर्विबुधानयजत्वं अन्नैर्द्विजान्संप्रीतोपाश्रितांश्च स्त्रियश्च कामैरतुलैश्चिरायुः युद्धैररीन्प्रीणयिता
ऽसि वीर। बालो मनो नंदय बांधवानां गुरोस्तथाज्ञाकरणैः कुमारः। स्त्रीणां युवा सत्कुलभूषणानां वृद्धो वने गोचरहो वनेचराणां। राज्यं कुर्वन्सु
हृदो नंदयेथाः साधून्रक्षंस्तात यज्ञैर्यजेथाः। दुष्टान्निघ्नन्वैरिणश्चाजिमध्ये गोविप्रार्थे वत्स मृत्युं व्रजेथाः। इति श्रीमार्कंडेयपु
राणे मदालसोपाख्याने प्रवृत्त्यनुशासनं॥ ।२६। एवमुल्लाप्यमानस्तु स तु मात्रा दिने दिने। ववृधे तनयः सो ऽपि वयसा चालर्कसं
ज्ञकः। स कौमारकमासाद्य कृतोपनयनः प्राज्ञः प्रणिपत्याह मातरं॥ मया यद्य देवकर्त्तव्यं ऐहिकामुष्मिकाय वै। सुखदं य
वेद तत्सर्वं प्रश्रयावनतस्य मे। मदालसा उवाच। वत्स राज्ये ऽभिषिक्तेन प्रजारंजनमादितः। कर्त्तव्यमविरोधेन स्वधर्मस्य महीभृता। व्यसनानि परित्य

।मार्कं ॥४५॥ ज्यस्य मूलहरणी वे। आत्मा रिपुभ्यः संरक्ष्यो वहिर्मंत्रविनिर्गमात्। अष्टधा नाशमाप्नोति स्वचक्रात्स्यंदनाद्यथा। तथा राजाप्यसंदिग्धं
वहिर्मंत्रविनिर्गमात्। [illegible] अज्ञातीयादमात्यान्विदोषतः। चरैश्चारैस्तथा शत्रोरन्वेष्टव्याः प्रयत्नतः। विश्वासो न तु कर्तव्यो
राज्ञा मित्राप्तबंधुषु। कार्ययोगादमित्रेपि विश्वसीत नराधिपः। स्थानवृद्धिक्षयज्ञेन षाड्गुण्यविदितात्मना। भवितव्यं नरेंद्रेण न का
मवशवर्तिना। प्रागात्मा मंत्रिणश्चैव ततो भृत्या महीभृता। जेयाश्चानंतरं पौरा विरुध्येत ततोऽरिभिः। यस्त्वेतानविजित्यैव वैरि
णो विजिगीषते। सोऽजितात्मा जितामात्यः शत्रुवर्गेण बाध्यते। तस्मात्कामादयः पूर्वं जेयाः पुत्र महीभृता। कामप्रसक्तमात्मानं स्मृत्वा
डुं निपातितं। निवर्तयेत्तथा क्रोधादनुह्रादं हतात्मजं। हतमैलं तथा लोभान्मदाद्वेनं द्विजैर्हतं। मानादनायुषः पुत्रं हतं हर्षात्पुरंजयः।
एभिर्जितैर्जितं सर्वं मरुत्तेन महात्मना। स्मृत्वा विवर्जयेदेतान् षड्दोषान्स महीपतिः। काककोकिलभृंगाणां वकव्यालशिखंडिनां।
हंसानां लोहकुक्कुटानां शिक्षेत चरितं नृपः। कौशिकस्य क्रियां कुर्याद्विपक्षे मनुजेश्वरः। चेष्टां पिपीलिकानां च काले भूपः प्रदर्शयेत्।
ज्ञेयाग्नेर्विस्फुलिंगानां बीजचेष्टा च शाल्मलेः। चंद्रसूर्यस्वरूपं च नीत्यर्थे पृथिवीभृता। वधकाब्जपसारभशूलिनीगुर्विणीस्तना
त्। प्रज्ञा नृपेण चादेया तथा चंडालयोषितः। शक्रार्कयमसोमानां तद्वद्वायोर्महीपतिः। रूपाणि पंच कुर्वीत महीपालनकर्मणि।
यथेंद्रश्चतुरो मासान्वाप्यौघेन चतुर्गतं। आप्याययेत्तथा लोकान्परिहारैर्महीपतिः। मासानष्टौ यथा सूर्यस्तोयं हरति रश्मि
भिः। सूक्ष्मेणोपायेन तथा शुल्कादिकं नृपः। यथा यमः प्रियद्वेष्यौ प्राप्ते काले नियच्छति। तथा प्रियाप्रिये राजा दुष्टादुष्टे स ॥५०॥
मो भवेत्। पूर्णेंदुमालोक्य यथा प्रीतिमाञ्जायते नरः। एवं यत्र प्रजाः सर्वा निर्वृतास्तच्छशिव्रतं। मारुतः सर्वभू

तेषु निगूढश्चरेत्तथा। एवं चरेत्तु पश्चारैः पौरामात्यारिवंधुषु। न लोभार्थेन कामार्थेनार्थार्थे यस्य मानसं। पदार्थैः कृष्यते धर्मान्न राजा स्वर्गमृच्छ
ति। उत्पथग्राहिणो मूढान्स्वधर्माच्चलितान्नरान्। यः करोति निजे धर्मे स राजा स्वर्गमृच्छति। वर्णधर्मा न सीदंति यस्य राष्ट्रे तथाश्रमाः। [illegible]स्य
सुखं तात परत्रेह च शाश्वतं। एतद्राज्ञः परं कृत्यं तथैतद्वृद्धिकारणं। स्वधर्मे स्थापनं नॄणां चाल्यते यन्न कुबुद्धिभिः। पालनेनैव भूतानां कृतकृत्यो
महीपतिः। सम्यक्पालयिता भागं धर्मस्याप्नोति वै यतः। २१॥ इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने। पुत्रे उवा। चे। तस्मात्तु वच
नं श्रुत्वा सोऽलर्को मातरं पुनः। पप्रच्छ वर्णधर्मांश्च वर्णाश्रमेषु वै। अलर्क उवाच। कथितो मे महाभागे राजवंशोचितस्त्वया। मम धर्मा ४म
मिच्छामि श्रोतुं वर्णाश्रमात्मकं। मदालसोवाच। दानमध्ययनं यज्ञो ब्राह्मणस्य त्रिधोदितः। धर्मो नान्यश्चतुर्थोस्ति धर्मस्तस्यापदं विना। याजनाध्या
पने शुद्धे तथा पुत्र प्रतिग्रहः। एष सम्यक्समाख्याता त्रितयं चास्य जीविका। दानमध्ययनं यज्ञः क्षत्रियस्याप्ययं त्रिधा। धर्मः प्रोक्तः क्षितेः रक्षा शस्त्रा
जीवश्च जीविका। दानं यज्ञोथ शुश्रूषा द्विजातीनां त्रिधा मया। व्याख्यातः शूद्रधर्मोपि जीविका कारुकर्मजा। तद्वद्द्विजातिशुश्रूषा पोषणं क्रयवि
क्रयौ। वर्णधर्मास्त्विमे प्रोक्ताः श्रूयतामाश्रमाश्रयाः। स्ववर्णधर्मात्संसिद्धिं नरः प्राप्नोति नच्युतः। प्रयाति नरकं प्रेत्य प्रतिषिद्धस्य सेवनात्। या
वत्तु नोपनयनं क्रियते वै द्विजन्मनः। कामचेष्टोक्तिभक्षस्तु तावद्भवति पुत्रक। कृतोपनयनः सम्यग्ब्रह्मचारी गुरोर्गृहे वसेत्तत्र च धर्मोस्य कथ्यते त
न्निबोध मे। स्वाध्यायोऽथाग्निशुश्रूषा स्नानं भिक्षाटनं तथा। गुरोर्निवेद्य तच्चाद्यमनुज्ञातेन सर्वदा। गुरोः कर्मणि सोद्योगः सम्यक्प्रीत्युपपा

।मार्कं ॥४३॥

ततः

दकः॥ तेनाहृतः प्रयोक्तैव ततस्योनान्यमानसः॥ एकं द्वौ सकलान्वापि वेदान्प्राप्य गुरोर्मुखात्। अनुज्ञातो वाथ दत्त्वा गुरवे दक्षिणां ततः॥ गार्हस्थ्या-
श्रमकामस्तु गृहस्थाश्रममावसेत्। वानप्रस्थाश्रमं वापि चतुर्थं चेच्छया पुनः॥ तत्रैव वा गुरोर्गेहे द्विजो निष्ठामवाप्नुयात्। गुरोरभावे तत्पुत्रे तच्छिष्ये
तत्सुते विना॥ शुश्रूषुर्निरभिमानो ब्रह्मचर्याश्रमं वसेत्॥ उपावृत्तस्ततस्तस्मात् गृहस्थाश्रमकाम्यया। ततो समानर्षिकुलां तुल्यां भार्यामरोगि-
णीं॥ उद्वहेत न्यायतो व्यंगां गृहस्थाश्रमकारणात्। स्वकर्मणा धनं लब्ध्वा पितृदेवातिथीनपि॥ सम्यक्संप्रीणयेद्भक्त्या पोषयेच्चाश्रितांस्तथा। भृत्यात्म-
जानाथ यामानृदीनान्धपतितानपि। यथाशक्त्यान्नदानेन वयांसि पशवस्तथा॥ एष धर्मो गृहस्थस्य स्वप्रकृत्या वृषितस्तथा॥ पितृदेवातिथिज्ञातिभुक्तशेषं
स्वयं नरः॥ भुंजीत च समं भृत्यैर्यथा विभवमात्मनः॥ एष तूद्देशतः प्रोक्तो गृहस्थस्याश्रमो मया। वानप्रस्थस्य धर्मं ते कथयाम्यवधार्यतां॥ अपत्यसंततिं दृ-
ष्ट्वा प्राज्ञो देहस्य चानतिं। वानप्रस्थाश्रमं गच्छेदात्मनः शुद्धिकारणात्। तत्रारण्योपभोगैश्च तपोभिश्चात्मकर्षणं। भूमौ शय्या ब्रह्मचर्यं पितृदेवातिथिक्रियाः।
होमस्त्रिषवणस्नानं जटावल्कलधारिणं। मौनादिकरणं चैव वन्यस्नेहनिषेवनं। इत्येष आत्मशुद्ध्यर्थमतस्तस्योपकारकः॥ वानप्रस्थाश्रमस्तस्मात्तृतीयस्तु च-
रमोऽपरः। चतुर्थस्य स्वरूपं तु श्रूयतामाश्रमस्य मे। यश्च धर्मोऽस्य धर्मज्ञैः प्रोक्तस्तान्महात्मभिः॥ सर्वसंगपरित्यागो ब्रह्मचर्यमकोपिता। यतेंद्रियत्वमावासे नैक-
स्मिन्वसतिश्चिरं॥ अनारंभस्तथाहारो भैक्ष्यान्नेनैककालिकः॥ आत्मज्ञानावबोधेच्छा तथा चात्मावलोकनं। चतुर्थे त्वाश्रमे धर्मो मयायं ते निवेदितः॥ सामान्य-
मन्यवर्णानामाश्रमाणां च मे शृणु। सत्यं शौचमहिंसा च अनसूया तथा क्षमा॥ आनृशंस्यमकार्पण्यं संतोषश्चाष्टमो गुणाः॥ एते संक्षेपतः प्रोक्ता धर्मा वर्णाश्र-
मेषु ते। एतेषु नित्यं धर्मेषु स्वेषु तिष्ठन्त्समंततः॥ यश्चोल्लंघ्य परं धर्मं स्ववर्णाश्रमसंज्ञितं। नरोऽन्यथा प्रवर्त्तेत सदंडो नृपतेर्भवेत्। ये च स्वधर्मसंत्यागात्पापं कुर्व-
न्ति मानवाः॥ उपेक्षितास्तान्नृपतेरिष्टापूर्त्तं प्रयात्यधः॥ तस्माद्राजा प्रयत्नेन सर्ववर्णाः स्वधर्मतः। प्रवर्त्तंतोऽन्यथा दंड्याः स्थाप्याश्चैव स्वकर्मसु॥४१॥ इति श्री ॥४२

मार्कंडेयपुराणे मदालसोपाख्याने। ॥ अलर्क उवाच॥ यत्कार्यं पुरुषेणेह गार्हस्थ्यमनुवर्त्तता। वंधश्च स्यादकरणे क्रियया यस्य चोद्धृतिः॥ उपका-
राय यन्नृणां यच्च वर्ज्यं गृहे सता। यथा च क्रियते तन्मे यथावत्पृच्छतो वद॥ मदालसोवाच॥ वत्स गार्हस्थ्यमास्थाय नरः सर्वमिदं जगत्। पुष्णाति तेन लोकां-
श्च स जयत्यभिवांछितान्॥ पितरो मुनयो देवा भूतानि मनुजास्तथा। कृमिकीटपतंगाश्च वयांसि पशवोऽसुराः॥ गृहस्थमुपजीवंति ततस्तृप्तिं प्रयांति
च। मुखं चास्य निरीक्षंते अपि नो दास्यतीति वै॥ सर्वस्याधारभूतेयं वत्स धेनुस्त्रयीमयी। यस्यां प्रतिष्ठितं विश्वं विश्वहेतुश्च या मता॥ ऋक्पृष्ठा-
सौ यजुर्मध्या सामवक्त्रशिरोधरा। इष्टापूर्त्तविषाणा च साधुसूक्ततनूरुहा॥ शांतिपुष्टिशकृन्मूत्रा वर्णपादप्रतिष्ठिता। उपजीव्या च जगतामक्ष-
याना ऽपचीयते। स्वाहाकारः स्वधाकारो वषट्कारश्च पुत्रक। हंतकारस्तथैवान्यस्तस्याः स्तनचतुष्टयं॥ स्वाहाकारं स्तनं देवाः पितरश्च स्वधाम-
यं। मुनयश्च वषट्कारं देवभूतसुरेश्वराः॥ हंतकारं मनुष्याश्च पिबंति सततं स्तनं। एवमाप्याययत्येषा देवादीनां खिलां त्रयी॥ तेषामुच्छेदकर्त्ता यः पु-
रुषो ऽत्यंतपापकृत्। स तमस्यंधतामिस्रे तामिस्रे च निमज्जति॥ एतद्धेनुस्तनचतुष्कं तु नरः स्तनचतुष्टयं। नातियुंज्याद्यथाकाले तेन तस्य स्तनैवमाविताः। दे-
वादीन्खिलान्येषु संतर्पयति मानवः॥ यस्त्वेतां मानवो धेनुं चैव णोरमणादिभिः। प्रापयत्सु चितेकाले स स्वर्गायोपपद्यते॥ तस्मात्पुत्र मनुष्येण दे-
वर्षिपितृमानवाः। भूतानि चानुदिवसं पोष्याणि स्वतनुर्यथा॥ तस्मात्स्नातः शुचिर्भूत्वा देवर्षिपितृतर्पणं। प्रजापतेस्तथैवाद्भिः काले कुर्या-
त्समाहितः॥ सुमनोगंधपुष्पैश्च देवानभ्यर्च्य मानवः। ततोऽग्नेस्तर्पणं कुर्याद्दद्याच्च बलिमित्यथो॥ ब्रह्मणो गृहमध्ये च विश्वेदेवेभ्य एव च।
धन्वंतरिसमुद्दिश्य प्रागुदीच्यां बलिं क्षिपेत्। प्राच्यां शक्राय याम्यायां यमाय बलिमाहरेत्॥ प्रतीच्यां वरुणायेव सोमायोत्तरतो बलिं

मार्कं ॥४४॥ ।दद्याद्द्वारे विधात्रे च बलिं द्वारे गृहस्य तु। अर्यम्णे च बहिर्दद्याद्गृहस्यास्य समंततः। नक्तंचरेभ्यो भूतेभ्यो बलिमाकाशतो
हरेत्। पितॄणां निर्वपेच्चैव दक्षिणाभिमुखः स्थितः। गृहस्थस्तन्मयो भूत्वा सुसमाहितमानसः। ततस्तोयमुपादाय तेष्वेवाचमनं ता
यवे। स्थानेषु निक्षिपेत्प्राज्ञः स्तास्तामुद्दिश्य देवताः। एवं गृहबलिं कृत्वा गृहे गृहपतिः शुचिः। आप्यायनाय भूतानां कुर्यादुत्सर्गमा
दरात्। श्वभ्यश्च श्वपचेभ्यश्च वयोभ्यश्चावपेद्भुवि। विश्वदेवं हि नामैतत्सायंप्रातरुदाहृतं। आचम्य च ततः कुर्यात्प्राज्ञो द्वारावलो
कनं। मुहूर्त्तस्याष्टमं भागमुदीक्षेतातिथिर्भवेत्। अतिथिं तत्र संप्राप्तमन्नाद्येनोदकेन च। संपूजयेद्यथाशक्त्या गंधपुष्पादिभिस्तथा।
न मित्रमतिथिं कुर्यान्नैकग्रामनिवासिनं। अज्ञातकुलनामानं तत्कालसमुपस्थितं। बुभुक्षुमागतं श्रांतं याचमानमकिंचनं। ब्राह्म
णं प्राहुरतिथिं संपूज्यः शक्तितो बुधैः। न पृच्छेद्गोत्रचरणं स्वाध्यायं चापि पंडितः। शोभनाशोभनाकारं तं मन्येत प्रजापतिं। अनित्यं हि स्थि
तो यस्मात्तस्मादतिथिरुच्यते। तस्मिन्तृप्ते नृयज्ञाख्यादृणान्मुच्येत गृहाश्रमी। नातिकाम्यैतं मत्वा तु पूजयेत्प्रयतो नरः। न सद
त्त्वा तु यो भुंक्ते स्वयं किल्बिषभुक्गृही। स पापं केवलं भुंक्ते पुरीषं चान्यजन्मनि। अतिथिर्यस्य भग्नाशो गृहात्प्रतिनिवर्त्तते। स दत्त्वा दुष्कृतं
तस्मै पुण्यमादाय गच्छति। अप्यंबुदशाकदानेन यद्वाप्यश्नाति संस्वयं। पूजयेत्तन्नरः शक्त्या तेनैवातिथिमादरात्। कुर्याच्चाहरहः श्राद्धम
न्नाद्येनोदकेन वा। पितॄनुद्दिश्य विप्रांश्च भोजयेद्विप्रमेव वा। अन्नस्याग्रं समुद्धृत्य ब्राह्मणायोपपादयेत्। भिक्षां च याचतां दद्यात् ॥४४॥
परिव्राड्ब्रह्मचारिणां। ग्रासप्रमाणा भिक्षा स्याद्ग्रासं ग्रासचतुष्टयं। अग्रं चतुर्गुणं प्राहुर्हंतकारं द्विजोत्तमाः। भोजनं हंतकारं वा अग्रं

भिक्षामथापि वा। अदत्त्वा तु न भोक्तव्यं यथाविभवमात्मनः। पूजयित्वातिथीन्विप्रान्ज्ञातीन्स्वजनबांधवान्। विकलान्बालवृद्धांश्च भोजयेच्चातुरांस्तथा।
वांछेतच्छुत्परीतात्मा यद्वान्योऽन्नमकिंचनः। कुटुंबिनो भोजनीयाः स्वसंविते सति। श्रीमंतं ज्ञातिमासाद्य यो ज्ञातिरवसीदति। सीदता यत्कृतं तेन तत्पापं समम
श्नुते। सायं चैष विधिः कार्यः सूर्योढं तत्र चातिथिं। पूजयेत यथाशक्त्या शयनासनभोजनैः। एवं सुद्वहतस्त्वान गार्हस्थ्यं भारमाहितं। तस्य विधातादेवाश्च पित
रश्च महर्षिभिः। श्रेयोभिवर्षिणः सर्वे तथैवात्यातिथिबांधवाः। पशुपक्षिगणास्तुष्टाः ये चान्ये सूक्ष्मकीटकाः। गाथाश्चात्र महात्मानस्त्वयमत्रिर्गायतातः शृणुष्व
महाभाग गृहस्थाश्रमसंस्थिताः। देवान्पितॄंश्चातिथींश्च तद्वत्संपूज्य बांधवान्। जामीस्तथा गुरूंश्चैव गृहस्थो विभवे सति। श्वभ्यश्च श्वपचेभ्यश्च वयोभ्य
श्चावपेद्भुवि। वैश्वदेवं हि नामैतत्कुर्यात्सायं दिने तथा। मांसमन्नं तथा शाकं गृहे यच्चापि साधितं। न च तत्स्वयमश्नीयात् विधिवद्यन्न निर्वपेत्। ७५ इति ४५
श्रीमार्कंडेयपुराणे सदाचारनिर्णये। ।मदालसोवाच। नित्यं नैमित्तिकं चैव नित्यनैमित्तिकं तथा। गृहस्थस्य त्रिधा कर्म तन्निशामय पुत्रक। पंचयज्ञाश्रितं
नित्यं यदेतत्कथितं तव। नैमित्तिकं तथा चान्यत्पुत्रजन्मक्रियादिकं। नित्यनैमित्तिकं ज्ञेयं पर्वश्राद्धादि पंडितैः। तत्र नैमित्तिकं वक्ष्ये श्राद्धमभ्युदयाय वै। पुत्रज
न्मनि यत्कार्यं जातकर्मसमं नरैः। विवाहादौ च कर्तव्यं सर्वं सम्यक्क्रमोदितं। पितरश्चात्र संपूज्याः ख्याता नांदीमुखाश्च ये। पिंडांश्च दधिसंमिश्रान्दद्याद्यवसम
न्वितान्। उदङ्मुखः प्राङ्मुखो वा यजमानः समाहितः। वैश्वदेवविहीनं तत्केचिदिच्छंति मानवाः। युग्माश्चात्र द्विजाः कार्यास्ते पूज्याश्च प्रदक्षिणं। एतन्नैमित्तिकं
वृद्धौ तथान्यन्नौर्ध्वदेहिकं। मृताहनि तु कर्त्तव्यमेकोद्दिष्टं शृणुष्व तत्। दैवहीनं तथैकार्घं तथैवैकपवित्रकं। आवाहनं न कर्त्तव्यं अग्नौकरणवर्जितं। प्रेतस्य पिं
डमेकं दद्यादुच्छिष्टसंनिधौ। तिलोदकं चापसव्यं तन्नामास्मरणादिकं। अक्षय्यममुकस्येति स्थाने विप्रविसर्जने। अभिरम्यतामिति ब्रूयात् ब्रूयुस्तेऽभिरताः स्म ते

मार्क
॥४५॥

प्रतिमासं भवेदेतत्कार्यं मासवत्सरात्परैः। सपिंडीकरणं कार्यं तत्रापि विधिरुच्यते। तच्चापि दैवरहितमेकार्घ्यैकपवित्रकं। नैवाग्नौकरणं तत्र तच्चावाहनवर्जितं॥
अपसव्यं च तत्रापि भोजयेदयुजो द्विजान्। विशेषस्तत्र चान्योस्ति प्रतिमासं क्रियाधिकः। तं कथ्यमानमेकाग्रो गदत्या मे निशामय। तिलगंधोदकैर्युक्तं। तत्र
पात्रचतुष्टयं। कुर्यात्पितॄणां त्रितयं एकं प्रेतस्य पुत्रक। पात्रत्रयं प्रेतपात्रं सर्घार्थं च प्रसेचयेत्। ये समाना इति जपन् पूर्ववच्छेषमाचरेत्। स्त्रीणाम
प्येवमेवैतदेकोद्दिष्टमुदाहृतं। सपिंडीकरणं तासां पुत्राभावे न विद्यते। प्रतिसंवत्सरं कार्यं एकोद्दिष्टं नरैः स्त्रियाः। मृताहनि यथान्यायं यथाहादिहोदितं पु
त्राभावे सपिंडास्तु तदभावे सहोदकाः। मातुःसपिंडायेवस्तु ये वा मातामहोदकाः। कुर्युरेवं विधिं सम्यगपुत्रस्य सुताः सुताः। कुर्युर्मातामहायेवं पुत्रिका
तनयास्तथा। आमुष्यायणसंज्ञास्तु मातामहपितामहान्। पूजयेयुर्यथान्यायं श्राद्धैर्नैमित्तिकैरपि। सर्वाभावे स्त्रियः कुर्युः स्वभर्तॄणाममंत्रकं। तदभा
वे च नृपतिः कारयेत्स्वकुटुंबवत्। तज्जातीयैर्नरैः सम्यक् दाहाद्याः सकलाः क्रियाः। सर्वेषामेव वर्णानां बांधवो नृपतिर्यतः॥ एतास्ते कथिता वत्स नि
त्यानैमित्तिकास्तथा। क्रियाश्राद्धाश्रया मन्यां नित्यनैमित्तिकां शृणु। दर्शस्तत्र निमित्तं वै कालश्चंद्रक्षयात्मकः। नित्यतां नियतः कालः तस्याः
संप्रुचनात्मकः।२५।इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने। ।मदालसा उ।सपिंडीकरणादूर्ध्वं पितुर्यः प्रपितामहः। स तु लेपभुजो याति प्र
लुप्तः पितृपिंडतः। तेषामन्यश्चतुर्थो यः पुत्रलेपभुजां स तु। सोपि संबंधतो हीनमुपभोगं प्रपद्यते। पिता पितामहश्चैव तथैव प्रपितामहः। पिंडसं
बंधिनो ह्येते विज्ञेयाः पुरुषास्त्रयः। ये पि संबंधिनश्चान्ये पितामहपितामहात्। प्रभृत्युक्तास्तांस्तेषां यजमानश्च सप्तमः। इत्येष मुनिभिः प्रोक्तः
संबंधः साप्तपौरुषः। यजमानात्प्रभृत्यूर्ध्वं अन्यलेपभुजस्तथा। ततोन्ये पूर्वजाः सर्वे ये चान्ये नरकौकसः। ये च तिर्यक्त्वमापन्ना ये च भूतादिसंस्थि ॥४५॥

ताः। तान्सर्वान्यजमानो वै श्राद्धं कुर्वन्यथाविधि। समाप्याययते वत्स येनयेन शृणुष्व तत्। अन्नप्रकिरणं यत्तु मनुष्यैः क्रियते भुवि। तेन तृप्ति
मथायान्ति ये पिशाचत्वमागताः। यदंबु स्नानवस्त्रोत्थं भूमौ पतति पुत्रक। तेन ये तरुतां प्राप्तास्तेषां तृप्तिः प्रजायते। यास्तु गंधांबुकणिकाः
पतंति धरणीतले। ताभिराप्यायनं तेषां ये देवत्वं कुले गताः। उद्धृतेष्वथ पिंडेषु याश्चान्नकणिका भुवि। ताभिराप्यायनं तेषां ये तिर्यक्त्वं कुले गताः।
ये वाहताः कुले बालाः क्रियायोग्या ह्यसंस्कृताः। विपन्नास्ते न्नविकिरणसंमार्जनजलाशिनः। भुक्त्वा चाचमतां यच्च जलं यच्चांघ्रिशौचने। ब्रा
ह्मणानां तथैवान्ये तेन तृप्तिं प्रयांति वै। ये पिशाचत्वमापन्नाः कृमिकीटत्वमेव वा। एवं यो यजमानस्य यच्च तेषां द्विजन्मनां। कश्चिज्जला
न्नविक्षेपः शुचिरुच्छिष्ट एव वा। तेनान्ये तत्कुले तत्र तिर्यग्योन्यंतरं गताः। प्रयांत्याप्यायनं वत्स सम्यक् श्राद्धक्रियावतां। अन्यायोपा
र्जितैर्विज्ञैर्यच्छ्राद्धं क्रियते नरैः। तृप्यंति तेन चांडालपुल्कसाद्यासु योनिषु। एवमाप्यायते वत्स बहूनामपि बांधवैः। श्राद्धं कुर्वद्भिरन्नां
बुशाकैरपि हि जायते। तस्माच्छ्राद्धं नरो भक्त्या शाकैरपि यथाविधि। कुर्वीत कुर्वतः श्राद्धं कुले कश्चिन्न सीदति। तस्य कालानहं वक्ष्ये नि
त्यनैमित्तिकात्मकान्। विधिना येन च नरैः क्रियते तन्निबोध मे। कार्यं श्राद्धममावास्यां मासि मास्युडुपक्षये। तथाष्टकास्वप्यवश्यं इ
ष्टकालं निबोध मे। विशिष्टब्राह्मणप्राप्तौ सूर्यचंद्रग्रहे नायने। विषुवद्वाविसंक्रांतिव्यतीपातेषु पुत्रक। श्राद्धार्हद्रव्यसंप्राप्तौ तथा दुःस्वप्नदर्श
ने। जन्मर्क्षग्रहपीडासु श्राद्धं वीत स्वेच्छया। विशिष्टश्रोत्रियो योगी वेदविज्ज्येष्ठसामगः। त्रिणाचिकेतस्त्रिमधुस्त्रिसुपर्णः षडंगवित्। दौहित्रश्च
ऋत्विग्जामातृस्वस्त्रीयाः श्वशुरस्तथा। पंचाग्निकर्मनिष्ठश्च तपोनिष्ठोथ मातुलः। मातापितृपरश्चैव शिष्यसंबंधिबांधवाः। एते द्विजोत्तमाः श्रा

मार्कं ॥४८॥

ऊर्ध्वसमस्ताः केतनस्तमाः ॥ अवकीर्णी तथा रोगी न्यूनोऽधांगस्तथाधिकः ॥ पौनर्भवस्तथा काणः कुंडो गोलोऽथ पुत्रक ॥ मित्रध्रुक् कुनखी क्लीबी
श्यावदंतो निराकृतिः ॥ अभिशस्तस्तथा स्तेनः पिशुनः सोमविक्रयी ॥ कन्यादूषयिता वैद्यो गुरुपित्रोस्त्यागकः ॥ भृतकाध्यापको मित्रः परपू-
र्वापतिस्तथा ॥ वेदोज्झोऽग्निमुज्झी च वृषलीपत्यदूषितः ॥ अथान्ये च विकर्मस्था ज्याः पित्र्येषु वै द्विजाः ॥ निमंत्रयीत पूर्वेद्युः पूर्वोक्तान्द्वि-
जसत्तमान् ॥ दैवे नियोगे पित्र्ये च तांस्तथैवोपकल्पयेत् ॥ तैश्च संयमिभिर्भाव्यं यश्च श्राद्धं करिष्यति ॥ श्राद्धं दत्त्वा च भुक्त्वा च य स्त्यां वा
मंत्रणे निशि ॥ श्राद्धं दत्त्वा च भुक्त्वा च मैथुनं योऽनुगच्छति ॥ पितरस्तस्य तन्मासं तस्मिन्रेतसि शेरते ॥ गत्वा तु योषितं श्राद्धं यो भुंक्ते य-
श्च गच्छति ॥ रेतोमूत्रकृताहारास्तं मासं पितरस्तयोः ॥ तस्मात्तु प्रथमं कार्यं प्राज्ञेनोपनिमंत्रणं ॥ अप्राप्तौ तद्दिने वापि हित्वा योषित्प्रसंगिनो ॥ भि-
क्षार्थमागतान्वापि काले संयमिनो यतीन् ॥ भोजयेत्प्रणिपत्यादौ प्रसाद्य यतमानसः ॥ यथैव शुक्लपक्षाद्धि पितॄणामसितः प्रियः ॥ तथा-
पराह्णः पूर्वाह्णात्पितॄणामतिरिच्यते ॥ संपूज्य स्वागतेनैतानुपेतान्स्वगृहे द्विजान् ॥ पवित्रपाणिराचांतानासनेषूपवेशयेत् ॥ पितॄणामयुग्मः
कामं युग्मान्दैवे द्विजोत्तमान् ॥ एकैकं वा पितॄणां च देवानां च स्वशक्तितः ॥ तथा मातामहानां च तुल्यं वा वैश्वदेविकं ॥ पृथक्केनयोस्तथाचा-
न्ये केचिदिच्छंति मानवाः ॥ प्राङ्मुखान्देवसंकल्प्यान्पित्र्यान्कुर्यादुदङ्मुखान् ॥ तथा मातामहानां च विधिरुक्तो मनीषिभिः ॥ विष्टरार्थं
कुशान्दत्त्वा संपूज्यार्घ्यादिना ततः ॥ पवित्राणि दत्त्वा च तेभ्योऽनुज्ञामवाप्य च ॥ कुर्यादावाहनं प्राज्ञो देवानां मंत्रतो द्विजः ॥ यवांभोभि-
स्तथा चार्घ्यं दत्त्वा वैश्वदेविकं ॥ गंधमाल्यांबुधूपं च दत्त्वा सम्यक्सदीपकं ॥ अपसव्यं पितॄणां च सर्वमेवोपकल्पयेत् ॥ दर्भांश्च द्वि-

गुणान्दत्त्वा तेभ्योऽनुज्ञामवाप्य च ॥ मंत्रपूर्वं पितॄणां च कुर्यादावाहनं बुधः ॥ अपसव्यं तथा चार्घ्यं यवार्थं च तथा तिलैः ॥ निष्पादयेन्म-
हाभाग पितॄणां प्रीणने नरः ॥ अग्नौ कार्यमनुज्ञातः कुरुष्वेति ततो द्विजैः ॥ जुहुयाद्व्यंजनक्षारवर्ज्यमन्नं यथाविधि ॥ अग्नये कव्य-
वाहनाय स्वाहेति प्रथमाहुतिः ॥ सोमाय वै पितृमते स्वाहेत्यन्या तथा भवेत् ॥ यमाय प्रेतपतये स्वाहेति तृतीयाहुतिः ॥ हुतावशिष्टं दद्या-
च्च भाजनेषु द्विजन्मनां ॥ भाजनालंभनं कृत्वा दद्यादन्नं यथाविधि ॥ यथासुखं जुषध्वं भोरिति वाच्यमनिष्ठुरं ॥ भुंजीरंश्च ततस्तेऽपि
तच्चित्ता मौनिनः सुखं ॥ यद्विघ्नमतेषां तं तदन्नमसत्वरः ॥ अक्रुद्धश्च नरो दद्यात्तेनैव न प्रलोभयन् ॥ रक्षोघ्नांश्च जपेन्मंत्रांस्तत्र तिलै-
श्च विकिरेन्महीं ॥ सिद्धार्थकैश्च रक्षार्थं श्राद्धस्य प्रचुरं छलं ॥ तृप्ताः स्थेति च पृष्टास्तृप्ताः स्म इति वादिभिः ॥ अनुज्ञातो नरस्तैश्चान्नं
प्रकिरेद्भुवि सर्वतः ॥ तद्वदाचमनार्थाय दद्यादेभ्यः सकृत्सकृत् ॥ अनुज्ञां च ततः प्राप्य जितवाक्कायमानसः ॥ सतिलेन ततोऽन्नेन पिं-
डान्सर्वेण पुत्रक ॥ पितॄनुद्दिश्य दर्भेषु दद्यादुच्छिष्टसंनिधौ ॥ पितृतीर्थेन तोयं च दद्यात्तेभ्यः समाहितः ॥ पितॄन्संचिंतयन्भक्त्या
यजमानो नृपात्मज ॥ तद्वन्मातामहानां च दत्त्वा पिंडान्यथाविधि ॥ गंधमाल्यादिसंयुक्तान्दद्यादाचमनं ततः ॥ दत्त्वा च दक्षिणां
शक्त्या सुस्वधास्त्विति तान्वदेत् ॥ तैश्च तुष्टैस्तथेत्युक्ते वाचयेद्वैश्वदेविकान् ॥ प्रीयंतामिति भद्रं वो विश्वेदेवा इतीरयन् ॥ तथेति चोक्ते
तैर्विप्रैः प्रार्थनीयास्तदाशिषः ॥ विसर्जयेत्प्रियाण्युक्त्वा प्रणिपत्य च भक्तितः ॥ आद्वारमनुगच्छेच्च आगच्छेच्चानुमोदितः ॥ ततो नित्यक्रि-
यां कुर्याद्भोजयेच्च तथातिथीन् ॥ नित्यक्रियां पितॄणां च केचिदिच्छंति सत्तमाः ॥ न पितॄणां तथैवान्ये शेषं पूर्ववदाचरेत् ॥ पृथक्पाकेन चे-

मार्कं
॥४७॥

त्यस्त्ये केचिदिच्छन्ति पूर्ववत्ताम्भमस्तदन्नं भुंजीत सहस्त्यादिभिर्नरः। एवं कुर्वीत धर्मज्ञ श्राद्धं पित्र्यं समाहितः। यथा च द्विजमुख्यानां
परितोषोभिजायते। त्रीणि श्राद्धे पवित्राणि दौहित्रं कुतपास्तिलाः। वर्ज्यानि दान्तविप्रैश्च कोपोध्वगमनं त्वरा। राजतं च तथा पात्रं श-
स्तं श्राद्धेषु पुत्रक। राजतस्य तथा कार्यं दर्शनं दानमेव च। राजते हि स्वधा दुग्धा पितृभिः श्रूयते मही। तस्मात्पितॄणां रजतं अभीष्टं प्रीति-
वर्द्धनं।३१। इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने पितृकल्पे। मदालसा उ। अतः परं शृणुष्वेदं पितृभक्त्या यथा हृतं। पितॄ-
णां प्रीतये यच्च वर्ज्यं च प्रीतिकारकं। मासं तृप्तिः पितॄणां तु हविष्यान्नेन जायते। यतो मासद्वयं मांसेन तृप्तिं यांति पितामहाः। त्रीन्मासा-
न्हारिणं मांसं विज्ञेयं पितृणां तृप्तये युक्तमाति चतुरो मासान् शशस्य पिशितं पितॄन्। शाकुनं पंच वै मासान् षण्मासान् शूकरामिषं।
छागलं सप्त वै मासानैणेयं चाष्टमासिकीं। करोति तृप्तिं नव वै रौरवं मांसं न संशयः। गवयस्य तु मांसेन तृप्तिर्दशमासिकी। तथैकादशमा-
सान् तृप्तिरौरभ्रं पितॄणामिदं। संवत्सरं तथा गव्यं पयः पायसमेव वा। वाध्रीणसस्यामिषं लोहकालशाकं तथा मधु। दौहित्रामिषमन्यच्च यद्द-
त्तं स्वकुले द्भवैः। अनंतां प्रयच्छंति तृप्तिं गौरीसुतस्तथा। पितॄणां नात्र संदेहो गयाश्राद्धं च पुत्रक। राजश्यामाकश्यामाकौ तद्वच्चैव प्रशा-
तिकौ। नीवाराः पौष्कलाश्चैव धान्यानां पितृतृप्तये। यवव्रीहिसगोधूमास्तिलमुद्गससर्षपाः। प्रियंगवः कोविदाराः निष्पावाश्चातिशोभनाः।
वर्ज्या मर्कटकाः श्राद्धे राजमाषास्तथाणवः। विप्रुषिकामसूराश्च श्राद्धकर्मणि गर्हिताः। लसुनं गृंजनं चैव पलांडुं तु मूलकं। करंभं यानि चान्या- ॥४७॥
न्यानि हीनानि रसवर्णतः। गांधारिकामलाबूनि लवणान्यूषराणि च। आरक्ता ये च निर्यासाः प्रत्यक्षलवणानि च। वर्ज्यान्येतानि वै श्राद्धे

यच्च वाचा न शस्यते। यच्चोत्कोचादिना प्राप्तं पतितायद्युपार्जितं। अन्याय्यकन्याशुल्कोत्थं द्रव्यं चात्र विगर्हितं। दुर्गंधि फेनिलं चांबु त-
थैवाल्पतरोदकं। न लभेद्यत्र गौस्तृप्तिं नक्तं यच्चाप्युपाहृतं। यच्च सर्वजनोच्छिष्टं यच्चाभोज्यनिपानजं। तद्वर्ज्यं सलिलं तात सदैव पितृ-
कर्मणि। मार्गमाविकमौष्ट्रं च सर्वमैकशफं च यत्। माहिषं चामरं चैव धेन्वा गोश्चाप्यनिर्दशं। पित्रर्थं मे प्रयच्छस्वेत्युक्त्वा यच्चापराहृ-
तं। वर्ज्जनीयं सदा सद्भिस्तत्स्ययः श्राद्धकर्मणि। वर्ज्यं जंतुमती रूक्षा क्षितिः प्लुष्टा तथाग्निना। अनिष्टदुष्टशब्दोग्रा दुर्गंधा चात्र कर्मणि। कुलो-
त्कुकोच्छ्वहा च तथा वैरिणश्च ये। कुलिको महिकाश्च व्याधिमोषिकलंघकाः। नग्नाः पातकिनश्चैव हन्युर्दृष्ट्या पितृक्रियां। सपुमानवधवि-
द्धश्च यो कुक्कुटो ग्रामशूकरः। श्वा चैव हंति श्राद्धानि यातुधानाश्च दर्शनात्। तस्मात्सुसंवृते दद्यात्तिलैश्चाविकरेन्महीं। एवं रक्षा भवेच्छ्राद्धे कृता तातो- ४८
र्योऽपि। शावसूतकसंस्पृष्टं दीर्घरोगिभिरेव च। पतितैर्मलिनैश्चैव पुष्टाति तत्पितामहान्। वर्जनीयं तथा श्राद्धे तथोदक्यादिदर्शनं। मुंडशौंडसमा-
ज्ञाथो यजमानेन चादरात्। केशकीटावपन्नं च तथा श्वभिरवेक्षितं। पूतिपर्युषितं चैव वार्ताकाभिषवास्तथा। वर्जनीयानि वै श्राद्धे तथा वस्त्रं चलोहि-
तं। श्रद्धयापापादत्तं पितॄणां नामगोत्रतः। यदाहारास्तु ते जातास्तदाहारत्वमेव तत्। तस्माच्छ्राद्धवता पात्रे यत्प्रशस्तं पितृकर्मणि। तथा तच्चैव दात-
व्यं पितॄणां तृप्तिमिच्छता। योगिनश्च सदा श्राद्धे भोजनीया विपश्चिता। योगाधारा हि पितरस्तस्मात्तान् पूजयेत्सदा। ब्राह्मणानां सहस्रस्य योगी त्व-
ग्राशनी यदि। यजमानं च भोक्तॄंश्च नौरिवांभसि तारयेत्। पितृगाथास्तथैवात्र गीयंते ब्रह्मवादिभिः। या गीताः पितृभिः पूर्वमैलस्यासन्महीपतेः।
कदा नः संततावग्र्यः कस्यचिद्भविता सुतः। यो योगिभुक्तशेषान्नो भुवि पिंडं प्रदास्यति। गयायामथवा पिंडं खड्गमांसं महाहविः। कालशाकं ति-

लाप्यं वा हृष्टमांसं तत्पृष्टे। चैत्यदेवं च सौम्यं च खड्गमांसं महाहविः। विषाणवज्रखड्गाख्याः अमर्यादाः श्यामहे। तथा वर्षात्रयोदश्यां मघासु
च यथाविधि। मधुसर्पिःसमायुक्तं पायसं दक्षिणायने। तस्मात्संपूजयेद्भक्त्या स्वपितॄन्पुत्र मानवः। कामानन्नीप्सन्सकलान्नयप्रो-
चात्मविमोचनं। वसून्रुद्रांस्तथादित्यान्नक्षत्रग्रहतारकाः। प्रीणयंति मनुष्याणां पितरः श्राद्धतर्पिताः। आयुः प्रजां धनं विद्यां स्वर्गमो-
क्षं सुखानि च। प्रयच्छंति तथा राज्यं प्रीता नृणां पितामहाः। एतत्ते पुत्र कथितं श्राद्धकर्म यथोदितं। काम्यानां श्रूयतां वत्स श्राद्धानां तिथिकी-
र्तनं। इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने श्राद्धकल्पे। ।मदालसा उ। प्रतिपद्धनलाभाय द्वितीया द्विपदप्रदा। वरार्थिनां तृतीया तु
चतुर्थी शत्रुनाशिनी। श्रियं प्राप्नोति पंचम्यां षष्ठ्यां पूज्यो भवेन्नरः। गणाधिपत्यं सप्तम्यां अष्टम्यां बुद्धिमुत्तमां। स्त्रियो नवम्यां प्राप्नोति दश-
म्यां पूर्णकामतां। वेदांस्तथाप्नुयात्सर्वानेकादश्यां क्रियापरः। द्वादश्यां जयलाभं च प्राप्नोति पितृपूजकः। प्रजावृद्धिं पशून्बुद्धिं स्वातंत्र्यं
पुष्टिमुत्तमां। दीर्घमायुस्तथैश्वर्यं कुर्वाणस्तु त्रयोदशीं। अवाप्नोति न संदेहः श्राद्धं श्रद्धापरो नरः। यथासंभवितेनान्नेन श्राद्धं संपत्समन्वि-
तः। युवानः पितरो यस्य मृताः शस्त्रेण वा हताः। तेन कार्यं चतुर्दश्यां तेषां तृप्तिमभीप्सता। श्राद्धं कुर्वन्नमावास्यां यत्नेन पुरुषः शुचिः। सर्वान्का-
मानवाप्नोति स्वर्गं चानंत्यमश्नुते। कृत्तिकासु पितॄनर्च्य स्वर्गमाप्नोति मानवः। अपत्यकामो रोहिण्यां सौम्ये तेजस्वितां लभेत्। शौर्यमार्द्रा-
स्ववाप्नोति क्षेत्रादि च पुनर्वसौ। पुष्टिं पुष्ये सदाभ्यर्च्य आश्लेषासु वरान्सुतान्। मघासु स्वजनश्रैष्ठ्यं सौभाग्यं फल्गुनीषु च। प्रदानशीलो भव-
ति सापत्यश्चोत्तरासु वै। प्रयाति श्रेष्ठतां सत्सु हस्ते श्राद्धप्रदो नरः। रूपयुक्तश्च चित्रासु तथापत्यान्यवाप्नुयात्। वाणिज्यलाभदा स्वाति वि- ॥४८॥

शाखापुत्रकामसदा। कुर्वतां चानुराधासु दद्युश्चक्रप्रवर्तनं। आधिपत्यं च ज्येष्ठासु मूले नारोग्यमुत्तमं। आषाढासु यशःप्राप्तिरुत्तरासु विशो-
कतां। श्रवणेन शुभांल्लोकान्धनिष्ठासु धनं महत्। वेदवित्त्वं त्वभिजिति भिषक्सिद्धिं च वारुणे। अजाविकं प्रोष्ठपदे विंदद्भार्यां तथोत्तरे।
रेवतीषु तथा कुप्यं अश्विनीषु तुरंगमान्। श्राद्धं कुर्वंस्तथाप्नोति भरण्यामायुरुत्तमं। तस्मात्काम्यानि कुर्वीत ऋक्षेष्वेतेषु तत्त्ववित्। १। इति
श्रीमार्कंडेयपुराणे मदालसोपाख्याने। ।एवं पुत्र गृहस्थेन देवताः पितरस्तथा। संपूज्या हव्यकव्याभ्यां अन्नेनातिथिबांधवाः।
भूतानि भृत्याः विकलाः पशुपक्षिपिपीलिकाः। भिक्षवो याचमानाश्च ये चान्ये वसता गृहे। सदाचाररता तात साधुना गृहमेधिना। पापं भुं-
क्ते समुल्लंघ्य विश्वनैमित्तिकीं क्रियाः। अलर्क उ। कथितं मे त्वया मातर्नित्यनैमित्तिकं च यत्। नित्यनैमित्तिकं चैव त्रिविधं कर्म पौष्टिकं। स-
दाचारमहं श्रोतुमिच्छामि कुलनंदिनि। यत्कुर्वन्सुखमाप्नोति परत्रेह च मानवः। मदालसा उ। गृहस्थेन सदा कार्यमाचारपरिपालनं। नह्या-
चारविहीनस्य सुखमत्र परत्र चाप्यज्ञदानतपांसीह पुरुषस्य न भूतये। भवंति यः सदाचारं समुल्लंघ्य प्रवर्तते। दुराचारो हि पुरुषो नेहायुर्वि-
दते महत्। कार्यो यत्नः सदाचारे आचारो हंत्यलक्षणं। तस्य स्वरूपं वक्ष्यामि सदाचारस्य पुत्रक। तन्ममैकमनाः श्रुत्वा तथैव परिपालय।
त्रिवर्गसाधने यत्नः कर्तव्यो गृहमेधिना। तत्संसिद्धौ गृहस्थस्य सिद्धिरत्र परत्र च। पादेनापस्य पारत्र्यं कुर्यात्संचयमात्मवान्। अर्द्धेन
चात्मभरणं नित्यनैमित्तिकान्वितं। पादं चाप्यात्ममायस्य मूलभूतं विवर्द्धयेत्। एवमाचरतः पुत्र अर्थः साफल्य[illegible]सन्न्यायतिष्ठे
धार्थे धर्मः कार्यो विपश्चिता। परत्रार्थस्तथैवान्यः काम्यो वैव फलप्रदः। प्रत्यवायभयात्काम्यस्तथान्यश्चाविरोधवान्। द्विधा कामो

मार्कं ष्ठिगादितस्त्रिवर्गो नवधा प्रभूतः। परस्परानुबंधांश्च सर्वानेतान्विचिंतयेत्। विपरीतानुबंधांश्च बुध्यस्वैतान्नृपात्मज। श्रृणुष्व मे। धर्मोऽ
॥५८॥ र्थानुबंधोऽर्थो धर्मो धर्मैसाधकः। उभौ स्यातां चद्विधा कामेनैतौ चाद्विधा पुनः। ब्राह्मे मुहूर्ते बुध्येत धर्मार्थौ चानुचिंतयेत्। समु
त्थाय तथाचम्य प्राङ्मुखो नियतः शुचिः। पूर्वां संध्यां सनक्षत्रां पश्चिमां सदिवाकरां। उपासीत यथान्यायं नैनां ह्यादनापदि। असत्प्र
लापमनृतं वाक्पारुष्यं च वर्जयेत्। असच्छास्त्रमसद्वादमसत्सेवां च पुत्रक। सायंप्रातस्तथा होमं कुर्वीत नियतात्मवान्। नोदयास्तमने
बिंबमुदीक्षेत विवस्वतः। केशप्रसाधनादर्शदर्शनं दंतधावनं। पूर्वाह्न एव कार्याणि देवतानां च तर्पणं। ग्रामावसथतीर्थानां क्षेत्राणां चैव व
र्त्मनि। विण्मूत्रमनुतिष्ठेत न कृष्टे न च गोव्रजे। नग्नां परस्त्रियं नेक्षेत न पश्येदात्मनः शकृत्। उदक्यादर्शनं स्पर्शं वर्ज्यं संभाषणं तथा। नाऽप्सु मू
त्रं पुरीषं वा मैथुनं वा समाचरेत्। नाधितिष्ठेत्शकृन्मूत्रकेशभस्मकपालिकाः। तुषांगारास्थिशीर्णानि रज्जुवस्त्राणि कानिचित्। नाधितिष्ठेत्तथै
था प्राज्ञः पवित्रं पत्राणि वा भुवि। पितृदेवमनुष्याणां भूतानां च तथार्चनं। कृत्वा विभवतः पश्चात्गृहस्थो भोक्तुमर्हति। उदङ्मुखः प्राङ्मुखो वा
स्वाचांतो वाग्यतः शुचिः। भुंजीतान्नं च तच्चित्तो ह्यंतर्जानुः सदा नरः। उपघातमृते दोषान्नान्नस्योदीरयेद्बुधः। प्रत्यक्षलवणं वर्ज्यमन्नमत्युष्ण
मेव च। न गच्छन्न च तिष्ठन्वै विण्मूत्रोत्सर्गमात्मवान्। कुर्वीत नैव कर्माणि न किंचिदपि भक्षयेत्। उच्छिष्टो नालपेत्किंचित्स्वाध्यायं च विवर्जये
त्। गुरूणामासनं देयं प्रत्युत्थानादिसत्कृया। अनुकूलं तथालापमभिवादनपूर्वकं। तथानुगमनं कुर्यात्प्रतिकूलं न संजपेत्। नैकवस्त्र
श्च भुंजीत न कुर्याद्देवतार्चनं। न वाचयेद्द्विजान्नाग्नौ होमं कुर्वीत बुद्धिमान्। न स्नायीत नरो नग्नो न शयीत कदाचन। न पाणिभ्यामु ॥५८॥

भाभ्यां च कंडूयेत शिरस्तथा। न चाभीक्ष्णं स्नानं कार्यं निष्कारणं नरैः। शिरः स्नानस्य तैलेन नांगं किंचिदपि स्पृशेत्। अनध्यायेषु सर्वे
षु स्वाध्यायं च विवर्जयेत्। ब्राह्मणानलगोसूर्यान्नमेहेत कदाचन। उदङ्मुखो दिवा रात्रावुत्सर्गं दक्षिणामुखः। आबाधासु यथाकामं कु
र्यान्मूत्रपुरीषयोः। दुष्कृतं न गुरोर्ब्रूयात्क्रुद्धं चैनं प्रसादयेत्। परिवादं न शृणुयादन्येषामपि कुर्वतां। पंथा देयो ब्राह्मणानां राज्ञो दुः
खातुरस्य च। विद्याधिकस्य गुर्विण्या भारार्तस्य महीयसः। मूकांधवधिराणां च मत्तस्योन्मत्तकस्य च। पुंश्चल्याः कृतवैरस्य बाल
स्य पतितस्य च। देवालयं चैत्यतरुं तथैव च चतुष्पथं। विद्याधिकं गुरुं चैव बुधः कुर्यात्प्रदक्षिणं। उपानद्वस्त्रमाल्यानि धृतान्यन्यैर्न
धारयेत्। उपवीतमलंकारं करकं चैव वर्जयेत्। स्त्रैसाऽनिमानृते व्यापादिन कुर्वीत विचक्षणः। मूर्खोन्मत्तव्यसनिनो विरूपान्मायिनस्त
था। न्यूनांगांश्चाधिकांगांश्च नोपहासेन दूषयेत्। परस्य दंडं नोद्यच्छेत्शिक्षार्थं पुत्रशिष्ययोः। तद्वन्नोपविशेत्प्राज्ञः पादेनाकृष्य चा
सनं। संयावं कृशरां मांसं नात्मार्थमुपसाधयेत्। सायंप्रातश्च भोक्तव्यं कृत्वा चातिथिपूजनं। उदङ्मुखः प्राङ्मुखो वा वाग्यतो दंत
धावनं। कुर्वीत सततं वत्स वर्जयेद्वर्ज्यवीरुधः। नोदक्शिराः स्वपेज्जातु न च प्रत्यक्शिरा नरः। शिरस्यगस्त्यमाधाय शयीताथ पुरंदरं। न तु
गंधवतीष्वप्सु नास्नायीत न तथा वसि। उपरागे परं स्नानमृते दिनमुदाहृतं। अपमृज्यान्न च स्नातो गात्राण्यंबरपाणिभिः। न चावधूनयेत्के
शान्वाससी नैव निर्धुनेत्। नानुलेपनमादद्यादस्नातः स्नातकं क्वचित्। न चापि रक्तवासाः स्याच्चित्रासितधरोऽपि वा। न च कुर्याद्विपर्यासं
वाससोर्न च भूषणे। वर्ज्यं चापि दशावस्त्रं अत्यंतोपहतं च यत्। केशकीटावपन्नं च तथा श्वाभिरवेक्षितं। अवलीढावलीढं च सारोद्धरणदूषितं।

मार्कं
॥५०॥

वर्ज्यं चिरोषितं चान्नं शुष्कं पर्युषितं च यत् । तद्वच्छाकेक्षुपयसां विकारान्न परंतप । तथा मांसविकारांश्च नैव वर्ज्याश्चिरोषिताः । उदयास्त
मने चार्कस्य शयनं च विवर्जयेत् । नास्नातो नैव संविष्टो न चैवान्यमना नरः । न चैव शयने नोर्व्यामुपविष्टो न शब्दवत् । न चैकवस्त्रो न वदन्
प्रेक्षतामप्रदाय च । भुंजीत पुरुषः स्नातः सायं प्रातर्यथाविधि । परदारा न गंतव्याः पुरुषेण विपश्चिता । इष्टापूर्तायुषां हंत्री परदारगतिर्नृणां ।
नहीदृशमनायुष्यं लोके किंचिन्न विद्यते । यादृशं पुरुषस्येह परदाराभिमर्शनं । देवताग्निकार्याणि तथा गुर्वभिवादनं । कुर्वीत सम्यगा
चम्य तद्वदन्नभुजिक्रियां । अफेनशब्दगंधाभिरद्भिरच्छाभिरादरात् । आचामेत्पुत्र पुण्याभिः प्राङ्मुखोदङ्मुखोपि वा । अंतर्जलादावसु
धाद्वल्मीकान्मूषकस्थलात् । कृतशौचावशिष्टाश्च वर्जयेत्पंच वै मृदः । स्नातिकाः प्रक्षाल्य पादौ हस्तौ च समभ्युक्ष्य समाहितः । अंत
र्जानुः सदाचामेत्त्रिश्चतुर्वापि वै पिबेत् । परिमृज्य द्विरास्यं च खानि मूर्धानमेव च । सम्यगाचम्य तोयेन क्रियाः कुर्वीत वै शुचिः । देवतानामृ
षीणां च पितॄणां चैव यत्नतः । समाहितमना भूत्वा कुर्वीत सततं नरः । क्षुतेऽवलीढे वांते च तथा निष्ठीवनादिषु । कुर्यादाचमनं स्पर्शं गो
पृष्ठं चार्कदर्शनं । कृत्वा निष्ठीव्य वा नस्यं परिधायाचमेद्बुधः । कुर्वीतालंभनं वापि दक्षिणश्रवणस्य वै । यथाविभवतो ह्येतत्पूर्वाभावे
ततः परः । न विद्यमाने पूर्वोक्ते उत्तरप्राप्तिरिष्यते । न कुर्याद्दंतसंघर्षं चात्मनो देहताडनं । स्वप्नाध्यापनभोज्यानि संध्यायां च वि
वर्जयेत् । संध्ययोर्मैथुनं चापि तथा प्रस्थानमेव च । पूर्वाह्णे तात देवानां मनुष्याणां च मध्यमे । तथापराह्णे कुर्वीत पितॄणां पूजनं नरः ।
शिरःस्नातश्च कुर्वीत दैवं पित्र्यमथापि वा । प्राङ्मुखोदङ्मुखो वापि श्मश्रुकर्म च कारयेत् । व्यंगां विवर्जयेत्कन्यामकुलां चापि रोगिणीं
विकृतां पिंगलां चैव वाचालां सर्वदूषितां । अव्यंगांगीं सौम्यनाम्नीं सर्वलक्षणलक्षितां । उद्वहेत्पितृमातृभ्यां सप्तमीं पंचमीं च यां । रक्षेद्दा ॥५०

ंस्त्यजेदीर्ष्यां तथाह्नः स्वप्नमैथुने । परोपतापकं कर्म जंतुपीडां न कारयेत् । उदक्या सर्ववर्णानां वर्ज्या रात्रिचतुष्टयं । स्त्रीजन्मपरिहारार्थं
पंचमीं चापि वर्जयेत् । ततः षष्ठीं व्रजेद्रात्रिं ज्येष्ठां युग्मासु पुत्रक । युग्मासु पुत्रा जायंते स्त्रियोऽयुग्मासु रात्रिषु । तस्माद्युग्मासु पुत्रार्थी संवि
शीत नरः सदा । सर्वेषु वर्जयेन्नित्यमृतुकालेषु योषितः ॥ विधर्मिणो ह्निपर्वादौ संध्याकाले च षंढकः ॥ क्षुरकर्मणि चांते च स्त्रीसंभो
गे च पुत्रक । स्नायीत चैलवान्प्राज्ञः कटभूमिमुपेत्य च । देववेदद्विजातीनां साधुसत्यमहात्मनां । गुरोः पतिव्रतानां च तथा यज्ञतपस्वि
नां परिवादं न कुर्वीत परिहासं च पुत्रक । कुर्वतामविनीतानां न श्रोतव्यं कथंचन । नोत्कृष्टशय्यासनयोर्नापकृष्टस्य चारुहेत् । धवलां
बरसंवीतः सितपुष्पविभूषितः । न चामंगल्यवेषः स्यान्न चामंगल्यवाग्भवेत् । नोद्धतोन्मत्तमूढैश्च नाविनीतैश्च पंडितः । गच्छेन्मैत्रीं
नाशीलैर्न च चौर्यादिदूषितैः । न व्यातिव्ययशीलैश्च न लुब्धैर्नातिवैरिभिः । प्राज्ञैरपि भुनेः शांतैः कर्मण्युद्योगकारिभिः । सुहृद्दीक्षितभू
पालस्नातकश्वशुरैः सह । ऋत्विगादीनृषउर्व्यां हीनत्वे यच्च गृहागतान् । यथाविभवतः पुत्र प्रतिसंवत्सरोषितान् । अर्चयेन्मधुप
र्केण यथाकालमतंद्रितः । तिष्ठेच्च शासने तेषां श्रेयस्कामो द्विजोत्तमः । नैतान्परिवदेत्प्राज्ञः आक्रुष्टश्चापि तैः सदा । सम्यग्गृह
स्थितं कृत्वा यथास्थानमतः क्रमात् । संपूजयेत्ततो वह्निं दद्याच्चैवाहुतीः क्रमात् । प्रथमां ब्रह्मणे दद्यात्प्रजानां पतये ततः । तृतीयां त्वे
व गृह्येभ्यः कश्यपाय तथापरां । ततोऽनुमतये दद्याद्दत्त्वा गृहबलिं ततः । पूर्वाख्यातं मया यत्ते नित्यकर्मक्रियाविधिं । वैश्वदेवं ततः कुर्या
दिमांस्तत्र बलीन्शृणुष्व यथास्थानविभागतः । देवानुद्दिश्य वै पृथक् । पर्जन्यापोधरित्रीणां दद्यान्मणिके त्रयं । ततो धातुश्च दद्या

DR. BHAU DAJI
DR. BHAU DAJI M.B. MOR.

द्वारे गृहस्य तु। बाह्ये वै च प्रतिदिशं दिग्भ्यः प्राच्यादितः क्रमात्। ब्रह्मणे चांतरिक्षाय सूर्याय च ततः क्रमात्। विश्वेभ्यश्चैव देवेभ्यो वि
श्वभूतेभ्य एव च। उषसे भूतपतये दद्यादुत्तरतस्ततः। स्वधा च नम इत्युक्त्वा पितृभ्यश्चापि दक्षिणे। कृत्वापसव्यं वायव्यां यक्ष्मैतत्ते
न्नेति जलं। अन्नावशेषमिश्रं वै तोयं दद्याद्यथाविधि। ततोन्नाग्रं समुद्धृत्य हंतकारोपकल्पनं। यथाविधि यथान्यायं ब्राह्मण
योपपादयेत्। कुर्यात्कर्माणि तीर्थेन स्वेन स्वेन यथाविधि। देवानां च तथा कुर्यात् ब्राह्मेण चमनक्रियां। अंगुष्ठोत्तरतो रेखा पाणेर्यो
दक्षिणस्य तु। एतद्ब्राह्ममिति ख्यातं तीर्थमाचमनाय तत्। तर्जन्यंगुष्ठयोरंतः पित्रतीर्थमुदाहृतं। पितॄणां तेन तोयादि दद्यान्नांदी
मुखादृते। अंगुल्यग्रे तथा दैवं तेन दिव्यः क्रियाविधिः। तीर्थं कानिष्ठिकामूले कायं तेन प्रजापतेः। एवमेभिः सदा तीर्थैर्देवानां पि
तृभिः सह। सदा कार्याणि कुर्वीत नान्यतीर्थेन कर्हिचित्। ब्राह्मेणाचमनं शस्तं पित्र्यं पैत्रेण सर्वदा। देवतीर्थेन देवानां प्राजापत्ये
निजेन च। नांदीमुखानां कुर्वीत प्राज्ञः पिंडोदकक्रियां। प्राजापत्येन तीर्थेन यच्च किंचित्प्रदीयते। युगपज्जलमग्निं च बिभृयान्न
विचक्षणः। गुरुदेवान्प्रति तथा न च पादौ प्रसारयेत्। नाचक्षीत धयंतीं गां जलं नांजलिना पिबेत्। शौचकालेषु सर्वेषु गुरुष्वल्पेषु
वा पुनः। न विलंबेत शौचार्थं न मुखेनानलं धमेत्। न च पुत्र न वास्तव्यं यत्र नास्ति चतुष्टयं। ऋणप्रदाता वैद्यश्च श्रोत्रियः सजला
नदी। जितामित्रो नृपो यत्र बलवान्धर्मतत्परः। तत्र नित्यं वसेत्प्राज्ञः कुतः कुनृपतौ सुखं। १२। पौराः सुसंहता यत्र सततं न्यायवर्तिनः। ॥१५१॥

यत्रामत्सरिणो लोकास्तत्र वासः सुखोदयः। उक्तं तत्कथितं सर्वं मया ते हितकाम्यया। अतः परं शृणुष्व त्वं वर्ज्यावर्ज्यं प्रतिक्रियां।
भोज्यमन्नं पर्युषितं स्नेहाक्तं चिरसंचितं। अस्नेहा अपि गोधूमयवगोरसविक्रियाः। शशकः कच्छपो गोधा श्वाविन्मत्स्योथ शल्लकः
भक्ष्या ह्येते सदा वर्ज्यौ ग्रामशूकरकुक्कुटौ। पितृदेवादिशेषं च श्राद्धे ब्राह्मणकाम्यया। प्रोक्षितं चौषधार्थं च खादन्मांसं न दुष्यति। श
ङ्खाश्मस्वर्णरूप्याणां रज्जूनामथ वाससां। शाकमूलफलानां च तथा विदलचर्मणां। मणिवज्रप्रवालानां तथा मुक्ताफलस्य च। गा
त्राणां च मनुष्याणामंबुना शौचमिष्यते। तथायसानां तोयेन भस्मसंघर्षणेन च। सस्नेहानां च पात्राणां शुद्धिरुष्णेन वारिणा।
।२०। शूर्पधान्याजिनानां च मुशलोलूखलस्य च। संहतानां च वस्त्राणां प्रोक्षणात्संचयस्य च। वल्कलानामशेषाणामंबुमृच्छौ
चमिष्यते। आविकानां समस्तानां केशानां चापि मिष्यते। शुचि चैतत्कारुहस्तः पण्यं यच्च प्रसारितं। योषिन्मुखं तथा बाल आस्य
चद्वमुखं तथा। रथ्यागतमविज्ञातं दासवर्गोथतत्कृतं। वाक्प्रशस्तं चिरातीतमनेकांतरितं लघु। अतिप्रभूतं बालस्य चक्रांतं विचे
ष्टितं। कर्मांतागारशालाश्च स्तनंधयसुताः स्त्रियः। शुचयश्च तथैवापः शुचयो गंधबुद्बुदाः। भूमेर्विशुध्यते कालदाहमार्जनगोक्रमैः।
लेपादुल्लेखनात्सेकाद्वेश्म संमार्जनात्क्रमात्। केशकीटावपन्नेऽन्ने गोघ्रातं मक्षिकान्विते। मृदंबुभस्मवातत्रप्रक्षेपकं विशुद्धये।
औदुंबराणामम्लेन क्षारेण त्रपुसीसयोः। भस्मांबुभिश्च कांस्यानां शुद्धिः प्लावो द्रवस्य च। अमेध्याक्तस्य मृत्तोयैर्गंधापहरणेन च। अन्ये
षां चैव तद्द्रव्यवर्णगंधापहारतः। शुचि भूमिसंतु चंडालक्रव्यादादिनिपातितं। रथ्यागतं तु चैलादि शुचि गोतृप्तिदं पयः। रजोग्निरश्वो गोच्छाया

रश्मयः पवनो वह्निर्विप्रुषो मक्षिका तथा। अदुष्टसंसर्गाद्दोषिणः ।। अजाश्वं मुखतो मेध्यं न गौर्वाश्वस्य चाननं । मातुः प्रस्रवणे मेध्यं शकुनिः फलपातने
नो । आसनं शयनं यानं नावः पथि तृणानि च । सोमसूर्यांशुपवनैः शुध्यंत्येतानि पण्यवत् । रथ्याकर्दमतोयानि नद्यस्तु तेषां पाता ऽन्यकर्मसु । आचमेत च
धान्नाद्यं वासो विपरिधाय च । स्पृष्ट्वा नामप्यसंस्पृष्टे पिबेद्विरथ्याकर्दमांभसी । पक्वेष्टिकाचितानां च मेध्यता वायुसंगमात् । प्रभूतोपहतादन्नादग्रमु
धृत्य संत्यजेत् । शेषस्य प्रोक्षणं कुर्यादाचम्याद्भिस्तथा मृदा । उपवासस्त्रिरात्रं तु दुष्टभक्ताशने नृपैः । अज्ञाते ज्ञातपूर्वे च तद्दोषोपशमनं तु । उदक्याश्वा
विनग्नांश्च सूतिकांत्यावसायिनः । स्पृष्ट्वा स्नायीत शौचार्थं तथैव मृतहारिणः । नारं स्पृष्ट्वास्थि सस्नेहं स्नातः शुध्यति मानवः । आचम्यैव तु निःस्ने
हं गामालभ्यार्कमीक्ष्य च । न लंघयेत्तथैवासृक्ष्ठीवनोद्वर्तनानि च । गृहादुच्छिष्टविण्मूत्रपादांभांसि क्षिपेद्बहिः । पंच पिंडाननुद्धृत्य न स्नायात्
परवारिणि । स्नायीत देवखातेषु सरोह्रदसरित्सु च । नोद्यानादौ विकालेषु प्राज्ञस्तिष्ठेत्कदाचन । नालपेज्जनविद्विष्टान्वीरहीनांस्तथा स्त्रि
यः । देवतापितृसच्छास्त्रयज्विसत्रादिनिंदकैः । कृत्वा तु स्पर्शमालापं शुध्यतार्कावलोकनात् । अवलोक्य तथोदक्यामंत्यजं पतितं शवं ।। विध
र्मिसूतिकाषंढविवस्त्रांत्यावसायिनः । मृतनिर्यातकाश्चैव परदाररताश्च ये । एतदेव तु कर्तव्यं प्राज्ञैः शोधनमात्मनः । अभोज्यसूतिकाषंढमा
र्जारश्वकुक्कुटान् । पतितापविद्धचांडालमृतहारांश्च धर्मवित् । संस्पृश्य शुध्यते स्नातो नादद्रक्या ग्रामशूकरौ । तद्वच्च सूतिकाशौचदूषितौ पुरु
षावपि । यस्य चानुदिनं हानिर्गृहे नित्यस्य कर्मणः । यश्च ब्राह्मणसंत्यक्तः किल्विषाशी नराधमः । नित्यस्य कर्मणो हानिं न कुर्वीत कदाचन । ता
स्य त्वकरणे बंधः केवलं मृतजन्मसु । दशाहं ब्राह्मणस्तिष्ठेद्दानकर्मादिवर्जितः । क्षत्रियो द्वादशाहं च वैश्यो मासार्द्धमेव च । शूद्रस्तु मासमासीत
निजकर्मविवर्जितः । ततः परं निजं कर्म कुर्युः सर्वे यथोदितं । प्रेताय सलिलं देयं बहिर्गत्वा तु गोत्रजैः । प्रथमेऽह्नि तृतीये वा सप्तमे नवमे तथा ।। त ॥५२॥

स्यास्थिसंचयं कार्यं चतुर्थे गोत्रिकैर्दिने । ऊर्द्धं संचयनात्तेषामंगस्पर्शो विधीयते । सोदकैस्तु क्रियाः सर्वाः कार्याः संचयनात्परं । स्पर्श एव सपिं
डानां मृताहनि तथोभयोः । अन्वहं भिक्षुशास्त्रेषु तोयोद्बंधनवह्निषु । वेत्रप्रपातादिमृते प्रायानाशकयोरपि । बाले देशांतरस्थे च तथा प्रव्रजि
ते मृते । सद्यः शौचं मतं चान्यैश्चतुरहं क्रमशौचकं । सपिंडानां सपिंडस्तु मृतेऽन्यस्मिन्मृते यदि । पूर्वाशौचसमाप्त्यंतैः कार्यास्तत्र दिनैः क्रियाः ।
एष एव विधिर्दृष्टो जन्मन्यपि हि सूतके । सपिंडानां सपिंडेषु तथावत्सोदकेषु च । जाते पुत्रे पितुः स्नानं सचैलस्य विधीयते । तत्रापि यदि चान्यस्मिन्नज
ते जायेत चापरः । तत्रापि शुद्धिस्तद्वद्धि पूर्वजन्मादिते तु वै । दशद्वादशमासार्द्धमाससंख्यैर्गतैर्दिनैः । स्वाः स्वाः कर्मक्रियाः कुर्युः सर्वे वर्णा यथो
विधिः । प्रेतमुद्दिश्य कर्तव्यमेकोद्दिष्टमतः परं । दानानि चैव देयानि ब्राह्मणेभ्यो मनीषिभिः । यदिष्टतमं लोके यच्चास्य दयितं गृहे । तत्तद्गुणव
ते देयं तदेवाक्षयमिच्छता । पूर्णैस्तु दिवसैः स्पृष्ट्वा सलिलं वाहनायुधं । प्रतोददंडौ च तथा सर्वे वर्णाः कृतक्रियाः । स्वधर्मकर्मनिर्दिष्टं ...प
नं तथा क्रियाः । कुर्युः समस्ताः शुचयः परत्रेह च भूतिदाः । अध्येतव्या त्रयी विद्या ज्ञातव्या च विपश्चिता । धर्मतो धनमाहार्यं यष्टव्यं चापि
यत्नतः । यद्वापि कुर्वतो नात्मा जुगुप्सामेति पुत्रक । तत्कर्तव्यमशंकेन यन्न गोप्यं महाजने । एवमाचरतो वत्स पुरुषस्य गृहे सतः । धर्मका
र्थसंप्राप्त्या परत्रेह च शोभनं ।। ९६ ।। इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने आचाराध्यायः ।। पुत्र उवाच । स एवमनुशास्तः सन्मात्रा ... सप्रा
प्य यौवनं । ऋतुध्वजसुतश्चक्रे सम्यग्दारपरिग्रहं । पुत्रांश्चोत्पादयामास यजे यज्ञान्स च प्रभुः । पितुश्च सर्वकालेषु चकाराज्ञानुपालनं । त
तः कालेन महता संप्राप्य चरमं वयः । चक्रेऽभिषेकं पुत्रस्य तत्र राज्ये ऋतुध्वजः । वीर्यया सह धर्मात्मा ययौ स तपसे वनं । अवतीर्णो महीरक्षो

महाज्ञोयोमहीपतिः।मदालसालसाचूतनयंप्राहेदंपश्चिमंवचः॥कामोपभोगसंसर्गप्रक्षालनकरंहितं।मदालसोवाच।यदादुःखमसह्यंतेप्रिय
वंधुवियोगजं।रुक्थाचारोद्भवंचापिविज्ञनाशात्मसंभवं।भवतःकुर्वतोराज्यंगृहकर्मावलंविनः।दुःखायतनभूतोहिममत्वालंवनोगृही
तदस्मात्पुत्रनिष्कृष्यमद्दत्तादंगुलीयकात्।वाच्यंतेशासनंपत्रेसूक्ष्माक्षरनिवेशितं॥जडउ॥इत्युक्त्वाप्रददौतस्मैसौवर्णंसांगुलीयकं।आ
शिषश्चापियायोग्याःपुरुषस्यगृहेसतः॥ततःकुवलयाश्वोसौसाचदेवीमदालसा।पुत्रायदत्वातद्राज्यंतपसेकाननंययौ॥सोप्यलर्कोपियथा
न्यायंपुत्रवन्मुदिताःप्रजाः।धर्मतःपालयामासस्वेस्वेकर्मण्यवस्थिताः॥दुष्टेषुदंडंशिष्टेषुसम्यक्चपरिपालनं।कुर्वन्परांमुदंलेभेइयाजच
महामखैः॥अथायंतसुताश्चास्यमहाबलपराक्रमाः।धर्मात्मानोमहात्मानोविमार्गपरिपंथिनः॥चकारसोर्थंधर्मेणधर्ममर्थेनचात्मवा
न्।तयोश्चैवाविरोधेनवेभुजेविषयानपि।एवंवहूनिवर्षाणितस्यपालयतोमही।धर्मार्थकामसक्तस्यजग्मुरेकमहर्यथा।वैराग्यंन
स्यसंजज्ञेभुंजतोविषयान्प्रियान्।नचाप्यलमभूत्तस्यभुंजतोऽर्थोऽप्युपार्जने।तंतथाभोगसंसर्गप्रमत्तमजितेंद्रियं।सुबाहुर्नामशुश्रा राम
वभ्रातातस्यवनेचरः।तंबुबोधयिषुःसोथचिरंध्यात्वामहीपतिः।तद्वैरिसंश्रयंतस्यश्रेयोमन्यतभूपतेः।ततःसकाशिभूपालमुदीर्ण
बलवाहनं।स्वराज्यप्राप्तयेगत्वाबहुशःशरणंकृती।सोपिचक्रेबलोद्योगंअलर्कंप्रतिपार्थिवः।दूतंचप्रेषयामासराज्यमस्मैप्रदीयतां।
सोपिनेच्छत्तदादातुमाज्ञापूर्वंस्वधर्मवित्।प्रत्युवाचचतंदूतमलर्कःकाशिभूभृतः।मामेवाभ्येत्यहार्द्देनयाचतांराज्यमग्रजः।नाक्रा
न्त्यासंप्रदास्यामिबलेनाल्पमपिक्षितेः।सुबाहुरपिनोयाच्ञांचकारमतिमांस्तथा।नधर्मःक्षत्रियस्येतियाचनंवीर्यधनोहिसः।ततः।५३।

समस्तसैन्येनकाशिराजपरिवारितः।आक्रांतुमन्यगाद्राष्ट्रमलर्कस्यमहीपतेः।अनंतरैश्चसंश्लेषमभ्येत्यतदनंतरं।तेषामन्यतरैर्भृत्यैःसम्य
मात्रस्यनयक्रमैः॥अपीडयंश्चसामंतान्तस्यराष्ट्रेततोबलात्।तथादुर्गांतपालांश्चचक्रेवाटविकान्वशे।कांश्चिच्चोपप्रदानेनकांश्चिद्भेदेनपा
र्थिवान्।साम्नैवान्यान्वशंनिन्येनिरुतास्तस्ययेऽभवन्।ततःसोल्पबलोराजापरचक्राभिपीडितः।कोशक्षयमवाप्योच्चैःपुरोध्यतथारि
णा।इत्थंसंपीड्यमानस्तुक्षीणकोशोदिनेदिने।विषादमगमत्परंव्याकुलत्वंचचेतसः।आर्त्तिंसपरमांप्राप्यततस्तस्मारांगुलीयकं।यमुद्दि
श्यपुराप्राहमातातस्यमदालसा।ततःस्नातःशुचिर्भूत्वावाचयित्वाद्विजोत्तमात्।निष्कृष्यशासनंतस्माद्ददृशेऽस्फुटाक्षरं।तत्रैतल्लिखि
तंमात्रावाचयामासपार्थिवः।प्रकाशपुलकांगोसौप्रहर्षोत्फुल्ललोचनः।संगःसर्वात्मनात्याज्यःसचेत्त्यक्तुंनशक्यते।ससद्भिःसहक
र्त्तव्यःसतांसंगस्यभेषजं।कामःसर्वात्मनाहेयोहातुंचेच्छक्यतेनसः।मुमुक्षांप्रतितत्कार्यःसावैतस्यापिभेषजं।वाचयित्वाचबहु
शोनृणांश्रेयःकथंत्विति।मुमुक्षाचेतिनिश्चित्यसाचेत्सत्संगतोयतः।ततःससाधुसंपन्नंचिंतयन्पृथिवीपतिः।दत्तात्रेयंमहात्मानं
आगच्छत्परमार्त्तिमान्।ससमेत्यमहात्मानमकल्मषमसंगिनं।प्रणिपत्याभिसंपूज्ययथान्यायमभाषत।ब्रह्मन्कुरुप्रसादंमेशरण्यः
शरणार्थिनः।दुःखापहारंकुरुमेदुःखार्त्तस्यातिकामिनः।दत्तात्रेयउवाच।दुःखापहारमद्यैवकरोमितवपार्थिव।सत्यंब्रूहिकिमर्थंतेदुः
खंचपृथिवीपते।कस्यत्वंकस्यवादुःखंतत्त्वयैवविचार्यतां।अंगान्यंगीतिरंगंचसर्वांगानिचचिंतय।जडउवाच।इत्युक्तश्चिंतयामासस
राजातेनधीमता।त्रिविधस्यापिदुःखस्यस्थानमात्मानमेवच।सविमृश्यचिरंराजापुनःपुनरुदारधीः।आत्मानमात्मनावीरःप्रहस्येदमु

मार्क
॥५७॥ वाच ह॥ नाहं भूमिर्न सलिलं न ज्योतिरनिलो न च। नाकाशं किं तु शारीरं ममेत्यसुखमिष्यते॥ उनातिरिक्तां याति पंच केऽस्मिन्‌ शुभाशुभं।
यदि स्यात्स्म मे किं न स्यादन्यस्थोपि हि तन्मयि। नित्यप्रसूतसंज्ञा वै न्यूनाधिक्यान्वितान्विते। तथा च मम तान्यक्तो विशेषो नोपलक्ष्यते। तन्मा
त्रावस्थिते सूक्ष्मे ... यांश्च न पश्यते। तथैव भूतसंज्ञा वै शारीरे किं सुखावहं मनस्यवस्थितं दुःखं दुःखं मामानसं च यत्। यतस्ततो न मे
दुःखं सुखं वा न ह्यहं मनः। नाहंकारो न च मनो बुद्धिर्नाहं यतस्ततः। अन्तःकरणजं दुःखं पारक्यं मम तत्कथं। अनाहं शरीरं न मनो यतोऽहं
पृथक्‌ शरीरान्मनसस्तथाहं। ततस्तु चेतस्यथवापि देहे सुखानि दुःखानि च किं ममात्र। राज्यस्य वांछां कुरुतेऽग्रजो मे देहः स चेत्पंचसमूहः
साराशिः। गुणप्रवृत्त्या मम किं नु तत्र तत्स्थः स चाहं च शरीरतोऽन्यः। न यस्य हस्तादिकमप्यशेषं मांसं न मांसं न नराधिहास्थि। कस्तस्य नागा
दिरथाश्वकोशैः स्वल्पोपि संबंध इहास्ति पुंसः। तस्मान्न मेऽरिर्न च मेस्ति दुःखं न मे सुखं चापि पुरं न कोशः। न चाश्वनागादिबलं न तत्
स्य नान्यस्य वा कस्य वा कस्यचिन्नाममचास्ति। यथा घटीकुंभकमंडलुस्थमाकाशमेकं बहुधा हि दृष्टं। तथा सुबाहुः स च काशिदे
हमन्योन्यदेहेषु शरीरभेदैः॥५३॥ इति श्रीमार्कंडेयपुराणे दत्तात्रेयदर्शनं नाम। ।पुत्र उ। दत्तात्रेयं ततो विप्र प्रणिपत्य स पा
र्थिवः। प्रत्युवाच महात्मानं प्रश्रयावनतो वचः। सम्यक्‌ प्रपश्यतो ब्रह्मन्‌ मम दुःखं न किंचन। असम्यक्‌दर्शिनो मग्नाः सर्वदा दुःख
खार्णवे। यस्मिन्नु ममत्वाख्यासंवित्पुंसः प्रजायते। ततस्ततः समादाय दुःखान्येव प्रयच्छति। मार्जाराभक्षिते दुःखं यादृशं गृहकुक्कु ॥५८॥
टे न तादृङ्‌ममताशून्ये कलविंकेथ मूषिके। सोऽहं न दुःखी न सुखी यतो हे प्रकृतेः परः। यो भूतानि भवाभूतैः सुखदुःखात्मको हि सः। दत्ता

त्रेय उ। एवमेतन्नरव्याघ्र यथैतद्व्याहृतं वचः। ममेति मूलं दुःखस्य न ममेति च निर्वृतिः। मत्प्रसादेन ते ज्ञानमुत्पन्नमिदमुत्तमं। ममेति प्र
त्ययो येन दिप्रः शाल्मलितूलवत्‌। अहमित्यंकुरोत्पन्नो ममेति स्कंधवान्महान्‌। गृहक्षेत्रादिशाखश्च पुत्रदारादिपल्लवः। धनधान्यमहा
पत्रो नैककालप्रवर्द्धितः। पुण्यापुण्यप्रपुष्पश्च सुखासुखमहाफलः। अपवर्गपथव्यापी मूढसंपर्कसेचनः। विवत्साचंगमालाढ्यो
हृदि जातो महातरुः। संसाराध्वपरिश्रांता येन च्छायां समाश्रिताः। भ्रांतज्ञानसुखंबी। तेषामात्यंतिकं कुतः। यैः सत्संगमपाषाणशितेन म
मतातरुः। छिन्नो विद्याकुठारेण ते गत्वा तेन वर्त्मना। प्राप्य ब्रह्मवनं सीतं नीरजस्कमकंटकं। प्राप्नुवंति परां प्राज्ञा निवृत्तिं तिवर्जितां। भू
तेंद्रियमयं स्थूलं तन्त्वं राजा न चाप्यहं। न तन्मात्रमयं वैहं नैवांतःकरणात्मको। किं न पश्यसि राजेंद्र प्रधानमपमावयोः। यतः परोऽति
क्षेत्रज्ञात्संघातीयं गुणात्मकः। मशको दुंबरेषीका मुंजमत्स्याम्भसो यथा। एकत्वेपि पृथक्‌भावस्तथा क्षेत्रात्मनोर्नृप। अलर्क उ। भगवंस्त
त्प्रसादेन ममाविर्भूतमुत्तमं। ज्ञानं प्रधानचिच्छक्ति विविक्तं परमीदृशं। किं त्वत्र विषयाक्रांतैः स्थैर्यमवत्वं न चेतसि। न चापि वेद्मि मुच्येयं
कथं प्रकृतिबंधनात्‌। कथं न भूयो भूयश्च कथं निर्गुणतामियात्‌। कथं च ब्रह्मणैकत्वं ब्रजेयं शाश्वतेन वै। तन्मे योगं तथा ब्रह्मन्‌ प्रणा
स्यानि याचतः। सम्यक्‌ ब्रूहि महाप्राज्ञ सत्संगो ह्युपकृन्नृणां॥२०॥ इति श्रीमार्कंडेयपुराणे। दत्तात्रेय उ। ज्ञानपूर्वो वियोगो यो ज्ञानेन
सह योगिनः। सा मुक्तिर्ब्रह्मणा चैक्यमनैक्यं प्राकृतैर्गुणैः। मुक्तिर्योगात्तथा योगः सम्यक्‌ज्ञानान्महीपते। ज्ञानं दुःखोद्भवं दुःखं ममत्वा
त्तच्च संगजं। तस्मात्संगं प्रयत्नेन मुमुक्षुः संत्यजेन्नरः। संगाभावान्ममेत्यस्याः ख्यातेर्हानिः प्रजापते। निर्ममत्वं सुखायैव वैराग्याद्दोष

दर्शनं। ज्ञानादेव च वैराग्यं ज्ञानं वैराग्यपूर्वकं। तद्गृहं यत्र वसतिः तद्भोज्यं येन जीव्यते। यन्मुक्तये तदेवोक्तं ज्ञानमज्ञानमन्यथा।। उप
भोगेन पुण्यानामपुण्यानां च पार्थिव। कर्तव्यमिति नित्यानामकामकरणात्तथा।। असंचयादपूर्वस्य क्षयात्पूर्वार्जितस्य च। कर्मणो
बंधमाप्नोति शरीरं न पुनः पुनः।। एतत्ते कथितं ज्ञानं योगं चेमं निबोध मे। यं प्राप्य ब्रह्मणो योगी शाश्वतान्नान्यतां व्रजेत्। प्रागात्मैवात्म
ना जेयो योगिनां स हि दुर्जयः। कुर्वीत तज्जये यत्नं तस्योपायं शृणुष्व मे। प्राणायामैर्दहेद्दोषान्धारणाभिश्च किल्बिषं। प्रत्याहारेण सं
सर्गान्ध्यानेनानीश्वरान्गुणान्। यथा पर्वतधातूनां ध्मातानां दह्यते मलः। तथेंद्रियकृता दोषा दह्यंते प्राणनिग्रहात्। प्रथमं साधनं कु
र्यात्प्राणायामस्य योगवित्। प्राणायामुनामुपनिरोधश्च प्राणायाम उदाहृतः। लघुमध्योत्तरीयाख्यः प्राणायामस्त्रिधोदितः। तस्य
प्रमाणं वक्ष्यामि तदलर्क शृणुष्व मे। लघुर्द्वादशमात्रस्तु द्विगुणः स तु मध्यमः। त्रिगुणाभिश्च मात्राभिरुत्तरीय उदाहृतः। निमेषोन्मे
षणे मात्रा तालो लघुलक्षणस्तथा। प्राणायामस्य संख्यार्थं स्मृतो द्वादशमात्रकः। प्रथमेन जयेत्स्वेदं मध्यमेन तु वेपथुं। विषादं हि तृतीये
न जयेद्दोषाननुक्रमात्। मृदुत्वं सेव्यमानास्तु सिंहशार्दूलकुंजराः। यथा याति तथा प्राणो वश्यो भवति योगिनः। वश्यं मत्तं यथेच्छातो ना
गं नयति हस्तिपः। तथैव योगी छंदेन प्राणं नयति साधितं। यथा हि साधितः सिंहो मृगान्हंति न मानवान्। तद्वन्निषिद्धः पवनः किल्बि
षं न नृणां तनुं। तस्माद्युक्तः सदा योगी प्राणायामपरो भवेत्। श्रूयतां मुक्तिफलदं तस्यावस्थाचतुष्टयं। ध्वस्तिः प्राप्तिस्तथा संवित्प्रसा
दश्च महीपते।। स्वरूपं शृणु चैतेषां कथ्यमानमनुक्रमात्। कर्मणामिष्टदुष्टानां जायते फलसंक्षयः। चेतसो विषयित्वात्तु यत्र सा ध्वस्ति ॥५५॥

रुच्यते। ऐहिकामुष्मिकान्कामाल्लोभमोहात्मिकः स्वयं। निरुध्यास्ते महायोगी प्राप्तिः सा सार्वकालिकी। अतीतानागतानर्थान्विप्रकृष्टति
रोहितान्। विजानातींदुसूर्यर्क्षग्रहाणां ज्ञानसंपदा। तुल्यप्रभावस्तु यदा योगी प्राप्नोति संविदं। तथा संविदिति ख्याता प्राणायामस्य सा स्थितिः।
यांति प्रसादं येनास्य मनो पंच च वायवः। इंद्रियाणींद्रियार्थाश्च स प्रसाद इति स्मृतः। शृणुष्व च महीपाल प्राणायामस्य लक्षणं। युंजतश्च सदा यो
गं यादृग्विहितमासनं। पद्ममर्द्धासनं वापि तथा स्वस्तिकमासनं। आस्थाय योगं युंजीत कृत्वा च प्रणवं हृदि। समः समानसो भूत्वा संहृत्य चर
णावुभौ। संवृत्यास्यं तथा चोरुः सम्यग्विष्टभ्य वाग्यतः। पाष्णिभ्यां लिंगवृषणावस्पृशन्प्रयतः स्थितः। किंचिदुन्नामितशिरा दंतैर्दंतान्न संस्पृ
शन्। संपश्यन्नासिकाग्रं स्वं दिशश्चानवलोकयेत्।। रजसस्तमसो वृत्तिं सत्वेन रजसस्तथा। संछाद्य निर्मले सत्वे स्थितो युंजीत योगवित्। इंद्रिया
णींद्रियार्थेभ्यः प्राणादीन्मन एव च। निगृह्य समवायेन प्रत्याहारमुपक्रमेत्। यस्तु प्रत्याहरेत्कामान्सर्वांगानीव कच्छपः। सदात्मरतिरेकस्थः
पश्यत्यात्मानमात्मनि। स बाह्याभ्यंतरं शौचं निष्पाद्याकंठनाभितः। पूरयित्वा बुधो देहं प्रत्याहारमुपाक्रमेत्। प्राणायामा दश द्वौ च धारणा सा
विधीयते। द्वे धारणे स्मृते योगो योगिभिस्तत्त्वदर्शिभिः। तथा वै योगयुक्तस्य योगिनो नियतात्मनः। सर्वे दोषाः प्रणश्यंति स्वस्थश्चैवोपजा
यते। वीक्षते च परं ब्रह्म प्राकृतांश्च गुणान्पृथक्। व्योमादिपरमाणूंश्च तथात्मानमकल्मषं। इत्थं योगी जिताहारः प्राणायामपरायणः।
जितां जितां शनैर्भूमिमारोहेत यथा गृहं। दोषान्व्याधींस्तथा मोहमाक्रांता तान्निर्जिता ह। विवर्द्धयति नाशेन तस्माद्भूमिं तु निर्जितां।
प्राणानामुपसंरोधात्प्राणायाम इति स्मृतः। धारणेत्युच्यते चेयं धार्यते यन्मनो यया। शब्दादिभ्यः प्रवृत्तानि यदक्षाणि यतात्मभिः।।

प्रात्याहृत्यं ते योगेन प्रत्याहारस्ततः स्मृतः। उपायश्चात्र कथितो योगिभिः परमर्षिभिः। येन व्याध्यादयो दोषा न जायंते हि योगिनः। य
थातोयार्थिनस्तोयं यंत्रनालादिभिः शनैः। आपिबेयुस्तथा वायुं पिबेद्योगी जितश्रमः। प्राग्नाभ्यां हृदये चाथ तृतीयां च तथोरसि। कं
ठे मुखे नासिकाग्रे नेत्रे भ्रूमध्यमूर्द्धसु। किंचित्तस्मात्परस्मिंश्च धारणा परमात्मनः। दशैता धारणाः प्राप्य प्राप्नोत्यक्षरसाम्यतां। ना
ध्मातः क्षुधितः श्रांतो न च व्याकुलचेतनः। युंजीत योगं राजेंद्र योगी सिद्ध्यर्थमादृतः। नातिशीते न चैवोष्णे द्वंद्वे नात्यनिलात्म
के। कालेष्वेतेषु युंजीत न योगं ध्यानतत्परः। सशब्देग्निजलाभ्यासे जीर्णगोष्ठे चतुष्पथे। शुष्कपर्णचये नद्यां श्मशाने ससरीसृपे। स
भये कूपतीरे वा चैत्यवल्मीकसंचये। देशेष्वेतेषु तत्त्वज्ञो योगाभ्यासं विवर्जयेत्। सत्वस्यानुपपत्तौ च देशकालविवर्जितं। नासतो द
र्शनं योगे तस्मात्तं परिवर्जयेत्। देशानेतान नादृत्य मूढत्वाद्यो युनक्ति वै। विघ्नाय तस्य ये दोषा जायंते तान्निबोध मे। बाधिर्यं जड
तालोपः स्मृतेर्मूकत्वमंधता। ज्वरश्च जायते सद्यस्तद्वदज्ञानयोगिनः। प्रमादाद्योगिनो दोषा यद्येते स्युश्चिकित्सितं। तेषां नाशा
य कर्तव्यं योगिनां तन्निबोध मे। स्निग्धां यवागूमत्युष्णां भुक्त्वा तत्रैव धारयेत्। वातगुल्मप्रशांत्यर्थमुदावर्ते तथोदरे। यवागूं वा
पि पवने वायुस्तथान्यपरिक्षिपेत्। तद्वत्कंपे महाशैलं स्थिरे मनसि धारयेत्। विघाते वचसो वाचं बाधिर्ये श्रवणेंद्रियं। तथैवाम्रफले
ध्यायेत्तृष्णार्तो रसनेंद्रिये। यस्मिन्यस्मिन्रुजा देहे तस्मिंस्तदुपकारिणीं। धारयेद्धारणामुष्णे शीतां शीते विदाहिनां। कीलं शिर ॥५६॥
सि संस्थाप्य काष्ठं काष्ठेन ताडयेत्। लुप्तस्मृतेः स्मृतिः सद्यो योगिनस्तेन जायते। द्यावापृथिव्यौ वाय्वग्नी व्यापिनावपि

धारयेत्। अमानुषान्सत्वजातान्बाधास्वेति विचिकित्सितं। अमानुषं सत्वमंतर्योगिनं प्रविशेद्यदि। वाय्वग्निधारणाच्चै
नं देहसंस्थं विनिर्दहेत्। एवं संस्थापनाकार्या रक्षा योगविदा नृप। धर्मार्थकाममोक्षाणां शरीरं साधनं यतः। प्रवृत्तिलक्षणाख्या
नाद्योगिनो विस्मयात्तथा। विज्ञानं विपुलं याति तस्माद्गोप्याः प्रवृत्तयः। अलौल्यमारोग्यमनिष्ठुरत्वं गंधः शुभो मूत्रपुरीषम
ल्पं। कांतिः प्रसादः स्वरसौम्यता च योगप्रवृत्तेः प्रथमं हि चिह्नं। अनुरागं जनो याति परोक्षे गुणकीर्तनं। न च बिभ्यति सत्वानि
सिद्धेर्लक्षणमुत्तमं। शीतोष्णादिभिरत्युग्रैर्यस्य बाधा न जायते। न भीतिमन्येभ्य उपैति तस्य सिद्धिरुपस्थिता। ६६। इति
श्रीमार्कंडेयपुराणे योगचिकित्सा ॥ ॥दत्तात्रेय उ०। उपसर्गाः प्रवर्त्तंते दृष्टे ह्यात्मनि योगिनः। ये तांस्ते संप्रवक्ष्यामि समा
सेन निबोध मे। काम्याः क्रियास्तथा कामान्मानुष्यानभिवांछति। स्त्रियो दानफलं विद्यां मायां कुप्यं धनादिकं। देवत्वममरेशत्वं
रसायनचयः क्रियाः। मरुत्प्रपतनं यज्ञं जलाग्न्यावेशनं तथा। श्राद्धानां सर्वदानानां फलानि नियमांस्तथा। तथोपवा
सान्पूर्त्तादेवताभ्यर्चनानि च। तेभ्यस्तेभ्यश्च कर्मभ्य उपसृष्टोभिवांछति। चित्तमित्थं प्रवर्त्तंतं यत्नाद्योगी निवर्तयेत्। ब्रह्म
संगि मनः कुर्वन्नुपसर्गात्प्रमुच्यते। उपसर्गैर्जितैरेभिरुपसर्गास्ततः पुनः। योगिनः संप्रवर्त्तंते सात्वराजसतामसाः। प्रातिभः श्र
वणो दैवो भ्रमावर्त्तौ तथापरौ। पंचैते योगिनां योगविघ्नाय कटुकोदयाः। वेदार्थाः काव्यशास्त्रार्थाः विद्याशिल्पान्यशेषतः। प्रति
भांति यदस्येति प्रातिभः स तु योगिनः। शब्दार्थानखिलान्वेत्ति शब्दं गृह्णाति चैव यत्। योजनानां सहस्रेभ्यः श्रावणः सोभिधीयते।

मार्कं श्लेषोयदातुदृश्यंतेसमंताद्देवयोनयः।उपसर्गंतमप्याहुर्दैवमुन्मत्तवद्बुधाः।भ्राम्यतेयन्निरालंबंमनोदोषेणयोगिनः।समस्ता
॥५७॥ चारविभ्रंशात्भ्रमःसपरिकीर्तितः।आवर्तइवतोयस्यज्ञानावर्तोयदाकुलः।चित्तंनाशयदावर्तःउपसर्गःसउच्यते।एतैर्नाशि
तयोगास्तुसकलादेवयोनयः।सूक्ष्मास्तुधारणाःसप्तभूराद्यामूर्ध्निधारयेत्।धरित्रींधारयेद्योगीततःसौक्ष्म्यंप्रतिपद्यते।आ
त्मानंमन्यतेचोर्वींतद्गंधंचजहातिसः।तथैवाप्सुरसंसूक्ष्मंतद्वद्रूपंचतेजसि।स्पर्शंवायौतथातद्वद्बिभ्रतस्तस्यधारणां।व्योम्नः
सूक्ष्मप्रवृत्तिंचशब्दंतद्वज्जहातिसः।मनसासर्वभूतानांमनस्त्वाविशतेयदा।मानसींधारणांबिभ्रन्मनःसूक्ष्मंचजायते।
तद्वद्बुद्धिमशेषाणांसत्त्वानामेत्ययोगवित्।परित्यजतिसंप्राप्यबुद्धिंसौक्ष्म्यमनुत्तमं।परित्यजतिसूक्ष्माणिसप्तैतानितुयो
गवित्।सम्यक्विज्ञाययोऽलर्कतस्यवृत्तिर्नविद्यते।एतासांधारणानांतुसप्तानांसौक्ष्म्यमात्मवान्।दृष्ट्वादृष्ट्वाततःसिद्धिं
त्यक्त्वात्यक्त्वापरांभजेत्।यस्मिन्यस्मिंश्चकुरुतेभूतेरागंमहीपते।तस्मिंस्तस्मिन्समासक्तिंसंप्राप्यसविनश्यति।तस्मा
द्विदित्वासूक्ष्माणिसंसक्तानिपरस्परं।परित्यजतियोयोगीसपरंप्राप्नुयात्पदं।एतान्येवतुसंधायसप्तसूक्ष्माणिपार्थि
व।भूतादीनांविरागोत्रसद्भावज्ञस्यमुक्तये।गंधादिषुसमासक्तमित्येनंदविलेजराजन्।पुनरावर्ततेसोपिभूपसर्वेह्यमरमानु
षाः।सप्तैताधारणायोगीसमतीत्ययदिच्छति।तस्मिंस्तस्मिन्लयंसूक्ष्मेयातिभूतेनरेश्वर।देवानामसुराणांगंधर्वोरगरक्ष
सांदेहेषुलयमायातिसंगंनाप्नोतिचक्वचित्।अणिमामहिमाचैवलघिमाप्राप्तिरेवच।प्राकाम्यंचतथेशित्वंवशित्वंच ॥५७॥

[त]थापरं।यत्रकामावसायित्वंगुणानेतांस्तथैश्वरान्।प्राप्नोत्यष्टौनरव्याघ्रपरंनिर्वाणसूचकान्।सूक्ष्मात्सूक्ष्मतरोऽणीयान्शीघ्रत्वाल्ल
घिमागुणः।महिमाशेषपूज्यत्वात्प्राप्तिर्नाप्राप्यमस्ययत्।प्राकाम्यमस्यव्यापित्वादीशत्वंचेश्वरोयतः।वशित्वाद्वशितानामयोगिनःसप्तमो
गुणः।यत्रेच्छास्थानमप्युक्तंयत्रकामावसायिता।ऐश्वर्यंकारणैरेभिर्योगिनःप्रोक्तमष्टधा।मुक्तिसंसूचकंभूपपरंनिर्वाणचेतसः।ततोनजा
यतेनैववर्द्धतेनविनश्यति।नातिक्षयमवाप्नोतिपरिणामंनगच्छति।छेदंक्लेदंतथादाहंशोषंभूरादितोनच।भूतवर्गादवाप्नोतिशब्दाद्यैर्ह्रियते
५८ नच।नचास्यसंतिशब्दाद्यास्तैर्ज्ञोक्तास्तैर्नयुज्यते।यथाहिकनकंखंडमपद्रव्यवदग्निना।दग्धदोषंद्वितीयेनखंडेनैक्यंव्रजेन्नृप।न
विशेषमवाप्नोतितद्वद्योगाग्निनायतिः।निर्दग्धदोषस्तेनैक्यंप्रयातिब्रह्मणासह।यथाग्निरग्नौसंक्षिप्तःसमानत्वमनुव्रजेत्।तदाख्य
स्तन्मयोभूत्वानगृह्यतेविशेषतः।परेणब्रह्मणातद्वत्प्राप्यैक्यंदग्धकल्मषः।योगीयातिपृथक्त्वंनयावत्कदाचिन्महीपते।यथाजलंज
लेनैक्यंनिक्षिप्तमुपगच्छति।तथात्मासात्म्यमभ्येतियोगिनःपरमात्मनि।४०।इतिश्रीमार्कंडेयपुराणे। ।अलर्कउवाच।भगवन्
योगिनश्चर्यांश्रोतुमिच्छामितत्त्वतः।ब्रह्मवर्त्मन्यनुसरन्यायोगीनावसीदति।।दत्तात्रेयउ।मानापमानौयावेतौप्रीत्युद्वेगकरौन
णां।तावेवविपरीतार्थौयोगिनःसिद्धिकारकौ।मानापमानौयावेतौतावेवाहुर्विषामृते।अपमानोऽमृतंतत्रमानस्तुविषमंविषं।च
क्षुःपूतंन्यसेत्पादंवस्त्रपूतंजलंपिबेत्।सत्यपूतांवदेद्वाणींबुद्धिपूतंविचिंतयेत्।आतिथ्यश्राद्धयज्ञेषुदेवयात्रोत्सवेषुच।महाज
नेनसिद्ध्यर्थंनगच्छेद्योगवित्क्वचित्।व्यस्तेविधूमेव्यंगारेसर्वस्मिन्भुक्तवतिजने।अटेतयोगविद्भैक्ष्यंनतुतिष्ठेतनिश्चलः।यथैन

मार्कं ॥५८॥

मवमन्यंते जनाः परिभवंति वै। तथा युक्तश्चरेद्योगी सतां धर्ममदूषयन्। भैक्ष्यं चरेद्गृहस्थेषु यायावरगृहेषु च। श्रेष्ठा तु प्रथमा
चेति वृत्तिरस्योपदिश्यते। अथ नित्यं गृहस्थेषु शालीनेषु चरेद्यतिः। श्रद्दधानेषु दांतेषु श्रोत्रियेषु महात्मसु। अत ऊर्द्ध्वं पुनश्चापि
अदुष्टापतितेषु च। भैक्ष्यचर्या विवर्णेषु जघन्या वृत्तिरिष्यते। भैक्ष्यं यवागूं तक्रं वा पयो यावकमेव वा। फलं मूलं विपक्वं वा कणपिण्या
कसक्तवः। इत्येते वै शुभाहाराः योगिनां सिद्धिकारकाः। तत्प्रयुंज्यान्मुनिर्युक्त्या परमेण समाधिना। अपः पूर्वं सकृत्प्राश्य तूष्णीं भूत्वा समाहितः।
प्राणायेति ततस्तस्य प्रथमा ह्याहुतिः स्मृता। अपानाय द्वितीया तु समानायेति चापरा। उदानाय चतुर्थी स्याद्व्यानायेति च पंचमी। प्राणा
यामैः पृथक्कृत्वा शेषं भुंजीत कामतः। अपः पुनः सकृत्प्राश्य आचम्य हृदयं स्पृशेत्। अस्तेयं ब्रह्मचर्यं च त्यागोऽलोभस्तथैव च। व्रतानि पं
च भिक्षूणाम् अहिंसा परमाणि वै। अक्रोधो गुरुशुश्रूषा शौचमाहारलाघवं। नित्यं स्वाध्याय इत्येते नियमाः पंच प्रकीर्तिताः। सारभूतमुपासीत
ज्ञानं यत्कार्यसाधनं। ज्ञानानां बहुता येयं योगविघ्नकरी सदा। इदं ज्ञेयमिदं ज्ञेयमिति यस्तृषितश्चरेत्। अपि कल्पसहस्रायुर्नैव ज्ञेयमवा
प्नुयात्। त्यक्तसंगो जितक्रोधो लघ्वाहारो जितेंद्रियः। पिधाय बुद्ध्या द्वाराणि मनो ध्याने निवेशयेत्। शून्येष्वेवावकाशेषु गुहासु च वनेषु च॥
नित्ययुक्तः सदा योगी ध्यानं सम्यगुपक्रमेत्। वाग्दंडः कर्मदंडश्च मनोदंडश्च ते त्रयः। यस्यैते नियता दंडाः स त्रिदंडी महामुनिः। सर्वमात्ममयं य
स्य सदसज्जगदीदृशं। गुणागुणमयं यस्य कः प्रियः को नृपाप्रियः। विशुद्धबुद्धिः समलोष्टकांचनः समस्तभूतात्मसमः समाहितः। स्थानं
परं शाश्वतमव्ययं च यतिर्हि गत्वा न पुनः प्रजायते। वेदाच्छ्रेष्ठाः सर्वयज्ञक्रियाश्च यज्ञाज्जप्यं ज्ञानमार्गश्च जप्यात्। ज्ञानाद्ध्यानं ॥५८॥

ध्यानाराग्यं ततस्तस्मिन्प्राप्ते शाश्वतस्योपलब्धिः। समाहितो ब्रह्मपरोऽप्रमादी शुचिस्तथैकांतरतिर्जितेंद्रियः। समाप्नुयाद्योगमिमं महा
मनाः विमुक्तिमाप्नोति ततश्च योगतः॥२६॥ इति श्रीमार्कंडेयपुराणे दत्तात्रेये योगसिद्धिः॥ ॥दत्तात्रेय उवाच॥ एवं यो वर्तते सम्यक् योगी
योगव्यवस्थितः। न स व्यावर्तयितुं शक्यो जन्मांतरशतैरपि। दृष्ट्वा च परमात्मानं प्रत्यक्षं विश्वरूपिणं। विश्वपादशिरोग्रीवं विश्वेशं विश्व
भावनं। तत्प्राप्तये महापुण्यमोमित्येकाक्षरं जपेत्। तदेवाध्ययनं तस्य स्वरूपं शृणुतः परं। अकारश्च तथोकारो मकारश्चाक्षरत्रये। एता मात्रा
स्त्रिः स्मृता मात्रा सात्त्विराजसतामसाः। निर्गुणा योगिगम्यान्या सार्द्धमात्रा तु संस्थिता। गांधारीति च विज्ञेया पंचधा स्वरसंश्रया। पिपीलि
कागतिस्पर्शा प्रयुक्ता मूर्द्ध्नि लक्ष्यते। यदा प्रयुक्त ॐकारः प्रतिनिर्याति मूर्द्धनि। तदोंकारमयो योगी अक्षरे त्वक्षरो भवेत्। प्राणो धनुः शरो
ह्यात्मा ब्रह्म वेध्यमुदाहृतं। अप्रमत्तेन वेद्धव्यं शरवत्तन्मयो भवेत्। ॐमित्येतत्त्रयो देवास्त्रयो लोकास्त्रयोऽग्नयः। विष्णुः क्रमास्त्रयश्चैव ऋक्
सामानि यजूंषि च। मात्राश्चार्द्धं च तस्य स्तु विज्ञेयाः परमार्थतः। तत्र युक्तस्तु यो योगी स तल्लयमवाप्नुयात्। अकारस्त्वथ भूर्लोक उकारश्चोच्यते
भुवः। सव्यंजनो मकारश्च स्वर्लोकः परिकल्प्यते। व्यक्ता तु प्रथमा मात्रा द्वितीयाऽव्यक्तसंज्ञिता। मात्रा तृतीया चिच्छक्तिरर्द्धमात्रा परं पदं। अने
नैव क्रमेणैता विज्ञेया योगभूमयः। ॐमित्युच्चारणात्सर्वं गृहीतं सदसद्भवेत्। ह्रस्वा तु प्रथमा मात्रा द्वितीया दीर्घसंयुता। तृतीया च प्लुता ज्ञेया अर्द्ध
र्द्धा वचसः सा न गोचरा। इत्येतदक्षरं ब्रह्म परमोंकारसंज्ञितं। यस्तु वेद नरः सम्यक् तथा ध्यायति वा पुनः। संसारचक्रमुत्सृज्य त्यक्तत्रिवि
धबंधनः। प्राप्नोति ब्रह्मनिलयं परमे परमात्मनि। अक्षीणकर्मबंधस्तु ज्ञात्वा मृत्युमरिष्टतः। उत्क्रांतिकाले संस्मृत्य पुनर्योगित्वमृच्छति। तस्मा

।मार्कं
॥५९॥

दसिद्धयोगेनसिद्धयोगेनवापुनः॥ज्ञेयान्यरिष्टानिमहाराजशृणुवक्ष्यामियानिते।येषामालोकनान्मृत्युंनिजंजानातियोगवित्॥देव
मार्गंध्रुवंशुक्रंसोमछायामरुंधतीं॥योनपश्येत्सजीवेतनरःसंवत्सरात्परं॥अरश्मिबिंबंसूर्यस्यवह्निंचैवांशुमालिनं।दृष्ट्वैकादशमासो
र्ध्वंनरोनार्द्धंसजीवति।वांत्यापुरीषमूत्रेयःसुवर्णरजतंनरः।प्रत्यक्षमथवास्वप्नेजीवितंदशमासिकं।दृष्ट्वाप्रेतपिशाचादीन्गंधर्वनग
राणिच।सुवर्णवर्णान्वृक्षांश्चनवमासान्सजीवति।स्थूलःकृशःस्थूलोयःऽकस्मादेवजायते।प्रकृतेश्चनिवर्त्तेततस्यायुश्चाष्टमासिकं।
खंडंयस्यपदंपार्ष्णौःपादस्याग्रेऽथवाभवेत्।पांशुकर्दममध्येसप्तमासान्सजीवति।कपोतगृध्रोऽलूकोवावायसोवापिमूर्द्धनि।क्रव्यादो
वाखगोलीनःषण्मासायुःप्रदर्शकः।हन्यतेकाकपंक्तीभिःपांशुवर्षेणवापुनः।स्वछायांयान्यथाद्दृष्ट्वापंचमासान्सजीवति।अन
भ्रेविद्युतंदृष्ट्वादक्षिणांदिशिमाश्रितां।पयसींद्रधनुर्वापिजीवितंद्वित्रिमासिकं।घृतेतैलेतथादर्शेतोयेवानात्मनस्तनुं।यःपश्येदशिरस्कां
वामासादूर्ध्वंनजीवति।यस्यछागसमोगंधोगात्रेशवसमोपिवा।तस्यार्द्धमासिकंज्ञेयंयोगिनोनृपजीवितं।यस्यवैस्नातमात्रस्यहृत्पा
दमथशुष्यति।पिवतश्चजलंशोषोदशाहंसोपिजीवति।संभिन्नोमारुतोयस्यमर्मस्थानानिकृंतति।नहृष्यतिचसंस्पर्शात्तस्यमृत्युरु राम
पस्थितः।ऋक्षवानरयुग्यस्थोयोयायाद्दक्षिणांदिशं।स्वप्नेप्रयातितस्यापिसमृत्युःकालमृच्छति।रक्तकृष्णांवरधरागायंतीहसतीचयं
दक्षिणाशांनयेन्नारीस्वप्नेसोपिनजीवति।नग्नंक्षपणकंस्वप्नेपश्यत्यथात्मानंनरःसद्योम्रियतेसः।केशांगारंतथाभस्मभुजगान्नि
र्जलांनदीं।दृष्ट्वास्वप्नेदशाहंतुमृत्युरेकादशेहनि।करालैर्विकटैःकृष्णैःपुरुषैरुद्यतायुधैः।पाषाणैस्ताडितःस्वप्नेसद्योमृत्युंलभेन्न ॥५९॥

रःसूर्योदयेयस्यशिवाक्रोशंतीयातिसन्मुखं।विपरीतंपरीतंवासससद्योमृत्युमृच्छति।यस्यवैस्नातमात्रस्यहृदयंपीड्यतेक्षुधा।जायंतेदंतहर्षश्चसगतायु
रसंशयं।दीपगंधंनयोवेत्तित्रस्यत्यह्नितथानिशि।नात्मानंपरनेत्रस्थंवीक्ष्यतेनसजीवति।शक्रायुधंचार्द्धरात्रेदिवाग्रहगणंतथा।दृष्ट्वामन्येतसंक्षी
णमात्मजीवितमात्मवान्।नासिकावक्रतामेतिकर्णयोर्नमनोन्नती।नेत्रंचवामंस्रवतियस्यतस्यायुरुद्गतं।आरक्ततामेतिमुखंजिह्वावाप्यसि
तायदा।तदाप्राज्ञोविजानीयान्मृत्युमासन्नमात्मनः।उष्ट्ररासभयानेनयःस्वप्नेदक्षिणांदिशं।प्रयातितंविजानीयात्सद्योमृत्युंनरेश्वर।पिधाय
कर्णौनिर्घोषंनशृणोत्यात्मसंभवं।नश्यतेचक्षुषोज्योतिर्यस्यसोपिनजीवति।पततोयस्यवैगर्तेस्वप्नेद्वारंविधीयते।नचोत्तिष्ठतियःश्वभ्रात्तदंतंत
स्यजीवितं।ऊर्द्ध्वाचदृष्टिर्नचसंप्रतिष्ठितारक्तापुनःसंपरिवर्त्तमाना।मुखस्यचोष्माशुषिरंचनाभेःशंसंतिपुंसामपरंशरीरं।स्वप्नेग्निंप्रविश्येद्य
स्तुनचनिःक्रमतेनरः।जलप्रवेशादपिवातदंतंतस्यजीवितं।यश्चाभिहन्यतेदुष्टैर्भूतैरात्रावथोदिवा।समृत्युंसप्तरात्रांतात्पुमान्प्राप्नोत्यसंशयं।स्व
वस्त्रममलंशुक्लंस्वप्नेपश्यत्यथासितं।यःपुमान्मृत्युमासन्नंतस्यापिहिविनिर्दिशेत्।स्वभाववैपरीत्यंतुप्रकृतेश्चविपर्ययः।कथयंतिमनुष्या
णांसमासन्नौयमांतिकौ।येषांविनीतःसततंयेचपूज्यतमामताः।तानेवचावजानातितानेवचविनिंदति।देवतान्नार्चयेद्दुष्टान्गुरून्विप्रांश्चनिं
ति।मातापित्रोःसत्कारंजामातॄणांकरोतिच।योगिनांज्ञानविदुषामन्येषांचमहात्मनां।प्राप्तेतुकालेपुरुषस्तद्वेद्यंविचक्षणैः।योगि
नासततंयत्नादनिष्टान्यवनीपते।संवत्सरांतेसंदृष्टान्फलदानिदिवानिशं।विलोक्यानिसदाचैवतेषांपंक्तिःसुभीरुणा।विज्ञायकार्योमन
सिवलकालोनरेश्वर।ज्ञात्वाकालंचतंसम्यगभयंस्थानमाश्रितः।युंजीतयोगीकालोसौयथास्याऽफलोनवैतं।दृष्ट्वारिष्टंततोयो

मार्कं
॥६१॥

गी त्यक्त्वा मरणजं भयं। तत्त्वज्ञो वंतदालोच्य कालेयावतिपाकदं। तस्य त्वं गेतथैवाह्नो योगं युंजीत योगवित्। पूर्वाह्ने वापराह्ने वा मध्याह्ने वा
दिने दिने। यत्र वा रजनीभागे तदरिष्टं निरीक्षितं। तत्रैव तावद्युंजीत यावत्प्राप्तहितं हि तं। ततस्त्यक्त्वा भयं सर्वं जित्वा तं कालमात्मवान्। तत्रैवा
वसथे स्थित्वा यत्र वावसथे स्थित्वा यत्र वा स्थैर्यमात्मनः। युंजीत योगी निर्जित्य त्रीन्गुणान्परमात्मनि। तत्परश्चात्मनो भूत्वा चिद्वृत्तिमपि
संत्यजेत्। ततः परमनिर्वाणमतींद्रियमगोचरं। यद्बुद्ध्येयन्नवाख्यातुं शक्यते तत्समश्नुते। एतत्ते सर्वमाख्यातं तत्वालर्क यथार्थवत्। ततः परम
निर्वाणमतींद्रियमगोचरं। प्राप्यसे येन तद्ब्रह्म संक्षेपात्तन्निबोध मे। शशांकरश्मिसंयोगाच्चंद्रकांतो मणिः पयः। समुत्सृजति नायुक्तः सोप
माध्योगिनः स्मृता। यथार्करश्मिसंयोगादर्ककांतो हुताशनं। आविः करोति नैकः सन्नुपमा सा तु योगिनः॥ पिपीलिकाखुनकुलगृहगोधा
पिंजलाः। वसंति स्वामिवद्गेहे ध्वस्ते यांति ततोन्यतः। दुःखं तु स्वामिनो ध्वंसे तस्य ते षां न किंचन। विमानो यत्र राजेंद्र सोपमा योगसिद्धये।
मृद्देहाकल्यगेहापि मुखाग्रेणातिपिणीयसा। करोति कृती मृद्भारेचयमुपदेशः स योगिनः। पशुपक्षिमनुष्याद्यैः पत्रपुष्पफलान्वितं। वृ
क्षं विलुप्यमानं तु बुध्वा सिद्ध्यति योगिनः। रुरुशावविषाणाग्रमालक्ष्य तिलकाकृतिं। सह तेन विवर्द्धते योगी सिद्धिमुपाश्नुते। द्रवपूर्णमुपादाय पा
त्रमारोहते भुवः। तुंगमार्गं विलोक्यैवं विज्ञातं किं तु योगिना। सर्वस्वं जीवनायालं निपाने पुरुषस्य या। चेष्टा तां तत्त्वतो ज्ञात्वा योगिनां हि तत्कृ
त्यता। तद्गृहं यत्र वसतिस्तद्भोज्यं येन जीवति। येन निष्पाद्यते स्वार्थस्तत्सुखं ममताऽत्र का। स्वर्थिना प्रार्थितः कार्यं करोति करणैर्यथा। त
था बुद्ध्यादिभिर्योगी पारक्यैः साधयेत्परं। जड उवाच। ततः प्रणम्य विप्रेंद्रमलर्कः स महीपतिः। प्रश्रयावनतो वाक्यमुवाचात्रिसुतान्वि ॥६१॥

अलर्क उ। दिष्ट्या देवैरिदं ब्रह्मन्प्राणिनिभवसंभवं। उपपादितमत्युग्रं प्राणसंदेहजं भयं। दिष्ट्या काशिपतिर्भूरिबलसंपन्नपौरुषः। यद्
स्मिकादिहायातः स युष्मत्संगदो मम। दिष्ट्या मदबलश्चाहं दिष्ट्या नष्टं महद्धनं। दिष्ट्या कोशः क्षयं यातो दिष्ट्याहं भीतिमागतः। दिष्ट्या
त्वत्पादयुगलं मम संस्मृतिपथं गतं। दिष्ट्या त्वदुक्तयः सर्वा मम चेतसि संस्थिताः। दिष्ट्या ज्ञानं ममोत्पन्नं त्वत्संश्रयसमागमात्। भवतान्नय
कारुण्यं दिष्ट्या ब्रह्मन्कृतं मयि। अनर्थोप्यर्थतां याति पुरुषस्य शुभोदये। यथेह उपकाराय व्यसनं संगमात्तव। सुबाहुरुपकारी मे स च काशिप
तिः प्रभो। ययोः कृतेहं संप्राप्तो योगीश त्वत्संनिकं। सोहं भवत्प्रसादाग्निनिर्दग्धाज्ञानकिल्बिषः। तथा यतिष्ये येनेह न स्यां दुःखभाक्पु
नः। परित्यक्ष्ये गार्हस्थ्यं आर्त्तिपादपकाननं। त्वत्तोनुज्ञां समासाद्य ज्ञानदातुर्महात्मनः। दत्तात्रेय उ। गच्छ राजेंद्र भद्रं ते यथावत्कथितं मया।
निर्ममो निरहंकारस्तथा चर विमुक्तये। पुत्र उवाच। एवमुक्तः प्रणम्यैनं आजगाम त्वरान्वितः। यत्र काशिपतिर्भ्राता सुबाहुश्चास्य सोग्रजः।
समुपेत्य महाबाहुं सोलर्कः काशिभूपतिं। सुबाहोरग्रतो वीरमुवाच प्रहसन्निव। राज्यकामुक काशीश भुज्यतां राज्यमूर्जितं। यथा वा रोचते तद्व
त्सुबाहोः संप्रयच्छ वा। काशिराज उवाच। किमलर्क परित्यक्तं राज्यं ते संगरं विना। क्षत्रियस्य न धर्मोयं भवांश्च क्षत्रधर्मवित्। निर्जितामात्यव
र्गस्तु त्यक्त्वा मरणजं भयं। संदधीत शरं राजा लक्ष्यमुद्दिश्य वैरिणां। तं जित्वा नृपतिर्भोगान्यथाभिलषितान्नृप। भुंजीत परमं सिद्ध्यै यजे
च महामखैः। अलर्क उ। एवमीदृशकं वीर ममाप्यासीन्मनः पुरा। सांप्रतं विपरीतार्थं शृणु चाप्यत्र कारणं। यथायं भौतिकः संघस्तथांतःकरणं
नृणां। गुणाश्च सकलास्तद्वदशेषेष्वेव जंतुषु। चिच्छक्तिरेव एवायं यदा नान्योस्ति कश्चन। तदा कान्नृपतेऽज्ञानां मित्रस्वाम्यरित्यता।

DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

तन्मया दुःखमासाद्य त्वद्भवमुत्तमं। दत्तात्रेयप्रसादेन ज्ञानं प्राप्तं नरेश्वर। निर्जितेंद्रियवर्गस्तु त्यक्त्वा संगमशेषतः। मनो ब्रह्मणि संधास्ये तज्ज्ञ
येयपरमो जेयः। संसाध्यमन्यन्नास्ति सिद्धौ यतः किंचिन्न विद्यते। इंद्रियाणि वसंयम्य ततः सिद्धिं नियच्छति। सो ऽहं नैतेरिर्न ममास्ति शत्रुः सुबाहुरेवा
नसमायकारी। इष्टं मयी सर्वमिदं यथात्मा अन्विष्यतां भूपरिपुस्तथान्यः। इत्थं स तेनाभिहितेन रेंद्रहृष्टः समुत्थाय ततः सुबाहुः। द्विधेति
तं भ्रातरमस्य नंदत्काशीश्वरं वाक्यमिदं बभाषे। ८३। इति श्रीमार्कंडेयपुराणे दत्तात्रेये अलर्कज्ञानप्राप्तिर्नाम। ।सुबाहुरु उ।। यदर्थं नृप
शार्दूल त्वामहं शरणं गतः। तन्मया सकलं प्राप्तं यास्यामि त्वं सुखी भव। काशिराज उ। किं निमित्तं भवान्प्राप्तो निष्पन्नो ऽर्थश्च कस्तव। सुबाहु
तन्मे माचद्भ्वपं कौतूहलं हि मे। ममाक्रांतमलर्केण पितृपैतामहं महत्। राज्यं देहीति निर्जेतुं त्वयाहमभिनोदितः। ततो मया समाक्रम्य राज्यम
स्यानुजस्य ते। एतत्ते वशमानीतं तत्तस्तु द्रव्यस्वकुलोचितं। सुबाहुरुवाच। काशिराज निबोध त्वं यदर्थं मयमुद्यमः। कृतो मयात्र वांछेव कारितो ऽ
त्यंतमुद्यमं। भ्राता ममायं भ्रात्येषु सक्तो ऽज्ञो ऽभूततत्त्ववित्। विमूढबोधवंतौ च भ्रातरौ वग्रजौ मम। तयोर्मम च यन्मात्रा बाल्ये स्तन्यपथा सुखे तथा
वबोधो विन्यस्तः कर्णयोरवनीपते। तयोर्मम च विज्ञेया प्राधान्यायस्मतो नृभिः। प्राकाश्यमनसो नीतास्ते मात्रा नास्य पार्थिव। यथैव सार्थे जातानां
एकस्मिन्नवसीदति दुःखं भवति साधूनां तथास्माकं महीपते। गार्हस्थ्यमोहमापन्ने सीदत्यस्मिन्नरेश्वरे। संबंधिन्यस्य देहस्य विभ्रातिरश्रातृक
ल्पनां। ततो मया विनिश्चित्य दुःखाद्वैराग्यकल्पना। भविष्यत्यस्य हि भवानित्युद्योगाय संश्रितः। तदस्य दुःखाद्वैराग्यसंयोगादवनीपते। समु
त्पन्नं कृतं कार्यं भद्रं ते स्तु व्रजाम्यहं। ९२। उषित्वा मदालसागर्भे तस्य पीत्वा तथा स्तनं। मान्यनारीसुतैर्यातं वर्त्म यात्विति पार्थिव। विचार्यैतन्मया ॥६१॥

सर्वैः युष्मत्सत्यपूर्वकं। कृतं तच्चापि निष्पन्नं प्रयास्ये सिद्धये पुनः। उपेक्ष्यते सीदमानः स्वजनो बांधवः सुहृत्। यैर्नरेंद्र न तान्मन्ये सेंद्रियान्विक
लाहि ते। सुहृदि स्वजने बंधौ समर्थे यो वसीदति। धर्मार्थकामभोगैभ्यो दोषो वाच्यास्ते तत्र न त्वमी। एतत्त्वत्संगमाद्भूप मया कार्यं महत्कृतं। स्वस्ति
ते ऽगमिष्यामि ज्ञानभाक् भव सत्तम। काशिराज उ। उपकारस्त्वया साध्वे अलर्कस्य कृतो महान्। ममोपकाराय कथं न करोषि स्वमानसे। फलदायि
सतां सद्भिः संगमो नाफलो यतः। तस्मात्त्वत्संश्रया युक्तो मया प्राप्ता समुन्नतिः। सुबाहुरु। धर्मार्थकाममोक्षाख्यं पुरुषार्थचतुष्टयं। तत्र धर्मार्थ
कामार्थं दीयते सकलो जनः। ते ते संक्षेपतो वक्ष्ये तदेहि कमनाः शृणु। श्रुत्वा चैष सम्यगालोच्य यतेथाः श्रेयसे नृप। ममेति प्रत्ययो भूपन कार्यो ऽहमिति ल
या। सम्यगालोच्य धर्मो हि धर्मभावे निराश्रयः। को वाहमिति संज्ञेयमित्यालोच्यं त्वयात्मना। राज्यांतर्गतमालोच्यमालोच्यापररात्रिषु। अव्यक्ता
द्यं विशेषांतं सविकारमचेतनं। व्यक्ताव्यक्तं त्वया ज्ञेयं ज्ञाता कश्चाहमित्युत। एतस्मिन्नेव विज्ञाते विज्ञातमखिलं त्वया। अनात्मन्यात्म विज्ञानं
न स्वे स्वमिति मूढता। सो ऽहं सर्वगतो भूप लोकसंव्यवहारतः। मयेदमुच्यते सर्वं त्वया दिष्टो व्रजाम्यहं। एवमुक्त्वा ययौ धीमान् सुबाहुः काशिभूमिपं। राम
काशिराजो पि संपूज्य सो ऽलर्कः स्वपुरं ययौ। अलर्को पि सुतं ज्येष्ठमभिषिच्य नराधिपं। वनं जगाम संत्यक्तसर्वसंगः स्वसिद्धये। ततः कालेन महता नि
र्द्वंद्वो निःपरिग्रहः। प्राप्य योगर्द्धिमतुलां परं निर्वाणलक्षणं। पश्यन् जगदिदं सर्वं सदेवासुरमानुषं। पाशैर्गुणमयैर्बद्धं बध्यमानं च नित्यशः। पुत्रा
त्मभ्रातृमित्रादि स्वपारक्यादि भाविनैः। आकृष्यमाणैः करणैः दुःखार्त्तं भिन्नदर्शनं। अज्ञानपंकगर्तस्थमनुद्धारं महामतिः। आत्मानं च स मुनी
र्णां गाथामेतामगायत। अहो कष्टं यदस्माभिः पूर्वं राज्यमनुष्ठितं। अपि पश्चान्मया ज्ञातं योगान्नास्ति परं सुखं। सुत उ। तातेत तत्त्वं समातिष्ठ मुक्तये येयो

।मार्कं
॥६२॥

गमुत्तमं। प्राप्स्यसे यस्मिन्ब्रह्म यत्र गत्वा न शोचसि। ततो हम पियास्यामि किं यज्ञैः किं जपेन च। कृतकृत्यस्य करणं ब्रह्मत्वायाय कल्पते॥ त्वत्तोनु
ज्ञामवाप्याहं निर्द्वंद्वो निःपरिग्रहः। प्रयतिष्ये तथा मुक्तिं यथा यास्यामि निर्वृतिं॥ पक्षिण ऊचुः। एवमुक्त्वा स पितरं प्राप्यानुज्ञां ततश्च सः। ब्रह्म
न्न जगाम मेधावी परित्यक्तपरिग्रहः। सोपि तस्य पिता तद्वत्क्रमेणैव समाहितः। वानप्रस्थं समास्थाय चतुर्थाश्रममभ्यगात्। तत्रात्मजयमासा
द्य हित्वा बंधं गुणादिकं। प्रापसिद्धिं परां प्राज्ञस्तत्कालोपात्तसन्मतिः। एतत्ते कथितं ब्रह्मन्मया यद्भवता वयं। सविस्तरं यथावच्च किमन्यच्छ्रोतुमि
च्छसि। ४०। इति श्रीमार्कंडेयपुराणे मदालसोपाख्याने अलर्कोपाख्याने अलर्कयोगसिद्धिः समाप्ता चेदं सुमति जडोपाख्यानं मदालसोपाख्यानं च
॥ ॥ जैमिनिरुः। सम्यगेतत्समाख्यातं भवद्भिर्द्विजसत्तमाः। प्रवृत्तं च निवृत्तं च द्विविधं कर्म वैदिकं। अहो पितृप्रसादेन भवतां ज्ञानमीदृशं।
यत्तिर्यक्त्वमप्येतत्प्राप्य मोहस्तिरस्कृतः। धन्या भवंतः संसिद्ध्यै प्रागवस्थास्थितं यतः। भवतां विषयोद्भूतैर्न मोहैश्चाल्यते मनः। दिष्ट्या भगव
ता तेन मार्कंडेयेन धीमता। भवंतो वै समाख्याताः सर्वसंदेहहृत्तमाः। संसारेस्मिन्मनुष्याणां भ्रमतामतिसंकटे। भवद्विधैः समं संगो जायते नातप
स्विनां। यद्यहं संगमासाद्य भवद्भिर्ज्ञानदृष्टिभिः। न स्यां कृतार्थस्तन्नूनं न मन्येस्ति कृतार्थता। प्रवृत्ते च निवृत्ते च भवतां धर्मकर्मणि। मतिरस्त्य
मला मन्ये यथा नान्यस्य कस्यचित्। यदि त्वनुग्रहवती मयि बुद्धिर्द्विजोत्तमाः। भवतां तत्समाख्यातुमर्हथ्येदमशेषतः। कथमेतत्समुद्भूतं जगत्स्था
वरजंगमं। कथं च प्रलयं काले पुनर्यास्यति सत्तमाः। कथं च वंशा देवर्षिपितृदेवादिसंभवाः। मन्वंतराणि च कथं वंशानुचरितं च यत्। यावत्यः सृ
ष्टयश्चैव यावंतः प्रलयास्तथा। यावत्कल्पविभागश्च या च मन्वंतरस्थितिः। यथा च क्षितिसंस्थानं यत्प्रमाणं च वै भुवः। यथा स्थि[illegible]ताः समु ॥६२॥

द्राद्रिनिम्नगाः काननानि च। भूर्लोकादिस्वलोकानां गणाः पातालसंश्रयः। गतिस्तथार्कसोमादिग्रहर्क्षज्योतिषामपि। श्रोतुमि[illegible]म्यहं सर्व
मेतदाभूतसंप्लवं। उपसंहृते च यच्छेषं जगत्यस्मिन्भविष्यति। पक्षिण ऊचुः। प्रश्नभारोयमतुलो यस्त्वया मुनिसत्तम। पृष्टस्तत्ते प्रवक्ष्यामस्तं श
णुष्वेह जैमिने। मार्कंडेयेन कथितं पुरा क्रोष्टुकये यथा। द्विजपुत्राय शांताय व्रतस्नाताय धीमते। मार्कंडेयं महात्मानमुपासीनं द्विजोत्तमैः। क्रोष्टु
किः परिपप्रच्छ यदेतत्पृष्टवान्भवान्। तस्मै चाकथयत्प्रीत्या यन्मुनिर्भृगुनंदनः। तत्ते प्रकथयिष्यामः शृणु त्वं द्विजसत्तम। प्रणिपत्य जग
न्नाथं पद्मयोनिं पितामहं। जगद्योनिं स्थितिं सृष्टौ स्थितौ विष्णुस्वरूपिणं। प्रलये चांतकर्तारं रौद्रं रुद्रस्वरूपिणं। मार्कंडेय उ०। उत्पन्नमात्रस्य पु
रा ब्रह्मणोऽव्यक्तजन्मनः। पुराणमेतद्वेदाश्च मुखेभ्योऽनुविनिःसृताः। पुराणसंहिताश्चक्रुर्बहुलाः शिष्यचतुष्टये। वेदान्सप्तर्षयस्तस्माज्जे
गृहुः सप्तमानसाः। पुराणं जगृहुश्चाद्या मुनयस्तस्य मानसाः। भृगोः सकाशाच्च्यवनस्तेनोक्तं तत्द्विजन्मनां। ऋषिभिश्चैव दक्षाय प्रोक्तं
मेतन्महात्मभिः। दक्षेण चापि कथितमिदमासीत्तदा मम। तत्तुभ्यं कथयाम्यद्य कलिकल्मषनाशनं। सर्वमेतन्महाभाग श्रूयतां मे समा
धिना। यथाश्रुतं मया पूर्वं दक्षस्य गदतो मुने। प्रणिपत्य जगद्योनिमजमव्ययमाश्रयं। चराचरस्य जगतो धातारं परमं पदं। ब्रह्माणमादि
पुरुषमुत्पत्तिस्थितिसंचये। यत्कारणमनौपम्यं यत्र सर्वं प्रतिष्ठितं। तस्मै हिरण्यगर्भाय लोकतंत्राय धीमते। प्रणम्य सम्यक्वक्ष्यामि भूत
सर्गमनुत्तमं। महदाद्यं विशेषांतं सवैरूप्यं सलक्षणं। प्रमाणैः पंचभिर्गम्यं स्रोतोभिः षड्भिरन्वितं। पुरुषाधिष्ठितं नित्यमनित्यमिव संस्थि
तं। तच्छ्रूयतां महाभाग परमेण समाधिना। प्रधानं कारणं यत्तदव्यक्ताख्यं महर्षयः। यदाहुः प्रकृतिं सूक्ष्मां नित्यां सदसदात्मिकां। ध्रुवम

।मार्कं क्षय्यमजरममेयं चान्यसंश्रयं। गंधरूपरसैर्हीनं शब्दस्पर्शविवर्जितं। अनाद्यंतं जगद्योनिं त्रिगुणप्रभवाव्ययं। असांप्रतमविज्ञेयं ब्रह्मा
॥६३॥ ग्रे समवर्त्तत। प्रलयस्यानु तेनेदं व्याप्तमासीदशेषतः। गुणसाम्यात्ततस्तस्मात् क्षेत्रज्ञाधिष्ठितान्मुने। गुणाव्यिंजमानेन सर्गकाले ततः पु
नः। प्रधानतत्त्वमुद्भूतं महांतं तत्समावृणोत्। यथा बीजं त्वचा रुद्धं एवं तेनावृतो महान्। भूतादिश्च विकुर्वाणः सर्गतन्मात्रकं ततः। ससर्ज
शब्दतन्मात्रादाकाशं शब्दलक्षणं। आकाशं शब्दतन्मात्रं भूतादिश्चावृणोत्ततः। आकाशस्तु विकुर्वाणः शब्दमात्रं ससर्ज ह। बलवा
श्च ततो वायुस्तस्य स्पर्शो गुणो मतः। आकाशाच्छब्दतन्मात्रं स्पर्शमात्रं समावृणोत्। ज्योतिश्चापि विकुर्वाणं रसमात्रं ससर्ज ह। संभवंति त
तो ह्यापस्ता वै प्रोक्ता रसात्मिकाः। रसमात्रं तु ता ह्यापो रूपमात्रं समावृणोत्। आपश्चापि विकुर्वंत्यो गंधमात्रं ससर्जिरे। संघातो जायते त
स्मात्तस्य गंधो गुणो मतः। तस्मिंस्तस्मिंस्तु तन्मात्रं तेन तन्मात्रता स्मृताः। अविशेषवाचकत्वादविशेषास्ततश्च ते। न शांता नापि घोरास्ते न मू
ढाश्चाविशेषिणः। भूततन्मात्रसर्गोयं अहंकारात्तु तामसात्। वैकारिकादहंकारात्सत्त्वोद्रिक्तात्तु सात्त्विकात्। तेजसानींद्रियाण्याहुर्देवा वै
कारिकाद्दश। एकादशं मनस्तत्र देवा वैकारिकाः स्मृताः। श्रोत्रं त्वक्चक्षुषी जिह्वा नासिका चैव पंचमी। शब्दादीनामवाप्त्यर्थं बुद्धियु
क्तानि वक्ष्यते। पादौ पायुरुपस्थश्च हस्तौ वाक् पंचमी भवत्। गतिर्विसर्गो ह्यानंदः शिल्पं वाक्यं च कर्म वै। आकाशं शब्दमात्रं तु स्पर्शमा
त्रं समाविशत्। तस्माच्चैतु गुणो ह्यापो विज्ञेयास्ता रसात्मिकाः। शब्दस्पर्शश्च रूपं च रसो गंधः समाविशत्। संहता गंधमात्रेण आचिन्वंति
महीमिमां। तस्मात्पंचगुणा भूमिः स्थूला भूतेषु दृश्यते। शांता घोराश्च मूढाश्च विशेषास्तेन ते स्मृताः। परस्परानुप्रवेशाद्धारयंति परस्परं ॥६३॥

भूमेरंतस्त्विदं सर्वं लोकालोकसमावृतं। विशेषाश्चेंद्रियग्राह्या नियतत्वाच्च ते स्मृताः। गुणं पूर्वस्य पूर्वस्य प्राप्नुवंत्युत्तरोत्तराः। नानावीर्याः पृ
थग्भूताः सप्तैते संहतिं विना। नाशक्नुवन् प्रजाः स्रष्टुमसमागम्य कृत्स्नशः। समेत्यान्योन्यसंयोगमन्योन्याश्रयिणश्च ते। एकसंघातल
क्षास्ते संप्राप्यैक्यमशेषतः। पुरुषाधिष्ठितत्वाच्च अव्यक्तानुग्रहेण च। महदाद्या विशेषांता ह्यंडमुत्पादयंति ते। आदिकर्त्ता च भूतानां ब्र
ह्माग्रे समवर्त्तत। तेन सर्वमिदं व्याप्तं त्रैलोक्यं सचराचरं। मेरुस्तस्योल्बसंभूतो जरायुश्चापि पर्वताः। समुद्रा गर्भसलिलं तस्यांडस्य महात्म
नः। तस्मिन्नंडे जगत्सर्वं सदेवासुरमानुषं। द्वीपान्यद्रिः समुद्राश्च ज्योतिर्लोकसंग्रहः। जलानिलानलाकाशैस्ततो भूतादिना बहिः। वृतं
दशगुणैरेकैकस्य च तैः पुनः। संहता तन्मात्राणां सहैवानेन वेष्टितं। महांस्तैः सहितैः सर्वैरव्यक्तेन समावृत[illegible]रोरंडं सप्तभिः प्रा
कृतैर्वृतं। अन्योन्यमावृत्य च ता ह्यष्टौ प्रकृतयः स्थिताः। एषा सा प्रकृतिर्नित्या तदंतः पुरुषश्च सः। ब्रह्माख्यः कथितो यस्ते समासात् श्रूयतां पु
नः। यथा मग्नो जले कश्चिदुन्मज्जन् जलसंभवं। चालयन्दीपते ब्रह्मा स तथा प्रकृतीर्विभुः। अव्यक्तं क्षेत्रमुद्दिष्टं ब्रह्म क्षेत्रज्ञ उच्यते। इत्ये
ष प्राकृतः सर्गः क्षेत्रज्ञाधिष्ठितस्तु यः। अबुद्धिपूर्वकः प्रथमः प्रादुर्भूतस्तडिद्यथा। ४५॥ इति श्रीमार्कंडेयपुराणे ब्रह्मनिर्वृत्तिः। क्रौ
ष्टुकिरु। भगवंस्तत्त्वसंभूतिर्यथावत्कथिता मम। ब्रह्मांडे ब्रह्मणो जन्म तथा चोक्तं महात्मना। एतदिच्छाम्यहं श्रोतुं त्वत्तो भृगुकुलो
द्वह। यदा न सृष्टिर्भूतानां अस्ति किंचिन्न दानवा १२ काले वै प्रलयस्यांते सर्वस्मिन्नुपसंहृते। मार्कंडेय उवाच। यदा तु प्रकृतौ याति लयं
सर्वमिदं जगत्। तदोच्यते प्राकृतोयं विद्वद्भिः प्रतिसंचरः। ८। स्वात्मन्यवस्थिते व्यक्ते विकारे प्रतिसंहृते। प्रकृतिः पुरुषश्चैव साधर्म्येणावति

मार्कं ष्टतः।तदा तमश्च सत्वं च समत्वेन गुणौ स्थितौ।अनुद्रिक्तावनुन्नौ तौ च ओतप्रोतौ परस्परं।तिलेषु वा यथा तैलं घृतं वा पयसि स्थितं।
॥६४॥ तथा तमसि सत्वे च रजोप्यनुसृतं स्थितं।६उत्पन्ने ब्रह्मणो यावदायुर्वै द्विपरार्द्धिकं।तावद्दिनं परेशस्य तत्समः संयमो निशा।अहर्मु
खे प्रबुद्धस्तु जगदादिरनादिमान्।सर्वहेतुरचिंत्यात्मा परः कोप्यपरःक्रियः।प्रकृतिं पुरुषं चैव प्रविश्याशु जगत्पतिः।क्षोभयामास
योगेन परेण परमेश्वरः।यथा मदो नरस्त्रीणां यथा वा माधवानिलः।अनुप्रविश्य क्षोभाय तथासौ योगमूर्तिमान्।प्रधाने क्षो
भ्यमाणे तु स देवो ब्रह्मसंज्ञिकः।समुत्पन्नोऽण्डकोशस्थो यथा ते कथितं मया।स एव क्षोभकः पूर्वं स क्षोभ्यः प्रकृतेः पतिः।स संकोचवि
काशाभ्यां प्राधान्येपि व्यवस्थितः।उत्पन्नः स जगद्योनिरगुणोऽपि रजोगुणः।भजन्प्रवर्त्तते सर्गं सर्गे ब्रह्मत्वं समुपाश्रितः।ब्रह्म
त्वे संप्रजाः सृष्ट्वा ततः सत्वातिरेकवान्।विष्णुत्वमेत्य धर्मेण कुरुते परिपालनं।ततस्तमोगुणोद्रिक्तो रुद्रत्वे चाखिलं जगत्।उपसंहृत्य
वै शेते त्रैलोक्ये त्रिगुणोऽगुणः।यथा प्राग्व्यापकः क्षेत्री पालको लावकस्तथा।तथा स संज्ञामायाति ब्रह्मविष्णुहरात्मिकां।ब्रह्मत्वे
सृजते लोकान्रुद्रत्वे संहरत्यपि।विष्णुत्वे चाप्युदासीनस्तिस्रोऽवस्थाः स्वयंभुवः।रजो ब्रह्मा तमो रुद्रो विष्णुः सत्वं जगत्पतिः।एत
एव त्रयो देवा एत एव त्रयो गुणाः।अन्योन्यमिथुना ह्येते अन्योन्याश्रयिणस्तथा।क्षणं वियोगो न ह्येषां न त्यजंति परस्परं।एवं ब्रह्मा
जगत्पूर्वो देवदेवश्चतुर्मुखः।रजोगुणं समाश्रित्य स्रष्टृत्वे संव्यवस्थितः।हिरण्यगर्भो देवादिरनादिरुपचारतः।भूपद्मकर्णिकासंस्थः प
द्मासने समजायत।तस्य वर्षशतं त्वेकं परमायुर्महात्मनः।ब्राह्मेणैव हि मानेन तस्य संख्यां निबोध मे।निमेषैर्दशभिः पंचकाष्ठा त्वथा पंच ॥६५॥

भि[illegible]च्यते।कला त्रिंशत्तु वै काष्ठा मुहूर्त्तस्त्रिंशदेव ताः।अहोरात्रं मुहूर्त्तानां नृणां त्रिंशत्तु वै स्मृतं।त्रिंशद्भिस्तैरहोरात्रैः पक्षौ द्वौ मास उच्यते।
तैः षड्भिरयनं वर्षं द्वेयने दक्षिणोत्तरे।तद्देवानामहोरात्रं दिनं तत्रोत्तरायणं।दिव्यैर्वर्षसहस्रैस्तु कृतत्रेतादिसंज्ञितं।चतुर्युगं द्वादशभि
स्तद्विभागं शृणुष्व मे।चत्वारि तु सहस्राणि वर्षाणां कृतमुच्यते।शतानि संध्या चत्वारि संध्यांशश्च तथाविधः।त्रेता त्रीणि सहस्राणि दिव्या
ब्दानां शतत्रयं।तस्य संध्या समाख्याता संध्यांशश्च तथाविधः।द्वापरं द्वे सहस्रे तु वर्षाणां द्वे शते तथा।तस्य संध्या समाख्याता द्वे शते च तद
ंशकः।कलिः सहस्रं दिव्यानामब्दानां द्विजसत्तम।संध्या संध्यांशकश्चैव शतिकौ समुदाहृतौ।एषा द्वादशसाहस्री युगाख्या कविभिः स्मृता।
एतत्सहस्रगुणितमहो ब्राह्ममुदाहृतं।ब्रह्मणो दिवसे ब्रह्मन्मनवस्तु चतुर्दश।भवंति भागशस्तेषां साहस्रं तद्विभज्यते।देवाः सप्तर्ष
यः सेंद्रा मनुस्तत्तनयान्नृपाः।मनुना सह सृज्यंते संह्रियंते च पूर्ववत्।चतुर्युगानां संख्याता साधिका ह्येकसप्ततिः।मन्वंतरस्य संख्या
यां मानुषाब्दैर्निबोध मे।त्रिंशत्कोट्यस्तु संपूर्णाः संख्याताः संख्यया द्विज।सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया।त्रिविंशतिस्तु स
हस्राणि कालोयं साधिकं विना।एतन्मन्वंतरं प्रोक्तं दिव्यैर्वर्षैर्निबोध मे।अष्टौ शतसहस्राणि दिव्यया संख्यया स्मृतं।द्वापंचाशत्तथा
न्यानि सहस्राण्यधिकानि वा।चतुर्दशगुणो ह्येष कालो ब्राह्ममहः स्मृतं।तस्यांते प्रलयः प्रोक्तो ब्राह्मो नैमित्तिको बुधैः।भूर्लोकोथ भु
वर्लोकः स्वर्लोकश्च विनाशितः।तदा विनाशमायांति महर्लोकश्च तिष्ठति।तद्वासिनो यतापेन जनलोकं प्रयांति वै।एकार्णवे च त्रैलोक्ये ब्र
ह्मा स्वपिति वै निशि।तत्प्रमाणैव सा रात्रिस्तदंते सृजति प्रभुः।एवं तु ब्रह्मणो वर्षं एवं वर्षशतं तु यत्।शतं हि तस्य वर्षाणां परमित्यभिधी

यते। पंचाशद्भिस्तथा वर्षैः परार्द्धमभिधीयते। एवमस्य परार्द्धं तु व्यतीतं द्विजसत्तम। तस्यांते ऽभून्महाकल्पः पाद्म इत्यभिविश्रुतः। द्वि
तीयस्य परार्द्धस्य वर्त्तमानस्य वै द्विज। वाराह इति कल्पो ऽयं प्रथमः परिकीर्त्तितः॥४५॥ इति श्रीमार्कंडेयपुराणे। ।क्रौष्टुकिरु। ।य
थाससर्ज वै ब्रह्मा भगवानादिकृत्प्रजाः। प्रजापतिर्देवदेवस्तन्मे विस्तरतो वद। श्रीमार्कंडेय उ। कथयाम्येष ते ब्रह्मन्ससर्ज भगवा
न्यथा। लोककृत्स्रष्टा प्रभवः कृत्स्नं जगत्स्थावरजंगमं। कल्पावसानसमये निशासुप्तोत्थितो विभुः। सत्त्वोद्रिक्तस्तथा ब्रह्मा शून्यं लोकमवै
क्षत। इदं चोदाहरंत्यत्र श्लोकं नारायणं प्रति। ब्रह्मस्वरूपिणं देवं जगतः प्रभवाव्ययं। आपो नारा इति प्रोक्ता आपो वै नरसूनवः। अय
नं तस्य ताः पूर्वं तेन नारायणः स्मृतः। विबुद्धः सलिले तस्मिन्विज्ञायांतर्गतां महीं। अनुमानात्तदुद्धारं कर्तुकामस्तदा मुनिः। अकरोत्स
तनूमन्यां कल्पादिषु यथा पुरा। मत्स्यकूर्मादिकां तद्वद्वाराहं वपुरास्थितः। वेदयज्ञमयं दिव्यं वेदयज्ञमयो विभुः। रूपं कृत्वा विवेशाप्सु
सर्वगः सर्वसंभवः। समुद्धृत्य च पातालान्मुमोच सलिले भुवं। जनलोकस्थितैः सिद्धैश्चिंत्यमानो जगत्पतिः। तस्योपरि जलौघस्य
महती नौरिव स्थिता। विततत्वात्तु देहस्य न मही याति संप्लवं। ततः क्षितिं समीकृत्य पृथिव्यां सो ऽसृजद्गिरीन्। त्रैलोक्ये दह्यमाने तु त
दा संवर्त्तकाग्निना। तेनाग्निना विशीर्णास्ते पर्वता भुवि सर्वशः। शैला ह्येकार्णवे मग्ना वायुना ह्यापः संस्थिताः। निषक्ता यत्र यत्र ते
न्तत्र तत्राचलान्नवान्। भूविभागं ततः कृत्वा सप्तद्वीपोपशोभितं। भूराद्यांश्चतुरो लोकान्पूर्ववत्समकल्पयत्। सृष्टिं चिंतयतस्तस्य दे
वं कल्पादिषु यथा पुरा। अबुद्धिपूर्वकस्तस्मात्प्रादुर्भूतस्तमोमयः। तमो मोहो महामोहस्तामिस्रो ह्यंधसंज्ञिकाः। अविद्या पंचपर्वैषा

प्रादुर्भूता महात्मनः। पंचधावस्थितः सर्गो ध्यायतो ऽप्रतिबोधवान्। बहिरंतश्चाप्रकाशः संवृतात्मा नगात्मकः। मुख्या नगा यत
मुख्यसर्गस्ततस्त्वयं। तं दृष्ट्वासाधकं सर्गममन्यदपरं पुनः। तस्याभिध्यायतः सर्गस्तिर्यक्स्रोतो ऽभ्यवर्त्तत। तस्मात्तिर्यक्प्रवृत्तः स तिर्यक्
स्रोतस्ततः स्मृतः॥ पश्वादयस्ते विख्यातास्तमःप्राया ह्यवेदिनः। उत्पथग्राहिणश्चैव ते ऽज्ञाने ज्ञानमानिनः। अहंकृता अहंमाना अष्टाविंश
द्विधात्मकाः। अंतःप्रकाशास्ते सर्वे आवृताश्च परस्परं। तमप्यसाधकं मत्वा ध्यायतो ऽन्यस्ततो ऽभवत्। ऊर्ध्वस्रोतस्तृतीयस्तु सात्त्विकोर्ध्व[illegible]
सर्वे[illegible]सुखप्रीतिबहुलाः बहिरंतस्त्वनावृताः। प्रकाशा बहिरंतश्च ऊर्ध्वस्रोतोभवाः स्मृताः। ततो ऽन्यं स तदा दध्यौ साधकं सर्गमुत्तमं। अ
साधकांस्तु तान्मत्वा दिव्यसंसर्गसंभवान्। अथाभिध्यायतस्तस्य सत्याभिध्यायिनस्ततः। प्रादुर्बभौ तदाव्यक्तादर्वाक्स्रोतस्तु साधकः। तस्मा
दर्वाक्प्रवर्त्तंते ततो ऽर्वाक्स्रोतसः स्मृताः। ते च प्रकाशबहुलास्तमोद्रिक्ता रजोधिकाः। तस्मात्ते दुःखबहुला भूयो भूयश्च कारिणः। प्रकाशा ब
हिरंतश्च मनुष्याः साधकाश्च ते। पंचमो ऽनुग्रहः सर्गः स चतुर्धा व्यवस्थितः। विपर्ययेण सिद्ध्या च शक्त्या तुष्ट्या तथैव च। निवृत्तं वर्त्तमानं
च सर्वं जानाति वै पुनः। भूतादिकानां भूतानां षष्ठः सर्ग उच्यते। ते परिग्राहिणः सर्वे संविभागरतास्तथा। विदिताश्चाप्यलीकाश्च ज्ञेया
भूतादिकाश्च ते। इत्येते कथिताः सर्गाः षडेव मुनिसत्तम। प्रथमो महतः सर्गो विज्ञेयो ब्रह्मणस्तु सः। तन्मात्राणां द्वितीयस्तु भूतसर्गः स उ
च्यते। वैकारिकस्तृतीयस्तु सर्गश्चैंद्रियकः स्मृतः। इत्येष प्राकृतः सर्गः संभूतो बुद्धिपूर्वकः। मुख्यसर्गश्चतुर्थस्तु मुख्या वै स्थावराः
स्मृताः। तिर्यक्स्रोतस्तु यः प्रोक्तस्तिर्यग्योन्यः स पंचमः। अथोर्ध्वस्रोतसं षष्ठो देवसर्गस्तु स स्मृतः। ततो ऽर्वाक्स्रोतसां सर्गः सप्तमः

मार्क
॥६६॥

सतुमानुषः॥ अष्टमोनुग्रहः सर्गः सात्त्विकस्तामसश्च सः। पंचैते वैकृताः सर्गाः प्राकृतास्तु त्रयः स्मृताः। प्राकृतो वैकृतश्चैव कौमा
रो नवमः स्मृतः॥ इत्येते च समाख्याता नव सर्गाः प्रजापतेः। प्राकृता वैकृताश्चैव किमन्यच्छ्रोतुमिच्छसि॥ ३७॥ इति श्रीमार्कंडेयपुराणे
सर्गस्थितिर्नाम॥ क्रोष्टुकिरु॥ समासात्कथिता सृष्टिर्नसम्यग्भवता मम। देवादीनां भवान्ब्रह्मन्विस्तरात्प्रब्रवीतु मे॥ श्रीमार्कंडेय उ॥
कुशलाकुशलैर्ब्रह्मन्भाविताः पूर्वकर्मभिः। ख्यात्यानया ह्यनिर्मुक्ताः प्रलये ह्युपसंहृताः। देवाद्याः स्थावरांताः प्रजा ब्रह्मंश्चतुर्विधाः।
ब्रह्मणः कुर्वतः सृष्टिं जज्ञिरे मानसास्तदा। ततो देवासुरपितॄन्मनुष्यांश्च चतुष्टयं। सिसृक्षुरंभांस्येतानि स्वमात्मानमयूयुजत्। युक्ता
त्मनस्तमोमात्रा उद्रिक्ताभूत्प्रजापतेः॥ सिसृक्षोर्जघनात्पूर्वं असुरा जज्ञिरे ततः। उत्ससर्ज ततस्तां तु तमोमात्रात्मिकां तनुं। सापविद्धा तनु
स्तेन सद्यो रात्रिरजायत। अन्यां तनुमुपादाय सिसृक्षुः प्रीतिमानभूत्। सत्त्वोद्रिक्तास्ततो देवा मुखतस्तस्य जज्ञिरे॥ उत्ससर्ज च तेनास्त
नुं तामपि स प्रभुः। सा चोत्सृष्टाभवत्संध्या दिननक्तांतरस्थितिः॥ रजोमात्रात्मिकामन्यां तनुं तामपि स प्रभुः। ततो मनुष्याः संभूता रजोमा
त्रासमुद्भवाः। सृष्ट्वा मनुष्यान्स विभुरुत्ससर्ज तनुं ततः। ज्योत्स्ना समभवत्सा च या प्राक्संध्येति सु खेचया। इत्येतास्तनवस्तस्य देवदेवस्य धीमतः।
ख्याता रात्र्यहनी चैव संध्या ज्योत्स्ना तथैव च। ज्योत्स्ना संध्या तथैवाहः सत्त्वमात्रात्मकं त्रयं। तमोमात्रात्मिका रात्रिः सा वै तस्मात्तमोधिका।
तस्माद्देवा दिवा शक्ता ह्यसुराश्च बलान्विताः। ज्योत्स्नागमे च मनुजाः संध्यायां पितरस्तथा। भवंति बलिनोऽधृष्या विपक्षाणां न संशयः। तादि
य्यायमानास्तु प्रयांति च विपर्ययं। ज्योत्स्ना रात्र्यहनी संध्या चत्वार्येतानि वै प्रभोः। ब्रह्मणस्तु शरीराणि त्रिगुणोपाश्रयाणि च। चत्वा ६६

र्येतान्यध्यात्वा घ तनुमान्यां प्रजापतिः। रजस्तमोमयीं रात्रौ जगृहे क्षुत्क्षमान्वितः। ततोंधकारे क्षुत्क्षामानसृजद्भगवानजः। विरूपान्श्म
श्रुलान्हे तु मारक्ष्यास्ते च तां तनुं रक्षाम इति तेष्वन्येष्वय ऊचुस्ते च राक्षसाः। यक्षाम इति ये चोचुस्ते यक्षा यक्षणाद्द्विज। तान्दृष्ट्वा ह्यप्रियेणा
स्य केशाः शीर्णास्तु वेधसः। समारोहणादीनां च शिरसो ब्रह्मणः शिरः। सर्पणात्तेऽभवन्सर्पाः हीनत्वादहयः स्मृताः। सर्पान्दृष्ट्वा ततः क्रुद्धः
क्रोधात्मानो विनिर्ममे। वर्णेन कपिशेनोग्रास्ते भूताः पिशिताशनाः। ध्यायतो गां ततस्तस्य गंधर्वा जज्ञिरे सुताः। पिबंतो जज्ञिरे वाचं गंधर्वास्ते
न ते स्मृताः। अष्टास्वेतासु सृष्टासु देवयोनिषु स प्रभुः। ततः स्वच्छन्दतोऽन्यानि वयांसि वयसोऽसृजत्। मुखतोऽजाः ससर्जाथ वक्षसश्चावयोऽसृ
जत्। गाश्चैवोदरतो ब्रह्मा पार्श्वाभ्यां च विनिर्ममे। पद्भ्यां सोऽश्वान्समातंगान्रासभान्गवयान्मृगान्। उष्ट्रानश्वतरांश्चैव नानारूपाश्च जा
यते अवध्यः फलमूलिन्यो रोमभ्यस्तस्य जज्ञिरे। एवं पश्वोषधीः सृष्ट्वा सयुजोजाऽध्वरे विभुः। तस्मादादौ तु कल्पस्य त्रेतायुगमुखे तदा। गौर
जः पुरुषो मेषोऽश्वाश्वतरगर्दभाः। एतान्ग्राम्यान्पशून्नाहुरारण्यांश्च निबोध मे। श्वापदं द्विखुरं हस्ती वानराः पक्षिपंचमः। औदकाः
पशवः षष्ठाः सप्तमाश्च सरीसृपाः। गायत्रं च ऋचश्चैव त्रिवृत्साम रथंतरं। अग्निष्टोमं च यज्ञानां निर्ममे प्रथमान्मुखात्। यजूंषि त्रिष्टुभं छंद
स्तोमं पंचदशं तथा। बृहत्साम तथोक्थ्यं च दक्षिणादसृजन्मुखात्। सामानि जगतीछंदः स्तोमं सप्तदशं तथा। अतिरात्रं च यज्ञानां निर्ममे पश्चि
मान्मुखात्। एकविंशमथर्वाणमाप्तोर्यामाणमेव च। अनुष्टुभं सवैराजमुत्तरादसृजन्मुखात्। विद्युतोऽशनिमेघांश्च रोहितेन्द्रधनूंषि च। वयां
सि च ससर्जादौ कल्पस्य भगवान्विभुः। उच्चावचानि भूतानि गात्रेभ्यस्तस्य जज्ञिरे। सृष्ट्वा चतुष्टयं पूर्वं देवासुरपितॄन्प्रजाः। ततोऽसृ

मार्कं ॥६७॥

जत्सृष्टानि चराणि स्थावराणि च। यक्षान् पिशाचान् गंधर्वान् तथैवाप्सरसां गणान्। नरकिंनररक्षांसि वयःपशुमृगोरगान्। अव्ययं च व्य
यं चैव यदिदं स्थाणुजंगमं। तेषां ये यानि कर्माणि प्राक्सृष्ट्यां प्रतिपेदिरे। तान्येव प्रतिपद्यंते सृज्यमानाः पुनः पुनः। हिंस्राहिंस्रे मृदुक्रूरे धर्मा
धर्मावृतानृते। तद्भाविताः प्रपद्यंते तस्मात्तत्तस्य रोचते। इंद्रियार्थेषु भूतेषु शरीरेषु च स प्रभुः। नानात्वं विनियोगं च धातैव व्यदधात्स्वयं। नाम
रूपं च भूतानां कृत्यानां च प्रपंचनं। देवाः शब्देभ्य एवादौ देवादीनां चकार सः। ऋषीणां नामधेयानि याश्च वेदेषु सृष्टयः। शर्वर्यंते प्रसूतानां
अन्येषां च ददाति सः। यथर्त्तावृतुलिंगानि नानारूपाणि पर्यये। दृश्यंते तानि तान्येव तथा भावा युगादिषु। एवंविधासु सृष्टिषु ब्रह्मणो
व्यक्तजन्मनः। शर्वर्यंते प्रबुद्धस्य कल्पे कल्पे भवंति वै। ४४। इति श्रीमार्कंडेयपुराणे सृष्टिनिवेदनो नामाध्यायः। ।क्रौष्टुकिरु।
अर्वाक्स्रोतस्तु कथितो भवता यस्तु मानुषः। ब्रह्मन् विस्तरतो ब्रूहि ब्रह्मा तं ससृजे यथा। यथा वर्णानसृजद् गुणांश्चापि महामुने।
यच्च तेषां स्मृतं कर्म विप्रादीनां वदस्व मे॥ श्रीमार्कंडेय उ। ब्रह्मणः सृजतः पूर्वं सत्याभिध्यायिनस्तथा। मिथुनानां सहस्रं तु सोऽसृजद्वक्त्रतो मु
ने। मुखात् जनास्ते ह्युपपद्यंते सत्त्वोद्रिक्ताः सुचेतसः। सहस्रमन्यद्वक्षसो मिथुनानां ससर्ज ह। ते सर्वे रजसोद्रिक्ताः शुष्मिणश्चा
प्यमर्षिणः। ससर्जान्यत्सहस्रं तु द्वंद्वानामूरुतः पुनः। रजस्तमोभ्यामुद्रिक्ता ईहाशीलास्तु ते स्मृताः। पद्भ्यां सहस्रमन्यच्च मिथुना
नां ससर्ज ह। उद्रिक्तास्तमसा सर्वे निःश्रीका ह्यल्पमेधसः। ततः संसर्प्यमाणास्ते द्वंद्वोत्पन्नास्तु प्राणिनः। अन्योन्यहृच्छयाविष्टा मै
थुनायोपचक्रमुः। ततः प्रभृति कल्पेऽस्मिन् मैथुनोत्पत्तिरुच्यते। मासि मास्यार्त्तवं यच्च न तदासीत्तु योषितां। तस्मात्तदा न सुषुवुः से ॥६७॥

वितैरपि मैथुनैः। आयुषोंते प्रसूयंते मिथुनान्येव ताः सकृत्। कुलिकं कुलिकाश्चैव उत्पद्यंते मुमूर्षतां। ततः प्रभृति कल्पेऽस्मिन् मिथुना
नां हि संभवः। ध्यानेन मनसा तासां प्रजानां जायते सकृत्। शब्दादिविषयः शुद्धः प्रत्येकं पंचलक्षणः। इत्येवं मानसी सृष्टिर्या पूर्वं वै प्रजा
पतेः। तस्यान्ववाये संभूता यैरिदं पूरितं जगत्। सरित्सरःसमुद्रांश्च सेवंते पर्वतानपि। तास्तदा ह्यल्पशीतोष्णा युगे तस्मिंश्चरंति वै। पृ
स्वाभाविकी प्राप्तविषये सुसहा मते। न तासां प्रतिघातोस्ति न द्वंद्वो नापि मत्सराः। पर्वतोदधिसेविन्यस्त्वनिकेताश्च सर्वशः। ता वै निःकामचा
रिण्योऽपि नित्यमुदितमानसाः। पिशाचोरगरक्षांसि न तदा मत्सरिणो जनाः। पशवः पक्षिणश्चैव न तदासन् सरीसृपाः। न नारका ह्यंडजा यास्ते
ह्यधर्मप्रसूतयः। न मूलफलपुष्पाणि नार्त्तवा ऋतवो न च। सर्वकालसुखः कालो नात्यर्थं शीतघर्मतः। कालेन गच्छता तेषां विज्ञसिद्धिर्न्नि
जायते। ततश्चापराह्णे पूर्वाह्णे मध्याह्ने च वितृप्तता। पुनस्तदिच्छतां तृप्तिरनायासेऽभवत्तदा। इच्छतां सततं यासां मनसः समजायत। अ
पां सौक्ष्म्यात्ततस्तासां संसिद्धिर्नाम नामतः। सोऽल्पसा। समजायत चैवान्या अर्थकामप्रदायिनी। असंस्कार्यैः शरीरैस्तु प्रजास्ताः स्थिरयौवनाः।
वृत्त्या रितु सहस्राणि वर्षाणां मानुषाणि च। आयुःप्रमाणं जीवंति न च क्लेशान् विपत्तयः। क्वचित्क्वचित्पुनः साभूत् क्षितिरोसा न स
र्वतः। कालेन गच्छता नाशमुपयांति ततः प्रजाः। तथा ताः क्रमशो नाशं जग्मुः सर्वत्र सिद्धयः। तासु सर्वासु नष्टासु मनसः प्रच्युता लसाः। प्राय
सः कल्पवृक्षास्ते संभूता गृहसंस्थिताः। सर्वं प्रत्युपभोगाश्च तासां तेभ्यः प्रजायते। वर्त्तयंति स्म तेभ्यस्तास्त्रेतायुगमुखे तदा। ततः कालेन वे
रागस्तासां सः कल्पको भवत्। मासि मास्यार्त्तवोत्पत्त्या गर्भोत्पत्तिः पुनः पुनः। रागोत्पत्त्या ततस्तासां वृक्षास्ते गृहसंस्थिताः। प्रणाशमुप
रे चासंस्थतु शीला महीरुहाः। वस्त्राणि च प्रसूयंते फलेष्वाभरणानि च। तेष्वेव जायते तासां गंधवर्णरसान्वितं। असाक्षिकं महावीर्यं पुटके

मधुः॥ तेन ता वर्त्तयंति स्म सुखेनेता युगस्य वै॥ ततः कालांतरेणैव पुनर्लोभान्वितास्तु ताः॥ वृक्षांस्तान्पर्यगृह्णंत ममत्वाविष्टचेतसः॥ नेशु
स्तेनाऽपचारेण ते पि तास्तां महीरुहाः॥ ततो द्वंद्वान्यजायंत शीतोष्णक्षुत्सुखानि वै॥ तास्ततो द्वंद्वोपघातार्थं चक्रुः पूर्वं पुराणि च॥ मरुधन्व
सु दुर्गेषु पर्वतेषु नदीषु च॥ संश्रयंति च दुर्गाणि धान्वं पार्वतमौदकं॥ कृत्रिमं च तथा दुर्गं मित्वा मित्वात्मनोऽङ्गुलीः॥ मानार्थानि प्रमाणानि
तास्ताः पूर्वं प्रचक्रिरे॥ परमाणुः परः सूक्ष्मस्त्रसरेणुर्महीरजः॥ वालाग्रं चैव लिक्षा च यूका चाथ यवोदरं॥ क्रमादष्टगुणान्याहुर्यवा ह्यष्टौ तथां
गुलं॥ षडंगुलं पदं यच्च वितस्तिर्द्विगुणा स्मृता॥ द्विवितस्तिस्तथा हस्तो ब्रह्मतीर्थादिवेष्टनैः॥ चतुर्हस्तं धनुर्दंडो नालिकायुगमेव च॥ क्रोशो ध
नुःसहस्रे द्वे गव्यूतिस्तच्चतुर्गुणाः॥ तच्चोक्तं योजनं प्राज्ञैः संख्यानार्थमिदं परं॥ चतुर्णामथ दुर्गाणां स्वसमुत्थानि त्रीणि तु॥ चतुर्थं कृत्रिमं दु
र्गं तच्च कुर्वन्नतस्ततः॥ पुरं च खेटकं चैव तद्द्रोणीमुखं द्विज॥ शाखानगरकं चैव तथा खर्वटकं द्रुमं॥ ग्रामसंघोषविन्यासं तेषु चावस
थान्पृथक्॥ सोत्सेधवः सुप्राकारं सर्वतः खातिकावृतं॥ योजनार्द्धार्द्धविष्कंभमष्टभागोत्तरायतं॥ प्रागुदक्प्रवणं शस्तं शुद्धवंशबहिर्गो
मं॥ तदर्द्धेन तथा खेटं तस्मादूनं तु खर्वटं॥ न्यूनं द्रोणीमुखं तस्मादष्टभागेन चोच्यते॥ प्राकारपरिखाहीनं पुरं खर्वटमुच्यते॥ शाखानग
रकं चान्यत्स्मृतं विसामंतसुक्तिमतां॥ तथा शूद्रजनप्रायाः सुसमृद्धकृषीवलाः॥ क्षेत्रोपभोगभूमध्ये वसतिर्ग्रामसंज्ञिता॥ अन्यस्मान्नग
रादेर्या कार्यमुद्दिश्य मानवैः॥ क्रियते वसतिः साथ विज्ञेया वसथिर्नरैः॥ दुष्टप्रायो विना क्षेत्रैः परभूमिश्च या बली॥ ग्राम एव द्रुमीसंज्ञा रा
जवल्लभसंश्रयः॥ शकटारूढभांडश्च सगोपो विपणिं विना॥ गोसमूहस्तथा घोषो यत्रेच्छा निकेतनः॥ एवं तेन पुरादीश्च कृत्वा वास ॥६८॥

थमात्मनः॥ निकेतनानि द्वंद्वानां चक्रुश्चोपशमाय वै॥ गृहाकाराय यथापूर्वं तेषामासन्महीरुहाः॥ तथा संस्मृत्य संस्मृत्य चक्रुर्वेश्मानि ताः
प्रजाः॥ वृक्षस्यैवं गताः शाखास्तथैवं चापरा मता॥ ततश्चैवोन्नताश्चैव तद्वच्छालाः प्रचक्रिरे॥ याः शाखाः कल्पवृक्षाणां पूर्वमासन्द्विजो
त्तम॥ ता एव शालारोहाणां शालात्वेनेन ता सुततः॥ हत्वा द्वंद्वोपघातं ते वार्त्तोपायमचिंतयन्॥ नष्टेषु मधुना सार्द्धं कल्पवृक्षेष्वशेषतः॥
विषादव्याकुलास्ता वै प्रजाः तृष्णाक्षुधार्दिताः॥ प्रादुर्बभूव तासां तु सिद्धिस्त्रेतामुखे तदा॥ वार्त्तायसाधिता ह्यन्या वृष्टिः सा साध्यकामता॥
तासां वृष्ट्युदकानीह यदा निम्नैर्गतानि वै॥ वृष्ट्यावरुद्धैरभवन्स्रोतः खातानि निम्नगाः॥ ये पुरस्तादपां स्तोका आपन्नाः पृथिवीतले॥
अपां भूमेश्च संयोगादोषध्यस्ता तदाऽभवन्॥ अकालकृष्टाश्चानुप्राप्या ह्यारण्याश्चतुर्दश॥ ऋतुपुष्पफलाश्चैव वृक्षा गुल्माश्च ज
ज्ञिरे॥ प्रादुर्भावस्तु त्रेतायामाद्यायामोषधस्य तु॥ तेनौषधेन वर्त्तंते प्रजास्त्रेतायुगे मुने॥ ततो लोभात्समासाद्य प्रजा ह्याकस्मिको
तदा॥ ततस्ताः पर्यगृह्णंत नदीक्षेत्राणि पर्वतान्॥ वृक्षगुल्मौषधीश्चैव प्रसह्य तु यथाबलं॥ तेन दोषेण ता नेशुरोषध्यो मिषतां
द्विज॥ अग्रसंत महीं तास्तु तदौषध्यो महामुने॥ ग्रस्तासु तासु पुनस्तासु तदौषध्यो महामुने॥ ग्रस्तासु तासु पुनस्तासु विभ्रांतास्ताः पुनः
प्रजाः॥ ब्रह्माणं शरणं जग्मुः क्षुधार्त्ताः परमेष्ठिनं॥ स चापि तत्त्वतो ज्ञात्वा ताः स्रस्ता वसुंधरां॥ वत्सं कृत्वा सुमेरुं तु दुदोह भगवान्विभुः॥
दुग्धेयं गौस्तदा तेन सस्यानि पृथिवीतले॥ जज्ञिरे तानि बीजानि ग्राम्यारण्यास्तु ताः पुनः॥ ओषध्यः फलपाकांताः गुणसप्तदशा स्मृताः॥
व्रीहयश्च यवाश्चैव गोधूमाश्चाणवस्तिलाः॥ प्रियंगुः सप्तमा ह्येते अष्टमास्तु कुलत्थकाः॥ श्यामाकास्त्वथ नीवारो जर्तिलास्त

मार्कं ॥६९॥

सगवेधुकाः॥ कुरुविंदा मर्कटकास्तथा वेणुयवाश्च ये। ग्राम्यारण्याः स्मृता ह्येते ओषध्यश्च चतुर्द्दशः। यदा प्रसृष्टा ओषध्यो न प्ररोहं
ति ताः पुनः। ततः स तासां वृद्ध्यर्थं वार्त्तोपायं चकार ह। ब्रह्मा स्वयंभूर्भगवान् हस्तसिद्धिं च कर्मजां। ततः प्रभृत्यथौषध्यः कृष्टपच्या
श्च जज्ञिरे। संसिद्धायां च वार्त्तायां ततस्तासां स्वयं विभुः। मर्यादाः स्थापयामास यथान्यायं यथागुणं। वर्णानामाश्रमाणां च ध
र्मान् धर्मभृतां वर। लोकांश्च सर्ववर्णानां सम्यग्धर्मानुपालिनां। प्राजापत्यं ब्राह्मणानां स्मृतं स्थानं क्रियावतां। स्थानमैंद्रं
क्षत्रियाणां संग्रामेष्वपलायिनां। वैश्यानां मारुतं स्थानं स्वधर्ममनुवर्त्तिनां। गांधर्व्वं शूद्रजातीनां परिचर्यानुवर्त्तिनां। अष्टाशी
तिसहस्राणि ऋषीणामूर्द्ध्वरेतसां। स्मृतं तेषां तु यत्स्थानं तदेव गुरुवासिनां। सप्तर्षीणां तु यत्स्थानं स्मृतं तद्वै वनौकसां। प्राजाप
त्यं गृहस्थानां न्यासिनां ब्रह्मणः क्षयं। योगिनाममृतं स्थानमित्येताः स्थानकल्पनाः। इति श्री मार्कंडेयपुराणे ।४९। श्री मार्कंडे राम
य उ॥ ततोऽभिध्यायतस्तस्य जज्ञिरे मानसीः प्रजाः। तच्छरीरसमुत्पन्नैः कार्यैस्तैः कारणैः सह। क्षेत्रज्ञाः समवर्त्तन्त गात्रेभ्यस्तस्य धीम
तः। ते सर्वे समवर्त्तन्त ये मया प्रागुदाहृताः। देवाद्याः स्थावरान्ताश्च त्रैगुण्यविषये स्थिताः। एवंभूतानि सृष्टानि स्थावराणि चराणि च। य
दास्य ताः प्रजाः सर्वा नाभ्यवर्द्धन्त धीमतः। तदान्यान्मानसान्पुत्रान्सदृशानात्मनोऽसृजत्। भृगुं पुलस्त्यं पुलहं क्रतुमंगिरसं तथा। म
रीचिं दक्षमत्रिं च वशिष्ठं चैव मानसान्। नव ब्रह्माण इत्येते पुराणे निश्चयं गताः। ततोऽसृजत्पुनर्ब्रह्मा रुद्रं रोषात्मसंभवं। संकल्पं चैव धर्मं ॥६९॥
च पूर्वेषामपि पूर्वजं। सनंदनादयो ये च पूर्वं सृष्टाः स्वयंभुवा। न ते लोकेष्वसज्जंत निरपेक्षाः समाहिताः। सर्वे तेऽनागतज्ञाना वीत

रागा विमत्सराः। तेष्वेवं निरपेक्षेषु लोकसृष्टौ महात्मनः। ब्रह्मणोऽभून्महान्क्रोधस्तत्रोत्पन्नोऽर्कसंनिभः। अर्द्धनारीनरवपुः पुरुषोऽतिश
रीरवान्। विभजात्मानमित्युक्त्वा स तदान्तर्दधे ततः। स चोक्तो वै पृथक्स्त्रीत्वं पुरुषत्वं तथाकरोत्। बिभेद पुरुषत्वं च दशधा चैकधा च सः।
सौम्यासौम्यैस्तथा शान्ताशान्तैः स्त्रीत्वं च स प्रभुः। बिभेद बहुधा देवः स्वरूपैरसितैः सितैः। ते त्वेकादश संख्याता रुद्रास्त्रिभुवनेश्वराः। जु
ते ब्रह्मणश्चैव देशान्त्वविनिते ततः। ततो ब्रह्मा स्वयंभूतं पूर्वं स्वायंभुवं प्रभुः। आत्मनः सदृशं चक्रे प्राजापत्ये मनुं द्विज। शतरूपां च तां नारीं त
पोनिर्धूतकल्मषां। स्वायंभुवो मनुर्देवः पत्नीत्वे जगृहे विभुः। तस्माच्च पुरुषात्पुत्रौ शतरूपा व्यजायत। प्रियव्रतोत्तानपादौ प्रख्याता
वात्मकर्मभिः। कन्ये द्वे च तथाकूतिं प्रसूतिं च ततः पिता। ददौ प्रसूतिं दक्षाय तथाकूतिं रुचेः पुरा। प्रजापतिः स जग्राह तस्यां यज्ञः स दक्षिणः।
पुत्रो जज्ञे महाभाग दंपत्योर्मिथुनं ततः। यज्ञस्य दक्षिणायां तु पुत्रा द्वादश जज्ञिरे। यामा इति समाख्याता देवाः स्वायंभुवेऽन्तरे। तस्य पुत्रास्तु
यज्ञस्य दक्षिणायां तु नास्वराः। प्रसूत्यां च तथा दक्षश्चतस्रो विंशतिस्तथा। ससर्ज कन्यकास्तासां च सम्यङ्नामानि मे शृणु। श्रद्धा ल
क्ष्मीर्धृतिः पुष्टिस्तुष्टिर्मेधा तथा क्रिया। बुद्धिर्लज्जा वपुः शान्तिः सिद्धिः कीर्त्तिस्त्रयोदश। पत्न्यर्थं प्रतिजग्राह धर्मो दाक्षायणीः प्रभुः। ता
भ्यः शिष्टा यवीयस्य एकादश सुलोचनाः। ख्यातिः सत्यथ संभूतिः स्मृतिः प्रीतिस्तथा क्षमा। संनतिश्चानुसूया च ऊर्जा स्वाहा स्वधा त
था। भृगुर्भवो मरीचिश्च तथा चैवांगिरा मुनिः। पुलस्त्यः पुलहश्चैव क्रतुश्चर्षिवरस्तथा। अत्रिर्वशिष्ठो वह्निश्च पितरश्च तथा क्रमात्।
ख्यात्याद्या जगृहुः कन्या मुनयो मुनिसत्तम। श्रद्धा कामं श्रीश्च हर्षं नियतं धृतिरात्मजं। संतोषं च तथा तुष्टिर्लोभं पुष्टिरसूयत। मे

मार्कं धा श्रुतं क्रिया दंडं नयं समयमेव च। बोधं बुद्धिस्तथा लज्जा विनयं वपुरात्मजं। व्यवसायं प्रजज्ञे वै क्षेमं शांतिरसूयत। सुखं सिद्धिर्यशः
॥७०॥ कीर्त्तिरित्येते धर्मसूनवः। कामाद्रती सुतं हर्षं धर्मपौत्रमसूयत। हिंसा भार्या त्वधर्मस्य तस्यां जज्ञे तथाऽनृतं। कन्या च निकृतिस्ताभ्यां
सुतौ द्वौ नरकं भयं। माया च वेदना चैव मिथुनं त्विदमेतयोः। तयोर्जज्ञेऽथ वै मायामृत्युं भूतापहारिणं। वेदना स्वसुतं चापि दुःखं जज्ञेऽथ
रौरवात्। मृत्योर्व्याधिजराशोकतृष्णाक्रोधाश्च जज्ञिरे। दुःखोत्तराः स्मृता ह्येते सर्वे चाऽधर्मलक्षणाः। नैषां भार्यास्ति पुत्रो वा स
र्वे ते ह्यूर्द्ध्वरेतसः। तिष्ठंति तिष्ठतथा चान्या मृत्योर्भार्या नवन्मुने। अलक्ष्मी नाम तस्यां च मृत्योः पुत्राश्चतुर्दश। अलक्ष्मीसुचकाश्चैते
मृत्योरादेशकारिणः। विनाशकाले तत्र च नरानन्नज्यंते शृणुष्व तान्। इंद्रियेषु दशस्वेते तथा मनसि संस्थिताः। स्वे स्वे नरं स्त्रियं चाऽपि
विषये योजयंति च। ततश्चेंद्रियाणि चाक्रम्य रागलोभादिभिर्न्नरान्। योजयंति तथा हानिं यांत्यधर्मादिभिर्न्नरैः। अहंकारगतश्चान्यस्त
थान्ये बुद्धिसंस्थिताः। विनाशायनरस्त्रीणां यतंते मोहसंश्रयाः। एवं स्वधर्मेणात्यन्ताः सर्वे चापि नयं कुरुः। तथैवान्यो गृहे पुंसां दु
सहो नाम संस्थितः। क्षुत्क्षामोऽधोमुखो नग्नश्चीरीकाकसमस्वनः। स सर्वं खादितुं सृष्टो ब्रह्मणा तमसा निधिः। दंष्ट्राकरालमत्यर्थ
विवृतास्यं सुभैरवं। तमत्तुकाममाहेदं ब्रह्मा लोकपितामहः। सर्वं ब्रह्ममयं शुद्धं कारणं जगतोऽव्ययः। ब्रह्मोवाच। नात्तव्यं तेजादिदं जहि
कोपं शमं व्रजात्यजे मां तामसीं वृत्तिं मायां रजसः कलां। ५४। दुःसह उवाच। क्षुत्क्षामोऽस्मि जगन्नाथ पिपासुश्च सुदुर्बलः। कथं तृ
प्तिर्भवेन्नाथ भवेयं बलवान्कथं। कश्चाश्रमो ममाख्याहि वसेयं यत्र निर्वृतिः। ब्रह्मोवाच। तवाश्रयो गृहे पुंसां जनश्चाधार्मिको ॥७०॥

DR. BHAU DAJI MEMORIAL

बलं। पुष्टिं नित्यक्रियाहान्या तव वत्स भविष्यति। व्रणपुष्पाश्च ते वस्त्रं चाहारं च ददामि ते। क्षुतकीटावपन्नं च तथा श्वभिरवेक्षितं। भग्नभांडगतं यच्च
मुखवातोपसाधितं। उच्छिष्टापक्वमस्विन्नमवलीढमसंस्कृतं। भग्नासनगतं भुक्तं आसंदीगतमेव च। विदिग्मुखं संध्ययोश्च नृत्यवाद्यस्वनाकुलं
उदक्यापश्यता भुक्तं उदक्यादृष्टमेव च। यच्चोपघातकं किंचित्तत्ते पेयमथापि वा। एतानि तव पुष्ट्यर्थं अन्यमन्यद्ददामि ते। अश्रद्धया हुतं दत्तम
स्नातैर्यदवज्ञया। यच्चांबुपूर्वकं क्लिष्टं अनाप्तीकृतमेव च। त्यक्तमाविःकृतं यच्च दत्तं चैवाति विस्मयात्। हृष्टक्रुद्धार्त्तदत्तं च यदस्त्वाप्यसि तत्फलं।
यच्च पौनर्भवः किंचित्करोत्यामुष्मिकं नरः। यच्च पौनर्भवा योषित द्यस्मन्नुतवत्सप्रियं। कन्याशुल्कोपयोन्याय समुपात्तं च यत्क्रिया। तत्व यस्मा
त्पुष्ट्यर्थमसच्छास्त्रक्रियाश्रयाः। यच्चाश्रुविहतं किंचित्करोत्यामुष्मिकं नरः। तत्सर्वं तव कालाश्च ददामि तव सिद्धये। गुर्विण्यधिगमे सद्योति
त्यकार्य्यव्यतिक्रमे। असच्छास्त्रक्रियालापदूषितेषु च दुःसह। तदा नित्यमभिभविष्यति तदान्येषु। पंक्तिभेदे वृथापाके पाकभेदे वृथाहते। नित्यं
च गृहकलहे भविताऽवसथस्तव। अपोष्यमाणे च तथा त्वं प्राणिवाहनादिषु। अनुपासंति ये संध्याकाले त्वत्रो भयं नृणां। नक्षत्रग्रहपीडासु त्रिवि
धोत्पातदर्शने। अशांतिकपराणां यद्भवनं तत्र नित्यं भविष्यति। वृथोपवासिनो मद्यद्यूतस्त्रीषु सदा रताः। रूक्ष्मीसतोयकर्तारो वैडालव्रतिकाश्च ये
अब्रह्मचारिणाधीतमिथ्यावाविदुषाकृतं। तपोवनेन्नाम्यजुजो यतेश्चानिर्ज्जितात्मनः। ब्राह्मणक्षत्रियविशांशूद्राणां च स्वकर्मतः। परिच्यु
तानां ये चेष्टाः परलोकार्थमाप्सितां। तासां च यत्फलं तत्ते यद्यमन्ने भविष्यसि। अन्यच्च ते प्रयच्छामि पुष्ट्यर्थं यन्निबोध तत्। त्वत्रनाम वैश्वदेवांते ना
मोच्चारणपूर्वकं। इदं ते वेति दास्यंति ये नरा बलिमूर्जितां। यः संस्कृताशी विधिवच्छुचिरंतस्तथा बहिः। अलोलुपो जितस्त्रीकस्तद्गेहं वर्ज्ज

DR. BHAU DAJI MEMORIAL

मार्कं
॥७१॥

यापूज्यंते हव्यकव्याशनाः देवता पितरस्तथा।ज्ञामयोतिथयश्चान्ये तद्गृहं यक्ष्म वर्जय।येषां स्मितो मित्रा यत्र न वहिर्गमनोत्सुकाः।यत्रा
तकथा यत्र तद्गृहं यक्ष्म वर्जय।यत्र मैत्री गृहे बालवृद्धयोषिन्नरेषु च।तथा स्वजनवर्गे च तद्गृहं यक्ष्म वर्जय।वयःसंबोधयोग्यानि शब्दकान्या
सनानि च।यत्र गेहे त्वया यक्ष्म तत्तद्वर्ज्यं वचनान्मम।यत्र सावर्णिका नित्यं साधुकर्मण्यवस्थिताः॥सामान्योपस्करैर्युक्तास्त्यजेथा
यक्ष्म तद्गृहं।यत्रासनस्थास्तिष्ठत्सु गुरुवृद्धद्विजातिषु।न तिष्ठंति गृहं तच्च वर्ज्यं यक्ष्म त्वया सदा।तरुकोणादिनिर्द्वारं न विद्धं यस्य वे
श्मनः।मर्मविद्धा स्ववापुं स तद्गृहं योजवेनते।देवतापितृमर्त्यानां स्वतिथीनां च वर्त्तनं।यस्यावशिष्टेनान्नेन पुंसस्तस्य गृहं त्यज।सत्यवा
क्यान्यक्ष्म शीलान हिंस्रान्क्षान्तानुयातिनः।पुरुषानीदृशान्यक्ष्म त्यजेये चानसूयवः।भर्तृशुश्रूषणे युक्ता असत्स्त्रीसंगवर्जिता।कु
टुंबभर्त्तुशेषान्नपुष्टांगैस्त्यज योषितं।यजनाध्ययनाभ्यासदानासक्तमतिं सदा।याजनाध्यापनादानकृतवृत्तिं द्विजं त्यज।दानाध्यय
नयज्ञेषु सदोद्युक्तं तु दुःसह।त्वाविश्यत्यज ततः शुल्कं शस्त्रास्त्रीवात्मवेतनं।वित्तिः पूर्वगुणैर्युक्तं पाशुपाल्यवणिज्ययोः।कृषेश्चावाप्तवित्तं
च त्यज वैश्यमकल्मषं।दानाद्यद्विजशुश्रूषा तत्परं यक्ष्म वर्जय।शूद्रं च ब्राह्मणादीनां शुश्रूषावृत्तियोषकं।श्रातिस्मृत्यविरोधेन कृतवृ राम
त्तिर्गृहे नृहीं।यत्र यत्र च तत्पत्नी तस्यैवानुगतात्मिका।यत्र पित्रो गुरोः पूजा देवतानां च तथा नरैः।पत्नी च [illegible] कुरुते तत्र बालदर्शन [illegible] कु
तः।सदानुलिप्तसंध्या सु गृहं संचुसमुद्धितं।कृतपुष्पवलिं यक्ष्म दृष्टुं शक्तो पि न वीक्षितुं।सास्करादधशय्यानि [illegible] सलिलानि च।सूर्याव
लोकदीपानि यक्ष्म गेहानि सज्जनैः।यत्रोदितः चंदनवीणा आदर्शो मधुसर्पिषी।विप्राज्य ताम्रपात्राणि तद्गृहं न तवाश्रयः।यत्र कंटकिनो वृक्षा यः ॥७॥

त्र नित्यवावल्ली निष्पावी पुनर्नवा।वल्मीकस्तव च स्कंभस्तत्र वसं दिशं।यस्मिन्गृहे नराः पंच स्त्रीत्रयं गोत्रयं तथा।अंधकारैंधनाग्निश्च तद्गृहं वसतिस्तवा।एक
छागं द्विवालेयं त्रिगवं पंचमाहिषं।षडश्वं सप्तमातंगं गृहं यक्ष्म तवाश्रयः।कुद्दालदात्रपिटकौ तद्वत्स्थाल्यादिभाजनं।यत्र तत्रैव विक्षिप्तं तवदद्युः
प्रतिश्रयं।मुशलोलूखले स्त्रीणामास्यते च द्वदं वरो।अवस्करमसत्रे च यक्ष्मैतदुपकृत्त्वरालंघ्यं ते यत्र धान्यानि पक्वापक्वानि वेश्मनि।तद्वच्छस्त्राणि तत्र
त्वं यथेष्टं चर दुःसह।स्थालीपिधाने यत्राग्निर्दत्तो दर्वीफलेन वा।गृहे तत्र दुरिष्टानामशेषाणां समाश्रयः।मानुषास्थि गृहे यस्य अहोरात्रं गृहे स्थितं।
तत्र यक्ष्मं स्तवावासस्तथान्येषां च रक्षसां।अदत्वा भुंजते यो वै बंधोः पिंडं तथोदकं।सपिंडान्सोदकांश्चैव तत्कालेनान्तरात्मजा।यत्र पद्ममहापद्मौ
पुरनिर्मदिकाशनिः।वृक्षश्चैव नयत्र कल्प्यते तद्गृहं त्यज।अशस्त्रा देवता यत्र सशस्त्राश्चाहवं विना।कल्प्यंते मनुजैर्वीरैस्तत्यज मंदिरं।पौरजानपदैर्
त्रप्राकपत्रसिद्धा महोत्सवाः।क्रियंते पूर्ववद्गेहे नत्वं तत्र गृहे स्थितः।सूर्यवायुयदीन्यात्रिः स्नानवस्त्राहुविप्रुषैः।नरस्वाम सलिलैश्चैव तान् [illegible] आहिहतलदा
न्देशाचारान्सर्वजातिधर्मान्जपहोममंगलं देवतेज्याः।सम्यक्शौचं त्रिविधान्लोकवादान्युंसां त्वया कुर्वतां मा भुजंगः।इत्युक्तो दुःसहब्रह्मा
तत्रैवांतरधीयत।चकार शासनं सोपि यदुक्तं ब्रह्मणा द्विज। ।इति श्रीमार्कंडेयपुराणे दुःसहशासनं। ।श्रीमार्कंडेय उ।दुःसहस्याभवद्भार्यायोनि
र्माष्टिर्नाम नामतः॥जाता कलेस्तु या भार्याया भूतौ त्यौ चांडालदर्शनात्।तयोः पुत्रान्यजनवद्जगद्व्यापीनि बोध उश।अष्टौ कुमाराः कन्याश्च तथा
ष्टावति भीषणाः।दंताकृष्टिस्तथोक्तिश्च परिवर्तस्तथापरः।अंगधुक् शकुनिश्चैव गंडप्रांतरतिस्तथा।गर्भहा सस्यहा चान्यः कुमारास्तनयास्तयोः।
कन्याश्चान्यास्तथैवाष्टौ तासां नामानि मे शृणु।नियोजिका तु प्रथमा तथैवान्या विरोधिनी।स्वयंहारकारी चैव भ्रामणी ऋतुहारिणी।स्मृतिवीज

मार्कं
॥७२॥

हेरेचान्येतयोकन्येसुदारुणो। अष्टमीदक्षिणीनामकन्यात्वतिभयावहा। एतासांकर्मवक्ष्यामिदोषप्रशमनंचयत्। अष्टानांतुकुमाराणांअय
तोद्विजसत्तम। दंताक्षोभिःप्रसुप्तानांबालानांदशनस्थितः। करोतिदंतसंघर्षचिकीर्षुर्दुःसहागमं। तस्योपशमनंकार्यंमुष्टसर्षपमिश्रितैर्बर्हिषैः। शयनस्योप
रिक्षिप्तैर्मीधेश्चदशनोपरि। सोवर्चलौषधीस्नानात्तथाशस्त्रमंत्रानुकीर्तनात्। औषधंकंटकैसद्भास्थिचिह्नौमवस्त्रावधारणात्। तिष्ठत्यन्यःकुमारस्ततत्
थास्थित्यसहद्ध्रुवंद्। अशुभाशुभेनरेणाभुक्तेस्तथोक्तिस्तच्चतोन्यथा। तस्माद्दुष्टमंगल्यंवक्तव्यंपंडितैःसदा। दुष्टेवाकुत्रतथोक्तेवैकीर्तनोयेजनार्द
नः। चराचरगुरुर्ब्रह्मायाचास्यकुलदेवता। अन्योगर्भपरावर्तसदेवयरिवर्तयन्। परिवर्तकसंज्ञोयंतस्यापिमितसर्षपैः। रक्षोघ्नमंत्रैर्जप्यैस्तु
द्रांकुर्वीतमंत्रवित्। अन्यथानरणावन्हरणांअंगस्थस्फुरणादितं। अशुभाशुभंसमाचष्टेदुष्टेतस्यांगनाउन्नोकाकादियत्नासंस्थोन्यःश्वाअगा
लगतोपिवा। अशुभाशुभंचशकुनैःकुमारोन्योब्रवीतिवै। तस्यापिदुष्टेव्याक्षेपःप्रारंभत्यागएववा। अशुभेद्भुततरंकार्यमितिप्राहप्रजापतिः
गंडांतेषुस्थितश्चान्यासुहूर्तौद्वौद्विजोत्तम। सर्वारंभान्कुमारोस्तिशमस्तस्यचश्रूयतां। विप्राक्यादेवतातुश्रीमूलोत्पातेनचद्विज। गोमूत्रस
र्षपस्नानैःसवृक्षग्रहपूजनैः। पुनश्चथर्मोपनिषत्करणैःशास्त्रदर्शनैः। अवज्ञयाजन्मतश्चप्रशमंयातिमंडेवत्। गर्भेस्त्रीणांतथोपशमि
कमंत्रलिखनात्शस्त्रमाल्यादिधारणात्। विशुद्धगेहवसनात्। स्नानाद्याःसाक्षवैद्विजा। तथैवसस्यदावान्यः। सस्यर्द्धिमुपहंतियः। तस्यापिरक्षांकुर्वी
तजीर्णोपानद्विधारणात्। वृषायसंव्यनेयनाच्चांडालस्याप्रवेशनात्। बहिर्बलिप्रदानाच्चसोमांबुपरिकीर्तनात्। परदारपरद्रव्यहरणादिषु
मानवान्। नियोजयतिचैवान्याकन्यासातुनियोजिका। तस्याःपवित्रपवनात्क्रोधलोभादिवर्जनात्। नियोजयत्येवमितिनराश्चिंतदशंबुधैः। ॥७२॥

परदाराभिमंसर्गैश्चित्रमात्मानमेवच। नियोजयत्येवमितिप्राज्ञोनित्यंविचिंतयेत्। विरोधंकुरुतेचान्यादंपत्योःप्रीयमाणयोः। वंधूनांसुहृ
दांपित्रोःपुत्रैःसंबंधिकैश्चया। विरोधिनीसातद्रक्षांकुर्वीतवलिकर्मणा। तथातिवादसहनात्शस्त्राचारनिषेवनात्। धान्यंसंहारत्खला
दोष्ठात्पयःसर्पिस्तथापराः। नमहानसादर्द्धसिद्धमन्नागारस्थितंतथा। परिविष्यमाणंचसदासार्द्धमुक्तेनुभुंजतः। उच्छिष्टान्नंमनु
ष्याणांहरत्यन्नंसुदुर्द्धरा। कर्मागारशालाभ्यःसिद्धार्द्धहरतिद्विज। गोस्त्रीस्तनेभ्यश्चपयःक्षीरहारीसदैवसा। दध्नोघृतंतथातैलंसुराणा
रात्तथाशुराणांकुसुंभकादिभ्यःकर्पासात्सूत्रमेवच। सास्वयंहारिकानाममहारणीनियताद्विज। कुर्यात्तुशिवंडिनोद्वंद्वात्रक्षार्थंकृत्रिमा
स्त्रियं। रक्षाचैवंगृहेलेख्यावर्ज्योच्छिष्टमुखंतथा। होमाग्निदेवताधूपभस्मनाचपरिक्रिया। कार्याक्षीरादिभांडानांएवंतद्रक्षणंस्मृतं
उद्वेगंजनयत्यन्याह्येकस्थाननिवासिनः। पुरुषस्यतुसाप्रोक्तास्त्रामणीसातुकन्यका। तस्याश्चरक्षांकुर्वीतविप्रैःसितसर्षपैः। आस
नेशयनेचोव्याययत्रास्तेसतुमानवः। विचिंतयेच्चनरःपापाभ्यामेवादुष्टचेतना। पमदान्यासत्तजुष्यप्रुवःसूक्तंसमाधिना। स्त्रीणांपुष्पह
रत्यन्याप्रवृत्तंपातुकन्यका। अथाप्रवृत्ताःसान्तयादोःसहीसातुदोरिका। कुर्वीततीर्थादिवोका। अन्यपर्वतसानुषु। नदीसंगमखातेषु
स्नपनंतत्प्रशांतये। यंत्रविद्भूततत्वज्ञःपर्वसूपसिंचद्विज। चिकित्सान्यस्यवैवैद्यसंप्रयुक्तैस्तौवधैः। स्मृतिंचापहरत्यन्यान्नृणां
सास्मृतिहारिका। विविक्तदेशसेवित्वात्तस्याश्चोपसमोभवेत्। अष्टमीदक्षिणीनामकन्यालोकभयावहा। याकरोतिजनंद्विवनरं
नारीमथापिवा। मथुक्षीरघ्नताक्रांतस्तशांत्यर्थंजुहुयात्तिलान्। कुर्वीतमित्रविंदांचतथेष्टिंतत्प्रशांतये। एतेषांतुकुमाराणांकन्यानां

मार्कं
॥१७३॥

तु द्विजोत्तम। अष्टाविंशदपत्यानि तेषां नामानि मे शृणु। दंताकृष्टिस्तथोक्तिर्न्या विजल्पा कलहा तथा। अवज्ञातनतदुष्टोक्ति विजल्पा तस्य पुंशां
तेयात्ता मेव चिंतयेत्प्राज्ञः प्रयतश्च गृही भवेत्। कलहं कलहा गेहे करोत्यविरतं नृणां। कुटुंबनाशहेतुश्च तत्प्रशांतिं निशामय। दूर्वांकुरान्मधुद्वी
राक्तान्बलिकर्मणि विक्षिपेत्। जुहुयाच्चैव तिलान्वह्नौ। मित्रं च च पतकीर्त्तयेत्। सोमं तु पीतघ्नां ज्ञोधिं सरितो दं वरानिलो॥ तथोक्तेस्तालुजिह्वौ तु
न्पुत्रस्तालुनिकेतनः। सायं प्रातस्तथा संस्थस्त्तमेसा धूमप्रवाहयेत्। परिवर्त्तसुतौ द्वौ तु विरूपविकृतौ द्विजा। तौ तु वृक्षाद्रिपरिखाप्राकारांभोधि
संश्रयौ। गुर्विण्याः परिवर्त्ततौ कुरुतः पादपादिषु। क्रोष्टु केपरि वर्त्तस्य गर्भस्यान्योदरांतरं। ततः तत्र वृक्षाञ्चैव नैवाद्रीन्नप्रकारं पयोनिधिं। यां
षां वा समाक्रामेद्वला गर्भधारिणी। अंगधृक्तनयोऽन्येपि शकुनं नाम नामतः। सोऽस्थिमज्जागतः पुंसां वालमत्यजितात्मनां। श्येनकाककपोतां
श्च गृध्रोलूकौ च वै सुतान्। अवाप शकुनिः पंच जगृहुस्तान्सुरासुराः। श्येनं जग्राह वै मृत्युः काकं कालो गृहीतवान्। उलूकं निर्ऋतिश्चा
पि जग्राहातिभयावहं। गृध्रं व्याधिस्तदीशश्च कपोतं च स्वयं यमः। एतेषामेव चैवोक्ताः सुताः पापापपादनाः। तस्माच्छ्येनादयो यस्य निली
यंते शिरस्यथा। ततोत्मरक्षणायालं शांतिः कार्या द्विजोत्तम। स्वप्नेपि हि कपोतस्य दर्शनं न प्रशस्यते। षडपत्यानि कथ्यंते गंडप्रांतरतेस्तथा।
स्त्रीणां रजस्यवस्थानं तेषां कालं च मे शृणु। चत्वार्य्यहानि पूर्वाणि तथैवान्ये त्रयोदश। एकादशं तथैवान्यदपत्यं तस्य वै दिनं। अन्यद्दिन
निगमने श्राद्धदाने तथा परं। पर्वस्वथान्यत्तस्माच्च वर्ज्यान्येतानि पंडितैः। गर्भहंता सुतो निद्यो मेहनी चापि कन्यका। प्रविश्य गर्भं हंत्ये
को पुष्कामेहयतेपरा। जायंते मेहनात्तस्याः सर्पमंडूकवायसाः। सरीसृपाणि चान्यानि पुरीषमथवापुनः। घरामा सा[illegible]णी मां समश्नु ॥१७३॥

राम

चाना मसंयुतां। वृक्षच्छायाश्रितां रात्रौ तिष्ठंती वा चतुष्पथे। स्मशानकूटभूमिस्था मुत्तरीयविवर्ज्जितां। रुदमानां निशीथे तु [illegible] विशेत्तामिमौ ह्वि
यां। तस्य हेतुस्तथैवैकः क्षुद्रको नाम नामतः। मासस्यर्द्धिः सदा हंति लघ्वारेष्वं शृणुष्व तत्। अमंगल्यदिनारंभे द्युत्र स्ना[illegible]सः। द्वेत्रेष्व
तु प्रवेशं वै करोत्यन्योपशंसिषु। तस्मात्काव्यः सुप्रशस्ते दिने च्यं च निशाकरं। कुर्याद्दारं च सुश्रिंच हम्रस्त्व पः महायवान्नाति [illegible] योजिके तिया[illegible]
दुःसहस्य मयोदिता। जातं प्रद्योतिका संज्ञं तस्याः कन्या चतुष्टयं। मनोमत्तप्रकृष्टाश्च नराण्नारीश्च ताः सदा। [illegible]विशांति नाशाय तोदय
ति च दारुणाः। अधर्मं धर्मरूपेण कामं चाकामरूपिणं। अनर्थं चार्थरूपेण मोक्षं चामोक्षरूपिणं। दुर्विनीतान्विनाशाय चैव दर्शयंति य
थ कुन्नरा। नश्यंत्याभिः प्रविष्टाभिः पुरुषार्थैः पृथग्नराः। तासां प्रवेशश्च गृहे संध्याकृत्ते ह्युदुंबरे। यातातिथ्या त्रोश्च बलिर्यत्र काले नदीय
तो भुंजतां पिबतां वापि संभिन्निर्जलविप्रुषैः। नरनारीषु संक्रांतिः तासामाशु निजायते। विरोधिन्याः स्त्रियः पुत्रा नोदको ग्राहकस्तथा। तमः प्रच्छा
दकश्चान्यत्तस्य रूपं शृणुष्व मे। प्रदीपतैलसंसर्गदूषिते लंघिते जले। मुशलोलूखले यत्र पादुका चासनं स्त्रियः। सूर्पदात्रादिकं यत्र पदाक्र
ध्यंत चासनं। यत्रोपलिप्ते चानर्च्य विहारः क्रियते गृहे। दर्वीमुखेन यत्रौरिता अन्यतोग्निश्च नीयते। विरोधिनीसुतास्तत्र विजृंभंते स्वकाम
तः। एको जिह्वागतः पुंसां स्त्रीणां वालीकसत्यवाक्। नोदको नाम सम्प्रोक्तः पैशून्यं कुरुते गृहे। अवधानगतश्चान्यः श्रवणस्थोति दुर्म[illegible]
करोति ग्रहणं तेषां वचसां ग्राहकस्तु सः। आक्रम्यान्यो मनो नॄणां तमसाच्छादयेद्दुर्मदः। क्रोधजनयते यस्तु तमःप्रच्छादकस्तु सः। [illegible]पहाय्या
स्तु चौरेण जनितं तनयत्रयं। सर्वहार्य्यर्द्धहारी च वीर्य्यहारी तथैव च। अनाचांतगृहे ष्वेते मंदाचांतगृहेषु च। अप्रक्षालितपादेषु प[illegible]स्तु

महानसं। खलेषु गोष्ठेषु च वेदोहेयेषु गृहेषु च। तेषु सर्वेष्वयथान्यायं विहरं हरंति च। अन्यस्यास्तनयस्त्वेकः काकजंघ इति स्मृतः। ते
नाविष्टो रतिं सुप्तो नैव प्राप्नोति वै पुरा। भुंजतो गायतोऽन्यस्य द्रावते हसते च यः। संध्यामैथुनं चैव नरमाविशते द्विजा। कन्यान्वये प्रजाता सा
या कन्या ऋतुहारिणी। एका कुचहरा कन्या त्वन्या व्यंजनहारिणी। यस्यान क्रियते सर्वः सम्यक् वैवाहिको विधिः। कालातीतेऽथवा तस्मा
हरत्येका कुचद्वयं॥ सम्यक् श्राद्धमदत्वा च तथा नग्नं च मातरः। विवाहिताया कन्याया हरते व्यंजनं तथा। अन्यत्वं युग्मं च तथा
नित्यं ये सूतिकागृहे। स्मृतिं चाऽप्रयतानां च शून्यागारनिषेवणात्। अपहंति सुतस्तस्याः प्रचंडो नाम नामतः। गोत्रेऽन्यस्तस्य संभूता
लीकाः शतसहस्रशः। चंडालयोनयश्चाष्टौ दंडपाशासिधारिणाः। क्षुधाविष्टास्ततो लीकास्ते च चंडालयोनयः। समये स्थापयामास या
दृशेतं शृणुष्व मे। अद्य प्रभृति लीनामावासं यो हि दास्यति। दंडं तस्याहमतुलं पातयिष्ये न संशयः। चंडालयोन्या वसथे लीकयाः प्रसू
विष्यति। तस्याश्च संततिः सर्वा सा च सद्यो न शिष्यते। प्रसूता कन्यके द्वे तु स्त्रीपुंसौ बीजहारिणी। वार्तारूपा ह्यरूपा च तस्याः प्रहरणं
तु ते। वार्तरूपा निषेकं ते सायस्नानं द्विपते सुता। पुमान्वातस्तु षंढत्वं प्राप्नोति वनिता पि वा। तस्यैव गच्छतः सद्यो निर्वीजत्वमरूपया अ
स्नाताशी नरो यो वै तथा चापि च यथाशनः। निर्वीजत्वं नरो याति नारी वाशौचवर्जिता। विद्वेषिणी च या कन्या भृकुटीकुटिलानना। त
तस्या द्वौ तनयावात्तौ अपकारप्रकाशकौ। येऽभून्यान्निरतं लोलं असज्जननिषेवितं। पुरुषं द्वेषणावेतौ नरमाक्रम्य तिष्ठतः। माता
स्वाचारात्तथा मित्रैर्नीचैः स्वजनैः परैः। विद्विष्टो नाशमायाति पुरुषो धर्मतोऽर्थतः। एकस्तस्या गुणाल्लोके प्रकाशयति पापकृत्। द्वितीयो ॥७५॥

स्य गुणान्मैत्रान् लोकस्यात्यपकर्षति। इत्येता दौःसहाः सर्वे यक्ष्मणाः संततावपि। पापाचाराः समाख्याता ये व्याप्तमखिलं जगत्॥ इति
श्री मार्कंडेयपुराणे दुःसहवंशकीर्तनं समाप्तम्॥ मार्कंडेय उवाच। एष ते तामसः सर्गो ब्रह्मणो व्यक्तजन्मनः। रुद्रसर्गं प्रवक्ष्यामि तन्मे नि
गदतः शृणु। तनयाश्च तथैवाष्टौ पत्न्यः पुत्राश्च येन तथा। कल्पादावात्मनस्तुल्यं सुतं प्रध्यायतः प्रभोः। प्रादुरासीदथांकेऽस्य कुमारो
नीललोहितः। रुदद्वै विस्वरं सोऽथ द्रवंश्च द्विजसत्तम। किं रोदिषीति तं ब्रह्मा रुदंतं प्रत्युवाच ह। नाम देहीति तं सोऽथ प्रत्युवाच प्रजा ७५
पतिः। रुद्रस्त्वं देव नाम्नासि मा रोदीर्धैर्यमावह। एवमुक्तस्ततः सोऽथ सप्तकृत्वो रुरोद ह। ततोऽन्यानि ददौ तस्मै सप्त नामानि वै वि
भुः। चक्रे वै सप्त नाम्नां तु स्थानान्येषां चकार सः। भवं सर्वमथेशानं तथा पशुपतिं द्विज। भीममुग्रं महादेवमुवाच प्रपितामह
हः। तनुनामान्यथैतानि पत्न्यः पुत्राश्च सप्त तु। सूर्यो जलं मही वायुर्वह्निराकाशमेव च। दीक्षितो ब्राह्मणः सोम इत्येतास्तन
वः क्रमात्। सुवर्चला तथैवोमा विकेशी चापरा शिवा। स्वाहा दिशस्तथा दीक्षा रोहिणी च यथाक्रमं। सूर्यादीनामिमाः पत्न्यो रु
द्राद्यैर्नामभिः सह। शनैश्चरस्तथा शुक्रो लोहितांगो मनोजवः। स्कंदः सर्गोऽथ संतानो बुधश्चापि क्रमात्सुताः। एवं प्रकारो रुद्रोऽसौ सतीं भार्यामवि
विंदत। दक्षकोपाच्च तत्याज सा सती स्वं कलेवरं। हिमवद्दुहिता चाभून्मेनायां द्विजसत्तम। तस्या भ्राता तु मैनाकः सोऽम्भोधेः सत्तमः
सखा। उपयेमे पुनश्चैनामनन्यां भगवान्भवः। देवौ धातृविधातारौ भृगोः ख्यातिरसूयत। श्रियं च देवदेवस्य पत्नी नारायण
स्य च। आयतिर्नियतिश्चैव मेरोः कन्ये महात्मनः। धातृविधात्रोस्ते तयोर्जातौ सुतावुभौ। प्राणश्चैव मृकंडश्च पिता मह

महायशाः॥ मनस्विन्या महंतस्य पुत्रो वेदशिरो मम॥ धूम्रावत्यां समभवत्प्राणस्यापत्यं निबोध मे॥ प्राणस्य द्युमान्पुत्र उत्पन्नस्तस्य चात्मजः॥ अ
जायंत तयोः पुत्राश्च पौत्राश्च बहवो भवन्॥ पत्नी मरीचेः संभूतिः पौर्णिमासमसूयत॥ विरजापर्वतश्चैव तस्य पुत्रो [illegible] तयोः पुत्रं
स्तौ वक्ष्ये हं वंशसंकीर्तने द्विजाः॥ स्मृतिश्चांगिरसः पत्नी प्रसूता कन्यकास्तथा॥ सिनीवाली कुहूश्चैव राका चानुमतिस्तथा॥ अनुसूया त
थैवात्रेः जज्ञे पुत्रानकल्मषान्॥ सोमं दुर्वाससं चैव दत्तात्रेयं च योगिनं॥ प्रीत्यां पुलस्त्यभार्यायां दत्तोलिस्तत्सुतोऽभवत्॥ पूर्वजन्मनि
सोऽगस्त्यः स्मृतः स्वायंभुवांतरे॥ कर्दमश्चार्वरीवांश्च सहिष्णुश्च सुतास्त्रयः॥ क्षमा तु सुषुवे भार्या पुलहस्य प्रजापतेः॥ क्रतोश्च संततिर्भा
र्या बालखिल्यानसूयत॥ षष्टिर्यानि सहस्राणि ऋषीणामूर्ध्वरेतसां॥ ऊर्जायां तु वसिष्ठस्य सप्ताजायंत वै सुताः॥ रजो गोत्रोर्ध्वबाहुश्च सव
नश्चानघस्तथा॥ सुतपाः शुक्र इत्येते सर्वे सप्तर्षयः स्मृताः॥ योऽसावग्न्यभिमानी ब्रह्मणस्तनयोऽग्रजः॥ तथा स्वाहा सुतांल्लेभे त्री
नुदारौजसो द्विजाः॥ पावकं पवमानं च शुचिं चापि जलाशिनं॥ तेषां तु संततावन्ये चत्वारिंशच्च पंच च॥ कथ्यंते वह्नयश्चैते पिता पुत्रत्र
यं च यत्॥ एवमेकोनपंचाशद्वह्नयः परिकीर्तिताः॥ पितरो ब्रह्मणा सृष्टा व्याख्याता मया द्विजाः॥ अग्निष्वात्ता बर्हिषदोऽनग्नयः सा
ग्नयश्च ये॥ तेभ्यः स्वधा सुते जज्ञे मेनां वैधारिणीं तथा॥ उभे ते ब्रह्मवादिन्यौ योगिन्यौ चाप्युभे द्विजाः॥ उत्तमज्ञानसंपन्ने सर्वैः समुदितै
र्गुणैः॥ इत्येषा दक्षकन्यानां कथितापत्यसंततिः॥ श्रद्धावान्संस्मरन्नेतामनपत्योऽभिजायते॥ ॥ इति श्रीमार्कंडेयपुराणे रुद्रसर्गो [illegible]
तदहं भगवन्सम्यक्श्रोतुमिच्छामि कथ्यतां॥ मन्वंतरप्रमाणं च सदेवान्देवपांस्तथा ॥५०॥
ष्टुकिरु॥ स्वायंभुवं त्वयाख्यातमेतन्मन्वंतरं च यत्॥

[illegible] च त्रिती[illegible] वन्देवेन्द्रांश्चैव यस्तथा॥ मार्कंडेय उ॥ मन्वंतराणां संख्याता साधिका ह्येकसप्ततिः॥ मानुषेण प्रमाणेन [illegible] मन्वंतरं च यत्॥
त्रिंशत्कोट्यस्तु संख्याताः सहस्राणि च विंशतिः॥ सप्तषष्टिस्तथान्यानि नियुतानि च संख्यया॥ मन्वंतरप्रमाणं तु इत्येतत्साधिकं विना॥ अष्टौ श
सहस्राणि दिव्यया संख्यया स्मृतं॥ द्विपंचाशत्तथान्यानि सहस्राण्यधिकानि तु॥ स्वायंभुवो मनुः पूर्वं मनुः स्वारोचिषस्तथा॥ उत्तमस्तामस
रैवतश्चाक्षुषस्तथा॥ षडेते मनवोऽतीतास्तथा वैवस्वतोऽधुना॥ सावर्णिः पंच रौच्यश्च भौत्यश्चागामिनस्त्वमी॥ एतेषां विस्तरं भूयो मन्वंतरेषु [illegible]
हैः॥ वक्ष्ये देवानृषींश्चैव यक्षांश्च पितरश्च ये॥ उत्पत्तिं संहृतिं चैव ब्रह्मन्श्रूयतामस्य संततिः॥ यच्चैतेषां प्रसूताश्च तत्पुत्राणां महात्मनां॥ मनोः स्वायंभु
वस्यासन्दश पुत्रास्तु तत्समाः॥ यैरियं पृथिवी सर्वा सप्तद्वीपा सपत्तना॥ ससमुद्राकरवती प्रतिवर्षं निवेशिता॥ स्वायंभुवेंतरे पूर्वमाद्ये त्रेतायु
गे तथा॥ प्रियव्रतस्य पुत्रैस्तैः पौत्रैः स्वायंभुवस्य तु॥ प्रियव्रतात्प्रजायंते वीरात्पत्नी व्यजायत॥ कन्या सा तु महाभागा कर्दमस्य प्रजापतेः॥ कन्ये द्वे
दश पुत्रांश्च सम्राट्कुक्षिश्च ते उभे॥ तेषां वै भ्रातरः शूराः प्रजापतिसमा दश॥ आग्नीध्रश्चाग्निबाहुश्च मेधा मेधातिथिर्वसुः॥ ज्योतिष्मान्द्यु
तिमान्हव्यः सवनो मित्र एव च॥ मेधाग्निबाहुमित्रास्तु त्रयो योगपरायणाः॥ जातिस्मरा महाभागा न राज्याय मनो दधुः॥ प्रियव्रतोऽभ्यषिंचत्तान्सप्त
सप्तसु पार्थिवान्॥ द्वीपेषु तेषु धर्मेण द्वीपांस्तांश्च निबोध मे॥ जंबूद्वीपे तथाग्नीध्रं राजानं कृतवान्पिता॥ प्लक्षद्वीपेश्वरश्चापि तेन मेधातिथिः
कृतः॥ शाल्मले तु वपुष्मंतं ज्योतिष्मंतं कुशाह्वये॥ क्रौंचद्वीपे द्युतिमंतं हव्यं शाकाह्वये सुतं॥ पुष्कराधिपतिं चैव सवनं कृतवान्सुतं॥ महावीतो धा
तकिश्च पुष्कराधिपतेः सुतौ॥ द्विधा कृत्वा ततो वर्षं पुष्करे संन्यवेशयत्॥ हव्यस्य पुत्राः सप्तासन्नामतस्तान्निबोध मे॥ जलदश्च कुमारश्च सुकुमारो

।मार्कं मणीवकः। कुशोत्तरोथमोदाकी सप्तमस्तु महाद्रुमः। तन्नामांकितवर्षाणि शाकद्वीपे चकार सः। तथा द्युतिमतः सप्तपुत्रांस्तांश्च निबोध मे। कु
॥७६॥ शलो मानुगश्चोष्णः प्रधानश्चान्धकारकः। मुनिश्च दुंदुभिश्चैव सप्तमस्तु तथा परः। तेषां स्वनामधेयानि क्रौंचद्वीपे तथाभवन्। ज्योतिष्मतः
तः कुशद्वीपे पुत्रनामांकितानि वै। तत्रापि सप्तवर्षाणि तेषां नामानि मे शृणु। उद्भिज्जं वेणुमच्चैव द्वैरथं लवणमेव च धृतिमत्प्रभाकरं चैव कपिलं चा
पि सप्तमं। वपुष्मतः सुताः सप्त शाल्मलेशस्य चाभवन्। श्वेतश्च हरितश्चैव जीमूतो रोहितस्तथा। वैद्युतो मानसश्चैव केतुः सुप्रभस्तथा। तथै
व शाल्मले तेषां समानानि तु सप्त वै। सप्त मेधातिथेः पुत्राः प्लक्षद्वीपेश्वरस्य तु। तेषां नामांकितैर्द्वीपैः प्लक्षद्वीपं सप्तभिर्वृतं। पूर्वं शांतभयं वर्षं शिशि
रं सुखोदयं। आनंदं च शिवं चैव क्षेमकं च ध्रुवं तथा। प्लक्षद्वीपादिषु तथा शाकद्वीपांतिकेषु वा। ज्ञेयः पंचसु धर्मो वै वर्णाश्रमविभागतः। या
नि किंपुरुषाद्यानि वर्जयित्वा हिमाह्वयं। सुखमायुः स्वरूपं च बलं धर्मश्च नित्यशः। पंचसु तेषु धर्मेषु सर्वसाधारणं स्मृतं। आग्नीध्राय पिता पू
र्वं जंबूद्वीपं ददौ द्विजा। तस्य पुत्रा बभूवुर्हि प्रजापतिसमा नव। ज्येष्ठो नाभिरिति ख्यातस्तस्य किंपुरुषोऽनुजः। हरिवर्षस्तृतीयस्तु चतुर्थोऽभूदि
लावृतः। रम्यश्च पंचमः पुत्रो हिरण्मयः षष्ठ उच्यते। कुरुश्च सप्तमस्तेषां भद्राश्वश्चाष्टमः स्मृतः। नवमः केतुमालश्च तन्नाम्ना वर्षसं
स्थितिः। यानि किंपुरुषाद्यानि वर्जयित्वा हिमाह्वयं। तेषां स्वभावतः सिद्धिः सुखप्राया ह्ययत्नतः। विपर्ययो न तेष्वस्ति जरामृत्युभ
यं न च। धर्माधर्मौ न तेष्वास्तां नोत्तमाधममध्यमाः। न तेषु चतुर्युगावस्था नास्ति मासर्तवो न च। आग्नीध्रसूनोर्नाभेश्च ऋषभोऽभूत्सुतो द्वि
जः। ऋषभाद्भरतो जज्ञे वीरः पुत्रशताद्वरः। सोऽभिषिच्यर्षभः पुत्रं महाप्राव्राज्यमास्थितः। तपस्तेपे महाभागः पुलहाश्रमसंश्रयः। हिमाह्वं ॥७६॥

दक्षिणं वर्षं […] पिता ददौ। तस्मात्तु भारतं वर्षं तस्य नाम्ना महात्मनः। भरतस्याभवत्पुत्रः सुमतिर्नाम धार्मिकः। तस्मिन्राज्यं समावेश्य भरतोऽपि वनं ययौ।
एतेषां पुत्रपौत्रैस्तु सप्तद्वीपा वसुंधरा। प्रियव्रतस्य पुत्राणां भुक्ता स्वायंभुवेंऽतरे। एष स्वायंभुवः सर्गः कथितस्ते द्विजोत्तम। पूर्वमन्वंतरेशस्य किमन्यत्क
थयामि ते। ।इति श्रीमार्कंडेयपुराणे वंशानुचरितं। ।क्रौष्टुकिरुवाच। कति द्वीपाः समुद्रा वा पर्वताः कति वा द्विज। कियंति चैव वर्षाणि तेषां नद्यश्च का
श्च मुने। महाभूतप्रमाणं च लोकालोकं तथैव च। पर्ययः परिमाणं च गतिश्चंद्रार्कयोरपि। एतत्प्रब्रूहि मे सर्वं विस्तरेण महामुने। ।मार्कंडेय उवाच। शतार्द्धकोटिवि
स्तारा पृथिवी कृत्स्नशो द्विज। तस्याः संस्थानमखिलं कथयामि शृणुष्व तत्। ये ते द्वीपा मया प्रोक्ता जंबूद्वीपादयो द्विज। पुष्करांता महाभाग शृणु तेषां विस्त
रं पुनः। द्वीपात्तु द्विगुणो द्वीपो जंबूः प्लक्षोऽथ शाल्मलिः। कुशः क्रौंचस्तथा शाकः पुष्करद्वीप एव च। लवणेक्षुसुरासर्पिर्दधिदुग्धजलादिभिः। द्विगुणैर्द्विगुणैर्वृ
द्ध्या सर्वतः परिवेष्टिताः। जंबूद्वीपस्य संस्थानं प्रवक्ष्ये तन्निबोध मे। लक्षमेकं योजनानां वृत्तो विस्तारदैर्घ्यतः। हिमवान्हेमकूटश्च निषधो मेरुरेव तः। राम
नीलः श्वेतस्तथा शृंगी सप्तास्मिन्वर्षपर्वताः। द्विलक्षयोजनायामौ मध्ये तत्र महाचलौ। तयोर्दक्षिणतो यौ च यौ चोत्तरतः स्थितौ। दशभिर्दशभिर्न्यूनैः स
हस्रैस्ते परस्परं। द्विसाहस्रोच्छ्रयाः सर्वे तावद्विस्तारिणश्च ते। समुद्रांतः प्रविष्टाश्च षडस्मिन्वर्षपर्वताः। दक्षिणोत्तरतो निम्ना मध्ये तुंगायताः क्षितिः।
वेद्यर्धं दक्षिणे त्रीणि त्रीणि वर्षाणि चोत्तरे। इलावृतं तयोर्मध्ये मेरुः कनकपर्वतः। चतुरशीतिसाहस्रस्तस्योच्छ्रायो महागिरेः। प्रविष्टः षोडशाधस्ता
द्विस्तीर्णः षोडशैव तु। शरावसंस्थितत्वाच्च द्वात्रिंशन्मूर्ध्नि संस्थितः। शुक्लः पीतोऽसितो रक्तः प्राच्यादिषु यथाक्रमं। विप्रो वैश्यस्तथा शूद्रः क्षत्रियश्च
स्ववर्णतः। तस्योपरि तथा चाष्टौ पूर्वादिषु यथाक्रमं। इंद्रादिलोकपालानां तन्मध्ये ब्रह्मणः सभा। योजनानां सहस्राणि चतुर्दश समुच्छ्रिता॥

।मार्कं
।।११।।

अयुतोच्छ्रयाश्च तस्याधस्तथा विष्कंभपर्वताः। प्राच्यादिषु क्रमेणैते मंदरो गंधमादनः।। विपुलश्च सुपार्श्वश्च केतुपादपशोभिताः। कदंबो मंदरे के-
तुर्जंबूर्वै गंधमादने। विपुले च तथाऽश्वत्थः सुपार्श्वे च वटो महान्। एकादशशतायामा योजनानामिमे नगाः। जठरो देवकूटश्च पूर्वस्यां दिशि पर्व-
तौ। आनीलनिषधप्राप्तौ परस्परं निरंतरौ। निषधः पारियात्रश्च मेरोः पार्श्वे तु पश्चिमे। यथापूर्वौ तथा चैतावानीलनिषधायतौ। कैलाशो हिमवांश्च
[torn] न महाचलौ। पूर्वपश्चायतावेतावर्णवांतर्व्यवस्थितौ। शृंगवान् जारुधिश्चैव तथैवोत्तरपर्वतौ। यथैव दक्षिणे तद्वद्वर्णवांतर्व्यवस्थितौ।
[torn] मर्यादापर्वता ह्येते कथ्यंतेऽष्टौ द्विजोत्तम। हिमवद्धेमकूटादिपर्वतानां परस्परं। नवयोजनसाहस्रमुदग्दक्षिणोत्तरे। मेरोरिलावृतं तद्वदंतरे वै च-
तुर्दिशं। फलानि यानि वै जंब्वा गंधमादनपर्वते। गजदेहप्रमाणानि पतंति गिरिमूर्द्धनि। तेषां स्रवात्प्रवर्तंते ख्याता जांबूनदीति वै। तत्र जांबूनदं ना-
मकनकं संप्रजायते। सा परिक्रम्य वै मेरुं जंबूमूलं पुनर्नदी। विशति द्विजशार्दूल पीयमाना जनैश्च तैः। भद्राश्वे अश्वशिरा विष्णुर्भारते कूर्मसंस्थितिः।
वराहः केतुमाले च मत्स्यरूपस्तथोत्तरे। तेषु नक्षत्रविन्यासाद्विषयाः समवस्थिताः। चतुर्ष्वपि द्विजश्रेष्ठ ग्रहाभिभवपाकदाः।। ।इति श्रीमा-
र्कंडेयपुराणे जंबूद्वीपवर्णनं नामाध्यायः।। ।मार्कंडेय उ।। शैलेषु मंदराद्येषु चतुर्ष्वपि द्विजोत्तम। वनानि यानि चत्वारि सरांसि च नि-
बोध मे। पूर्वं चैत्ररथं नाम दक्षिणे गंधमादने। वैभ्राजं पश्चिमे शैले सावित्रं चोत्तरेऽचले। अरुणोदं सरः पूर्वे मानसं दक्षिणे तथा। शितोदः पश्चि-
मे मेरोर्महाभद्रस्तथोत्तरे। शीतांतश्च कुमुदश्च कुलीरोऽन्यश्च कंककवान्। मणिशैलोऽथ वृषवान् महानीलो महाचलः।। भवनिंदुर्मंदरो वेणुः सुमेघो-
निषधस्तथा। देवशैलश्च पूर्वेण मंदरस्य महाचलाः। त्रिकूटः शिखराद्रिश्च कालिंगोऽथ पतंगकः। रुचकः सानुमांश्चैव ताम्रकोऽथ विशाखवान्। ।।११।।

श्वेतोदरः सुमूलश्च वसुधारश्च रत्नवान्। एकशृंगो महाशैलो राजशैलः पिशाचकः। पंचशैलोऽथ कैलाशो हिमवांश्चाचलोत्तमः। इत्येते दक्षि-
णपार्श्वे मेरोः प्रोक्ता महाचलाः। सुवक्षुः शिशिराक्षश्च वैदूर्यः पिंगलस्तथा। पिंजरोऽथ तथा रुद्रः सुरथः कपिलो मधुः। अंजनः कुकुटः कृष्णः
पांडुरः स्याद्वरोत्तमः।। सहस्रशिखरश्चाद्रिः पारियात्रश्च शृंगवान्। पश्चिमे च तथा मेरोर्विष्कंभात्पश्चिमाद्बहिः। एतेऽचलाः समाख्या-
ताः शृणुष्वातस्तथोत्तरान्। शंखकूटोऽथ वृषभो हंसनाभस्तथाचलौ। कपिलेंद्रस्तथा शैलः सानुमान्नील एव च। शतशृंगः स्वर्णशृंगः पुष्पकोऽमेघप-
र्वतः। विरजाख्यो वराहोऽद्रिर्मयूरो जारुधिस्तथा। इत्येते कथिता ब्रह्मन् मेरोरुत्तरतो नगाः। एतेषां पर्वतानां तु द्रोण्योऽतिमनोहराः। सचेतनैर्विमलपानी-
यैः सरोभिश्चापि शोभिताः। तासु पुण्यकृतां जन्म मनुष्याणां द्विजोत्तम। एते भौमा द्विजश्रेष्ठ स्वर्गाः स्वर्गगुणाधिकाः। नैतेषु पुण्यपापानामपूर्वेषां स-
मुपार्जनं। पुण्योपभोगा एवोक्ता देवानामपि तास्वपि। शीतांताद्येषु चैतेषु शैलेषु द्विजसत्तम। विद्याधराणां यक्षाणां किंनरोरगरक्षसां। देवानां
च महावासा गंधर्वाणां च शोभनाः। महापुण्या मनोज्ञाश्च सदेवोपवनैर्युताः। सरांसि च मनोज्ञानि सर्वर्तुसुखदोऽनिलः। न चैतेषु मनुष्याणां वैम-
नस्यानि कुत्रचित्। तदेतत्पार्थिवं पद्मं चतुष्पत्रं मयोदितं। भद्राश्वभारताद्यानि पत्राण्यस्य चतुर्दिशं। भारतं नाम यद्वर्षं दक्षिणेन मयो-
दितं। तत्कर्मभूमिर्नान्यत्र संप्राप्तिः पुण्यपापयोः। तत्प्रधानमयं ज्ञेयं यत्र सर्वं प्रतिष्ठितं। अस्मात्स्वर्गोऽपवर्गो वा मानुष्यं नारकोऽपि वा। तिर्यक्-
त्वमथवा पुण्यं नरः प्राप्नोति वै द्विज।। श्रीमार्कंडेय उ।। ध्रुवाधारं जगद्योनेः पदं नारायणस्य तु। ततः प्रविष्टा सा देवी गंगा त्रिपथगामिनी।
सा प्रविश्य सुधायोनिं सोममाधाररंहसा। ततः संवर्द्धमानार्करश्मिसंगतपावनी। पपात मेरुपृष्ठे च सा चतुर्द्धा ततो ययौ। मेरुकूटतटांता-

मार्कं
॥११८॥

न्यामुत्कृष्टा स्यां निवर्त्तिता। विकीर्यमाणा सलिला निरालंबा पपात सा। मंदराद्येषु पादेषु विरक्तोदका समं। चतुर्ष्वपि पपाताम्बु विभिन्नांघ्रिशिलो
च्चया। पूर्वा शीतेति विख्याता ययौ चैत्ररथं वनं। तत्प्लावयित्वा तु ययौ अरुणोदं सरोवरं। शीतांतं च गिरिं तस्मात्ततश्चान्यान् गिरींद्रक्रमात्। गत्वा भुवं
समासाद्य भद्राश्वं जलधिं गता। तथैवालकनंदाख्या दक्षिणां गंधमादनं। मेरुपादे वनं गत्वा नंदनं देवनंदनं। मानसं च महावेगा प्लावयित्वा सरोव
रं। आसाद्य शैलराजानं रम्यं त्रिशिखरं तथा। तस्माच्चापर्वतान्सर्वान् दक्षिणेन क्रमोदितान्। तान्प्लावयित्वा संप्राप्ता हिमवंतं महागिरिं। दध्
रे चैव तां शंभुर्मुमोचाथ वृषध्वजः। भगीरथेनोपवासैः स्तुत्वा चाराधितो विभुः। तत्र मुक्ता च सा देवी ततः प्रयाता दक्षिणोदधिं। प्रविवेश तथा प्राच्या प्र
ती च्यां च महानदी। भगीरथीत्यानुययौ स्रोतसैकेन दक्षिणे। तथैव पश्चिमे पादे विपुले सा महानदी। सुचक्षुरिति विख्याता वैभ्राजं सा वनं ययौ। त
स्मात्क्रमेण चाद्रीणां शिखरेषु निपत्य सा। सुचक्षुपर्वतं प्राप्ता तथैवो घिशिशिरं गता। शितोदं च शिखरं तस्मात्प्लावयंती महानदी। केतुमाले
समासाद्य प्रविष्टा वरुणोदधिं। गत्वोत्तरां दिशं गंगा दिव्या सा च महानदी। तस्माच्चक्रमवसादीं श्रृक्रमादुत्तरान्नगान्। सुपार्श्वं च ततो नाद्रिं मे
रुपार्श्वं च समागता। भद्रसोमेति विख्याता सा ययौ सवितुर्वनं। तत्प्लावयित्वा संप्राप्ता महाभद्रं सरोवरं। ततः सा शंखकूटं च प्रयाता वै महा
नदी। तस्माच्च वृषभादींस्तान्क्रमात्प्राप्य शिलोच्चयान्। महार्णवमनुप्राप्ता प्लावयित्वोत्तरान्कुरून्। एवमेषा महागंगा कथिता ते द्विजसत्तम।
जंबूद्वीपनिवेशश्च वर्षाणि च यथा तथा। वसंति तेषु सर्वेषु प्रजाः किंपुरुषादिषु। सुखप्राया निरातंका न्यूनातोत्कर्षवर्जिताः। नवस्वपि च व
र्षेषु सप्त सप्त कुलाचलाः। एकैकस्मिंस्तथा देशा नद्यश्चापि विनिःसृताः। यानि किंपुरुषाद्यानि वर्षाण्यष्टौ द्विजोत्तम। तेष्वेतेषु स्थिदानीतोया ॥११८

ति मेरुं चार्य्य उत्तरार्ते। वार्क्षी स्वाभाविकी वेश्या तोयोत्था मानसी तथा। कर्मजा च नराणां सिद्धिर्वर्षेष्वेतेष्वथाष्टसु। कामप्रदेशेयो वृक्षेभ्यो
वार्क्षी सिद्धिः स्वभावजा। स्वाभाविकी समाख्याता तत्सिद्धिर्देशपा च देशिकी। अपां सौख्याच्च तोयोत्था ध्यानतो मानसी च तपसी। स्म साधना
दिकाया तु धर्मदा सा प्रदाहृता। न चैतेषु युगावस्था नाधयो व्याधयो न च। पुण्यापुण्यसमारंभो नैव तेषु द्विजोत्तम ॥५०॥ इति श्रीमा
र्कंडेयपुराणे गंगावतरणं नाम ॥ क्रौष्टुकिरु॰। भगवन्कथितं चैतत् जंबूद्वीपं समासतः। यदेतद्भवता प्रोक्तं कर्म नान्यत्र पुण्यदं। पापं
वा महाभाग वर्जयित्वा तु भारतं। इतः स्वर्गश्च मोक्षश्च मध्यं चांतश्च गम्यते। न खल्वन्यत्र मर्त्यानां भूमौ कर्म विधीयते। तस्माद्विस्तरतो
ब्रह्मन्ममैतद्भारतं वद। यच्चास्य भेदा यावंतो यथावस्थितमेव च। वर्षोयं द्विजशार्दूल ये चास्मिन्वर्षपर्वताः। श्रीमार्कंडेय उ॰। भारतस्
स्य वर्षस्य नव भेदान्निबोध मे। समुद्रांतरिता ज्ञेयास्ते नागम्याः परस्परं। इंद्रद्वीपः कसेरुश्च ताम्रवर्णो गभस्तिमान्। नागद्वीपस्तथा सौम्यो ग
गंधर्वो वारुणस्तथा। अयं तु नवमस्तेषां द्वीपः सागरसंवृतः। योजनानां सहस्रं वै द्वीपोयं दक्षिणोत्तरात्। पूर्वे किराता यस्यांते पश्चिमे य
वनाः स्मृताः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चांतः स्थिता द्विजाः। इज्यायुद्धवणिज्याद्यैः कर्मभिः कृतजीवनाः। तेषां संव्यवहा म
रोभिः कर्मभिरिष्यते। स्वर्गापवर्गप्राप्तिश्च पुण्यं पापं च वै तथा। महेंद्रो मलयः सह्यः शुक्तिमानृक्षपर्वतः। विंध्यश्च पारियात्रश्च मू
सप्तैवात्र कुलाचलाः। तेषां सहस्रशश्चान्ये भूधरा ये समीपगाः। विस्तारोच्छ्रायिणो रम्या विपुलाश्चित्रसानवः। कोलाहलः स वै गः
भ्राजो मंदरो दर्दुराचलः। वातंधमो वैद्युतश्च मैनाकः सुरसस्तथा। तुंगप्रस्थो नागगिरिर्गोधनः पांडुराचलः। पुष्पो वैजयंतो रैवतोर्बुद एव च। ऋष्यमू

मार्कं ॥१२॥ कः सगोमंतः कूटशैलः कृतस्मरः। श्रीपर्वतश्च कोरश्च शतशोऽन्येऽल्पपर्वताः। तैर्विमिश्रा जनपदाम्लेच्छाश्चार्याश्च भागशः। तैः पीयंते स-
रितः श्रेष्ठा यास्ताः सम्यक् निबोध मे। गंगा सरस्वती सिंधुश्चंद्रभागा तथापगाः यमुना च शतद्रूश्च वितस्ता रावती कुहूः। गोमती धूत-
पा च बाहुदा च दृषद्वती। विपाशा देविका चक्षुर्विश्वरा गंडकी तथा। कौशिकी चापगा विप्र हिमवत्पादनिःसृता। वेदस्मृतिर्वेतसिन-
त्रिघ्नी सिंधुश्च वेणा सानंदमती चैव शिता नीवा मही तथा। पारा चर्मन्वती तापी विदिशा वेत्रवत्यपि। सिप्रा ह्यवंती च तथा पारिय-
श्रया स्तथा। शोणो महानदश्चैव सुरथा नर्मदा क्रिया। मंदाकिनी दशार्णा च चित्रकूटा तथापगाः। चित्रोत्पला वितमसा करतो-
यिशाविका। तथान्या पिप्पली श्रोणी विपाशा वंजुला नदी। समेना जाम्बुक्तिमती जांगुली त्रिदिवा क्रमात्। ऋक्षपादप्रसूता च तथा-
न्या वेगवाहिनी। सिप्रापयोष्णी निर्विंध्या तापी च निषधावती। वेणा वैतरणी चैव सिनीवाली कुः कुमुद्वती। तोया चैव महागौरी दुर्गा चं-
तः शिवा तथा। विंध्यपादप्रसूतास्ताः नद्यः पुण्यजलाः शुभाः। गोदावरी भीमरथी कृष्णा वेणा तथापगा। तुंगभद्रा सुप्रयोगा बाह्या
कावेर्यथापगाः सह्यपादविनिष्क्रांतास्त्वेताः सरिदुत्तमाः। कृतमाला ताम्रपर्णी पुष्पजात्युत्पलावती। मलयाद्रिसमुद्भूता नद्यः
शीतजलास्त्विमाः। पितृसोमर्षिकुल्या च इक्षुका त्रिदिवा च या। लांगुलिनी वंशकरा महेंद्रप्रभवाः स्मृताः। ऋषिका च कुमारी च मं-
दगा मंदवाहिनी। कृपा पलाशिनी चैव शुक्तिमत्प्रभवाः स्मृताः। सर्वाः पुण्याः सरस्वत्यः सर्वा गंगाः समुद्रगाः। विश्वस्य मातरः स-
र्वाः सर्वाः पापहराः स्मृताः। अन्याः सहस्रशश्चोक्ताः क्षुद्रनद्यो द्विजोत्तम। प्रावृट्कालवहाः संति सदाकालवहाश्च याः। मत्स्या ॥१६॥

श्च मत्स्याः कुल्याश्च कुंतलाः काशिकोशलाः। अंबष्ठाश्च कलिंगाश्च मशकाश्च वृकैः सह। मध्यदेशा जनपदाः प्रायशोऽमी प्रकीर्तिताः। स-
ह्यस्य चोत्तरे यस्तु यत्र गोदावरी नदी पृथिव्यामपि कृत्स्नायां स प्रदेशो मनोरमः। गोवर्द्धनं पुरं रम्यं भार्गवस्य महात्मनः। वाह्लीका वाटधा-
नाश्च आभीराः कालतोयकाः। अपरांताश्च शूद्राश्च पह्लवाश्चर्मखंडकाः। गांधारा यवनाश्चैव सिंधुसौवीरमद्रकाः। शतद्रुदाललित्था-
श्च पारदा हारमूर्तिकाः। सावरोरज्ञहतकाः कैकेया दशमानिकाः। क्षत्रियाः पारिदेशाश्च वैश्याः शूद्रकुलानि च। कांबोजा दरदाश्चैव बर्ब-
रा ह्यंगलौकिकाः। चीनाश्चैव तुषाराश्च पह्लवा बाह्यतोदराः। आत्रेयाः सभरद्वाजाः प्रस्थलाश्च दशेरकाः। लंपाकास्तलनकाराश्च चू-
लिका जागुडैः सह। औपधाश्चालिकाद्राः किरातानां च जातयः। तामसा हंसमार्गाश्च काश्मीरास्तंगणास्तथा। शूलिकाः कुहूकाः-
श्चैव ऊर्णा दार्वास्तथैव च। एते देशा ह्युदीच्यास्तु प्राच्यान्देशान्निबोध मे। अंध्रा मुद्गरकाश्चैव अंगगिरिबहिर्गिराः। तथा प्रवंग वं-
वेयामलयामलवर्त्तिकाः। ब्रह्मोत्तराः प्रविजया भार्गवा गोतमालिकाः। प्राग्ज्योतिषाश्च मद्राश्च विदेहास्ताम्रलिप्तकाः। मल्लाम-
गधगोनंदाः प्राच्या जनपदाः स्मृताः। अथापरे जनपदा दक्षिणापथवासिनः। याम्याश्च केरलाश्चैव वेल्लाः कुल्यास्तथैव च। सेतुकामू-
लिकाश्चैव कुमारापानमासिकाः। महाराष्ट्रा माहिषिकाः कलिंगाश्चैव सर्वशः। आभीराः सह वैषीकाः अटव्यारुबराश्च ये। पुलिंदा
दा विंध्यमौलेया वैदर्भा दंडकैः सह। पौरिका मौलिकाश्चैव अश्मका भोगवर्द्धनाः। तैलिकाः कुंतलाह्यंध्रा उद्भिदा नलिकालिकाः। दाक्षिणा

स्त्विमेदेशा अपरान्तान् निबोधमे। सूर्य्याविकाः कालतताः दुर्गास्तालकटैः सह। पुलिंदाश्च सुशीलाश्च रूपमास्तामसैः सह। तथा कुरुमि
नश्चैव सर्वे चैव करस्कराः। नासिकाख्याश्च येचान्ये ये चैवांतरनर्मदाः। भारुकच्छाः समाहेयाः सर्वैः सारस्वतैः सह। मोच्छीयाश्च सु
राष्ट्राश्च आवंत्याश्चार्वुदैः सह। इत्येते परांतश्चशृणु विंध्यनिवासिनः। मनोज्ञाश्च करूषाश्च मेकलाश्चोत्कलैः सह। उत्तमार्णा दशार्णाश्च
भोजाः किंकिंधकैः सह। तोसलाकोसलाश्चैव त्रिपुरा वैदिशास्तथा। मुमुरास्तुंबराश्चैव पांडुमान्नैषधैः सह। अन्नपास्तुंडिकेराश्च धीरहो
त्राह्यवंतयः। एते जनपदाः सर्वे विंध्यपृष्ठनिवासिनः। अतो देशान् प्रवक्ष्यामि पर्वताश्रयिणश्चये। निहाराहंसमार्गाश्च कुपथाः सुंगणाः
खसाः कुथप्रावरणाश्चैव उर्णादार्घाः सहूहुकाः। त्रिगर्त्ता मालवाश्चैव किरातास्तामसैः सह। कृतत्रेतादिकश्चात्र चतुर्युगकृतो विधिः
एतत्तु भारतं वर्षं चतुःसंस्थानसंस्थितं। दक्षिणापरभागेन पूर्वेण च महोदधिः। हिमवानुत्तरेणास्य कार्मुकस्य यथा गुणः। तदेतद्भार
तं वर्षं सर्वबीजं द्विजोत्तम। ब्रह्मत्वममरेशत्वं देवत्वं नरतां तथा। मृगपक्षिश्वरखचरायोनीस्तद्वत्सरीसृपाः। स्थावराणां च सर्वेषां मतो
ब्रह्मन् शुभाशुभैः। प्रयांति कर्मभूर्ब्रह्मन् नान्या लोकेषु विद्यते। देवानामपि विप्रर्षे सदैवैष मनोरथः। अपि मानुष्यमाप्स्यामो देवत्वात्प्र
च्युताः क्षितौ। मनुष्यः कुरुते तत्तु यन्न शक्यं सुरासुरैः। स्वकर्मनिगडग्रस्तैः स्वकर्मक्षपणोन्मुखैः॥ ॥इति मार्कंडेयपुराणे भारतवर्णनं ना राम
म॥ ॥क्रोष्टु० किरु०। भगवन् कथितं सम्यक् भवता भारतं मम। सरितः पर्वता देशा ये च तत्र वसंति ते। किं तु कूर्मस्त्वया द्वै भारते भगवान् ८०

हरिः। कथितं तस्य संस्थानं श्रोतुमिच्छाम्यशेषतः। कथं स संस्थितो देवः कूर्मरूपी जनार्द्दनः। शुभाशुभं मनुष्याणां व्यस्यते चैव तत्कथं॥ य
था मुखं यथा पादास्तस्य तद्ब्रूह्यशेषतः॥ मार्कंडेय उ०॥ प्राङ्मुखो भगवान् देवः कूर्मरूपी व्यवस्थितः। आक्रम्य भारतं वर्षं नवभेदमि
मं द्विज। नवधा संस्थितस्यास्य नक्षत्राणि समंततः। विषयाश्च द्विजश्रेष्ठ ये सम्यक् तान्निबोधमे। मेदा मद्रास्तथा चांध्राः शाल्वा नीका
स्तथा शकाः। उज्जिहानास्तथा वत्सघोषसंख्यास्तु यामुनाः। मध्ये सारस्वता मत्स्याः शूरसेनाः समाथुराः। धर्मारण्या ज्योतिषिकाः गौ
या गुडाश्मकाः। उद्देहकाः सपांचलाः संकेताः कंकमारुताः। कालकोटिसपाषंडाः पारियात्रनिवासिनः। कापिंजलाः कुरुसह्यास्तथैवो
दुंबरा जनाः। गजाह्वयाश्च कूर्मस्य जनामध्यनिवासिनः। कृत्तिका रोहिणी सौम्यमेतेषां मध्यवासिनां। नक्षत्रत्रितयं विप्र शुभाशुभविपा
चकं। वृषध्वजोऽञ्जनश्चैव पद्माख्यो मानवाचलः। सूर्पकर्णो व्याघ्रमुखः खर्परः कर्पटाशनैः। तथा चंद्रपुराश्चैव खसाः समागधास्तथा।
शिबाश्चयो मैथिलाः सौद्रास्तथा वदनदंतुराः॥१३॥ प्राग्ज्योतिषः सलौहित्योः समुद्राः पुरुषादकाः। पौंड्रोत्कलो भद्रगौरस्तथोदयगिरिर्द्वि
ज। कासयो मेकलांबष्टास्तामलिप्तेकपारकाः। वर्द्धमानः कौशलाश्च मुखे कूर्मस्य संस्थिताः। रौद्रं पुनर्वसुस्तिष्यं नक्षत्रत्रितयं मुने। पा
देतु दक्षिणे देशान् क्रोष्टुके वदतः शृणु। कलिंकवंगजठराः कोशला मूषकास्तथा। वेदपाश्चार्द्धकर्णाश्च मत्स्यांध्रा विंध्यवासिनः। विद

र्गनालिकेराश्च धर्मद्वीपास्तथैलिकाः॥ व्याघ्रग्रीवामहाग्रीवास्त्रैपुरास्सश्मश्रुधारिणः॥ कैष्किंधिकाहेमकूटानिषधाः कटकस्थलाः॥ दशार्णाहा
रिकानग्नानिषदाः काकुलालकाः॥ तथैवपर्णशवराः पादेवैपूर्वदक्षिणे॥ आश्लेषार्क्षंतथापित्र्यंफाल्गुन्यः प्रथमाद्विज॥ नक्षत्रत्रितयंपाद
माश्रितंपूर्वदक्षिणं॥ लंकाः कालाजनाश्चैवशैलिकालिकरास्तथा॥ महेंद्रमलयाद्रौचदुर्दुरेचवसंतिये॥ कर्कोटकवनेदैवभृगुकच्छाः
सकौंकणाः॥ आभीराः शवराश्चैववेणातीरनिवासिनः॥ अवंतयोदासपुरास्तथैवाक्वारिणोजनाः॥ महाकर्णाः सकर्णाटागोनर्दाश्चि
त्रकूटकाः॥ चोलाः कोल्लुगिराश्चैवक्रौंचद्वीपजटाधराः॥ कावेरीऋष्यमूकस्थानासिक्याश्चैवयेजनाः॥ शंखमुक्तादिवैदूर्यशैलप्रांतरता
श्चये॥ तथावारिचराः कोलाधर्मपत्तनकास्तथा॥ गणराज्यानराः कृष्णद्वीपवासनिवासिनः॥ सूर्याद्रौकुमुदाद्रौतुयेवसंतितथाज
नाः॥ नैबंधनाः सपिसिकास्तथायेकार्मणेयकाः॥ कौरव्याः कैकयायेचऋषिकास्तापसाश्रमाः॥ ऋषभाः सिंहलाश्चैवतथाकांचीनि
वासिनः॥ तिलिंगाः कुंजरदरीकच्छपाः पूर्वचयेजनाः॥ ताम्रवर्णास्तथाचीनाः कुक्षौकूर्मस्यदक्षिणे॥ फाल्गुन्यश्चोत्तराहस्तश्चित्रा[illegible]त्रयं
द्विज॥ कूर्मस्यदक्षिणेकुक्षौवस्थपादमथापरं॥ कांबोजाः पह्लवाश्चैवतथैववडवामुखाः॥ तथैवसिंधुसौवीराः सानंता[illegible]मुखाः॥ भा
वनामार्गगाः शूद्राः कर्णप्राधेयबर्बराः॥ किराताः पारसामुंडास्तथापारायताः करलाः॥ चूडकाहेमगिरिकाः सिंधु[illegible]वताः सौराष्ट्रा रा॰
८१

वादिराश्चैवद्रविडाः समहार्णवाः॥ एतेजनपदाः पादेस्थितावैदक्षिणेपरे॥ स्वात्याविशाखामैत्रंचनक्षत्रत्र[illegible]पिमेघाःसु
राद्रिभ्यः खर्जूरोऽस्तगिरिस्तथा॥ अपरांतिकाहैहयाश्चशांतिकाद्विप्रहरास्तवः॥ कौंकणाः पंचनदकारामनाः पारदास्तथा॥ तर[illegible]नि
र्जगतकाः शर्कराः साश्मवेश्यकाः॥ गुरुचूलाः फल्गुलुकाः वेणुमत्याचयेजनाः॥ एकेक्षणाश्चसनुहादीर्घग्रीवाः सतौलिकाः॥ अश्व
केशास्तथापुच्छजनाः कूर्मस्यसंस्थिताः॥ एवंमूलंतथाषाढानक्षत्रत्रयमेवच॥ मांडव्याश्चतुषाराश्च अश्मकालललनास्तथा॥ कु
सुतानडुहाश्चैवस्त्रीराज्यंकोलिकास्तथा॥ नृसिंहावेणुमत्याश्चवनावस्थास्तथापरे॥ चर्मरंगास्तथोलूकाः मुक्ताः कूर्चास्तथजनाः
तथाफल्गुलुकाः पोरागुरुलुध्वालुकास्तथा॥ एकेक्षणावाजिकेशाः दीर्घपादास्तथैवच॥ यामाचापरजनाः पार्श्वेस्थिताः कूर्मस्यचोत्तरे॥ अ
षाढाश्रवणंचैवधनिष्ठाचात्रशब्दिताः॥ कैलाशोहिमवांश्चैवधनुष्मान्वसुमांस्तथा॥ वसुष्मान्क्रौंचकुरवः क्षुद्रवीणाश्चयेजनाः॥
वसातयःसकैकेयाभोगप्रस्थाः सयामुनाः॥ अंतर्द्वीपास्त्रिगर्त्ताश्चअग्निकाः सा—नाः जनाः॥ तथैवाश्वमुखप्रांताश्चिविडाः केशधा
रिणः॥ दासेरकावाटधानाः सरधानास्तथैवच॥ पुष्करावर्त्तकैरातास्तथातक्षशिलाश्रयाः॥ अंबरामालकामद्राः कौशिकाः सरदंड[illegible]
पिंगलामाणहलकाहूणकोलाहलास्तथा॥ मांडव्याभूतिपुरकाः सीतकाहेमतालकाः॥ यशोमत्याः सगांधाराश्चिरवागव्यरामर[illegible]

धेयादासमेयाश्चराजन्याःश्यामकास्तथा।क्षेमधूर्त्ताश्चकूर्मस्यवामंकुक्षिमुपागताः।वारुणंचात्रनक्षत्रंतद्वत्प्रोष्ठपदाद्वयं।नैमि
कंनवराज्यंचपशुपालंसकीचकं।काश्मीरंचतथाराष्ट्रंत्र्यभिसारजनस्तथा।दारदास्त्वंगणाश्चैवकुनटानवराष्ट्रकाः।सैरिंध्र
ब्रह्मपुरकास्तथैववनराज्यकाः।किरातचीनकालिंगाजनाःपल्लवलोलजाः।दार्घदामरकाश्चैवकुलोलश्चात्रदीरिकाः।एकपादाःष
साघोषाःपूर्णसोमानुबिंबकाः।तथावसुधनालिस्थाश्चीरप्रावरणाश्चये।त्रिनेत्राःपौरवाश्चैवगंधर्वाश्चद्विजोत्तम।पूर्वोत्तरंतुकूर्म
स्यपादमेतेसमाश्रिताः।रेवत्याश्वाश्विदेवत्यंनक्षत्राण्यपिवैद्विज।एतत्पीडास्वमीदेशाःपीड्यंतेतत्क्रमोदिताः।यांतिचाभ्युदयंविप्रग्र
हैःसम्यक्व्यवस्थितैः।यस्यर्क्षस्ययतिर्योवैनक्षत्रग्रहसंभवं।भयंलोकस्यभवतिशोभनंवाद्विजोत्तम।स्वकेरशोभनैर्ग्रस्तैःसा[illegible]स्थितैः
[illegible]मान्यमितिकीर्त्तितं।ग्रहैर्भवतिपीडास्यमस्त्यायासमशोभनं।तथैवशोभनःपाकोदुःस्थितैश्चतथाग्रहैः।अत्यापकारायन्नृणां
देशजैश्चात्मिकंद्विधा।द्रव्येगोष्ठेषुभृत्येषुसुहृत्सुतनयेषुच।भार्यायांचग्रहेदुःस्थेभयंपुण्यवतांनृणां।आत्मन्यथाल्पपुण्यानांसर्वत्रैवा
तिपापिनां॥नैवात्रापिह्यपापानांनराणांजायतेभयं।दिक्देशजनसामान्यंनृपसामान्यमात्मजं।नक्षत्रग्रहसामान्यंनरोभुंक्तेशुभाशुभं।प
रस्पराभिरक्षाचग्रहदौस्थ्येषुजायते।एतेभ्यएवविप्रेंद्रशुभहानिस्तथाशुभैः।यदेतत्कूर्मसंस्थानंनक्षत्रेषुमयोदितं।एतत्तुदेशसामान्यमशु

भशुभमेववा।तस्माद्विज्ञायदेशर्क्षग्रहपीडांतथात्मनः।कुर्वीतशांतिमेधावीलोकवादांश्चसत्तम।आकाशदेवतानांचचैत्यादीनांचदौहृदात
पृथिव्यांपतितेलोकेलोकवादाइतिश्रुताः।तांस्तथैवबुधःकुर्याल्लोकवादान्नहापयेत।तेषांतुकारणान्नृणांमुक्तोदुष्टागमक्षयः।शुभोदयः
प्रहानिश्चपापानांद्विजसत्तम।प्रज्ञाहानिंप्रकुर्युस्तेद्रव्यादीनांप्रकुर्वते।तस्मात्शांतिपरःप्राज्ञोलोकवादरतस्तथा॥लोकवांश्चशांतीश्चग्र
हपीडासुधारयेत।भूदोहरूपवासैश्चशस्तचैत्यादिवंदनं।जपंहोमंतथादानंस्नानंक्रोधादिवर्जनं।अद्रोहंसर्वभूतेषुमैत्रींकुर्वीतपंडितः
वर्जयेतअसतींवाचंअतिवादांस्तथैवच।ग्रहपूजांचकुर्वीतसर्वपीडासुमानवः।एवंशाम्यंत्यशेषाणिघोराणिद्विजसत्तम।प्रयतानांमनुष्या
णांग्रहास्तुष्यंत्यसंशयं।एवंकूर्मोमयाख्यातोभारतेभगवान्विभुः।नारायणोह्यचिंत्यात्मायत्रसर्वंप्रतिष्ठितं।यत्रदेवाःस्थिताःसर्वेप्रतिन
क्षत्रसंश्रयाः।यथामध्येहुतवहःपृथ्वीसोमश्चवैद्विज।मेषादयस्त्रयोमध्येमुखेद्वौमिथुनादिकौ॥प्रदक्षिणेतथापादेकर्कसिंहौव्यवस्थितौ।
सिंहकन्यातुलाश्चैवकुक्षौराशित्रयंस्थितं।तुलायवृश्चिकश्चाभौपादेदक्षिणपश्चिमे।पृष्ठेतुवृश्चिकश्चैवसहधन्वीव्यवस्थितः।वायव्येचा
स्यवैपादेधनुर्ग्राहादिकंत्रयं।कुंभमीनौतथैवास्यउत्तरंकुक्षिमास्थितौ।मीनमेषौद्विजश्रेष्ठपादेपूर्वोत्तरेस्थितौ।कूर्मेदेशास्तथाक्षाणिदेशेषु
तेषुवैद्विज।राशयश्चतथार्क्षेषुग्रहाराशिव्यवस्थिताः।तस्मात्ग्रहर्क्षपीडासुदेशपीडांविनिर्द्दिशेत।तत्रस्नानंप्रकुर्वंतिदानहोमादिकंविधिं

DR. BHAU DAJI MEMORIAL

सएषवैनवपादाब्रह्मन्मध्येग्रहश्चयः।नारायणाख्योविश्वात्माकारणंजगतःप्रभुः॥८३॥ ।इतिश्रीमार्कंडेयपुराणेकूर्मनिवेशः। ।श्री॥
एतत्तेभारतंवर्षंयथावत्कथितंमुने।कृतंत्रेताद्वापरंचतथाकलिचतुष्टयं।अत्रैवैतद्युगानांचातुर्वर्ण्यस्यवैजनाः।चत्वारित्राणिचइदंचतथै
वेकेशरस्थितं।जीवंयत्रनराब्रह्मन्कृतत्रेतादिषुक्रमात्।देवकूटस्यसह्यस्यशैलेंद्रस्यमहात्मनः।पूर्वेणायतस्थितंवर्षंभद्राश्वंतन्निबोध
मे।पीतवर्णश्चनीलश्चशैवलश्चाचलोत्तमः।कौलजःपर्णशालाग्रपंचात्रेनकुलाचलाः।तेषांप्रसूतिरन्येपिबहवःक्षुद्रपर्वताः।तैर्विमिश्रा
जनपदानानारूपाःसहस्रशः।महास्थूलःशुकश्चैवसुवद्धोतःसुमंगलः।इत्येवमादयोन्येपिशतशोथसहस्रशः।शीताशंखावतीभद्रा
चक्रावर्त्तादिकाःस्थिताः।नद्योत्रबहवोविस्तीर्णाःशीततोयौघवाहिनीः।अत्रवर्षेनराःशंखाःशुद्धाहेमसमप्रभाः।दिव्यसंगमिनःपुण्यादश
वर्षशतायुषः।अधमोत्तमंनतेष्वस्तिसर्वेतेसमदर्शनाः।तितिक्षादिभिरष्टाभिःप्रकृत्यातेगुणैर्युताः।तत्राप्यश्वशिराश्चैवचतुर्बाहुर्जनार्दनः
शिरोहृदयमेढ्रांघ्रिहयस्तेषुस्त्रयाचितः।तस्याप्यथैवंविषयाविज्ञेयाजगतःप्रभोः।केतुमालमतोवर्षंनिबोधममपश्चिमं।विशालःकंबम
लोहृद्योजयंतोहरिपर्वतः।विशोकोवर्द्धमानश्चसप्तैतेकुलपर्वताः।अन्येसहस्रशःशैलायेषुलोकगणाःस्थिताः।मानसोत्तुंगाःमहेयाःशातप
तकरंभकौ।अंशलप्रमुखाश्चैववसंतिशतशोजनाः।येपिबंतिनदीश्रेष्ठांवक्षुष्यामंसुकोमलांसुमेधांकामिनीश्यामांतथैवान्याःसहस्रशः। राम ८३

अत्राप्यायुःसमंपूर्वैरत्रापिभगवान्हरिः।वाराहरूपीपादास्यहृत्पृष्ठपार्श्वतस्तथा।त्रिनक्षत्रयुतोदेशोनक्षत्राणियुतानि।इत्येतत्केतुमा
लंतेकथितंमुनिसत्तम।अतःपरंकुरून्वक्ष्येनिबोधेहममोत्तरान्।तत्रवृक्षामधुफलानित्यपुष्पफलोपगाः।वस्त्राणिचप्रसूयंतेफ
लेष्वाभरणानिच।सर्वकामप्रदास्तेहिसर्वकामफलप्रदाः।भूमिर्मणिमयीवायुःसुगंधिःसर्वदासुखः।जायंतेमानवास्तत्रदेवलोक
परिच्युताः।मिथुनानिप्रसूयंतेसमकालस्थितानिच।अन्योन्यमनुरक्तानिचक्रवाकोपमानिह।चतुर्दशसहस्राणितेषांसार्द्धानिवैस्थि
तिः।चंद्रकांतश्चशैलेंद्रःसूर्यकांतस्तथापरः।तस्मिन्कुलाचलौवर्षेतन्मध्येचमहानदी।भद्रसोमाप्रयासुर्वीपुण्यामलजलौघि
नी।सहस्रशस्तथैवान्यानद्योवर्षेपिचोत्तरे।तथान्याक्षीरवाहिन्योघृतवाहिन्यएवच।दध्नोह्रदास्तथैवात्रतथान्येचात्रपर्वताः।अ
मृतस्वादुकल्पानिफलानिविविधानिच।वनेषुतेषुवर्षाग्र्यशतशोथसहस्रशः।तत्रापिभगवान्विष्णुरगच्छन्मत्स्यरूपतां।विभक्ता
नवधातत्रनक्षत्राणित्रयंत्रयं।देशास्तत्रापिनवधाविभक्तामुनिसत्तम।चतुर्द्वीपसमुद्रेषुभद्रद्वीपस्तथापरः।तत्रापिद्वीपाविचि
ख्याताःसमुद्रांतर्महामुने।एतत्तेकथितंब्रह्मन्कुरुवर्षंमयोत्तरं।श्रृणुकिंपुरुषादीनिवर्षाणिगदतोमम॥२९॥ ।इतिश्रीमार्कंडे
यपुराणेवर्षवर्णनं॥ ॥श्रीमार्कंडेयउवाच॥यत्तुकिंपुरुषंवर्षंतत्तेवक्ष्याम्यहंद्विज।तत्रायुर्दशसाहस्रःपुरुषाणांवपुष्मतां।अना

मार्कं
८४

याद्यशोकाश्चनरास्तत्रतथास्त्रियः॥प्लक्षखंडश्चतत्रोक्तःसुमहान्नंदनोपमः॥तस्यतेवैफलरसंपिबंतिपुरुषाःसदा॥स्थिरयौवनाह्यविस्पंदाःस्त्रि
यश्चोत्पलगंधिकाः॥अतःपरंकिंपुरुषाद्धरिवर्षंप्रचक्षते॥महारजतसंकाशाजायंतेतत्रमानवाः॥परलोकच्युताःसर्वेदेवानूकाश्चसर्वशः॥
हरिवर्षनराःसर्वेपिबंतीक्षुरसंशुभं॥नजराबाधतेतत्रनजीर्यंतेचकर्हिचित्॥तावंतमेवतेकालंजीवंत्यथनिरामयाः॥मेरुवर्षंतथाप्रो
क्तंमध्यमंयदिलावृतं॥नतत्रसूर्यस्तपतिनतेजीर्यंतिमानवाः॥लभंतेनात्मनोलाभंरश्मयश्चंद्रसूर्ययोः॥नक्षत्राणांग्रहाणांचमेरुस्तत्रप
राद्धृतिः॥पद्मप्रभाःपद्मगंधाजंबूफलरसाशिनः॥पद्मपत्रायताक्षाश्चजायंतेतत्रमानवाः॥वर्षाणांतुसहस्राणितत्राप्यायुस्त्रयोदश॥श
रावाकारसंस्थानोमेरुर्मध्येइलावृतं॥रम्यकंवर्षमस्मात्तुकथयिष्येनिबोधतत्॥अत्रापिचोत्तुंगोन्यग्रोधोहरितच्छदः॥तस्यापि
तेफलरसंपिबंतोवर्त्तयंतिवै॥वर्षायुतायुषस्तत्रनरास्तत्फलभोजिनः॥विप्रप्रधानाविमलानरादौर्गंध्यवर्जिताः॥तस्मादप्युत्तरं
वर्षंनाम्नाख्यातंहिरण्मयं॥हिरण्वतीनदीयत्रसुवर्णकमलोज्वला॥महाबलाःसुतेजस्काजायंतेतत्रमानवाः॥यक्षानुकामहासत्त्वा
धनिनःप्रियदर्शिनः॥ ॥इतिश्रीमार्कंडेयपुराणे॥ ॥क्रोष्टुकिरु॥कथितंभगवन्सर्वंयत्पृष्टोसिमहामुने॥भूसमुद्रादिसंस्थानंप्र
माणंसरितांग्रहाः॥तेषांचैवप्रमाणंयत्नक्षत्राणांचसंस्थितिः॥भूरादयस्तथालोकाःपातालान्यखिलानिच॥स्वायंभुवंतथाख्यातं राम ८४

तंमुनेमन्वंतरंमम॥अनंतरमहंश्रोतुमिच्छेमन्वंतराणिवै॥मन्वंतराधिपान्देवान्ऋषींस्तत्रतथानृपान्॥श्रीमार्कंडेयउवाच॥
मन्वंतरंतवाख्यातंमयास्वायंभुवंचयत्॥स्वारोचिकाख्यमन्वंतुशृणुतस्मादनंतरं॥कश्चिद्द्विजातिप्रवरःपुरेभूदरुणास्पदे॥वरुणा
यास्तटेविप्रोरूपेणात्यश्विनावपि॥मृदुस्वभावःसद्वृत्तोवेदवेदांगपारगः॥सदातिथिप्रियोरात्रावागतानांसमाश्रयः॥तस्ययज्ञेमतिःपृ
थ्वीमटेयमितिनित्यदा॥अतिरम्यवनोद्यानांनानानगरशोभितां॥अथागादतिथिर्विप्रकदाचित्तस्यवेश्मनि॥नानौषधिप्रभावज्ञोमं
त्रविद्यासाधकः॥अभ्यर्चितस्तुतेनासौश्रद्धापूतेनचेतसा॥तस्याचख्यौसदेशांश्चरम्याणिनगराणिच॥नदीर्वनानिशैलांश्चपुण्या
न्यायतनानिच॥सततोविस्मयाविष्टःप्राहतंद्विजसत्तमं॥अनेकदेशदर्शित्वेनातिश्रद्धासमन्वितः॥त्वंनातिवृद्धवयसाननिवृत्तश्चयौ
वनात्॥कथमल्पेनकालेनपृथिवीमटितोद्विज॥ ॥ब्राह्मणउ॥ममौषधिप्रभावेनविप्र प्रतिहतागतिः॥योजनानांसहस्रंहिदिना
र्द्धेनव्रजाम्यहं॥मार्कंडेयउवाच॥ततःसविप्रस्तंभूयःप्रत्युवाचेदमादरात्॥श्रद्दधानोवचस्तस्यब्राह्मणस्यविपश्चितः॥ममप्रसादं
भगवान्करोत्वौषधिदानजं॥द्रष्टुमेतांममहीमतीवेच्छाप्रवर्त्तते॥प्रादात्सब्राह्मणश्चासौपादलेपमुदारधीः॥अभिमंत्रयामासदि
शमाख्यातांतेनयत्नतः॥तेनानुलिप्तपादोथसद्विजोद्विजसत्तम॥हिमवंतमगाद्द्रष्टुंनानाप्रस्रवणान्वितं॥सहस्रंयोजनानांहिदिना

मार्कं० ८५

ईणव्रजामियत्। आयास्यामीतिहिसंचिंत्यतद्ईणापरेणहि। संप्राप्तोहिमवत्पृष्ठंनातिक्रांततनुर्द्विज। विचचारततस्तत्रतुहिनास्तृतभूतले।
पादाक्रांतेनतस्याथतुहिनेनविलीयत। प्रक्षालितःपादलेपःपरमौषधिसंभृतः। ततोजडगतिःसोथइतश्चेतश्चपर्य्यटन्। ददर्शातिमनोज्ञानि
भूतानिहिमभूभृतः। सिद्धगंधर्वजुष्टानिकिंनराभिमतानिच। क्रीडाविहाररम्याणिदेवादीनामितस्ततः। दिव्याप्सरोगणशतैराकीर्णान्यवलो
कयत्। नातृप्यतद्विजश्रेष्ठःप्रोद्भूतपुलकोमुनौ। क्वचित्प्रस्रवणभ्रष्टजलपातमनोरमं। प्रवृत्तशिखिकेकाभिरन्यतश्चविनादितं। दात्यूहकोय
ष्टिरुतैःक्वचिच्चाभिमनोरमं। पुंस्कोकिलकलालापैःप्रतिहारिभिरन्वितं। प्रफुल्लतरुगंधेनवासितानिलवीजितं। मुदायुक्तःसदृशेहिमवंतंम
हागिरिं। दृष्ट्वाचतंद्विजसुतोहिमवंतंमहाचलं। स्वईक्षामीतिसंचिंत्यमतिंचक्रेगृहंप्रति। विभ्रष्टपादलेपोसौमचिरेणजडसंक्रमः। चिंतयामासकि
मिदंमयाज्ञानादनुष्ठितं। पादप्रलेपोनष्टोमेविलीनोहिमवारिणा। शैलोऽतिदुर्गमश्चायंदूराच्चाहमिहागतः। प्रयास्यतिक्रियाहानिरग्निशुश्रूष
णादिका।। कथमत्रकरिष्यामिसंकटंमहदागतं। इदंरम्यमिदंरम्यमित्यस्मिन्वननिर्झरे। सक्तदृष्टिरहंतृप्तिंनयास्येष्टशतैरपि। नराणां
कलालापाःसमंतात्श्रोत्रहारिणः। प्रफुल्लतरुगंधोत्रघ्राणमन्यंतमृच्छति। सुखस्पर्शस्तथावायुर्ज्ञानिरसवंतिच। हरंतिकेनरंनात्रमनोज्ञा
सरांसिच। एवंगतेतुपश्ययदिकिंचित्पोथनं। सममोपदिशेन्मार्गंगमनायगृहंप्रति। ।श्रीमार्कंडेयउवाच। ।एवमचिंतितः विप्रोबभ्रामसहिमा

राम ८५

चले। भ्रष्टपादौषधिबलोवैक्लव्यंपरमंगतः। तंददर्शभ्रमंतंचमुनिश्रेष्ठंवरूथिनी। वराप्सरामहाभागामौनेयारूपशालिनी।। तस्मिन्
दृष्टेततःसाभूतद्विजवर्येवरूथिनी। मदनासक्तहृदयासानुरागाभवत्क्षणात्। चिंतयामाससोन्वेष्यरमणीयतराकृतिः। सफलंते[illegible]
न्मयदिमानावमन्यते। अहोऽस्यरूपमाधुर्य्यमहोस्यसलिलगतिः। अहोगंभीरतादृष्टेःकुतोस्यसदृशोभुवि। दृष्टादेवास्तथादैत्याःसिद्ध
पन्नगाः। कथमेकोपिनास्यस्यतुल्यरूपोमहात्मनः। यथाहमस्मिन्नप्येषसानुरागास्तथायदि। भवेद्भवेदत्रमयातत्कृतःपुण्यसंचय
श्चमयिसुस्निग्धांदृष्टिमद्यनिपातयेत्। कृतपुण्यानमत्तोन्यास्त्रैलोक्येवनितास्ततः। ।श्रीमार्कंडेयउवाच।। ।।एवंसंचिंतयंतीसादिव्ययो
षित्स्मरातुरा। आत्मानंदर्शयामासरमणीयतराकृतिं।। तांदृष्ट्वासद्विजसुतश्चारुरूपांवरूथिनीं।। सोपचारंसमागम्यवाक्यमेतदुवाचह। का
त्वंकमलगर्भाभिकस्यकिंवात्रतिष्ठसि। ब्राह्मणोहमिहायातोनगरादरुणास्पदात्। पादलेपोऽत्रमेध्वस्तोविलीनोहिमवारिणा। यस्यानुभाव
दत्राहमागतोमदिरेक्षणे।। वरूथिन्युवाच।। ।।मौनेयाहंमहाभागनाम्नाख्यातावरूथिनी।। विचरामिसदैवात्ररमणीयेहिमाचले। साहंत्वद्द
र्शनाद्विप्रकामवैक्लव्यतांगता। प्रशाधियन्मयाकार्य्यंत्वदधीनास्मिसांप्रतं।। ब्राह्मणउवाच।। ।।येनोपायेनगच्छेहंनिजंगेहंशुचिस्मिते।।
तन्ममाचक्ष्वमहाहानिर्भवत्यखिलकर्मणां। नित्यनैमित्तिकानांतुहान्याहानिर्द्विजन्मनः। भवसतस्त्वंकल्याणिमग्नमुद्धरमामितः। प्र

स्यतेन प्रवासो ब्राह्मणानां कदाचन। अपराध्यति मे भीरु देशदर्शनकौतुकं। सतो गृहे द्विजाग्र्यस्य निष्पत्तिः सर्वकर्मणां। नित्यनैमि
त्तिकानां तु हानिरेव प्रवासिनः। सा त्वं किं बहुनोक्तेन तथा कुरु सुमध्यमे। यथा नास्तं गते सूर्ये पश्यामि निजमालयं। वरूथिन्युवाच। ॥
मैवं ब्रूहि महाभाग माभूत्स दिवसो मम। यां परित्यज्य यत्र त्वं निजं गेहमुपैष्यसि॥ अतोऽन्यतरः स्वर्गो न यतो द्विजनंदन। ततो वयं परित्य
ज्य तिष्ठामो ऽत्र सुरालये। स त्वं सह मया कांत कांतेऽत्र तुहिनाचले। रममाणो हिमज्ञानां बंधुनात्य स्मरिष्यति। स्रजो वस्त्राण्यलंकारान् भक्ष्यभो
ज्यानुलेपनं। दास्याम्यत्र तवाहं ते स्मरेण वशगा कृता। वीणावेणुस्वनोद्गीतं किंनराणां मनोरमं। अंगाह्लादकरो वायुर्मृष्टान्नमुदकं शुचिः
मनोभिलषिता शय्या सुगंधमनुलेपनं। इहासतो महाभाग गृहे किं ते धिकं निजे। इहासतो नैव जरा कदाचित्ते भविष्यति। त्रिदशानामि
यं भूमिर्यौवनोपचयप्रभाः। इत्युक्त्वा सानुरागा सा सहसा तरलेक्षणा। आलिंगालिंग प्रसीदेति वदंती कलमुन्मुदा॥ ।ब्राह्मण उ॰। ।मां मा
स्प्राक्षीर्व्रजान्यत्र दुष्टे यः सदृशस्तव। अन्यन्मया याचिता त्वं अन्यथैवाभ्युपैषि मां। सायं प्रातर्हुतं हव्यं लोकान् प्रछति शाश्वतान्। त्रैलोक्य
मेतदखिलं मूढे हव्ये प्रतिष्ठितं। वरूथिन्युवाच। किं ते नाहं प्रिया विप्र रमणीयो न किं गिरिः। गंधर्वविद्याधरादीस्त्यक्त्वाभीष्टो हि कस्तव॥
ब्राह्मण उवाच॥ अभीष्टा गार्हपत्याद्याः सततं मे त्रयो ग्नयः। रम्ये ममाग्निशरणं वेदी विष्टरिणी प्रिया। वरूथिन्युवाच। अष्टावात्मगु

णा ये हि तेषां मा हो दया द्विज। तो करोषि कथं न ष्टं मयि सद्धर्मपालने। त्वद्वियुक्ता न जीवामि तथा प्रीतिर्मम त्वयि। नैतद्ब्रवीम्यहं मिथ्या प्रसीद त्वं
ममानय। ब्राह्मण उ॰। यदि प्रीतिमती सत्यं नोपचारो ब्रवीषि मां। तमुपायं समाचक्ष्व येन यामि स्वमालयं। वरूथिन्यु॰। निजमालयमप्यस्माद्गवा
न्यास्यसि संशयं। स्वल्पं कालं मया सार्द्धं भुंक्ष्व भोगान् सुदुर्लभान्। ब्राह्मण उ॰। न भोगार्थाय विप्राणां शस्यते हि वरूथिनी। इह क्लेशाय विप्राणां चे
ष्टा प्रेत्य फलप्रदाः। वरूथिन्यु॰। संतोषं मृयमाणाया मम मा हत्वा परत्र ते। पुण्यस्येव फलं भावि भोगाश्चाप्यत्र जन्मनि। एवं च द्वयमप्येतत्तवोप
चयकारकं। प्रत्याख्याता त्वहं मृत्युं त्वं च पापमवाप्स्यसि। ब्राह्मण उ॰। परस्त्रियं नाभिलषेदित्यूचुर्गुरवो मम। तेन त्वां नाभिवांछामि कामं विलप शु
ष्य वा। मार्कंडेय उ॰। इत्युक्त्वा स महाभागः स्पृष्ट्वापः प्रयतः शुचिः। शादेहं प्रणिपत्याग्निं गार्हपत्यमथांशुना। भगवान् गार्हपत्याग्ने योनिस्त्वमसि कर्म
णां। त्वत्त आहवनीयोग्निर्दक्षिणाग्निश्च नान्यतः। एवं त्वत्तो भवंत्येते तथेन सत्येन वै जगत्। तथाहमद्य स्वं गेहं पश्येहं सति भास्करे। यथा वेदोदितं
कर्म स्वकाले नाश्रितं मया। तेन सत्येन पश्येयं गृहस्थो ह्य दिवाकरं। यथा न परदारेषु परद्रव्ये च मे मतिः। कदाचित्साभिलाषाभूत्तथैतत्सिद्धये स्तु मे
॥७९॥ इति श्रीमार्कंडेयपुराणे स्वारोचिषे॥ ॥एवं तु वदतस्तस्य द्विजपुत्रस्य पावकः। गार्हपत्यः शरीरेऽस्य संनिधानमथाकरोत्। तेन चाधिष्ठितः
सोथ प्रभामंडलमध्यगः। व्यदीपयत तं देशं मूर्त्तिमानिव हव्यवाट्। तस्याश्च सुतरां तत्र तादृक्रूपे द्विजन्मनि। अनुरागोऽभवद्विप्र पश्यंत्या देवयोषि

मार्कं०
८१

तः॥ ततः सोधिष्ठितस्तेन हव्यवाहेन तत्क्षणात्। यथा पूर्वं तथा गंतुं प्रवृत्तो द्विजनंदनः॥ स जगामतुरायुक्तस्तया सास्त्रं निरीक्षितः॥ आदृष्टिपातात्तन्वं-
ग्या निःश्वासाकंपिकंधरं। ततः क्षणेनैव तदा निजं गेहमुपेत्य सः॥ यथा प्रोक्ता द्विजश्रेष्ठश्चकार सकलाः क्रियाः॥ अथ सा चारुसर्वांगी तत्रासक्तात्ममान-
सा॥ निःश्वासपरमा निन्ये दिनशेषं तथा निशां॥ निःश्वसत्य नवद्यांगी तत्रासक्ता हा हेति वदती मुहुः॥ मंदभाग्यमथात्मानं निनिंद मदिरेक्षणा॥ न विहा-
रे न चाहारे रमणीये न चावने। न कंदरेषु शैलानां सा बबंध तथा रतिं। चकार रममाणं च चक्रवाकयुगे स्पृहां॥ मुक्ता तेन वरारोहा निनिंद निजयौ-
वनं॥ का गताहमिमं शैलं दुष्टदैवबलात्कृता॥ क्व नु प्राप्तः समे दृष्टेर्गोचरं तादृशो नरः॥ यद्यद्य स महाभागो न मया संगमेष्यति। तत्कामाग्निरवश्यं
मां क्षमयिष्यति दुःसहं। रमणीयमभूत् यत्तत्पुंस्कोकिलनिनादितं। तेन दीनं तदेवैतत् दहतीवाद्य मां वनं। इत्थं सा मदनाविष्टा जगाद मुनिस-
त्तम। ववृधे च तदा रागस्तस्यास्तस्मिन् प्रतिक्षणं। कलिर्नाम्ना तु गंधर्वः सानुरागो निराकृतिः। तया पूर्वमभूत्सोथ तदवस्थां ददर्श तां॥ स चिंतयामा-
स तदा किं त्वेषा गजगामिनी॥ निःश्वासपरग्लाना गिरावत्र वरूथिनी॥ मुनिशाप कृता किं तु केन चिद्वा वमानिता। बाष्पवारिपरिक्लिष्टमियं ध-
त्ते यतो मुखं॥ ततः स दध्यौ सुचिरं तमर्थं कौतुकात्कलिः। ज्ञातवांश्च प्रभावेन समाधेश्च यथा तथा॥ पुनः सा चिंतयामास तद्विज्ञाय मुनेः कलिः॥ राम
ममो मया दित्तं साधुभाग्ये रतस्सुराकृतेः। मयैषा सानुरागेण बहुशः प्रार्थिता सती॥ निराकृतवती सेयं अद्य प्राप्या भविष्यति। मानुषे सा- ८१

नुरागेयं यत्र तद्रूपधारिणी॥ रंस्यते मय्यसंदिग्धं किं कालेन करोमि तत्॥ मार्कंडेय उवाच। आत्मप्रभावेन ततस्तस्य रूपे द्विजन्मनः। कृत्वा च चारय-
त्रास्ते निषण्णा सा वरूथिनी॥ सा तं दृष्ट्वा वरारोहा किंचिदुत्फुल्ललोचना। समेत्य प्राह तन्वंगी प्रसीदेति पुनः पुनः॥ त्वया सक्ता न संदेहः परित्यजामि
जीवितं। तवाधर्मः कष्टतरः क्रियालोपाद्भविष्यति। मया समेत्य रम्येऽस्मिन् महामंदरकंदरे। मत्परित्राणजं कर्म अवश्यं प्रतिपत्स्यसे॥ आयुषश्चा-
वशेषो मे ध्रुवमस्ति महामते। निवृत्तस्तेन नूनं त्वं हृदयाह्लादकारकः॥ कलिरुवाच। किं करोमि क्रियाहानिर्भवत्यत्र न संशयः। त्वमप्येवं विधं
वाक्यं ब्रवीषि तनुमध्यमे॥ तदहं संकटं प्राप्तो यद्ब्रवीषि करोमि तत्। समये संगमो मेस्याद्भवत्या सह नान्यथा॥ वरूथिन्युवाच। प्रसीद यद्ब्रवीषि त्वं
तत्करोमि न ते मृषा॥ ब्रवीषि तद्वदावश्यं यत्ते कार्यं मयाधुना॥ कलिरु०। नात्मसंभोगसमये दृष्टव्योहं त्वयाऽबले॥ निमिमीलिताक्ष्याः संसर्ग-
स्तवस्तात्तु मया सह॥ वरूथिन्यु०। एवं भवतु भद्रं ते यथेच्छसि तथास्तु तत्। मया सर्वप्रकारं हि वशेस्थेयं तवाधुना॥ श्रीमार्कंडेय उ०। ततः स हतया
सोथ रराम गिरिसानुषु॥ फुल्लकाननहृद्येषु रम्येषु सरस्सु वा। कंदरेषु च शैलानां निम्नगापुलिनेषु च॥ मनोरम्येषु तथान्येषु देशेषु मुदिता द्विज। व-
ह्निना वेष्टितस्यासीद्यद्रूपं तस्य तत्र सा। अचिंतयत् भोगकाले निमीलितविलोचना॥ तत्कालेन च सा गर्भमवाप मुनिसत्तम। गंधर्ववीर्यतो रूपं
चिंतनाच्च द्विजन्मनः॥ तां गर्भधारिणीं सोपि सांत्वयित्वा वरूथिनीं॥ विप्ररूपधरो यातस्तया प्रीत्या विसर्जितः॥ ततो जज्ञे स द्युतिमान् ज्वलन्निव दिशो

मार्कं· वसुः।स्वारोचिषिर्यथा सूर्यो भासयन्सकला दिशः।स्वारोचिर्भिर्यतो भाति भास्वान्।निवसन्बालकः।ततः स्वारोचिरित्येव नाम्ना ख्यातो बभूव सः।ववृधे स
८८ महाभागो वयसानुदिनं तथा।गुणैर्वैश्रवणो यथा बालः कलाभिः शशलांछनः।स जग्राह धनुर्वेदं विद्याश्च सुमनाः मनाः।प्राप्तवांश्चाचिरेणैव तदा यौवन
गोचरं।मंदराद्रौ कदाचित्तु विसरन्नश्वारूढ विवेष्टितं।ददर्शैकां तदा कन्यां गिरिप्रस्थे भयातुरां।त्रायस्वेति निरीक्ष्यैनं सा तदा वाक्यमब्रवीत्।मा भैषीरिति
स प्राह भयविप्लुतलोचनां।किमेतदिति तेनोक्ता धीरवाक्यं महात्मना।ततः सा कथयामास श्वासोत्क्षेपोल्लुताक्षरं।कन्योवाच।अहमिंदीवरा
क्षस्य सुता विद्याधरस्य वै।नाम्ना मनोरमा ख्याता सुतायां मरुधन्वनः।मंदार विद्याधरजा सखी मम विभावरी।कलावती चाप्यपरा सुता पारस्य वै
मुनेः।ताभ्यामहं सहायाता कैलासवनमुत्तमं।तत्र दृष्टो मुनिः कश्चित्तपसातिकृशाकृतिः।क्षुत्क्षामकंठो निस्तेजा दूरायातास्थितारकः।मया वहसि
तः क्रुद्धः स तदा मां स सापयहा।क्षमः क्षामस्वरं किंचित्कंपिताधरपल्लवं।त्वया वहसितो यस्मादनार्ये दुष्टतापसि।तस्मात्त्वामचिरेणैव राक्षसोऽपहरि
ष्यति।दत्ते शापे मत्सखीभ्यां स तु निर्भर्त्सितो मुनिः।धिक्ते ब्राह्मण्यमक्षांत्या हतं ते निर्विवलं तपः।अमर्षेणैव शुष्कोऽसि तपसा।नातिकृशितः क्षांत्यास
रं वै ब्राह्मण्यं क्रोधसंयमनं तपः।एतत्श्रुत्वा ददौ शापं तयोरप्यमितद्युतिः।एकस्याः कुष्ठमप्यमेभाव्यन्यस्यास्तु क्षयः।तयोस्तथैव तज्जातं यथोक्तं ते राम
न तत्क्षणात्।मामप्येतन्महद्रक्षः सदोषो तिपदानुगं।नष्टेणेषि महानादं तस्य दूरेऽपि नर्दनः।तृतीयमद्य दिवसं यन्मे पृष्ठं न मुंचति।अस्त्रग्रामस्य ८८

सर्वस्य हृदयज्ञाहमद्य ते।तत्प्रयच्छामि मां रक्ष रक्षसोऽस्मान्महाद्युते।प्रादात्स्वायंभुवस्यादौ स्वयं रुद्रः पिनाकधृक्।स्वायंभुवो वशिष्ठाय सिद्धवर्या
य दत्तवान्।तेनापि दत्तमस्मातुः पित्रे चित्रायुधाय वै।प्रददौ दाहिके सोऽपि मस्ति त्रे स्वसुरः स्वयं।मयापि शिक्षितं वीर सकाशात्तात मापि तु।हृदयं सक
लास्त्राणां अशेषरिपुनाशनं।तदिदं गृह्यतां शीघ्रं मशेषास्त्रपरायणं।ततोऽजहि दुरात्मानमेनं राक्षसमागतं।मार्कंडेय उ०।तथेत्युक्ते ततस्तेन वा
र्युपस्पृश्य पतस्य तत।अस्त्राणां हृदयं प्रादात्सरहस्यनिवर्त्तनं।एतस्मिन्नंतरे रक्षस्तत्रा भीषणाकृतिः।नर्दमानं महानादमाजगाम त्वरान्वितं।भया
भिभूता कं त्राणमुपेयिद्रुतमेहि मां।भक्षायकिं चिरेणेति ब्रुवाणं तद्ददर्श सा।स्वारोचिश्चिंतयामास दृष्ट्वा तत्समुपागतं।गृहीत्वा त्येष वन्वः सत्यं तस्या
स्त्रितिमहामुने।जग्राह समुपेत्यैनां त्वरयासोपि राक्षसः।त्राहि त्राहीति करुणं विलपंतीं सुमध्यमां।ततः स्वारोचिः सक्रुद्धस्त्रं द्रास्त्रमतिभैरवं।दृष्ट्वा नि
विश्य तद्रक्षो ददर्शानिमिषेक्षणः।हा हाभिभूतः स तदा तामुत्सृज्य निशाचरः।प्रसीद शाम्यतामस्त्रं श्रूयतां चेत्यभाषत।मोक्षितोऽहं त्वया शापान्महा
घोरान्महाद्युते।प्रदत्तमतितीव्रेण ब्रह्ममित्रेण धीमता।उपकारी नाम त्वत्तो महाभागाधिकोऽपरः।येनाहं सुमहाकष्टान्महाशापाद्विमोक्षितः।स्वारोचि
रुवाच।ब्रह्ममित्रेण मुनिना किंनिमित्तं महात्मना।शप्तस्त्वं कीदृशश्चैव शापो वै ते भवत्सुरा।रक्ष उवाच।ब्रह्ममित्रोऽष्टधा भिन्नमायुर्वेदमधीतवान्।
त्रयोदशाधिकारं च प्रगृह्याथ वर्णी द्विजः।अहं चेंदीवराक्षाख्यः ख्यातोऽस्या जनकोऽभवं।विद्याधरपतेः पुत्रो नलनाभस्य षड्गिनः।मयापि याचितः पूर्वं

मार्कं. ब्रह्ममित्रोऽभवन्मुनिः।आयुर्वेदमशेषंमेभगवन्दातुमर्हसि।यद्दातुंबहुशोवीरःप्रश्रयावनतस्यमे।नप्रादात्याचितोविद्यामायुर्वेदात्मिकां
८९ मम।शिष्येभ्योददतस्तस्यमयात्तइतिनिगेनहि।आयुर्वेदात्मिकाविद्यागृहीताभूत्तदामया।गृहीतायांतुविद्यायांमासैरष्टाभिरंतरा।ममाति
हर्षादभवत्हासोऽतीवपुनःपुनः।प्रत्यभिज्ञायमांहासान्मुनिःकोपसमन्वितः।विकंपिकंधरःप्राहमामिदंपरुषाक्षरं।राक्षसेनेवयस्मा
त्त्वयाऽदृश्येनदुर्मते।हृताविद्याऽवहासश्चमामविज्ञायवैकृतः।ततस्त्वंशापनिर्दग्धोराक्षसोऽतिभयंकरः।भविष्यतिनसंदेहःसप्तरा
त्रेणादारुणः।इत्युक्ते प्रणिपाताद्यैरुपचारैःप्रसादितः।समामाहपुनर्विप्रस्तत्क्षणान्मृदुमानसः।यन्मयोक्तमवश्यंतत्भाविगंधर्वना
न्यथा।किंतुत्वंराक्षसोभूत्वापुनस्त्वंप्राप्स्यसिवपुः।तथैवस्वमधिष्ठानंलोकेगंधर्वसंज्ञितो।सोहंत्वयामहाभागमोक्षितोऽस्मात्सुदारुणात्।
निशाचरत्वात्तयाहीरतेनमेप्रार्थनांकुरु।इमांतेतनयांभार्यांप्रयच्छामिप्रतीच्छतां।आयुर्वेदश्चसकलःस्वधीतोयंमयाततःमुनेःसका
शात्संप्राप्तंगृहीष्वेतन्महामते।श्रीमार्कंडेयउ०इत्युक्त्वाप्रददेविद्यांसतुदिव्यांवरोज्वलः।स्त्रीभूषणधरोदिव्यंपौराणंवपुरास्थितः।दत्वा
विद्यांततःकन्यांसदातुमुपचक्रमे।तमाहसातदाकन्याजनेनारंस्वरूपिणं।अनुरागोममाप्यत्रतातातीवमहात्मनि।दर्शनादेवसंजातोवि राम
शेषेणोपकारिणी।किंतुमेसासखीसाचमत्कृतेदुःखपीडिता।अतोनाभिलषेहोभान्भोक्तुमेतेनवै[illegible]समं।पुरुषेरपिनोकर्तुमिथ्यंशक्यान्तृ ८९

शंसता।स्वभावकठिनैरीदृक्कथंयेपितकरिष्यत।साहंयथातेदुःखार्त्तेमत्कृतेकन्यकेपितः।तथास्यास्यामितदुःखसुमहाऽनलतापिना।स्वारोचि
रुःआयुर्वेदप्रसादेनतेकरिष्येपुनर्नवे।सौख्यंतवमहाशोकंसमुत्सृज्यस्तुमध्यमे।मार्कंडेयउ०।ततःपित्रास्वयंदत्तांतांकन्यांसविधानतः।उपयेमे
गिरौतस्मिन्स्वारोचिश्चारुलोचनां।दत्वातुतांतवाकन्यांअभिसांत्व्यचभामिनीं।जगामदिव्ययागत्यागंधर्वःस्वपुरंततः।सचापिसहितस्तन्व्यातदु
द्यानंतदाययौ।कन्यकायुगलंयत्रतच्छायोत्स्यगदातुरं।ततस्तयोःसतत्त्वज्ञोरोगघ्नैरौषधैरसैः।चकारनीरुजौदेहौस्वरोचिरपराजितः।ततोति
शोभनेकन्येविमुक्तेव्याधिनाशुभे।कोस्यायेतितउद्भागउत्क्रांतेतंमहीधरं।।८४।।इतिश्रीमार्कंडेयपुराणेस्वारोचिषेमन्वंतरे।श्रीमार्कंडेयउ०एवंवि
मुक्तरोगातुकन्यकातंमुदान्विता।स्वारोचिषमुवाचेदंश्रूणुष्वचनंप्रभो।मंदारविद्याधरजानाम्नाख्याताविभावरी।उपकारिणंमहात्मानंप्रयच्छामि
प्रतीच्छमां।विद्यांचतुभ्यंदास्यामिसर्वभूतरुतानिवै।यथाभिव्यक्तिमेष्यंतिप्रसादप्रवणोभव।मार्कंडेयउ०एवमस्त्वितितेनोक्तेधर्मज्ञेनस्वरोचिषा।द्वि
तीयासातदाकन्यावाक्यमेवाक्यमेतदभाषत।कुमारब्रह्मचर्य्यासीत्पारोनामपितामम।ब्रह्मर्षिःसुमहातेजावेदवेदांगपारगः।तस्यपुंस्कोकिलाला
पारमणीयमधौपुरा।आजगामाप्सराभ्यासंप्रख्यातापुंजिकस्थला।कामवैक्लव्यतांनीतःसतयामुनिसत्तमः।तत्संयोगेहमुत्पन्नातस्यांतत्रमहाचले।
विहायसिगतासाचमामस्मिन्विजनेवने।बालामेकांमहीपृष्ठेव्यालश्वापदसंकुले।ततःकलाभिःसोमस्यवर्द्धयंतीरहस्यये।आप्याय्यमानाहंरहोवृद्धिं

यातास्मिसत्तम।ततःकलावतीत्येवंतन्ममनाममहात्मना।देवारिणालिःसुप्तस्तेनमेघातितःपिता।ततोहमपिनिर्वेदादात्मव्यापादनोद्यता।निवारि
शंभुपत्न्यासत्यासत्यप्रतिश्रवा।माशुचःशुभ्रुभर्त्तातिमहाभागोभविष्यति।स्वरोचिर्नामपुत्रस्तेमनुस्तस्यभविष्यति।आज्ञांचनिधयःसर्वेकरिष्यं
तितवादृताः।यथाभिलषितंवित्तंप्रदास्यंतिचतेशुभ्रे।यस्यावहेप्रभावेनविद्यायास्तांगृहाणमे।पद्मिनीनामविद्येयंमहापद्माभिपूजिता।इत्याह
सादक्षसुतासतीसत्यपरायणा।स्वरोचिस्त्वंश्चवंदेवीनान्यथासावदिष्यति।साहंप्राणप्रदायाद्यतांविद्यांस्वंतथावपुः।प्रयच्छामिप्रतीच्छत्वंप्रसा
दसुमुखोभव।मार्कंडेयउवाच।एवमस्त्वितितामाहसतुकन्यांकलावतीं।विभावर्य्याःस्वरोचिश्चस्निग्धदृष्ट्यानुमोदितः॥७॥उग्राहचततःपाणी
सतयोरमितद्युतिः।नदत्सुदेवतूर्येषुनृत्यत्स्वप्सरस्सुच॥१८॥इतिमार्कंडेयपुराणेद्वितीयविवाहः॥छ॥मार्कंडेयउवाच।ततःसताभिःसहि
तःपत्नीभिरमितद्युतिः।रराामतस्मिन्शैलेंद्रेरम्यकानननिर्झरे।सर्वभोगोपपन्नानिमधूनिमधुराणिच।निधयःसमुपाजह्रुःपद्मिन्यावश
र्त्तिनः।स्रजोवस्त्राण्यलंकारान्गंधाढ्यमनुलेपनं।आसनान्यतिशुभ्राणिकांचनानियथेच्छया।सौवर्णानिमहाभागकरकान्भाजनानिच।त
थाशय्याश्चविविधादिव्यैरास्तरणैर्युताः।एवंसताभिःसहितोदिव्यगंधादिवासिते।ररामस्वरुचिस्ताभिर्भासितेवरपर्वते।ताश्चापिसहतेनेत्थंलेभिरेमु
दमुत्तमं।रममाणायथास्वर्गेनथातत्रशिलोच्चये।अथहंसीजगादैकाचक्रवाकींजलेसतीं।तस्यतासांचललितैःसंबंधेवस्पृहावती।धन्येयमतिपु

ण्येयंयोयंयौवनगोचरः।दयिताभिःसहैताभिर्भुंक्तेभोगानभीप्सितान्।संतियौवनिनःश्लाघ्यास्तसन्त्योनातिशोभनाः।संगत्यामत्यकाःपत्न्यः
पतयश्चातिशोभनाः।अभीष्टाःकस्यचिद्भार्याभर्त्ताकस्याश्चिदीप्सितः।परस्परानुरागाढ्यंदांपत्यमतिदुर्लभं।धन्योयंदयिताभीष्टएता
श्चास्यातिवल्लभाः।परस्परानुरागोहिधन्यानामेवजायते।एतन्निशम्यवचनेकलहंस्याःसमीरितं।उवाचचक्रवाकीतांनातिविस्मित
मानसा।नायंधन्योयतोलज्जानास्तिस्त्रीसंनिकर्षतः।अन्यास्त्रियमयंभुंक्तेनसर्वास्विस्यचमानसं।चित्तानुरागएकस्मिन्नधिष्ठाने
यतःसखि।ततोहप्रीतिमानेषभार्यासुभविताकथं।एतानदयिताःपत्युर्नैतासांदयितःपतिः।विनोदमात्रमेवैतायथापरिजनोऽपरः।एता
सांयदीष्टोयंतत्काप्राणान्नमुंचति।आलिंगत्यपराकांतायातिचैकांतमन्यया।विद्याप्रदानमूल्येनक्रीताह्येतास्तुभृत्यवत्।प्रवर्त्ततेनहिप्रे
मस्तमंबद्धीषुकुत्रचित्।कलहंसिपतिर्धन्योममधन्याहमेवच।यस्यैकस्यांस्थिरंचित्तंयस्याश्चैकत्रसंस्थितं।श्रीमार्कंडेयउ।सर्वभूत
रुतज्ञोसौस्वारोचिरपराजितः।निशम्यलज्जितोदध्यौसत्यमेवहिनानृतं।ततोवर्षशतेयातेरममाणंमहागिरौ।रममाणंसमंताभिर्ददृ
शपुरतोमृगं।सुस्निग्धपीनावयवंमृगीहृदयहारिणं।वासिताभिःस्वरूभिर्मृगीभिःपरिवारितं।आकृष्टघ्राणपुटकैर्जिघ्रतीस्तास्ततोमृगीः।
उवाचचमृगोऽलंबोलज्जात्यागेनगम्यतां।नाहंस्वरोचिस्तच्छीलोनचैवाहंसुलोचनाः।निर्लज्जाबहवःसंतितादृशास्तत्रगच्छत।एकाह्यनेक

नुगता यथा हास्यास्यदंजनो।अनेकाभिस्तथैवैको भोगदृष्ट्या निरीक्षितं।अस्य धर्मक्रिया हानिरहन्यहनि जायते।त्वं तोर्थी भार्यया चास्य कामास
क्तस्तथा परः।यस्ता दृशोन्यस्तच्छीलः परलोकपराङ्मुख।तं कामयत भद्रं वो नाहं तुल्यः स्वरोचिषा।मार्कंडेय उवा।एवं निरस्यमानास्ता हरिणेन मृगां
गणाः।श्रुत्वा स्वरोचिरात्मानं मेने स पतितं यथा।त्यागे च कार च मनः सतां सोम्मुनिसत्तम।चक्रवाकीमृगप्रोक्तानिजचर्यां जुगुप्सितः।समेत्य ताभि
र्भूयः सतुईमानमनो भवः।अक्षिप्तनिर्वेदकथो रेमे वर्षशतानि वा।किंतु धर्मविरोधेन कुर्वन्धर्माश्रिताः क्रियाः।बुभुजे स्वरोचिर्विविषयान्सहिताभिरु
दारधीः।ततस्तु जज्ञिरे तस्य त्रयः पुत्राः स्वरोचिषः।विजयो मेरुनंदश्च प्रभासश्च महाबलः।मनोरमाप्यविजयमवायेंदीवरात्मजा।विभावरी मेरुनंदं प्र
भासं च कलावती।पद्मिनी नाम या विद्या सर्वभोगोपपादिका।स तेषां तत्प्रभावेन पिता चक्रे पुरत्रयं।प्राच्यां तु विजयं नाम कामरूपे नगोत्तमे।विजया
य सुताया दौ स ददौ पुरमुत्तमं।उदीच्यां मेरुनंदस्य पुरीं नंदवतीमिति।ख्यातां चकार प्रोत्तुंगवप्रप्राकारमालिनीं।कलावतीसुतस्यापि प्रभासस्य नि
वेशितं।पुरं तालुमितिख्यातं दक्षिणापथमाश्रितं।एवं निवेश्य पुत्रान्स पुरेषु पुरुषर्षभः।रेमे ताभिः समं विप्र मनोज्ञास्वतिभूमिषु।एकदा तु गतोरण्य
मृगव्यां स धनुर्द्धरः।च कर्ष धनुरालोक्य वराहमतिदूरगं।अथाह काचिदभ्येत्य तं तदा हरिणांगना।मय्येष पात्यतां बाणः प्रसीदेति पुनः पुनः।किमनेन राम
न हतेनाद्य ममाशु विनिपातय।त्वया निपातितो बाणो मां दुःखान्मोचयिष्यति।स्वरोचिरु॰।न ते शरीरं सरुजमस्माभिरिह लक्ष्यते।किंतु तत्कारणं येन प्राणा ९१

स्त्वं हातुमिच्छसि।मृग्युवाच।अन्यासक्तहृदये यत्र चेतः हृतास्परं।मम तेन विना मृत्युरोषधं किमिहाऽपरं।स्वरोचिरु॰।कस्त्वं नाभिलषद्गीरसानु
रागास्ति कुत्र वा।यत्प्राप्तौ निजान्प्राणान्परित्यक्तुं व्यवस्यति।मृग्युवाच।त्वामेवेच्छामि भद्रं ते त्वया मेऽपहृतं मनः।तूर्णोम्यहमतो मृत्युमपि बाणेनि
पात्यतां।स्वारोचिरु॰।त्वं मृगी चपलापांगी नररूपधरा वयं।कथं त्वया समं योगो मद्विधस्य भविष्यति।मृग्युवाच।यदि सा पद्मवे चित्तं मयि ते मां परि
ष्वज।एतावताहं भवता भविष्याम्यतिमानिता।श्रीमार्कंडेय उ॰।आलिंगत ततस्तां स स्वारोचिर्हरिणांगनां।तेन चालिंगिता सद्यः साभूद्दिव्यवपुर्द्ध
रा।ततः स विस्मयाविष्टः का त्वमित्यभ्यभाषत।सा चास्मै कथयामास प्रेम्णाल्लज्जालसाक्षरं।अहमभ्यर्थिता देवैः काननस्यास्य देवता।उत्पादनी
यो हि मनुस्त्वया मयि महामते।प्रीतिमत्यां मयि सुतं भूर्लोकपरिपालकं।त्वमुत्पादय देवानां तामहं वचनाद्दे।मार्कंडेय उ॰।ततः स तस्यां तनयं
सर्वलक्षणलक्षितं।तेजस्विनं स्वमात्मानं जनयामास तत्क्षणात्।जातमात्रस्य तस्याथ देववाद्यानि निस्वनः।जगुर्गंधर्वपतयो ननृतुश्चाप्स
रोगणाः।शिषिचुर्भूतलं मेघा नीरजस्कं स्ववारिणा।पवनः पुष्पवर्षं च मुमोचाथ समंततः।तस्य तेजः समालोक्य नाम चक्रे पिता स्वयं।द्युतिमानि
ति तेनास्य तेजसा भासिता दिशः।स बालो द्युतिमान्नाम महाबलपराक्रमः।स्वरोचिषसुतो यस्मात्तस्मात्स्वारोचिषोभवत्।स चापि विपिनेरण्य
कदाचिद्गिरिनिर्झरे।स्वरोचिर्ददृशे हंसं निजपत्न्या समन्वितं।उवाच स तदा हंसीं साभिलाषां पुनः पुनः।उपसंहृयतात्मा।चिरं ते क्रीडितं मया।किंस
मा

मार्कं० ९२ र्वकालंभोगैस्तैरासन्नंवरमंवयः।परित्यागस्यकालोमेतवापिचजलेचरि।हंसुवाच।अकालःकोहिभोगानांसर्वंभोगात्मकंजगत्।यज्ञाःक्रियंते
भोगार्थंब्राह्मणैःसंयतात्मभिः।दृष्टादृष्टास्तथाभोगान्वांछमानाविवेकिनः।दानानिचप्रयच्छंतिपूर्वधर्मांश्चकुर्वते।सत्वंकिंनेच्छसेभोगान्भोगाः
श्रेष्ठंफलंनृणां।विवेकिनातिरश्चाऽप्यकिंपुनःसंवृतात्मनां।हंसउवाच।भोगेकासक्तचित्तानांपरमार्थान्वितामतिः।भविष्यतिकदासंगमुपेतानां
चबंधुषु।पुत्रमित्रकलत्रेषुसक्ताःसीदंतिजंतवः।सरःपंकार्णवेमग्नाजीर्णावनगजाइव।किंनपश्यसिवाभद्देजातसंगंस्वरोचिषं।आबाल्या
त्कामसंसक्तंनिमग्नंस्नेहकर्दमे।यौवनेवीरभार्यासुसांप्रतंपुत्रवर्त्मसु।स्वरोचिषोमनोमग्नमुद्धारंप्राप्स्यतेकुतः।नाहंस्वरोचिस्ततुल्योस्त्री
वश्योवाजलेचरि।विवेकवान्भोगेभ्योविनिवृत्तोस्मिसांप्रतं।श्रीमार्कंडेयउ।स्वरोचिरेतदाकर्ण्यजातोद्वेगःस्वगोचरे।आदायभार्यांतपसेययौ
वन्यत्तपोवनं।तत्रतप्त्वातपोघोरंसहनाभिरुदारधीः।जगामलोकानमलान्निर्दूतानिलकल्मषः।९८।।इतिश्रीमार्कंडेयपुराणेस्वरोचिर्नामा
ध्यायः॥ ।।मार्कंडेयउवाच।ततःस्वारोचिषंनामाद्यतिमंतंप्रजापतिः।मनुंचकारभगवान्तस्यमन्वंतरंशृणु।तत्रांतरेतुयेदेवामुनयस्तु
त्सुताश्चये।भूपालाःकौष्टकेयेतान्गदतोमेनिशामय।देवाःपरावतास्तत्रतथैवतुषिताद्विज।स्वारोचिषेंऽतरेचेंद्रोविपश्चिदितिविश्रुतः।ऊ
र्ज्जस्तंबस्तथाप्राणोदत्तोलिऋषभस्तथा।निश्चरश्चार्वरीवांश्चतत्रसप्तर्षयोभवन्।चैत्रकिंपुरुषाद्यास्तुसुतास्तस्यमहात्मनः।सप्तासन्सु राम ९२

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

महावीर्याःपृथिवीपालकाः।तस्यमन्वंतरंयावत्तावत्तैःस्मृतिसंभवैः।भुंक्तेयमवनिःसर्वाद्वितीयंचैतदंतरं।स्वारोचिषस्यचरितंजन्मस्वारोचिषस्य
च।निशम्यमुच्यतेपापैःश्रद्दधानोहिमानवः।७१ ।इतिश्रीमार्कंडेयपुराणेस्वारोचिषंमन्वंतरंसमाप्तं।क्रौष्टुकिरु०।भगवन्कथितंसर्वंविस्त
रेणत्वयामम।स्वरोचिषोऽद्भुतंकर्मजन्मस्वारोचिषस्यतु।यातुसापद्मिनीनामविद्याभोगोपपादिका।तत्संश्रयायेनिधयस्तन्मेविस्तरतोवद।
अष्टौयेनिधयस्तेषांस्वरूपंद्रव्यसंस्थितिं।भवताभिहितंसम्यक्श्रोतुमिच्छाम्यहंगुरो।श्रीमार्कंडेयउ०।पद्मिनीनामयाविद्यालक्ष्मीस्तस्या
धिदेवतं।तदाधाराश्चनिधयस्तान्मेनिगदतःशृणु।तत्रपद्ममहापद्मौतथामकरकच्छपौ।मुकुंदनंदौनीलश्चशंखश्चैवाष्टमोनिधिः।
सत्यांऋध्यांभवंत्येतेसिद्धिस्तेषांहिजायते।एभिरालोकितंवित्तंमनुष्यस्यमहामुने।यादृक्स्वरूपोभवतितन्मेनिशादतःशृणु।पद्मोनाम
निधिःपूर्वंसयस्यभवतिद्विज।सतस्यतत्सुतानांचतत्पौत्राणांचनान्यगः।दाक्षिण्यसारःपुरुषस्तेनचाधिष्ठितोभवेत्।सत्वाधारोमहा
भोगोयतोसौसात्विकोनिधिः।सुवर्णरौप्यताम्रादिधातूनांचपरिग्रहं।समौक्तिकप्रवालादेस्तेषांचक्रयविक्रयं।ददातियोगशीलेभ्य
स्तेषामावसथंतथा।सकारयतितच्छीलःस्वयमेवचजायते।तत्प्रसूतास्तथाशीलाःपुत्रपौत्रक्रमेणच।पूर्वर्द्धिमात्रसंप्राप्तोपुर
षांश्चनमुंचति।नामसोमकरोनामनिधिस्तेनावलोकितः।पुरुषोहितमःप्रायःसुशीलोपिहिजायते।बाणखड्गर्ष्टिधनुषांचर्मणांचपरिग्र

DR. BHAU DAJI MEMORIAL
डाक्टर भाऊ दाजी स्मारक

हः। दंशनानांच कुरुते याति मैत्रीं च राजभिः। ददाति शौर्यवृत्तीनां भूभुजां ये च तत्क्रियाः। क्रयविक्रयं च शस्त्राणां न चान्यत्प्रीतिरेव च॥ एकस्यैव भव
त्येष नरस्य न सुतानुगः। द्रव्यार्थमुद्यतो नाशं संग्रामे चापि संव्रजेत्। कच्छपाख्यो निधिर्योन्यो नरस्तेनावलोकितः। तमःप्रधानो भवति यतो सौता
मसो निधिः। व्यवहारन्न शिष्टस्तु पुण्यजातं करोति च। कर्माताश्च खिलांश्चैव न विश्वसति कस्यचित्। समस्तानि यथांगानि गृह्यास्ते हि कच्छपः।
तथा वितत्य रत्नानि तिष्ठत्याकुलमानसः। न ददाति न वा भुंक्ते तद्विनाशभयाकुलः। निधानमुर्व्यां कुरुते निधिः सोप्येकपूरुषः। रजोगुणमयश्चा
न्यो मुकुंदो नाम यो निधिः। नरोऽवलोकितस्तेन तद्गुणो भवति द्विज। वीणावेणुमृदंगादि गीतादिकपरिग्रहं। करोति गायतां चित्तं नृत्यतां च प्रयच्छति।
वंदिनामथ सूतानां विटानां लास्यपाठिनां। ददात्यहर्निशं भोगान् भुंक्ते तैस्तैः समं द्विज। कुलटासु रतिश्चास्य भवत्यन्यैश्च तद्विधैः। प्रयाति संगमे
कं च सन्निधिर्भजते नरं। रजःसत्वमयश्चान्यो नंदो नाम महानिधिः। उपैति स्तंभमधिकं नरस्तेनावलोकितः। समस्तधातुरत्नानां पण्यधान्यादिकस्य
च। परिग्रहं करोत्येष तथैव क्रयविक्रयौ। आधारः स्वजनानां च आगताभ्यागतस्य च। सहते नावमानोक्तिं स्वल्पामपि महामुने। स्तूयमानश्च मह
तीं प्रीतिं बध्नाति प्रयच्छति। यं यमिच्छति वै कामं मृदुत्वमुपयाति च। बह्व्यो भार्या भवंत्यस्य सुप्रजाश्चातिशोभनाः। एतये सप्तवनराश्निधिर्नंदोऽनुवर्त्तते। राम
प्रवर्द्धमानोऽनु नरमष्टभागेन सप्तमात्। दीर्घायुस्त्वं च सर्वेषां पुरुषाणां प्रयच्छति। बंधूनामेव भरणं ये च दूरादुपागताः। तेषां करोति वै नंदः परलो ९३

के पि चेष्टते। भवत्यस्य न च स्नेहः सहवासिषु जायते। पूर्वमित्रेषु शैथिल्यं प्रीतिमन्यैः करोति च। यथैव सत्वरजसी यो बिभर्त्ति महानिधिः। निधिः
स नील संज्ञस्तत्संगी नरस्तच्छीलभाग्भवेत्। वस्त्रकार्पासधान्यादि फलपुष्पपरिग्रहं। मुक्ताविद्रुमशंखानां शुक्त्यादीनां तथा मुने। काष्ठादीनां
करोत्येष यच्चान्यज्जलसंभवं। क्रयविक्रयमप्येषां नान्यत्र रमते मनः। तडागान् पुष्करिण्यश्च तथारामान् करोति च। बंधं च सरितां वृक्षान्
तथा रोपयते नरः। अनुलेपनपुष्पादि भोगभुक् चापि जायते। त्रिपौरुषश्चापि निधिर्नीलो नामेति विश्रुतः। रजस्तमोमयश्चान्यः शंख
संज्ञो हि यो निधिः। तेनापि नीयते विप्र तद्गुणत्वं निधीश्वरः। एकस्यैव भवत्येष नरं नान्यमुपैति च। यस्य शंखनिधिस्तस्य स्वरूपं क्रोष्टुके शृ
णु। एक एवात्मना मृष्टमन्नं भुंक्ते तथाम्बरं। कदन्नभुक् परिजनो न च शोभनवस्त्रभृत्। न ददाति सुहृद्भार्यासुतपौत्रस्नुषादिषु। स्वपो
षणपरः शंखी नरो भवति सर्वदा। इत्येते निधयः ख्याता नराणामर्थदेवताः। मिश्रावलोकिता मिश्राः स्वभावफलदायिनः। यथाख्यातस्व
भावस्तु भवत्येकविलोकनात्। सर्वेषामधिपत्ये च श्रीरेवाद्य द्विज पद्मिनी॥ ४३ ॥ इति श्रीमार्कंडेयपुराणे निधिलक्षणं नाम॥ ॥क्रोष्टुकिरु॰।
विस्तरात्कथितं ब्रह्मन् मम स्वारोचिषं त्वया॥ मन्वंतरं तथैवाष्टौ ये प्रष्टा निधयो मया। स्वायंभुवं पूर्वमेव मन्वंतरमुदाहृतं। स्वारोचिषं द्विती
यं च नानैश्वर्यसमन्वितं। मन्वंतरं तृतीयं मे कथयोत्तमसंज्ञिकं। मार्कंडेय उ॰। उत्तानपदः पुत्रो भूदुत्तमो नाम नामतः। सुरुच्यास्तनयः ख्यातो

महाबलपराक्रमः।सधर्मात्मामहात्माचपराक्रमधनोनृपः।अतीयसर्वभूतानिवभौमेरुरिवापरः।समःशत्रौचमित्रेचदारपुत्रेषुधर्मवित्।
दुष्टादुष्टेषुचयमवत्सोमवञ्चमहामुने।वाभ्रव्यांबहुलानामउपयेमेसधर्मवित्।उत्तानपादतनयःशची मिंद्रइवोत्तमः।तस्यामतीवतस्यासीद्द्विज
वर्य्यमनःसदा।स्त्रेवतशशिनोयद्वतरोहिण्यांनिहितास्पदं।अन्यप्रयोजनासक्तिंउपैतिनहितन्मनाः।स्वप्नेचैवतदालंविमनोभूत्तस्यभूभृतः।सतु
तस्याःसुचार्व्वंग्याःदर्शदेवपार्थिवः।ददाहलोचनेगात्रेगात्रस्पर्शश्चतन्मयः।श्रोत्रोद्वेगकरंवाक्यंप्रियमप्यवनीपतेः।तस्यामभूत्सचात्मानंमेनेप
रिभवास्पदं।अवमेनेस्त्रजंदत्तांशुभान्याभरणानिच।उत्तस्यावईपीतेवपिवतोस्यसुरासवं।अश्नतांचनरेंद्रेणलक्षणमात्रंकरेधृता।बुभुजेसत्त्व
वांस्वक्षेद्विजनातिमुदान्विता।एवंतस्यानुकूलस्यनानुकूलामहात्मनः।प्रततरमत्यर्थंचक्रेरागंमहीभृतः।अथपानगतोभूयःकदाचिन्नाममिंद्
तां।सुराभृतंपानपात्रंग्राहयामाससादरं।पश्यतांभूमिपालानांवारमुख्यासमन्विताः।उपगीयमानोमधुरैर्गीतगायनतत्परैः।सातुनेच्छतित
त्पात्रंमादातुंतत्पराङ्मुखी।समक्षमवनीशानांततःक्रुद्धःसपार्थिवः।उवाचद्वास्थमाहूयनिःश्वसन्नुरगोयथा।।निराकृतस्तयादेव्याप्रिययापरि
रप्रियः।द्वास्थैनांदुष्टहृदयांआदायविजनेवने।परित्यजाशुनैतत्तेविचार्य्यंवचनंमम।।इतिश्रीमार्कंडेयपुराणे।। ।।मार्कंडेयउ॰।ततोनृपस्यवच
नमविचार्य्यमवेक्ष्यसः।द्वास्थस्तत्याजतांसुभ्रूमारोप्यस्यंदनेवने।साचतंविपिनेत्यागंकृतेतेनमहीभृता।अपश्यमानातेमेनेपरंकृतमनुग्रहं।सो

पितत्रानुरागार्त्तिर्दुह्यमानात्ममानसः।औत्तानपादिर्भूपालोनान्यांभार्य्यामविंदत।संस्मारतांवार्त्तांगीं।अहर्निशमनिर्वृतः।चकारचनिजंराज्यं
प्रजाधर्मेणपालयन्।प्रजाःपालयतस्तस्यपितुःपुत्रानिवौरसान्।आगत्यब्राह्मणःकश्चिदिदमाहार्त्तमानसः।ब्राह्मणउ।महाराजभृशार्त्तो
स्मिश्रूयतांगदतोमम।नृणामार्त्तिपरित्राणमन्यतोननराधिपात्।ममभार्याप्रसुप्तस्यकेनाप्यपहृतानिशि।गृहद्वारमनुद्घाट्यतांममने
तुमर्हसि।राजोवाच।नवेत्सिकेनापिहृताकवानीताचसाद्विज।यतिष्येनिग्रहेकस्यकुतोवाप्यानयामितां।ब्राह्मणउ॰।तथैवस्थगित
द्वारिप्रसुप्तस्यगृहेमम।हृताहिभार्यासाकेननैतद्वेत्त्यायतेभवान्।त्वंरक्षितानोनृपतेषड्भागादानवेतनं।धर्मस्यतेननिश्चिंताःस्वपंतिम
नुजानिशि।राजोवाच।नतेदृष्टामयाभार्यायादृग्भूतापिदेहतः।वयश्चमेसमाख्याहिकिंशीलाब्राह्मणीचते।ब्राह्मणउ॰।कठोरनेत्रासा
प्युच्चाह्रस्वगङ्घाकृशानना।विरूपरूपाभूपालानर्निंदामितथापितां।वाग्विभूत्यातिपरुषानसौम्याचातिशीलतः।इत्याख्यातामया
भार्यासाकरालनिरीक्षणा।मनागतीतंभूपालतस्याश्चप्रथमंवयः।ईदृग्रूपाहिमेभार्यासत्यमेतन्मयोदितं।राजोवाच।अलंतेब्राह्मणतया
भार्यामन्यांददामिते।सुखायभार्याकल्याणीदुःखहेतुर्हिताहृशी।अल्याकुरूपताविप्रकारणंशीलमुत्तमं।रूपशीलविहीनायात्याज्या
सान्येनवैहृता।ब्राह्मणउ॰।रक्ष्याभार्य्यामहीपालइतिमेश्रुतिरुत्तमा।भार्यायांरक्ष्यमाणायांप्रजाभवतिरक्षिता।आत्माहिजायतेतस्यांसा

रक्ष्यो ताजनेश्वर।प्रजायांरक्ष्यमाणायांआत्माभवतिरक्षितः।तस्यामरक्ष्यमायांभविताविर्णसंकरः।सपातयेन्महीपालपूर्वान्स्वर्गादधःपितॄन्॥
धर्महानिश्चाप्यनुदिनंभार्य्यस्यभवेन्मम।नित्यक्रियायाविभ्रंशःसतापियतनायमे।तस्यांचपृथिवीपालभवित्रीममसंततिः।तवषड्गामहा
त्रीसाभवित्रीकर्महेतुकी॥तदेतत्तेसमाख्यातंपत्नीसामेहृताप्रभो।तांममानयरक्षायांभवानधिकृतोयतः।श्रीमार्कंडेयउ।सतस्यैतद्वचः
श्रुत्वाविमृश्यचनरेश्वरः।सर्वोपकरणैर्युक्तमारुरोहरथंततः।इतश्चेतश्चतेनासौपरिबभ्राममेदिनीं।ददर्शचमहारण्येतापसाश्रममुत्त
मं।अवतीर्य्यचतत्रासौप्रविश्यददृशेमुनिं।कौशंयांवृष्यांसमासीनंज्वलंतमिवतेजसा।सदृष्ट्वानृपतिंप्राप्तंसमुत्थायत्वरान्वितः।संमा
न्यस्वागतेनैवशिष्यमाहार्घ्यमानय।तमाहशिष्यःशनकैर्दाति पातयेन्महीपालपूर्वान्स्वर्गादध व्योऽर्घोस्यचेन्मुने।तद्राज्ञापयसंचिं
त्यतवाज्ञांहिकरोम्यहं।ततोऽवगतवृत्तांतोभूपतेस्तस्यसद्विजः।संभाषासनदानेनचक्रेस्वागतनात्मवान्।ऋषिरुवाच।किंनिमित्तमिहा
यातोभवान्किंचचिकीर्षसि।उत्तानपादतनयंवेद्मित्वामुत्तमंनृपं।राजोवाच।ब्राह्मणस्यगृहेभार्याकेनाप्यपहृतामुने।अविज्ञातस्वरू
पेणतामन्वेष्टुमिहागतः।पृच्छामियत्तुतन्मेत्वंप्रणतस्यानुकंपया।अभ्यागतस्यात्मगृहंभगवन्वक्तुमर्हसि।ऋषिरुवाच।पृच्छमामवनीपाल
प्रष्टव्यंयदशंकितः।वक्तव्यंचेत्तवमयाकथयिष्यामितत्त्वतः।ऋषिरु।त्वद्दर्शनेनरभसाद्राजन्प्रोयंमयानृप।यदातदाहमेतेनशिष्येणप्रति

बोधितः।एषवेत्तिजगत्सर्वमत्प्रसादादनागतं।तथाहंसमतीतंचवर्त्तमानंचसर्वशः।आलोच्याज्ञापयेत्युक्ते ततोज्ञातंमयापितत्।ततोनरत्नवानर्घं
अर्हंतुभ्यंविधानतः।सत्यंराज्यंस्त्वमर्घार्हःकुलेस्वायंभुवस्यवै।तथापिनार्घयोग्यंत्वांमन्यामोवयमुत्तमं।राजोउ।किंतेकृतंमयाब्रह्मन्ज्ञानादज्ञानतो
पिवा।येनत्वत्तोर्घमर्हामिनाहमभ्यागतश्चिरात्।ऋषिरु।किंविस्मृतंयात्वत्पत्नीत्वयात्यक्तामहावने।परित्यक्तस्तयासार्द्धंत्वयाधर्मोनृपाखिलः।
पक्षेणाकर्मणोहान्याप्रयात्यस्पृश्यतांनरः।किंतुत्रैवार्षिकीयस्यहानिस्तेनित्यकर्मणः।पत्न्यानुकूलयाभाव्यंयथाशीलेपिभर्त्तरि।दुःशीलापितथा
भार्यापोषणीयानरेश्वर।प्रतिकूलापिसापत्नीतस्यविप्रस्ययाहृता।तथापिधर्मकामोसौत्वामुद्योजितवान्नृप।चलतःस्थापयस्यन्यान्स्वधर्मेत्वं
महीपते।त्वांस्वधर्माद्विचलितेकोपरःस्थापयिष्यति।द्विपकंडंगरीयेवाराज्ञिचान्यायवर्त्तिनि।पापकृत्सुचविद्वत्सुनियंताजंतुरत्रकः।श्रीमार्कं
डेयउ।विलक्षःसमहाबाहुरित्युक्तस्तेनधीमता।तथेत्युक्त्वातिपप्रच्छहृतांपत्नींद्विजन्मनः।भगवन्केननीतासापत्नीविप्रस्यकुत्रवा।अतीतानग
तंवेत्तिजगत्सर्वितथ्यंभवान्।ऋषिरु।तांजहाराद्रितनयोबलाकोनामराक्षसः।द्रक्ष्यसेचाद्यतांभूपउत्पलावतकेवने।गच्छसंयोजयाशुत्वंभार्य
यातंद्विजोत्तमं।मापापास्पदतांयातुत्वमिवासौदिनेदिने॥४८॥इतिश्रीमार्कण्डेयपुराणेउत्तमे॥ ॥श्रीमार्कंडेयउ।अथारुरोहस्वरथंप्रणिपत्यस
तंमुनिं।तेनाख्यातंवनंतच्चप्रययावुत्पलावने।यथाख्यातस्वरूपांतुभर्त्राभार्यांद्विजस्यतां।लक्षयंतींददर्शाथश्रीफलानिनरेश्वरः।पप्रच्छचकथंभ

दुःखमेतदुपागता॥ स्फुरन्तद्गृहि वैशालेरपि भार्या सुशर्मणः॥ ब्राह्मण्युवाच।सुताहमतिरात्रस्य द्विजस्य वनवासिनः।पत्नी विशालपुत्रस्य यस्य
नाम त्वयोदितं।साहं हृता बलात्केन राक्षसेन दुरात्मना। प्रसुप्ता भुवनस्यांते भर्तृमातृवियोजिता।भस्मीभवतु तद्रक्षो येनास्म्येवं वियोजिता।मात्रा
भ्रातृभिरन्यैश्च तिष्ठाम्यत्र सुदुःखिता।अस्मिन्वनेऽतिगहने येनानीताहमुज्झिता।न वेद्मि कारणं किंतु नोपभुंक्ते न खादति।राजोउ·।अपि तत्ज्ञाय
ते रक्षस्त्वां प्रमुच्य क्व वै गतं। अहं भर्त्रा तवैवात्र प्रेषितो द्विजनंदिनि।ब्राह्मण्युवाच।असैव काननस्यांतः प्रतिष्ठति निशाचरः।प्रविश्य पश्यतु भवान्
न बिभेति तु तो यदि।श्रीमार्कंडेयउ·।प्रविवेश ततः सोथ तया वर्त्म निदर्शिते।ददृशे परिवारेण समवेतं स राक्षसं।दृष्टमात्रेण तस्तास्मिन्त्वरमाणः स
राक्षसः।दूरादेव महीं मूर्ध्ना स्पृशन्पादांतिकं ययौ॥ राक्षसउ·।मम मात्रागच्छता गेहं प्रसादः सुमहान्कृतः प्रशाधि किं करोम्यस्य वसामि विषये तव॥
अर्घ्यं चेमं प्रतीच्छस्व स्थीयतां चेदमासनं।वयं भृत्या भवान्स्वामी दृढमाज्ञापयस्व मां॥ राजोवाच।कृतमेव त्वया सर्वं सर्वमिय चितिः कृता।किमर्थं
ब्राह्मणवधूस्त्वयानीता निशाचर।नेयं सुरूपसंपत्या भार्यार्थिनोऽहृता त्वया॥ भक्षार्थं चेत्कथं नात्ता त्वयैतत्कथ्यतां मम।राक्षसउ·।न वयं मानु
षाहारा अन्ये ते नृप राक्षसाः।कुकृतस्य फलं यत्तु तदश्नीमो वयं नृप।स्वभावं च मनुष्याणां योषितां च विमानिताः।मानिताश्च समश्नीमो न वयं जंतु
षादकाः।यदाश्नाभिर्नृणां क्षांति र्भुक्ता कुप्यंति ते तदा।भुंक्ते दुष्टस्वभावे तु गुणवंतो भवंति ते।संति नः प्रमदा भूप रूपेणाप्सरसां समाः।राक्षस्यः संभवे

तासां मानुष्यानां रतिः कथं।राजोवाच। यद्येषा नोपभोगाय नाहाराय निशाचर।गृहं प्रविश्य विप्रस्य तत्किमेषा हृता त्वया।राक्षसउ·।मंत्रवित्स
द्विजश्रेष्ठो यज्ञे यज्ञे गतस्समे।रक्षोघ्नमंत्रपठनात्करोत्युच्चाटनं नृप।बुभुक्षिता वयं तस्य मंत्रोच्चारणकर्मणा।क्व यामः सर्वयज्ञेषु स ऋत्विक्
भवति स द्विजः।ततोस्माभिरिदं तस्य वैकल्यमुपपादितं।पत्न्या विना पुमानृत्त्याः कर्मयोग्यो न जायते।श्रीमार्कंडेयउ·।वैकल्योच्चारणं तस्य
ब्राह्मणस्य महामुने।ततः राजा सुभृशं विषण्णः समजायत।वैकल्यमेष विप्रस्य वदन्मामेव निंदति।अनर्हमर्घ्यस्य च मां सोप्याह मुनिस
त्तमः।वैकल्यं तस्य विप्रस्य राक्षसः प्राह मे यथा॥ अपत्नीकस्तथा सोहं संकटं महदास्थितः।श्रीमार्कंडेयउ·।एवं चिंतयतस्तस्य पुनरप्या
ह राक्षसः।प्राणामनम्रो राजानं बद्धांजलिपुटो मुने॥ नरेंद्राज्ञाप्रदानेन प्रसादः क्रियतां मम।भृत्यस्य प्रणतस्येत्थं युष्मद्विषयवासिनः॥
राजोवाच।स्वभावं वयमश्नीमस्त्वयोक्तं यन्निशाचर।तदर्थिनो वयं येन कार्येण शृणु तन्मम।अस्यास्त्वया द्य ब्राह्मण्या दौःशील्यमुपभुज्यतां येन
त्वयापि दौःशील्यतद्विनीता भवेदियं।नीयतां यस्य भार्येयं तस्य वेश्म निशाचर।अस्मिन्कृते कृतं सर्वं गृहमभ्यागतस्य मे।श्रीमार्कंडेयउ·।ततः
स राक्षसस्तस्याः प्रविश्यांतः स्वमायया।भक्षयामास दौःशील्यं निजशिक्षां नृपाज्ञया॥ दौःशील्येनातिरौद्रेण पत्नी तस्य द्विजन्मनः।वियोजिता हत
द्वितुरयमासीन्निशाचरः।ममैव दोषेणान्यस्य स्वकृतं ह्युपभुज्यते।अन्यजन्मनि कस्यापि विप्रयोगः कृतो मया।सोयं ममाप्युपनयतः कोदोषास्य

मार्कं॰ ६७ महात्मनः।वियोजिता राक्षसउवाच॥शापयामित्वादेशादिमांभर्तृगृहेप्रभो।यदन्यत्करणीयंतेतदाज्ञापयपार्थिव।राजाउ॰।अस्मिन्कृतेकृतं
सर्वंत्वयामेरजनीचर।आगंतव्यंचतेवीरकार्य्यकालेस्मृतेनमे।श्रीमार्कंडेयउ॰।तथेत्युक्त्वाऽथतद्रक्षस्तामादायद्विजांगनाम्।निन्येगृहंशुद्धांदौः भर्तृ२
शील्यापगमात्ततः॥४९॥ ।इतिश्रीमार्कंडेयपुराणेब्राह्मणभार्यानयनंनामाध्यायः। ।मार्कंडेयउ॰।तांप्रेषयित्वाराजापिस्वभर्तृगृहमंगनां॥चिं
तयामासनिःश्वस्यकिमत्रसुकृतंभवेत्।अनर्घयोग्यतांकष्टंसमामाहमहामनाः।वैकल्यंविप्रमुद्दिश्यममत्वायंनिशाचरः।सोहंकथंकरि
ष्यामित्यक्तापत्नीमयाहिसा।अथवाज्ञानदृष्टंतंपश्यामिमुनिसत्तमं।संचिंत्येत्थंसभूपालःसमारुह्यचतंरथं।ययौयत्रसधर्मात्मात्रिकाल
ज्ञोमहामुनिः।अवरुह्यरथात्सोथतंसमेत्यप्रणम्यच।यथावृत्तंसमाचख्यौराक्षसेनसमागमं।ब्राह्मण्यादर्शनंचैवदौःशील्यापगमंत
था।प्रयाणंभर्तृगेहेचकार्य्यमागमनेचयत्।ऋषिरु॰।ज्ञातमेतन्मयासर्वंयत्कृतंतेनराधिप।कार्य्यमागमनेचैवमत्समीपेतवाखिलं।पृष्टुमा
मिहकिंकार्य्यमयेस्युद्विग्नमानसः।त्वमागतोमहीपालश्रृणुकार्य्यंचयत्त्वया।पत्नीधर्मार्थकामानांकारणंप्रवरंनृणां।विशेषतश्चधर्मस्तसं
त्यक्तस्त्यजताहितां।अपत्नीकोनरोभूपनयोग्योनिजकर्मणां।ब्राह्मणःक्षत्रियोवापिवैश्यःशूद्रोनराधिप।त्यजताभवतापत्नीनशोभनमनु राम
ष्ठितं।अत्याज्योहियथाभर्त्तास्त्रीणांभार्यातथानृणां।राजाउ॰।भगवन्किंकरोम्येषविपाकोममकर्मणां।नाऽनुकूलानुकूलस्ययस्मात्त्यक्ताततोम ६७

या।यत्यत्करोतितत्स्मातेदह्यमानेनचेतसा।भवंगस्तद्वियोगार्त्तिभीतेनानिर्वृतिक्षुण्णा।सांप्रतंतुवनेत्यक्तानवेद्मिक्वनुसागता।भक्षितावापिविपि
नेसिंहव्याघ्रनिशाचरैः।ऋषिरु॰।नभक्षितासाभूपालसिंहव्याघ्रनिशाचरैः।सात्वऽविप्लुतचारित्रासांप्रतंतुरसातले।राजाउ॰।सानीताकेनपातालंअ
स्तेवाऽदूषिताकथं।अत्यद्भुतमिदंब्रह्मन्यथावद्वक्तुमर्हसि।ऋषिरुवाच।पातालेनागराजोस्तिप्रख्यातःशालपोतकः।तेनदृष्टात्वयात्यक्ताभ्रममाणा
महावने।सारूपशालिनीतेनसानुरागेणपार्थिव।विदितार्थेनपातालंनीतामायाबतातदा।ततस्तस्यसुतासुभ्रूर्नन्दानाममहीपते।भार्यामनोरमा
ख्यस्यनागराजस्यधीमतः।तयामातुःसपत्नीयंसाभवित्रीत्यशोभना।हृतात्मगेहंसानीतागुप्तात्वंतःपुरेधृता।यत्नात्तुयाचितानंदानददातिनृपोत्तरं।
मूकाभविष्यसीत्याहतदातांतनयापिता।एवंसमास्तुतातेनसाचास्तेतत्रभूपते।नीतातेनोरगेंद्रेणधृतातत्सुतयासती।श्रीमार्कंडेयउ॰।ततोराजा
परंहर्षमवाप्यतमपृच्छत।द्विजवर्य्यस्वदौर्भाग्यकारणंदयितांप्रति।राजाउ॰।भगवन्सर्वलोकस्यमयिप्रीतिरनुत्तमा।किंनुतत्कारणंयेनस्वपत्नी
नातिवत्सला।ममातीवत्वसाविष्टाप्राणेभ्योपिमहामुने।साचमांप्रतिदुःशीलाकारणंब्रूहियद्द्विज।ऋषिरुवा॰।पाणिग्रहणकालेतुसूर्य्यभौमशनैश्चरैः।
शुक्रवाचस्पतिभ्यांचतत्रभार्य्याविलोकिता।त्वन्मूर्त्तावभवद्भौमस्तस्याःसोमस्तदाभवत्।परस्परविपक्षौतौमतस्तेपार्थिवेदृशं।तद्गच्छत्वंस्वधर्मेणपरि
पालयमेदिनीं।पत्नीसहायःसर्वाश्चकुरुधर्मवतीःक्रियाः।श्रीमार्कंडेयउ॰।इत्युक्तःप्रणिपत्यैनंआरुह्यस्यंदनंततः।उत्तमःपृथिवीपालआजगामपुरंद्विज॥

॥ २९॥ ॥इतिश्रीमार्कंडेयपुराणेउत्तमे॥ ॥श्रीमार्कंडेयउ०।ततःसनगरंप्राप्यतंददर्शद्विजंनृपः।समेतंभार्ययागेहेशीलवत्यामुदान्वितं।ब्राह्म
णउ०।राजवर्य्यकृतार्थोस्मिकृतो।धर्मोद्धरक्षितः।धर्मज्ञेनेहभवताभार्यामानयताममाराजाउ०।कृतार्थस्त्वंद्विजश्रेष्ठनिजधर्मानुपालनात्।
वयंसंकटिनोविप्रयेषांपत्नीनवेश्मनि।ब्राह्मणउ०।नरेंद्रसाहिविपिनेभक्षिताश्वापदैर्वने।अलंतयाकिमन्यस्यानपाणिंगृह्यतेत्वया।राजाउ०।
नभक्षितासादयिताश्वापदैःसाहिजीवति।अविदूषितचारित्राकथमेतत्करोम्यहं।ब्राह्मणउ०।यदिजीवतितेभार्यातथैवा।न्यमिवारिणी।तदपत्नी
कृतापायंजन्मकिंक्रियतेत्वया।राजाउ०।आनीतापिहिसाविप्रप्रतिकूलासदैवते।दुःखायनसुखायालंतस्यांमैत्रीनवैमयि।ब्राह्मणउ०।त्वयिसंप्री
तयेनस्यातत्त्वरेष्टिमुपकारिणीं।क्रियतेमित्रकामैर्यामित्रविंदांकरोमितां।अप्रीतयोःप्रीतिकरीसासुभ्रूस्तवभार्य्यमहीपते।तस्मादानीयतांसा
तेपरांप्रीतिमुपेष्यति।श्रीमार्कंडेयउ०।इत्युक्तःसतुसंभारानशेषानवनीपतिः।आनिनायचकारेष्टिंसचतांद्विजसत्तमः।सप्तकृत्वःसतुतदाचकारे
ष्टिंपुनःपुनः।तस्यराज्ञोद्विजश्रेष्ठोभार्यासंवनयायवै।यदासौपितसन्मेनेतामममन्यतमानद।स्वभर्त्तरितदाविप्रस्तमुवाचनराधिपं।आनीयतांन
रश्रेष्ठसात्वयेष्टात्मनोंऽतिकं।भुंक्ष्वभोगांस्तयासार्द्धंयजयज्ञांस्तथादृतः।श्रीमार्कंडेयउ०।इत्युक्तस्तेनविप्रेणभूपालोविस्मितस्तदा।सस्मारतंमहा
सत्यसंधंनिशाचरं।स्मृतस्तेनतदासद्यःसमुपेत्यनराधिपं।किंकरोमीतिसोप्याहप्रणिपत्यमहामुने।ततस्तेननरेंद्रेणविस्तरेणनिवेदितं।गत्वापाता राम
९८

लमादायराजपत्नीमुपाययौ।आनीताचातिहार्द्देनसाददर्शतदापतिं।उवाचप्रसीदेतिभूयोभूयोमुदान्विता।ततःसराजारभसात्परिष्वज्याहभामिनीं।
प्रसन्नएवाहमतोभूयोभूयोब्रवीषिकिं।पत्न्युवाचयदिप्रसादप्रवणंनरेंद्रमयितेमनः।तदेतदभियाचेत्वातत्कुरुष्वममारिहन्।राजोवाच।निःशं
कंब्रूहिमत्तोयद्भवत्याकिंचिदीप्सितंतदलभ्यंनतेभीरुत्वदायत्तोस्मिनान्यथा।पत्न्युवाच।मदर्थेतेननागेनसुताशप्तासखीमम।मूकाभविष्यसी
त्याहसाचमूकत्वमागता।तस्याःप्रतिक्रियांप्रीत्याममशक्नोतिचेद्भवान्।वाग्विघातोपशांत्यर्थंततःकिंनकृतंमम।श्रीमार्कंडेयउ०।ततःसराजातंवि
प्रमाहास्मिन्कीदृशीक्रिया।तन्मूकतापनोदायसचतंप्राहपार्थिवं।ब्राह्मणउ०।भूपसारस्वतीमिष्टिंकरोमिवचनात्तव।पत्नीतवेयमानृण्यंयातुत
द्वाक्प्रवर्त्तनात्।श्रीमार्कंडेयउ०।इष्टिंसारस्वतींचक्रेतदर्थंतांविधायतु।सारस्वतान्निसूक्तानिजजापचसमाहितः।ततःप्रवृत्तवाक्यांतांगर्गःप्राह
रसातले।उपकारःसखीभर्त्रांक्रितोऽयमतिदुःकरः।इत्थंज्ञातसमागत्यनंदाशीघ्रगतिःपुरं।तस्यराज्ञःपरिष्वज्यतांसखीमुरगात्मजा।तंचसंस्तूयभूपा
लंकल्याणोक्त्यापुनःपुनः।उवाचमधुरंनागीकृतासनपरिग्रहा।उपकारःकृतोवीरभवतायोममाधुना।तेनास्माकृष्टहृदयायद्ब्रवीमिशृणुष्व
तत्।तवपुत्रोमहावीर्योभविष्यतिनराधिप।तस्याःप्रतिहतंचक्रंअस्यांभुविभविष्यति।सर्वास्त्रिशस्त्रशास्त्रज्ञोधर्मानुष्ठानतत्परः।मन्वंतरेश्वरो
धीमान्भविष्यतिसवैमनुः।श्रीमार्कंडेयउवाच।इतिदत्वावरंतस्मैनागराजसुताततः।सखींतुतांपरिष्वज्यपातालमगमत्पुनः।तस्यतत्रतयासा
म

ईरमतः पृथिवीपतेः। जगाम कालः सुमहान् प्रजाः पालयतस्तथा॥ ततः सतस्यां तनयो जज्ञे राज्ञो महात्मनः। पौर्णमास्यां यथा कांतश्चंद्रः संपूर्णमं
डलः। तस्मिन् जाते मुदं प्रापुः प्रजाः सर्वाः सहामराः। देवदुंदुभयो नेदुः पुष्पवृष्टिः पपात च। तस्य दृष्ट्वा वपुः कांतं भविष्यं शीलमेव च। उत्तमस्यैव मुन
यो नाम चक्रुः समागताः। जातो यमुत्तमे वंशे वालः काले तथोत्तमे। उत्तमाच्चापतस्तेन उत्तमोयं भविष्यति॥ श्रीमार्कंडेय उ॰। उत्तमस्य सुतः सोथ नाम्ना
ख्यातस्तथोत्तमः। मनुरासीत् यत्प्रभावो भागुरेः श्रूयतां मम। उत्तमाख्यानमखिलं जन्म वैवोत्तमस्य यः। नित्यं शृणोति विद्वेषं न करा चित्स गच्छति। इ
ष्टैर्दारैस्तथा पुत्रैर्बंधुभिर्वा कदाचन। वियोगो नास्य भविता शृण्वतः पठतोपि वा॥ तस्य मन्वंतरं ब्रह्मन् गदतो मम विस्तरात्। श्रूयतां तत्र यश्चेंद्रो ये
देवा ये महर्षयः॥४२॥ इति श्रीमार्कण्डेयपुराणे उत्तमे॥ ॥श्रीमार्कण्डेय उ॰। मन्वंतरे तृतीयेस्मिन्नौत्तमस्य प्रजापतेः। देवानिंद्रानृषीन्भूपान्निबोध
गदतो मम॥ सुधामानस्तथो देवा यथानामार्थधारिणः। सत्या[redacted]ख्यश्च द्वितीयोन्यस्त्रिदशानां तथा गणः। तृतीये तु गणे देवाः शिवाख्या वै महामुने।
शिवाः स्वरूपतस्ते तु श्रुताः पापप्रनाशनाः। प्रतर्दनाख्यश्च गणो देवानां मुनिसत्तम। चतुर्थस्तस्य कथित उत्तमस्यांतरे गणः। वशवर्त्तिनः पं
चमोपि देवास्तत्र गणेपि च। यथाख्यातस्वरूपास्तु सर्व एते महामते। एते देवगणाः पंच स्मृता यज्ञभुजस्तदा। मन्वंतरे मुनिश्रेष्ठ सर्वे द्वादशका गणाः।
एषामिंद्रो महावीर्यस्त्रैलोक्यस्येश्वरोऽभवेत्। शतक्रतूनाहृत्य सुशांतिर्न्नामनामतः। यस्योपसर्गनाशाय नामाक्षरविभूषिता। अद्यापि मानवैर्गा

र्गीयते ऽत्र महीतले। सुशांतिर्देवराट् शांतः सुशांतिं नः प्रयच्छतु। सहितः शिवसत्याद्यैस्तथैव वशवर्त्तिभिः। अजस्त्र परिदिव्याद्या महाबलपराक्रमाः।
पुत्रास्तस्य मनोरासन् व्याख्यातास्त्रिदशोपमाः। तत्सूतिसंभवैर्भूमिपालिता भूर्न्नरेश्वरैः। यावन्मन्वंतरं तस्य मनोरुत्तमतेजसः। चतुर्युगानां सं
ख्यातः साधिका ह्येकसप्ततिः। कृतत्रेतादिसंज्ञानां या प्रयुक्ता निपुरा मया। सुतेजसो पितपसो वसिष्ठस्य महात्मनः। तनया श्चांतरे यस्मिन् सप्त सप्तर्षयो
ऽभवन्। तृतीयमेतत्कथितं तव मन्वंतरं मया। तामस्य चतुर्थं तु मनोरंतरमुच्यते। विज्ञो निजन्मनो यस्य यशसाद्योतितं जगत्। जन्म तस्य मनो ब्र
ह्मन् श्रूयतां गदतो मम। अतींद्रियमशेषाणां मनूनां चरितं तथा॥ तथा जन्मापि विज्ञेयं प्रभावश्च महात्मनां॥ ९९॥ इति श्रीमार्कंडेयपुराणे उत्तमम
न्वंतरं समाप्तं॥ ॥श्रीमार्कण्डेय उ॰। राजाभूद्भुवि विख्यातः सुराष्ट्रो नाम वीर्य्यवान्। अनेकयज्ञस्त्वप्राज्ञः संग्रामेष्वपराजितः। तस्यायुः सुमहद्दत्तं मंत्रि
णाराधितेन वै। पत्नीनां च शतं तस्य वंध्या नाम भवद्द्विज। तस्य दीर्घायुषः पत्न्यो नातिदीर्घायुषो मुने। कालेन जग्मुर्निधनं बंधुभृत्यजनास्तथा॥ स भा
र्याभिस्तदा मुक्तो भृत्यैश्च सम महात्मभिः। उद्विग्नचेताः संप्राप्तो वीर्य्यहानिमहर्निशं। तं वीर्य्यहीनं निभृतैर्भृत्यैस्त्यक्तं सुदुःखितं। अनंतरो विमर्द्दाख्यो राज्या
च्चावितवांस्तथा। राज्याच्च्युतः सोपि वनं गत्वा निर्विण्णचेतनः। तपस्तेपे महाभागो वितस्तापुलिने स्थितः। ग्रीष्मे पंचतपा भूत्वा वर्षास्वभ्रावकाशकः।
जलशायी च शिशिरे निराहारो यतव्रतः। तपस्तपस्यतस्तस्य प्रावृट्काले महान् प्लवः। बभूवानुदिनं मेघैर्वर्षद्भिरनुसंततं। न दिक्कु विज्ञायते पूर्वा

दक्षिणावानपश्चिमा।नोत्तरातमसासर्वमनुलिप्तमिवाऽभवत्।ततोऽतिदूरेणनृपःसनद्याःप्रेरितस्तटं।प्रार्थयन्नपिनावापह्रियमाणेऽतिवेगिना॥अथ
दूराज्जलौघेनह्रियमाणोमहामतिः।आससादजलेराहीं।सपुच्छेजगृहेत्वतां।तेनप्लवेनसययावुह्यमानोनदीजले।इतश्चेतश्चांधकारेआससादततटंततः।
विस्तारिपंकमत्यर्थंदुस्तरंसन्नृपस्तरन्।तथैवकृष्यमाणोऽन्यद्रम्यंवनमवापच।तत्रांधकारेसारोहीचकर्षवसुधाधिपं।पुच्छेलग्नंमहाभागंकृशंध
मुनिसंततं।तस्याश्चास्पर्शसंभूतामवायमुदमुत्तमां।सोऽंधकारेभ्रमन्भूपोमदनाकृष्टमानसः।विज्ञायसानुरागंतंपृष्टस्पर्शनितत्परं।नरेंद्रंतंदृ
ष्ट्यंतंसामृगीदमुवाचह।किंपृष्ठेवेपथुमताकरेणस्पृशसेमम।अन्यथैवास्यकार्यस्यसजातानृपतेगतिः।नास्थानेतेमनोयातंनागम्याहंतवेश्व
र।किंतुमेसंगमेविघ्नमेषलोलःकरोतिते॥श्रीमार्कंडेयउ॰।इतिश्रुत्वावचस्तस्याम्मृग्याःसजगतीपतिः।जातकौतूहलोराहीमिदंवचनमब्रवीत्।कात्वं
ब्रूहिमृगीवाक्यंकथंमानुषमुद्वदेत्।कश्चैषलोलोयोविघ्नंत्वत्संगेकुरुतेमम।मृग्युवाच॥अहंतेदयिताभूपप्रागासंछुत्पलावती।भार्याशताग्रमहि
षीदुहितादृढधन्विनः॥राजाउ॰।किंत्वयातत्कृतंकर्मयेनेमांयोनिमागता।पतिव्रताधर्मपरासान्वत्वंकथमीदृशी॥मृग्युवाच॥अहंपितृगृहेबालासस
खीभिःसहितावनं।रंतुंगतादृदृशैकिंमृगंमृग्याःसमन्वितं।ततःसमीपवर्त्तिन्यात्वतयाताडितामृगी।मयात्रस्तागतान्यत्रक्रुद्धःप्राहततोमृगः।मूढेकि
मेवंकर्त्तासिविक्लृतेदोःशील्यमीदृशं।प्रधानकालोयेनायंत्वयामेविफलीकृतः।वाचंश्रुत्वाततस्तस्यमानुषस्येवभाषतः।भीताहंतंध्रुवंकोसीयेन

योनिमुपागतः।ततःसप्राहपुत्रोहमृषेर्निर्वृत्तचक्षुषः।सुतपानाममृग्यांतुसाभिलाषोमृगोऽभवत्।इमांचानुगतोप्रेम्णावांछितश्चानयावने।त्व
याविवियोजितोदुष्टेतस्माच्छापंददामिते।कन्यावाच॥मयाचायंतवाज्ञानादपराधःकृतोमुने।प्रसादंकुरुशापंमेनभवान्दातुमर्हति।इत्युक्तः
प्राहमांसोपिमुनिरित्थंमहीपते।नप्रयच्छामितेशापंयद्यात्मानंददासिमे।मयाचोक्तंमृगीनाहंमृगरूपधरोवने।लप्स्यसेन्यांमृगीनांचमपि
भावोनिवर्त्यतां।इत्युक्तःकोपरक्ताक्षःसप्राहस्फुरिताधरः।नाहंमृगीत्वयेत्युक्तंमृगीमूढेभविष्यति।ततोभृशंप्रव्यथिताप्रणम्यमुनिमब्रु
वं।स्वरूपस्थमपिक्रुद्धंप्रसीदेतिपुनःपुनः।बालानभिज्ञावाक्यानांततःप्रोक्तमिदंमया।पित्र्यसतिनारीभिर्वृयतेहिपतिःस्वयं।सतितातेकथं
त्वाहंवृणोमिमुनिसत्तम।अबलानाथवत्सादेप्रसीदेशानमाम्यहं।प्रसीदेतिप्रसीदेतिप्रणतायामहामते।इत्थंलालप्यमानायांसप्राहंमुनि
पुंगवः।नभवत्यन्यथाप्रोक्तंममवाक्यंकदाचन।मृगीभविष्यसिमृतावालेनात्रैवजन्मनि।मृगत्वेचमहाभागस्तवगर्भमुपैष्यति।लोलोना
ममुनेःपुत्रःसिद्धवीर्यस्यभामिनि।जातिस्मराभवित्रीत्वंतस्मिन्गर्भमुपागते।स्मृतिंप्राप्यतथावाचंमानुषींचकरिष्यति।तस्मिन्जातेमृ
गत्वात्त्वंविमुक्तापतिनार्चितान्।लोकानवाप्स्यसिप्राप्यायनदुःकृतकर्मभिः।सोपिलोलोमहावीर्यःपितृशत्रून्निपात्यवै।जित्वावसुंधरांकृत्स्नां
भविष्यतिततोमनुः।एवंशापमहंलब्ध्वामृत्युंतिर्यक्त्वमागता।तवस्पर्शाच्चगर्भोसौसंभूतोजठरेमम।ततोऽब्रवीमिनास्थानेतवयातंमनोम

पि।न चाप्यगम्यागर्भस्थोलोलो विघ्नं करोत्यसौ॥श्रीमार्कंडेयउ॰।एवमुक्तस्ततः सोपि राजा प्राप्य परामुदं।पुत्रो ममारी नृजित्वे निष्टथिव्यां भवितामनुः॥ततः सुखायतं पुत्रं सा मृगीलक्षणान्वितं।तस्मिन् जाते तु भूतानि सर्वाणि प्रययुर्मुदं।विशेषतश्च राजासौ पुत्रो जाते महाबले।सा विमुक्ता मृगीशापात्प्राप लोकानभीप्सितान्।ततस्तस्य ऋषयः सर्वे सत्ये मे मुनिसत्तम।अवेक्ष्य भाविनी मृद्धिं नाम चक्रुर्महात्मनः।तामसी भजमानायां योनिं मातर्यजायत।तमसा चावृते लोके तामसोयं भवत्विति।ततः सुतामसस्तेन पित्रा संवर्द्धितो वने।जातबुद्धिरुवाचेदं पितरं मुनिसत्तम॥ कस्त्वं तात कथं चाहं पुत्रो माता च का मम॥किमर्थमागतश्च त्वं एतत्सर्वं ब्रवीहि मे॥श्रीमार्कंडेयउ॰।ततः पिता यथावृत्तं स्वराज्यच्यावनादिकं।तस्याचष्ट महाबाहोः पुत्रस्य जगतीपतिः॥श्रुत्वा तत्सकलं सोपि समाराध्य च भास्करं।अवाप दिव्यान्यस्त्राणि ससंहाराण्यशेषतः।कृतास्त्रस्तानरीन्जित्वा पितुरानीय चांतिकं।अनुज्ञातान्मुमोचाथ प्रसक्षं धर्ममास्थितान्।पितापि तस्य तान् लोकान्।तपोयज्ञसमार्जितान्।विसृष्टदेहः संप्राप्तो दृष्ट्वा पुत्रमुखं सुखं।जित्वा समस्तां पृथिवीं तामसाख्यः स पार्थिवः।तामसाख्यो मनुरभूत्तस्य मन्वंतरं शृणु।ये देवास्तस्य तिर्यश्च देवेंद्रो वै महर्षयः।ये च पुत्रा मनोस्तस्य पृथिवी परिपालकाः।सत्यास्तथान्ये सुधियः सुरायाहरयस्तथा॥एते देवगणास्तत्र सप्तविंशतिका मुने।महाबलो महावीर्यः शतयज्ञोपलक्षणः।शिबिरिंद्रस्तथा तेषां देवानामभवद्विभुः।ज्योतिर्द्धामा पृथुः काव्यश्चैत्रो ग्निर्वरुणस्तथा॥पीतरश्च तथा ब्रह्मन् सप्त सप्तर्षयोऽभवन्।नरः शां राम १०१

तिः शांतभयो जानुजंघादयस्तथा॥पुत्रास्तु तामसस्यासन् राजानः सुमहाबलाः॥६०॥ ॥इति श्रीमार्कंडेयपुराणे तामसं मन्वंतरं समाप्तम्॥ ॥श्रीमार्कंडेयउ॰ पंचमोपि मनुर्ब्रह्मन् रैवतो नाम नामतः।तस्योत्पत्तिं विस्तरं च शृणुष्व कथयामि ते।ऋषिरासीन्महाभाग ऋतवागिति विश्रुतः।तस्य पुत्रस्य पुत्रोभूद्रेवत्यंते महात्मनः।स तस्य विधिवच्चक्रे जातकर्मादिकाः क्रियाः।तथोपनयनादींश्च सचाशीलोऽभवन्मुनेः।यतः प्रभृति जातो सो ततः प्रभृति सोप्यृषिः दीर्घरोगपरामर्षमवाप मुनिपुंगवः॥माता तस्य परामार्तिं कुष्टरोगाभिपीडिता।जगाम स पिता चास्य चिंतयामास दुःखितः।किमेतदिति सोप्यस्य पित्रोत्यंतं सुदुर्मतिः।जग्राह भार्यामन्यस्य मुनिपुत्रस्य मंदधीः।ततो विषण्णमनसा कृत्वा वागिदमुक्तवान्।अपुत्रता मनुष्याणां श्रेयसे न कुपुत्रता।कुपुत्रो हृदयायासं सर्वदा कुरुते पितुः।मातुश्च स्वर्गसंस्थांश्च स्वपितॄन् पातयत्यधः।सुहृदां नोपकाराय पितॄणां नो पतृप्तये।पित्रो दुःखाय धिक् तज्जन्म तस्य दुष्कृतकर्मणः।धन्यास्ते तनया येषां सर्वलोकाभिसंमताः।परोपकारिणो दांताः साधुकर्मण्यनुव्रताः।अनिर्वृत्तं तथा नष्टं परलोकपराङ्मुखं।नरकाय न यत्स्यै कुपुत्रालंबि मन्मनः।करोति सुहृदां दैन्यं अहितानां तथा मुदं।अकाले पिजरां पित्रोः कुपुत्रः कुरुते हि वै।श्रीमार्कंडेयउ॰।एवं सौख्यं न दुष्टस्य पुत्रस्य चरितैर्मुनिः।दह्यमानमनोवृत्तिर्वृद्धगर्गमपृच्छत।ऋषिरुवा॰।सुव्रतेन पुरा वेदा गृहीता विधिवन्मया।समाप्य वेदान्विधिवत्कृतो दारपरिग्रहः।सदारेण यथार्काः श्रौताः स्मार्त्तास्तथा क्रियाः।न मे न्यूना क्रिया काश्चित्यावदद्य महामुने।गर्भाधानविधानेन सकाममनुरु

ध्यता॥पुत्रार्थविहितश्चायंपुंनाम्नो॥विभ्यतामुने।सोयंकिमात्मदोषेणममदोषेणवामुने।अस्माद्दुःखावहोजातोदौःशील्याद्बंधुशोकदः।गर्गउ०।रेवत्यंते
मुनिश्रेष्ठजातोयंतनयस्तव।तेनदुःखायतेकष्टकालेयस्माद्दजायत।नतेऽपचारान्नवास्यमातुर्नैवास्यकुलस्यते।तस्यदौःशील्यहेतुत्वंरेवत्यंत
मुपागतं॥ऋतवागुवाच॥यस्मान्ममैकपुत्रस्यरेवत्यंतसमुद्भवं।दौःशील्यमेतयातस्मात्पततामाशुरेवती॥श्रीमार्कंडेयउ०।तेनैवंव्याहृतेशा
पेरेवत्यर्क्षंपपातह।पश्यतःसर्वलोकस्यविस्मयाकुलचेतसः।रेवत्यर्क्षंचपतितंकुमुदाद्रौसमंततः।भासयामाससहसावनकंदरनिर्झरान्॥
कुमुदाद्रिश्चतत्पातात्ख्यातोरैवतकोऽभवत।अतीवरम्यःसर्वस्यांपृथिव्यांपृथिवीधरः।तस्यर्क्षस्ययाकांतिर्यातापंकजिनीसरः।ततोजज्ञेतदाकन्या
रूपेणातीवशोभना।रेवतीकांतिसंभूतांतांदृष्ट्वाप्रमुचोमुनिः।तस्यानामचकाराऽस्यरेवतीमितिभागुरे।पोषयामासचैवैतांस्वाश्रमाभ्याससंभवां।
प्रमुचःसुमहाभागस्तस्मिन्नेवमहामुने।तांतुयौवनिनींदृष्ट्वाकन्यकांरूपशालिनीं।समुनिश्चिंतयामासकोऽस्याभर्त्ताभवेदिति।एवंचिंतयतःका
लोजगामसुमहात्मनः।नचाससादसदृशंवरंतस्यामहामुनिः।ततस्तस्यावरंपृष्टमग्निस्सप्रश्रयोमुनिः।विवेशचाग्निशालांवैपृष्टस्तंप्राहहव्यभु
क्।महाबलोमहावीर्य्यःप्रियवाक्धर्मवत्सलः।दुर्द्दमोनामभविताभर्त्ताह्यस्यामहीपतिः।अनंतरंचमृगयाप्रसंगेनागतोमुने।तस्याश्रमपदंधीमा
नदुर्द्दमःसनराधिपः।प्रियव्रतान्वयाभवोमहावलपराक्रमः।पुत्रोविक्रमशीलस्यकालिंदीजठरोद्भवः।सप्रविश्याश्रमपदंतांतन्वींजगतीपतिः।अ

राम
१०२

DR. BHAU DAJI MEMORIAL

पश्यमानस्तमृषिंप्रियेत्यामंत्र्यपृष्टवान्॥राजोवाच॥क्वगतोभगवानस्मादाश्रमान्मुनिपुंगवः।तंप्रणंतुमिहेच्छामिसत्यंप्रब्रूहिशोभने॥श्रीमार्कंडेयउ०
अग्निशालांगतोविप्रस्तच्छ्रुत्वातस्यभाषितं।प्रियेत्यामंत्रणंचैवनिश्चक्रामातुरान्वितः।सददर्शमहात्मानंराजानंदुर्द्दमंमुनिः।नरेंद्रचिह्नसहितंप्र
श्रयावनतंपुरः।तस्मिन्दृष्टेततःशिष्यमुवाचसतुगौतमं।गौतमानीयतांशीघ्रमर्घोस्यजगतीपतेः।एकतावदयंभूपश्चिरकालादुपागतः।जामा
ताचविशेषेणयोग्योऽर्घ्यस्यमतेमम॥श्रीमार्कंडेयउ०॥ततःसचिंतयामासराजाजामातृकारणं।विवेदनचतोमौनीजग्राहेऽर्घंचतंनृपः।तमास
नगतंविप्रगृहीतार्घंमहामुनिः।प्रस्तुतंप्राहराजेंद्रमपितेकुशलंपुरे।कोशेबलेचभृत्येषुमित्रामात्येषुचेश्वर।तथात्मनिमहाबाहोयत्रसर्वंप्रतिष्ठि
व तं।पत्नीचतेकुशलिनीयतएवातितिष्ठति।पृच्छाम्यस्यास्ततोनाहंकुशलिन्यापरास्तव॥राजोवाच॥त्वत्प्रसादादकुशलंनक्वचिन्मयिसत्तम।जात
कौतूहलश्चास्मिममभार्यात्रकामुने॥ऋषिरु०॥रेवतीतुमहाभागात्रैलोक्यस्यापिसुंदरी॥तवभार्यावरारोहावरांगीनखिवेत्सिकिं॥राजाउ०॥सु
भद्रांशांततनयांकावेरीतनयांविभो।सुराष्ट्रजांसुजातांचकदंबांचवरूथजां।विपाशांनंदिनींचैववेद्मिभार्यागृहेहियाः।तिष्ठंतिमेनभगवन्रे
वतींवेद्मिकाप्रिये॥ऋषिरु०॥प्रियेतिसांप्रतंयेयंत्वयोक्तावरवर्णिनी॥किंविस्मृतंतेभूपालश्लाघ्येयंगृहिणीतव॥राजाउ०॥सम्यगुक्तंत्वयाकिंतु
भावोदुष्टोनमेमुने॥नात्रकोपंभवान्कर्त्तुमर्हस्यस्मासुयाचितः।ऋषिरु०॥सत्यंब्रवीषिभूपालनभावस्तवदूषितः।व्याजहारभवानेवंवह्निनानृ

DR. BHAU DAJI MEMORIAL

पनोदितः।मयापृष्टोकुतवहःकोऽस्याभर्त्तेतिपार्थिवः।भवतातेनचाप्युक्तोभवानेवाद्यचागतः।तद्गृह्यतांमयादत्तांतुभ्यंकन्यानराधिप।प्रि
येत्यामंत्रितान्वेयंविवाहंकुरुषेकथं॥श्रीमार्कंडेयउवाच॥ततःसोऽभवन्मौनीतेनोक्तःपृथिवीपतिः॥ऋषिरुवाच॥स्तथोद्यतःकर्त्तुंतस्यावै
वाहिकंविधिं।समुद्यतंचपितरंविवाहायमहामुने॥उवाचकन्यासाकिंचित्प्रश्रयावनतानना॥यदिमेप्रीतिमांस्तातप्रसादंकर्त्तुमिच्छसि।रेव
त्यर्क्षेविवाहंमेतत्करोतुप्रसादतः॥ऋषिरु॰।रेवत्यर्क्षंनवैभद्रेचंद्रयोगादिविस्थितं।अन्यानिसंतिऋक्षाणिसुभ्रूवैवाहिकानिते।कन्योवाच॥
ताततेनविनाकालोविकलःप्रतिभातिमे।विवाहोविकलेकालेमद्विधायाःकथंभवेत्।ऋषिरु॰।ऋतवागितिविख्यातस्तपस्वीरेवतींप्रति।च
कारकोपंक्रुद्धेनतेनर्क्षंतन्निपातितं।मयाचास्मैप्रतिज्ञाताभार्येयंमदिरेक्षणे।नचेच्छसिविवाहंत्वंसंकटंनःसमागतं।कन्योवाच॥ऋतवाकुस
मुनिस्तातकिमेकस्तप्तवांस्तपः।नत्वयाममतातेनब्रह्मबंधोःसुतास्मिकिं॥ऋषिरु॰॥ब्रह्मबंधोःसुतानत्वंकालेनैवातपस्विनः।सुतात्वंममयादे
वाकर्त्तुमन्यान्समुत्सहे॥कन्याउ॰।तपस्वीयदिमेतातस्तत्किमर्थमिदंदिवि।समारोप्यविवाहोमेनात्रर्क्षेक्रियतेपितः॥ऋषिरु॰॥एवंभवतुभद्रंते
भद्रेप्रीतिमतीभव।आरोपयामीदुमार्गेरेवत्यर्क्षंकृतेतव॥श्रीमार्कंडेयउ॰॥ततस्तपःप्रभावेनरेवत्यर्क्षंमहामुनिः।यथापूर्वंतथाचक्रेसोमयोगेद्विजो राम
त्तमः।विवाहंचैवदुहितुर्विधिवन्मंत्रयोजितं।निष्पाद्यप्रीतिमान्भूयोजामातरमथाब्रवीत्॥औद्वाहिकंतुभूपालकथ्यतांकिंददाम्यहं॥दुर्लभ्यमपिदा १०३

स्यामिममाप्रतिहतंतपः।राजोवाच॥मनोःस्वायंभुवस्याहंउत्पन्नःसंततौमुने।मन्वंतराधिपंपुत्रंत्वत्प्रसादाद्वृणोम्यहं॥मुनिरुवाच॥भविष्य
त्येषतेकामोमनुस्त्वत्तनयोमहान्।सकलांभोक्ष्यतेभूमिंधर्मविच्चभविष्यति॥श्रीमार्कंडेयउ॰॥तमादायततोभूपस्तंदेवनगरंययौ।तस्यांचा
ऽजायतसुतोरेवत्यांरैवतोमनुः।समेतःसकलैर्धर्मैर्मानवैरपराजितः।विज्ञाताखिलशास्त्रार्थोवेदविद्यार्थशास्त्रवित्।तस्यमन्वंतरेदेवा
न्मुनिदेवेंद्रपार्थिवान्।कथ्यमानान्मयाब्रह्मन्निबोधसुसमाहितः।सुमेधसस्तत्रदेवास्तथाभूतरयाद्विज।वैकुंठाश्चामिताभाश्चचतुर्दशचतुर्द
श।तेषांदेवगणानांतुचतुर्णामपियेश्वरः।नाम्नाविभुरभूदिंद्रःशतयज्ञोपलक्षणः।हिरण्यरोमावेदश्रीऊर्द्ध्वबाहुस्तथाशिरः।देवबाहुःसुधामा
चपर्जन्यश्चमहामुने।सुतासेतेमहाभागासर्ववेदांतपारगाः।एतेसप्तर्षयश्चासन्रैवतस्यांतरेमनोः।बलबंधुर्महावीर्यःस्वयंबाहुस्तथा
परः।सत्यकाद्यास्तथैवासन्रैवतस्यमनोःसुताः।रैवतांताश्चमनवःकथितायमयातव।स्वायंभुवान्वयाह्येतेस्वारोचिषमृतेमनुं॥४४॥इतिश्री
मार्कंडेयपुराणेरैवतमन्वंतरेपंचमंसमाप्तम्॥ ॥श्रीमार्कंडेयउ॰।एतत्तेकथितंतुभ्यंमयापंचममंतरं।चाक्षुषस्यमनोःषष्ठंश्रूयतामिदमं
तरं।अन्यजन्मनिजातोसौचक्षुषःपरमेष्ठिनः।चाक्षुष[redacted]त्वमतस्तस्यजन्मन्यस्मिन्नपिद्विज।अनिमित्तस्यराजर्षेर्भद्राभार्यामहात्मनः।जज्ञे
सुतेसुविद्धांसंश्रुचिंजातिस्मरंविभुं।जातेमातानिजोत्संगेस्थितमुल्लाप्यतेपुनः।परिष्वजतिहार्द्देनरुल्लापयत्यथ।जातिस्मरस्तुजातोऽसौमातुर

मार्कं. त्संगमास्थितः॥ जहास च तदा माता संस्तुधा वाक्यमब्रवीत्। भीतासि किं किमिदं वत्स हास्यावर्त्तते तव। अकालबोधः संजातः कश्चित्स्वप्तिशोभनं।
१०४ पुत्र उवाच॥ इयं मामिच्छति पुरो मार्ज्जारी किं न पश्यसि। अंतर्द्धिं गता चेयं द्वितीया जातहारिणी॥ पुत्रप्रीत्याथ भवती सौहार्द्दसमवीक्षति। उद्भाष्य
लाप्य बहुशः परिष्वजसि मां यथा॥ उद्भूतपुलका स्नेहसंभवाश्रावलक्षणा॥ ततो यमागतो हास स्पृणुष्वाप्यत्र कारणं। स्वार्थप्रसक्ता मार्ज्जारी प्र
वृत्ता मामवेक्षते। तथांऽतर्द्धिं गता चेयं द्वितीया जातहारिणी॥ स्वार्थायस्निग्धहृदये यथैते ते ममोपरि। प्रवृत्ता स्वार्थसंज्ञेयं तस्यैवं प्रतिभा
ति मे। किंतु सद्योपभागाय मार्ज्जारी जातहारिणी॥ त्वं तु क्रमेणोपभोग्यं मत्तः फलमभीप्ससि। नामं जानासि कोप्येष नैवोपकृतं मया। सग
तेनाप्रकालीनं पंचसप्तदिनात्मकं। तथापि हृष्यसे त्वं च परिष्वज्याभिलप्य च। तातेति वत्स भद्रेति किमलीकं ब्रवीषि मे॥ माता उ०॥ न त्वाह
मुपकारार्थं वत्स प्रीत्या परिष्वजे। न चेदेतद्भवत्प्रीत्ये परित्यक्तोस्यलं त्वया॥ परित्यक्तोप्यतः स्वार्थो यस्त्वत्तो मे भविष्यति। इत्युक्ता सा तमुत्सृज्य
निःक्रांता सूतिकागृहात्। जहात्मबाधकरणं शुद्धांतःकरणात्मकं। जहार तस्य रिस्यक्तं सा तदा जातहारिणी॥ सा हृत्वा तं तदा बालं विक्रांतस्य राम
महीभुजः। प्रसूतपत्नीशयने न्यस्य तस्या इदे सुतो। तमन्यस्य गृहे नीत्वा गृहीत्वा तस्य चात्मजं। तृतीयं भक्षयामास सा क्रमाज्जातहारिणी॥ सा १०४
हृत्वा तु तदा बालं विक्रांतस्य महीभृतः। हृत्वा हृत्वा तृतीयं तु भक्षयस्यति निर्घृणा॥ करोत्यनुदिने सा तु परिवर्त्तं तथान्ययोः। विक्रांतोपि ततस्त

स्य सुतस्य च महीपतिः। कारयामास संस्कारान् जन्मन्यस्य भवितिये। आनंद इति सोप्यस्य नाम चक्रे विधानतः। मुदया परया युक्तो विक्रांतः पुरुषाधि
पः। कृतोपयने ते तु गुरुराह कुमारकं। जनन्याः प्रागुपस्थानं क्रियतां चाभिवादने। स गुरोस्तद्वचः श्रुत्वा विहस्येदमब्रवीत्॥ आनंद उ०। वंद्यामे कत
मा माता जनित्री पालिका नु किं॥ गुरुरुवाच॥ नन्वियं ते महाभाग जनित्री यानृपात्मज। विक्रांतस्याग्रमहिषी हैमिनी नामनामतः॥ आनंद उ०॥ इयं ज
नित्री चैत्रस्य विशारवग्रामवासिनः। विप्राग्र्यबोधपुत्रस्य योऽस्यां जीतो न्यजाव यं॥ गुरुरु०॥ कुतस्त्वं कथयानंद चैत्रः कोवा त्वयोच्यते। संकटं मह
दाभाति जातोऽत्र त्वं ब्रवीषि किं॥ आनंद उवा०॥ जातं मांऽमतिमित्रस्य क्षितियस्य गृहे द्विज। तसत्यां गिरिभद्रायां आददे जातहारिणी॥ तया त्वमुत्के
हैमिन्यां हृत्वा तत्सुतं च सा। बोधस्य द्विजमुख्यस्य गृहे नीतवती पुनः। भक्षयामास च सुतं तस्य बोधद्विजन्मनः। स तत्र द्विजसंस्कारैः संस्कृतो
हैमिनीसुतः॥ वयमत्र महाभाग संस्कृता गुरुणा त्वया॥ मया तव वचः कार्य्यं अवैमि कतमां गुरो॥ गुरुरु०॥ अतीव गहनं वत्स संकटं महदागतं। न
वेद्मि किं चिन्मोहेन भ्रमं तीव हि बुद्धयः॥ आनंद उ०॥ मोहस्यावसरः कोऽभूज्जगत्येवं व्यवस्थिते। कः कस्य पुत्रो विप्रर्षे को वा कस्य न बांधवः॥ आरंभे
जन्मनो नृणां संबंधिहादुपैति यः। अन्यसंबंधिनो विप्र मृत्युनाननिवर्त्तितः। अत्रापि जातस्य सतः संबंधो योऽस्य बांधवैः। सोप्यस्तमेते देहस्य प्र
यातस्य तेरिवलक्रमः। अतो ब्रवीमि संसारे सारतः केन बांधवाः। कोयाति सततं बंधुः किं चातिभ्राम्यते मतिः। पितृद्वयं मया प्राप्तमस्मिन्नेव हि जन्मनि।

अन्यसंसारबंधतोविप्रमृत्योरासन्नवर्त्तिनः।अत्रापिजातस्यसतोममत्वंपितृजन्मनि॥मातृइयंचकिंचित्रंयदन्यद्देहसंभवां।सोहंतपःकरिष्यामित्व
याचाप्यस्यभूपतेः॥विशालग्रामतःपुत्रआनीयतामिति॥श्रीमार्कंडेयउ॰।ततःसविस्मितोराजासभार्य्यःसहबंधुभिः।तस्मान्निवर्त्यममतांअनु
मेनेवनायतं।चैत्रमानीयतनयंराज्ययोग्यंचकारसः।संमान्यब्राह्मणंयेनपुत्रबुद्ध्यासपालितः।सोप्यानंदस्तपस्तेपेबालएवमहावने।कर्म
णांक्षपणार्थायविमुक्तिपरिपंथिनं॥तपस्यंतेततस्तंचप्राहदेवःप्रजापतिः।किमर्थंतप्यतेवत्सतपस्तीव्रंवदस्वतत्॥आनंदउ॰॥आत्मनःशुद्धिका
मोहंकरोमिभगवंस्तपः।बंधायममकर्माणियानितत्क्षपणोन्मुखः॥ब्रह्मोवाच॥क्षीणाधिकारोभवतिमुक्तियोग्योनकर्मवान्।तेनाधिकारवान्मुक्ति
मवाप्स्यसिकथंभवान्।मनुनाभवताभाव्यंषष्ठेनव्रजतंकुरु।अलंतेतपसातस्मिन्कृतेमुक्तिमवाप्स्यसि॥श्रीमार्कंडेयउ॰।इत्युक्तोब्रह्मणासोपित
थेत्युक्त्वामहामतिः।तत्कर्माभिमुखोजातस्तपसोविररामह।चाक्षुषेत्याहतंब्रह्मातपसाविनिवर्त्तयन्।पूर्वनामबभूवाथप्रख्यातश्चाक्षुषोमनुः।उ
पयेमेविदर्भस्सुसुतामुग्रस्यभूभृतः।तस्यांचोत्पादयामासपुत्रान्प्रख्यातविक्रमान्॥तस्यमन्वंतरेशस्येयेंऽतरेत्रिदशाद्विज।येचर्षयस्तथैवेंद्रो
येसुतास्तांश्चतान्शृणु।साध्यानामसुरास्तत्रतेषामेवाष्टकोगणः।प्रख्यातकर्मणांविप्रयज्ञेहव्यभुजामयं।प्रख्यातबलवीर्य्याणांप्रभामंडल
शालिनां।द्वितीयश्चप्रभूताख्योदेवानामष्टकोगणः।तथैवाष्टकएवान्योभाव्याख्योदेवतागणः।चतुर्थश्चगणस्तत्रपृथकाख्यस्तथाष्टकः।लेखाः

संज्ञास्तथैवान्येतस्यमन्वंतरेद्विज॥पंचमेचगणेदेवास्तत्संख्याह्यमृताशिनः।शतक्रतूनामाहृत्ययस्तेषामधिपोऽभवत्।मनोजवस्तथैवेंद्रः
संख्यातोयज्ञभागभुक्।सुमेधाविरजाश्चैवहविष्मानुन्नतोमधुः।अतिनामासहिष्णुश्चसप्तासन्नितिचर्षयः।उरुःपुरुःशतद्युम्नप्रमुखाःसुमहा
बलाः।चाक्षुषस्यमनोःपुत्राःपृथिवीपतयोऽभवन्।एतत्तेकथितंषष्ठंमयामन्वंतरंद्विज।चाक्षुषस्यतथाजन्मचरितंचमहात्मनः।सांप्रतंव
र्त्ततेयायंनाम्नावैवस्वतोमनुः।सप्तमोयोंऽतरेतस्यदेवाद्यास्तान्शृणुष्वमे॥७२॥इतिश्रीमार्कंडेयपुराणेचाक्षुषमन्वंतरंसमाप्तम्॥श्रीमार्कं
डेयउ॰॥॥मार्त्तंडस्यरवेर्भार्यातनयाविश्वकर्मणः।संज्ञानाममहाभागातस्यांभानुरजीजनत्।मनुंप्रख्याततयशसमनेकज्ञानपारगं॥विवस्वत
सुतोयस्मात्तस्माद्वैवस्वतश्चसः।संज्ञाचरविणादृष्टानिमीलयतिलोचने।यतस्ततःसरोषोऽर्कःसंज्ञांवचनमब्रवीत्।मयिदृष्टेसदायस्मा
त्कुरुषेनेत्रसंयमं।तस्माज्जनिष्यसेमूढेप्रजासंयमनंयमं॥श्रीमार्कंडेयउ॰॥ततःसाचपलांदृष्टिंदेवीचक्रेभयाकुला।विलोलितदृशंदृष्ट्वापुन
राहचतांरविः।यस्माद्विलोलितादृष्टिर्मयिदृष्टेत्वयाऽधुना।तस्माद्विलोलांतनयांनदींत्वंप्रसविष्यसि॥श्रीमार्कंडेयउ॰॥ततस्तस्यास्तुसंजज्ञे
भर्तृशापेनतेनवै।यमश्चयमुनाचेयंप्रख्यातासुमहानदी।सापिसंज्ञारवेस्तेजःसेहेदुःखेनभामिनी।असहंतीचसातेजश्चिंतयामासवैतदा।किंक
रोमिक्कगच्छामिक्कगतायाश्चनिर्वृतिः।भवेन्ममकथंभर्त्ताकोपमर्कश्चनेष्यति।इतिसंचिंत्यबहुधाप्रजापतिसुतातदा।बहुमेनेमहाभागापितृसंश्र

पमेवसा।ततःपितृगृहंगंतुंकृतबुद्धिर्यशस्विनी॥ॐओमयीमात्मतनुंनिर्ममेदयितांरवेः।तांचोवाचत्वयावेश्मन्यत्रभानोर्यथामति।तथासम्यगपत्ये
षुवर्त्तितव्यंयथारवौ।पृष्टयापिनवाच्यंतेतथैतद्गमनंमम।सैवास्मिनामसंज्ञेतिवाच्यमेतत्तुपृष्टया॥छायासंज्ञाउवाच।आकेशग्रहणाद्देवि
आशापाद्ववचस्तव।करिष्येकथयिष्यामियावत्केशापकर्षणं।इत्युक्त्वासातदादेवीजगामभुवनंपितुः।ददर्शतत्रत्वष्टारंतपसाधूतकल्म
षं।बहुमानाच्चतेनापिपूजिताविश्वकर्मणा।तस्थौपितृगृहेसातुकिंचित्कालमनिंदिता।ततस्तामाहचार्वंगींपितानातिचिरोषितां।स्तुत्वाचत
नयांप्रेम्णाबहुमानपुरःसरं।त्वांचमेपश्यतोवत्सेदिनानिसुबहून्यपि।मुहूर्त्तार्द्धसमानीवयांतिकिंतुधर्मोविलुप्यते।बांधवेषुचिरंवासोनना
रीणांयशस्करः।मनोरथोबांधवानांभार्याभर्तृगृहेस्थिता।सात्वंत्रैलोक्यनाथेनसूर्येणासमतांगता।पितुर्गृहेचिरंकालंवस्तुंनार्हसिपुत्रके।
तत्त्वंभर्तृगृहेगच्छहृष्टोहंपूजितासिमे।पुनरागमनेकार्यंदर्शनायशुभेमम॥मार्कंडेयउ०।इत्युक्तासातदापित्रातथेत्युक्त्वाचवैमुने।संपूज
यित्वापितरंजगामाथोत्तरान्कुरून्।सूर्यतापमनिच्छंतीतेजसस्तस्यबिभ्यती।तपश्चचारतत्रापिवडवारूपधारिणी।संज्ञेयंइतिमन्वानो
द्वितीयांचदिवस्पतिः।जनयामासतनयौकन्यांचैकांमनोरमां।छायासंज्ञात्वपत्येषुसदास्वेष्वतिवत्सला।तथानसंज्ञाकन्यायांपुत्रयोश्चानुवर्त्त राम
ते।लालनाद्युपभोगेषुविशेषमनुवासरं।चक्षमेतन्मनुःक्षांत्यायमस्तुनहिचक्षमे।यदासंतर्जयामासछायासंज्ञांक्रुधायमः।तयाशप्तस्तदा १०६

आप्रज्ञासंयमनोयमः॥पततामेषपादस्तेयेनमातर्जयस्यले।मातुःशापभयाक्रांतोयमःसूर्यंवचोब्रवीत्॥यमउ०।तातैतन्महदाश्चर्यंनदृष्टमिहकेनचि
त्।मातावात्सल्यमुत्सृज्यशापंपुत्रेप्रयच्छति।तथामनोममाचष्टेनेयंमाताततथामम।विगुणेष्वपिपुत्रेषुनमाताविगुणाभवेत्॥श्रीमार्कंडेयउ०।यमस्यै
तद्वचःश्रुत्वाभगवांस्तिमिरापहः।छायासंज्ञांसमाहूयपप्रच्छक्वगतेसेति।साचाहतनयात्वष्टुरहंसंज्ञाविभावसोः।पत्नीतवत्वयापत्यान्येतानिजनिता
निमे।इत्थंविवस्वतःसातुबहुशःपृच्छतोयदा।नाचक्षेततःक्रुद्धोभास्वांस्तांशप्तुमुद्यतः।ततःसाकथयामासत्वष्टात्रैलोक्यपूजिते।भास्वांस्तंपरया
भक्त्यानिजंगेहमुपागतं।संज्ञांपृष्टस्ततस्तस्मैकथयामासविश्वकृत्।आगताचेहमेवेश्मभवतःप्रेषितेतिवै।दिवाकरःसमाधिस्थोवडवारूपधारि
णीं।तपश्चरंतींददृशेउत्तरेषुकुरुष्वथ।सौम्यमूर्त्तिःशुभाकारोममभर्त्ताभवेदिति।अभिसंधिंचतपसोबुबोधास्यादिवाकरः।शातनंतेजसोमेद्य
क्रियतामितिभास्करः।तंचाहविश्वकर्माणंसंज्ञायाःपितरंद्विज।संवत्सरंभ्रमिस्तस्यविश्वकर्मारवेस्ततः।तेजसःशातनंचक्रेस्तूयमानस्यदैवतैः।
श्रीमार्कंडेयउ०।ततस्तंतुष्टुवुर्देवास्तथादेवर्षयोरविं।अंगिरोद्यमशेषस्यत्रैलोक्यस्यसमागताः।इदंस्तोत्रंवरंरम्यंस्तोतव्यंश्रद्धयानरैः।शिष्यो
भूत्वासमाधिस्थोदत्वादेयंगुरोरपि।नशून्यभूतैःश्रोतव्यमेतत्तुसकलंभवेत्।आजन्मजन्मवल्लवान्नरकेस्वर्गवान्भवेत्।देवाऊचुः॥नमस्तेऋ
क्स्वरूपायसामरूपायतेनमः।यजुःस्वरूपरूपायसाम्नांधामवतेप्रभो।ज्ञानैकदेहभूतायनिर्द्धूततमसेनमः।शुद्धज्योतिस्वरूपायनिस्तंत्रायामला

मार्क· त्मनोचक्रिणेशंखिनेधान्मशार्ङ्गिणेशूलिनेनमः।वरिष्ठायवरेण्यायपरस्मैपरमात्मनोनमोखिलजगद्व्यापिस्वरूपायापारमूर्त्तये।सर्वकारणभूताय
१०७ निष्ठायैज्ञानचेतसे।।नमःसूर्य्यस्वरूपायप्रकाशाऽऽलक्ष्यरूपिणे।भास्करायनमस्तुभ्यंतथादिनकृतेनमः।सर्वरीहेतवेचैवसंध्ययोश्चकृतेनमः।त्वंसर्व
मेतद्भगवन्जगद्भ्रमतात्वया।।भ्रमत्याविश्वमखिलंब्रह्मांडंसचराचरं।त्वदंशुभिरिदंसर्वंसंस्पृष्टंजायतेशुचिः।क्रियतेत्वत्करस्पर्शाज्जलादीनांपवि
त्रता।होमदानादिकोधर्मोनोपकारायजायते।तावद्यावन्नसंयोगिजगदेतत्त्वदंशुभिः।ऋचस्तेसकलाह्येतायजूंष्येतानिनान्यतः।सकलानिचसामा
निनिपतंतित्वदंगतः।ऋग्मयस्त्वंजगन्नाथस्त्वमेवचयजुर्मयः।यतःसाममयश्चैवततोनाथत्रयीमयः।त्वमेवब्रह्मणोरूपंपरंचापरमेवच।मूर्त्तामू
र्त्तंतथासूक्ष्मस्थूलरूपतयास्थितं।निमेषकाष्ठादिमयःकालरूपाक्षयात्मकः।प्रसीदस्वेच्छयारूपंस्वतेजस्त्वंमयाकुरु।।श्रीमार्कंडेयउ।।एवंसंस्तूय
मानस्तुदेवैर्देवर्षिभिस्तथा।मुमोचस्वंतदातेजस्तेजसांराशिरव्ययः।यत्तस्यऋग्मयंतेजःपावितातेनमेदिनी।यजुर्मयेनापिदिवंस्वर्गःसाममयंरवेः।
शातितास्तेजसोभागायेत्वष्ट्रादशपंचच।त्वष्ट्रैवतेनशर्वस्यकृतंशूलंमहात्मनः।चक्रंविष्णोर्वसूनांचशंकवोऽथसुदारुणाः।पावकस्ययथाशक्तिःशि
विकाधनदस्यच।अन्येषामसुराणांशस्त्राण्युग्राणियानिवै।यक्षविद्याधराणांचतानिचक्रेसविश्वकृत्।ततःषोडशमेभागंबिभर्त्तिभगवान्रविः।तत्तेजः राम
पंचदशधाशातितंविश्वकर्मणा।ततोऽस्वरूपधृक्भानुरुत्तरानगमत्कुरून्।ददृशेतत्रसंज्ञांतुवडवारूपधारिणीं।साचदृष्ट्वातमायांतंपरपुंसोविशंकया। १०७

जगामसन्मुखंतस्यपृष्टरक्षणतत्परा।ततश्चनासिकायोगंतयोस्तत्रसमेतयोः।नासत्यदस्रौतनयावश्ववक्त्राद्विनिर्गतौ।रेतसोऽन्तेचरेवंतः
षड्गीधन्वीतलत्रधृक्।अश्वारूढःसमुत्पन्नोबाणतूणसमन्वितः।ततःस्वरूपममलंदर्शयामासभानुमान्।तस्यैषाचसमालोक्यस्वरू
पंमुदमाददे।स्वरूपधारिणींचेमानिनायनिजाश्रमं।संज्ञांभार्यांप्रीतिमतींभास्करोवारितस्करः।ततःपूर्वसुतोयोऽस्याःसोभूद्वैवस्वतोमनुः।
द्वितीयश्चयमःशापाद्धर्मदृष्टिरभूत्सुतः।कृमयोमांसमादायपादतस्तेमहीतलं।पतिष्यंतीतिशापांतंतस्यचक्रेपितास्वयं।धर्मदृष्टिंततश्चा
सौसमोमित्रेतथाऽहिते।ततोनियोगंतंयाम्येचकारतिमिरापहः।यमुनाचनदीजज्ञेकलिंदांतरवाहिनी।अश्विनौदेवभिषजौकृतौपित्रामा
हात्मना।गुह्यकाधिपतित्वेचरेवंतोविनियोजितः।छायासंज्ञासुतानांचविनियोगःश्रूयतांमम।पूर्वजस्यमनोस्तुल्यःछायासंज्ञासुतोऽग्रजः।
ततःसावर्णिकांसंज्ञामवापतनयोरवेः।भविष्यतिमनुःसोपिबलिरिंद्रोयदातदा।शनैश्चरोग्रहाणांचमध्येपित्रानियोजितः।तयोस्तृतीयाया
कन्यातपतीनामसाकुरुं।नृपात्संवरणात्पुत्रमवापमनुजेश्वरं।तस्यवैवस्वतस्याहंमनोःसप्तममंतरं।कथयिष्यामिसुतान्भूपान्ऋषीदेवा
न्सुराधिपं।।७५।।इतिश्रीमार्कंडेयपुराणेवैवस्वतमन्वंतरे।। ।।श्रीमार्कंडेयउ।।आदित्यावसवोरुद्राःसाध्याविश्वेमरुद्गणाः।भृगवोऽगिरसश्चा
ष्टौयत्रदेवगणाःस्मृताः।आदित्यावसवोरुद्राविज्ञेयाःकश्यपात्मजाः।साध्याश्चमरुतोविश्वेधर्मपुत्रागणास्त्रयः।भृगोस्तुपुत्राभृगवः।अंगिरोऽ

गिरसस्तथा॥एषवर्गस्तुमारीचोविज्ञेयःसात्वताधिपः॥तेजस्वीनामवेंद्रोपिमहात्मायज्ञभागभुक्॥अतीतानागतावेववर्त्तंतियेचसांप्रतं॥सर्वेतेत्रि
दशेंद्रास्तुविज्ञेयास्तुल्यलक्षणाः॥सहस्राक्षाःकुलिशिनःसर्वएवपुरंदराः॥मघवंतोवृषाःसर्वेश्रृंगिणोगजगामिनः॥तेशतक्रतवःसर्वेभूतानिभुवि
तेजसः॥धर्माद्यैःकारणैरेतेराधिपत्यगुणान्विताः॥भूतभव्यभवन्नाथाःश्रृणुचैतत्त्रयंद्विज॥भूर्लोकोयंस्मृतोभूमिरंतरिक्षंभुवःस्मृतं॥भव्याख्यश्च
तःस्वर्गस्त्रैलोक्यमितिगद्यते॥अत्रिश्चैववशिष्ठश्चकश्यपश्चमहानृषिः॥गोतमश्चभरद्वाजोविश्वामित्रश्चकौशिकः॥तथैवपुत्रोभगवान्ऋची
कस्यमहात्मनः॥जमदग्निश्चसप्तैतेमुनयोऽत्रतथांतरे॥इक्ष्वाकुर्नाभगश्चैवधृष्टःसर्यातिरेवच॥नरिष्यंतश्चविख्यातोनाभागोदिष्टएवच॥क
रूषश्चपृषध्रश्चभूमिपालोऽतिविश्रुताः॥मनोर्वैवस्वतस्यैतेनवपुत्राःप्रकीर्त्तिताः॥वैवस्वतमिदंविप्रकथितंमेतवांतरं॥अस्मिन्श्रुतेनरःसद्यः
पठितेचैवसत्तम॥मुच्यतेपातकैःसर्वैःपुण्यंचमहदश्नुते॥१३॥इतिश्रीमार्कंडेयपुराणेजैमिनिषंडेप्रथमेपक्षिणोवैवस्वतमन्वंतरंसमाप्तम्॥॥
॥॥क्रौष्टुकिरुवाच॥ ॥स्वायंभुवाद्याःकथिताःसप्तैतेमनवोमम॥तदंतरेषुयेदेवाराजानोमुनयोमताः॥अस्मिन्कल्पेसप्तयेऽन्येभविष्यंतिमहामुने॥
मनवस्तान्समाचक्ष्वतेषुदेवादयश्चये॥मार्कंडेयउवाच॥कथितस्तवसावर्णिःछायासंज्ञासुतश्चयः॥पूर्वजस्यमनोस्तुल्यःसमनुर्भविताष्टमः॥ राम
रामोव्यासोगालवश्चदीप्तिमान्त्रयएवच॥ऋष्यश्रृंगस्तथाद्रौणिःसप्तसप्तर्षयस्तदा॥सुतपाश्चामिताभाश्चमुख्याश्चैवत्रिधासुराः॥दिशंकः १०८

कथितश्चैषांत्रयाणांतुगणोगणः॥तपस्तपश्यःशुक्रश्चधृतिर्द्योतिःप्रभाकरः॥प्रभासःसविताधर्मस्तेजोरश्मिःस्वरःक्रतुः॥इत्यादिकस्तुसुतपादेवानां
विंशकोगणः॥प्रभुर्विभुर्विभासाद्यस्तथैषांविंशकोगणः॥सुराणाममिताभानांतृतीयमथमेश्रृणु॥दमोदांतोरितःसोमःश्वेताद्याश्चैकविंशतिः॥मुख्या
ह्येतेसमाख्यातादेवामन्वंतराधिपाः॥मारीचस्यैवतेपुत्राःकश्यपस्यप्रजापतेः॥भविष्यस्यभविष्यंतिसावर्ण्यस्यांतरेमनोः॥तेषामिंद्रोभविष्यस्तु
बलिर्वैरोचनोमुने॥पातालआस्तेयोद्यापिदैत्यःसमयबंधनः॥विरजाश्चार्वरीवांश्चनिर्मोहःसत्यवान्कृतिः॥धिष्ण्याद्याश्चैवतनयाःसावर्ण्यस्य
मनोर्नृपाः॥१२॥ ॥इतिश्रीमार्कंडेयपुराणेसूर्य्यसावर्णिके॥ ॥ ॥अतःपरंदेवीमाहात्म्यम्॥ ॥श्रीमार्कंडेयउ०॥ ॥सावर्णिःसूर्यतनयोयोमनुःक
थ्यतेष्टमः॥निशामयतदुत्पत्तिंविस्तराद्गदतोमम॥१॥महामायानुभावेनयथामन्वंतराधिपः॥सबभूवमहाभागःसावर्णिस्तनयोरवेः॥२॥स्वारोचि
षेंतरेपूर्वंचैत्रवंशसमुद्भवः॥सुरथोनामराजाभूत्समस्तेक्षितिमंडले॥३॥तस्यपालयतःसम्यक्प्रजाःपुत्रानिवौरसान्॥बभूवुःशत्रवोभूपाःको
लाविध्वंसिनस्तदा॥४॥तस्यतैरभवद्युद्धमतिप्रबलदंडिनः॥न्यूनैरपिसतैर्युद्धेकोलाविध्वंसिभिर्जितः॥५॥ततःस्वपुरमायातोनिजदेशाधिपो
भव॥आक्रांतःसमहाभागस्तैस्तदाप्रबलारिभिः॥६॥अमात्यैर्बलिभिर्दुष्टैर्दुर्बलस्यदुरात्मभिः॥कोशोबलंचापहृतंतत्रापिस्वपुरेततः॥७॥ततो
गयाव्याजेनहृतस्वाम्यःसभूपतिः॥एकाकीहयमारुह्यजगामगहनंवनं॥८॥सतत्राश्रममद्राक्षीद्द्विजवर्यस्यमेधसः॥प्रशांतश्वापदाकीर्णंमुनिशि

ष्यापशोभितं॥९॥तस्थौकंचित्सकालंचमुनिनातेनसत्कृतः॥इतश्चेतश्चविचरंस्तस्मिन्मुनिवराश्रमे॥१०॥सोचिंतयत्तदातत्रममत्वाकृष्टचेतनः॥मत्पू
र्वैःपालितंपूर्वंमयाहीनंपुरंहितत्॥११॥मद्भृत्यैस्तैरसद्वृत्तैर्धर्म्मतःपाल्यतेनवा॥नजानेसप्रधानोमेशूरोहस्तिसदामदः॥१२॥ममवैरिवशंयातःकान्भो
गानुपलप्स्यते॥येममानुगतानित्यंप्रसादधनभोजनैः॥१३॥अनुवृत्तिंध्रुवंतेद्यकुर्वंत्यन्यमहीभृतां॥असम्यग्व्ययशीलैस्तैःकुर्वद्भिःसततंव्ययं॥१४॥
संचितःसोतिदुःखेनक्षयंकोशोगमिष्यति॥एतच्चान्यच्चसततंचिंतयामासपार्थिवः॥१५॥तत्रविप्राश्रमाभ्यासेवैश्यमेकंददर्शसः॥सपृष्टस्तेनकस्त्वं
भोहेतुश्चागमनेत्रकः॥१६॥सशोकइवकस्मात्वंदुर्म्मनाइवलक्ष्यसे॥इत्याकर्ण्यवचस्तस्यभूपतेःप्रणयोदितं॥१७॥प्रत्युवाचसतंवैश्यःप्रश्रयावनतो
नृपं॥राज्ञोवाच॥समाधिर्नामवैश्योहमुत्पन्नोधनिनांकुले॥१८॥पुत्रदारैर्निरस्तश्चधनलोभादसाधुभिः॥विहीनश्चधनैर्दारैःपुत्रैरादायमेधनं॥
वनमभ्यागतोदुःखीनिरस्तश्चाप्तबंधुभिः॥१९॥सोहंनवेद्मिपुत्राणांकुशलाकुशलात्मिकां॥प्रवृत्तिंस्वजनानांचदाराणांचात्रसंस्थितः॥२०॥किंनुते
षांगृहेक्षेममक्षेमंकिंनुसांप्रतं॥कथंतेकिंनुसद्वृत्तादुर्वृत्ताःकिंनुमेसुताः॥२१॥राज्ञोवाच॥यैर्निरस्तोभवांल्लुब्धैःपुत्रदारादिभिर्द्धनैः॥तेषुकिंभवतःस्ने
हमनुबध्नातिमानसं॥२२॥वैश्यउवाच॥एवमेतद्यथाप्राहभवानस्मद्गतंवचः॥किंकरोमिनबध्नातिममनिष्ठुरतांमनः॥२३॥यैःसंत्यज्यपितृस्नेहंध
नलुब्धैर्निराकृतः॥पतिस्वजनहार्दंचहार्दितेष्वेवमेमनः॥२४॥किमेतन्नाभिजानामिजानन्नपिमहामते॥यत्प्रेमप्रवणंचित्तंविगुणेष्वपिबंधुषु॥२५॥ते

षांकृतेमेनिश्वासोदौर्मनस्यंचजायते॥करोमिकिंयन्नमनस्तेष्वप्रीतिषुनिष्ठुरं॥२६॥मार्कंडेयउवाच॥ततस्तौसहितौविप्रतंमुनिंसमुपस्थितौ॥समाधिर्नाम
वैश्योसौसचपार्थिवसत्तम॥२७॥कृत्वातुतौयथान्यायंयथार्हंतेनसंविदं॥उपविष्टौकथाःकाश्चिच्चक्रतुर्वैश्यपार्थिवौ॥राजोवाच॥भगवंस्त्वामहंप्रष्टुमि
च्छाम्येकंवदस्वतत्॥दुःखाययन्मेमनसःस्वचित्तायत्ततांविना॥२९॥ममत्वंममराज्यस्यराज्यांगेष्वखिलेष्वपि॥जानतोपियथाज्ञस्यकिमेतन्मुनिसत्तम
॥३०॥अयंचनिकृतःपुत्रैर्दारैर्भृत्यैस्तथोज्झितः॥स्वजनेनचसंत्यक्तस्तेषुहार्द्दीतथाप्यति॥३१॥एवमेषतथाहंचद्वावप्यत्यंतदुःखितौ॥दृष्टदोषेपिविष
येममत्वाकृष्टमानसौ॥३२॥तत्केनैतन्महाभागयन्मोहोज्ञानिनोरपि॥ममास्यचभवत्येषाविवेकांधस्यमूढता॥३३॥ऋषिरुवाच॥ज्ञानमस्तिसमस्तस्य
जंतोर्विषयगोचरे॥विषयश्चमहाभागयातिचैवंपृथक्पृथक्॥३४॥दिवांधाःप्राणिनःकेचिद्रात्रावंधास्तथापरे॥केचिद्दिवातथारात्रौप्राणिनस्तुल्यदृष्टयः
॥३५॥ज्ञानिनोमनुजाःसत्यंकिंनुतेनहिकेवलं॥यतोहिज्ञानिनःसर्वेपशुपक्षिमृगादयः॥३६॥ज्ञानंचतन्मनुष्याणांयत्तेषांमृगपक्षिणां॥मनुष्याणांचयत्तेषां
तुल्यमन्यत्तथोभयोः॥३७॥ज्ञानेपिसतिपश्यैतान्पतंगांछावचंचुषु॥कणमोक्षादृतान्मोहात्पीड्यमानानपिक्षुधा॥३८॥मानुषामनुजव्याघ्रसाभिलाषाःसु
तान्प्रति॥लोभात्प्रपकारायनन्वेतेकिंनपश्यसि॥३९॥तथापिममतावर्त्तेमोहगर्त्तेनिपातिताः॥महामायाप्रभावेनसंसारस्थितिकारिणा॥४०॥तन्नात्रविस्म
यःकार्योयोगनिद्राजगत्पतेः॥महामायाहरेश्चैषातयासंमोह्यतेजगत्॥४१॥ज्ञानिनामपिचेतांसिदेवीभगवतीहिसा॥बलादाकृष्यमोहायमहामायाप्रयच्छति॥

॥४२॥ तयाविसृज्यते विश्वंजगदेतच्चराचरं॥ सैषा प्रसन्नावरदानृणांभवतिमुक्तये॥४३॥ साविद्यापरमामुक्तेर्हेतुभूतासनातनी॥ संसारबंधहेतुश्चसैवसर्वे
श्वरेश्वरी॥४४॥ राजोवाच॥ भगवन्काहिसादेवीमहामायेतियांभवान्॥ ब्रवीतिकथमुत्पन्नासाकर्मास्याश्चकिंद्विज॥४५॥ यत्प्रभावाचसादेवीयत्स्वरूपायदुद्भवा॥
तत्सर्वंश्रोतुमिच्छामित्वत्तोब्रह्मविदांवर॥४६॥ ऋषिरुवाच॥ नित्यैवसाजगन्मूर्तिस्तयासर्वमिदंततं॥ तथापितत्समुत्पत्तिर्बहुधाश्रूयतांमम॥४७॥ देवानां
कार्यसिद्ध्यर्थमाविर्भवतिसायदा॥ उत्पन्नेतितदालोकेसानित्याप्यभिधीयते॥४८॥ योगनिद्रांयदाविष्णुर्जगत्येकार्णवीकृते॥ आस्तीर्यशेषमभजत्कल्पांतेभग
वान्प्रभुः॥४९॥ तदाद्वावसुरौघोरौविख्यातौमधुकैटभौ॥ विष्णुकर्णमलोद्भूतौहंतुंब्रह्माणमुद्यतौ॥५०॥ सनाभिकमलेविष्णोःस्थितोब्रह्माप्रजापतिः॥ दृष्ट्वातावसु
रौचोग्रौप्रसुप्तंचजनार्दनं॥५१॥ तुष्टावयोगनिद्रांतामेकाग्रहृदयस्थितः॥ विबोधनार्थायहरेर्हरिनेत्रकृतालयां॥५२॥ ब्रह्मोवाच॥ विश्वेश्वरींजगद्धात्रींस्थितिसं
हारकारिणीं॥ स्तौमिनिद्रांभगवतींविष्णोरतुलतेजसः॥५३॥ त्वंस्वाहात्वंस्वधात्वंहिवषट्कारःस्वरात्मिका॥ सुधात्वमक्षरेनित्येत्रिधामात्रात्मिकास्थिता॥५४॥
अर्धमात्रास्थितानित्यायानुच्चार्याविशेषतः॥ त्वमेवसात्वंसावित्रीत्वंदेविजननीपरा॥५५॥ त्वयैतद्धार्यतेविश्वंत्वयैतत्सृज्यतेजगत्॥ त्वयैतत्पाल्यतेदेवित्वमत्स्य
तेचसर्वदा॥५६॥ विसृष्टौसृष्टिरूपात्वंस्थितिरूपाचपालने॥ तथासंहृतिरूपांतेजगतोस्यजगन्मये॥५७॥ महाविद्यामहामायामहामेधामहास्मृतिः॥ महामोहाच राम
भवतीमहादेवीमहासुरी॥५८॥ प्रकृतिस्त्वंचसर्वस्यगुणत्रयविभाविनी॥ कालरात्रिर्महारात्रिर्मोहरात्रिश्चदारुणा॥५९॥ त्वंश्रीस्त्वमीश्वरीत्वंह्रीस्त्वंबुद्धिर्बोधल ११०

क्षणा॥ लज्जापुष्टिस्तथातुष्टिस्त्वंशांतिःक्षांतिरेवच॥६०॥ खड्गिनीशूलिनीघोरागदिनीचक्रिणीतथा॥ शंखिनीचापिनीबाणभुशुंडीपरिघायुधा॥६१॥ सौम्यासौम्य
तराशेषसौम्येभ्यस्त्वतिसुंदरी॥ परापराणांपरमात्वमेवपरमेश्वरी॥६२॥ यच्चकिंचित्क्वचिद्वस्तुसदसद्वाखिलात्मिके॥ तस्यसर्वस्ययाशक्तिःसात्वंकिंस्तूयसेमया॥
॥६३॥ ययात्वयाजगत्स्रष्टाजगत्पात्यत्तियोजगत्॥ सोपिनिद्रावशंनीतःकस्त्वांस्तोतुमिहेश्वरः॥६४॥ विष्णुःशरीरग्रहणमहमीशानएवच॥ कारितास्तेयतो
तस्त्वांकःस्तोतुंशक्तिमान्भवेत्॥६५॥ सात्वमित्थंप्रभावैःस्वैरुदारैर्देविसंस्तुता॥ मोहयैतौदुराधर्षावसुरौमधुकैटभौ॥६६॥ प्रबोधंचजगत्स्वामीनीयतामच्युतो
लघु॥ बोधश्चक्रियतामस्यहंतुमेतौमहासुरौ॥६७॥ ऋषिरुवाच॥ एवंस्तुतातदादेवीतामसीतत्रवेधसा॥ विष्णोःप्रबोधनार्थायनिहंतुंमधुकैटभौ॥६८॥ नेत्रास्य
नासिकाबाहुहृदयेभ्यस्तथोरसः॥ निर्गम्यदर्शनेतस्थौब्रह्मणोव्यक्तजन्मनः॥६९॥ उत्तस्थौचजगन्नाथस्तयामुक्तोजनार्दनः॥ एकार्णवेहिशयनाततःसदद
शेचतौ॥७०॥ मधुकैटभौदुरात्मानावतिवीर्यपराक्रमौ॥ क्रोधरक्तेक्षणावत्तुंब्रह्माणंजनितोद्यमौ॥७१॥ समुत्थायततस्ताभ्यांयुयुधेभगवान्हरिः॥ पंचवर्ष
सहस्राणिबाहुप्रहरणोविभुः॥७२॥ तावप्यतिबलोन्मत्तौमहामायाविमोहितौ॥ उक्तवंतौवरोस्मत्तोव्रियतामितिकेशवं॥७३॥ श्रीभगवानुवाच॥ भवेतामद्य
मेतुष्टौममवध्यावुभावपि॥ किमन्येनवरेणात्रएतावद्धिवृतंमम॥७४॥ ऋषिरुवाच॥ वंचिताभ्यामितितदासर्वमापोमयंजगत्॥ विलोक्यताभ्यांगदितोभग
वान्कमलेक्षणः॥७५॥ प्रीतौस्वस्तवयुद्धेनश्लाघ्यस्त्वंमृत्युरावयोः॥ आवांजहिनयत्रोर्वीसलिलेनपरिप्लुता॥७६॥ ऋषिरुवाच॥ तथेत्युक्त्वाभगवताशंखचक्रग

दाभृता॥ हत्वा चक्रेण वै छिन्ने जघने शिरसी तयोः॥७७॥ एवमेषा समुत्पन्ना ब्रह्मणा संस्तुता स्वयं॥ प्रभावमस्या देव्यास्तु भूयः शृणु वदामि ते॥७८॥ ॥इति श्रीमा
र्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमाहात्म्ये मधुकैटभवधः॥ ॥ऋषिरुवाच॥ ॥देवासुरमभूद्युद्धं पूर्णमब्दशतं पुरा॥ महिषेसुराणामधिपे देवानां च पुरंद
रे॥१॥ तत्रासुरैर्महावीर्यैर्देवसैन्यं पराजितं॥ जित्वा च सकलान्देवानिंद्रोभून्महिषासुरः॥२॥ ततः पराजिता देवाः पद्मयोनिं प्रजापतिं॥ पुरस्कृत्य गतास्तत्र यत्रेश
गरुडध्वजौ॥३॥ यथावृत्तं तयोस्तद्वन्महिषासुरचेष्टितं॥ त्रिदशाः कथयामासुर्देवाभिभवविस्तरं॥४॥ सूर्येंद्राग्न्यनिलेंदूनां यमस्य वरुणस्य च॥ अन्येषां चा
धिकारान्स स्वयमेवाधितिष्ठति॥५॥ स्वर्गान्निराकृताः सर्वे तेन देवगणा भुवि॥ विचरंति यथा मर्त्या महिषेण दुरात्मना॥६॥ एतद्वः कथितं सर्वममरारिविचे
ष्टितं॥ शरणं वः प्रपन्नाः स्मो वधस्तस्य विचिंत्यतां॥७॥ इत्थं निशम्य देवानां वचांसि मधुसूदनः॥ चकार कोपं शंभुश्च भ्रुकुटीकुटिलाननौ॥८॥ ततोतिकोपपूर्णस्य
चक्रिणो वदनात्ततः॥ निश्चक्राम महत्तेजो ब्रह्मणः शंकरस्य च॥९॥ अन्येषां चैव देवानां शक्रादीनां शरीरतः॥ निर्गतं सुमहत्तेजस्तच्चैक्यं समगछत॥१०॥ अतीव
तेजसः कूटं ज्वलंतमिव पर्वतं॥ ददृशुस्ते सुरास्तत्र ज्वालाव्याप्तदिगंतरं॥११॥ अतुलं तत्र तत्तेजः सर्वदेवशरीरजं॥ एकस्थं तदभून्नारी व्याप्तलोकत्रयं त्विषा॥१२॥
यदभूच्छांभवं तेजः स्तेनाजायत तन्मुखं॥ याम्येन चाभवन्केशा बाहवो विष्णुतेजसा॥१३॥ सौम्येन स्तनयोर्युग्मं मध्यं चैंद्रेण चाभवत्॥ वारुणेन च जंघोरू नितंब राम
स्तेजसा भुवः॥१४॥ ब्रह्मणस्तेजसा पादौ तदंगुल्योर्कतेजसा॥ वसूनां च करांगुल्यः कौबेरेण च नासिका॥१५॥ तस्यास्तु दंताः संभूताः प्राजापत्येन तेजसा॥ नयन १११

त्रितयं जज्ञे तथा पावकतेजसा॥१६॥ भ्रुवौ च संध्ययोस्तेजः श्रवणावनिलस्य च॥ अन्येषां चैव देवानां संभवस्तेजसां शिवा॥१७॥ ततः समस्तदेवानां तेजो
राशिसमुद्भवां॥ तां विलोक्य मुदं प्रापुरमरा महिषार्दिताः॥१८॥ शूलं शूलाद्विनिष्कृष्य ददौ तस्यै पिनाकधृक्॥ चक्रं च दत्तवान्कृष्णः समुत्पाद्य स्वचक्रतः॥१९॥
शंखं च वरुणः शक्तिं ददौ तस्यै हुताशनः॥ मारुतो दत्तवांश्चापं बाणपूर्णे तथेषुधी॥२०॥ वज्रमिंद्रः समुत्पाद्य कुलिशादमराधिपः॥ ददौ तस्यै सहस्राक्षो घंटा
मैरावताद्गजात्॥२१॥ कालदंडाद्यमो दंडं पाशं चांबुपतिर्ददौ॥ प्रजापतिश्चाक्षमालां ददौ ब्रह्मा कमंडलुं॥२२॥ समस्तरोमकूपेषु निजरश्मीन्दिवाकरः॥ कालश्च
दत्तवान्खड्गं तस्याश्चर्म च निर्मलं॥२३॥ क्षीरोदश्चामलं हारमजरे च तथांबरे॥ चूडामणिं तथा दिव्यं कुंडले कटकानि च॥२४॥ अर्द्धचंद्रं तथा शुभ्रं केयूरान्सर्वबा
हुषु॥ नूपुरौ विमलौ तद्वद्ग्रैवेयकमनुत्तमं॥२५॥ अंगुलीयकरत्नानि समस्तास्वंगुलीषु च॥ विश्वकर्मा ददौ तस्यै परशुं चातिनिर्मलं॥२६॥ अस्त्राण्यनेकरू
पाणि तथाभेद्यं च दंशनं॥ अम्लानपंकजां मालां शिरस्युरसि चापरां॥२७॥ अददज्जलधिस्तस्यै पंकजं चातिशोभनं॥ हिमवान्वाहनं सिंहं रत्नानि विविधानि
च॥२८॥ ददावशून्यं सुरया पानपात्रं धनाधिपः॥ शेषश्च सर्वनागेशो महामणिविभूषितं॥२९॥ नागहारं ददौ तस्यै धत्ते यः पृथिवीमिमां॥ अन्यैरपि सुरैर्देवी
भूषणैरायुधैस्तथा॥३०॥ संमानिता ननादोच्चैः साट्टहासं मुहुर्मुहुः॥ तस्या नादेन घोरेण कृत्स्नमापूरितं नभः॥३१॥ अमायतातिमहता प्रतिशब्दो महानभू
त्॥ चुक्षुभुः सकला लोकाः समुद्राश्च चकंपिरे॥३२॥ चचाल वसुधा चेलुः सकलाश्च महीधराः॥ जयेति देवाश्च मुदा तामूचुः सिंहवाहिनीं॥३३॥ तुष्टुवुर्मुन

मार्कं· यश्चैनां भक्तिनम्रात्ममूर्त्तयः॥ दृष्ट्वा समस्तं संक्षुब्धं त्रैलोक्यममरारयः॥३४॥ सन्नद्धाखिलसैन्यास्ते समुत्तस्थुरुदायुधाः॥ आः किमेतदिति क्रोधादाभाष्य म
११२ हिषासुरः॥३५॥ अभ्यधावत तं शब्दमशेषैरसुरैर्वृतः॥ स ददर्श ततो देवीं व्याप्तलोकत्रयां त्विषा॥ पादाक्रांत्या नतभुवं किरीटोल्लिखितांबरां॥ क्षोभिताशेष
पातालां धनुर्ज्यानिःस्वनेन तां॥३७॥ दिशो भुजसहस्रेण समंताद्व्याप्य संस्थितां॥ ततः प्रववृते युद्धं तया देव्या सुरद्विषां॥३८॥ शस्त्रास्त्रैर्बहुधा मुक्तैरादीपि
तदिगंतरं॥ महिषासुरसेनानीश्चिक्षुराख्यो महासुरः॥३९॥ युयुधे चामरश्चान्यैश्चतुरंगबलान्वितः॥ रथानामयुतैः षड्भिरुदग्राख्यो महासुरः॥४०॥
अयुध्यतायुतानां च सहस्रेण महाहनुः॥ पंचाशद्भिश्च नियुतैरसिलोमा महासुरः॥४१॥ अयुतानां शतैः षड्भिर्बाष्कलो युयुधे रणे॥ गजवाजिसहस्रौघै
रनेकैः परिवारितः॥४२॥ वृतो रथानां कोट्या च युद्धे तस्मिन्नयुध्यत॥ बिडालाख्योयुतानां च पंचाशद्भिरथायुतैः॥४३॥ युयुधे संयुगे तत्र रथानां परिवा
रितः॥ अन्ये च तत्रायुतशो रथनागहयैर्वृताः॥४४॥ युयुधुः संयुगे देव्या सह तत्र महासुराः॥ कोटिकोटिसहस्रैस्तु रथानां दंतिनां तथा॥४५॥ हयानां च वृ
तो युद्धे तत्राभून्महिषासुरः॥ तोमरैर्भिंदिपालैश्च शक्तिभिर्मुसलैस्तथा॥४६॥ युयुधुः संयुगे देव्या खड्गैः परशुपट्टिशैः॥ केचिच्च चिक्षिपुः शक्तीः केचित्पा
शांस्तथापरे॥४७॥ ■देवीं खड्गप्रहारैस्तु ते तां हंतुं प्रचक्रमुः॥ सापि देवी ततस्तानि शस्त्राण्यस्त्राणि चंडिका॥४८॥ लीलयैव प्रचिच्छेद निजशस्त्रास्त्रवर्षि राम
णी॥ अनायस्तानना देवी स्तूयमाना सुरर्षिभिः॥४९॥ मुमोचासुरदेहेषु शस्त्राण्यस्त्राणि चेश्वरी॥ सोपि क्रुद्धो धुतसटो देव्या वाहनकेसरी॥५०॥ चचारासुरसै ११२

न्येषु वनेष्विव हुताशनः॥ निश्वासान्मुमुचे यांश्च युध्यमाना रणेंबिका॥५१॥ त एव सद्यः संभूता गणाः शतसहस्रशः॥ युयुधुस्ते परशुभिर्भिंदिपालासिपट्टिशैः
॥५२॥ नाशयंतो सुरगणान्देवीशक्त्युपबृंहिताः॥ अवादयंत पटहान्गणाः शंखांस्तथापरे॥५३॥ मृदंगांश्च तथैवान्ये तस्मिन्युद्धमहोत्सवे॥ ततो देवी त्रिशूले
न गदया शक्तिवृष्टिभिः॥५४॥ खड्गादिभिश्च शतशो निजघान महासुरान्॥ पातयामास चैवान्यान्घंटास्वनविमोहितान्॥५५॥ असुरान्भुवि पाशेन बध्वा
चान्यानकर्षयत॥ केचिद्द्विधाकृतास्तीक्ष्णैः खड्गपातैस्तथापरे॥५६॥ विपोथिता निपातेन गदया भुवि शेरते॥ वेमुश्च केचिद्रुधिरं मुसलेन भृशं हताः॥५७॥
केचिन्निपतिता भूमौ भिन्नाः शूलेन वक्षसि॥ निरंतराः शरौघेण कृताः केचिद्रणाजिरे॥५८॥ श्येनानुकारिणः प्राणान्मुमुचुस्त्रिदशार्द्दनाः॥ केषांचिद्बाहवश्छि
न्नाश्छिन्नग्रीवास्तथापरे॥५९॥ शिरांसि पेतुरन्येषामन्ये मध्ये विदारिताः॥ विछिन्नजंघास्त्वपरे पेतुरुर्व्यां महासुराः॥६०॥ एकबाह्वक्षिचरणाः केचिद्देव्या
द्विधाकृताः॥ छिन्नेपि चान्ये शिरसि पतिताः पुनरुत्थिताः॥६१॥ कबंधा युयुधुर्देव्या गृहीतपरमायुधाः॥ ननृतुश्चापरे तत्र युद्धे तूर्यलयाश्रिताः॥६२॥ कबंधा
श्छिन्नशिरसः खड्गशक्त्यृष्टिपाणयः॥ तिष्ठ तिष्ठेति भाषंतो देवीमन्ये महासुराः॥६३॥ पातितै रथनागाश्वैरसुरैश्च वसुंधरा॥ अगम्या साभवत्तत्र भूत्स
महारणा॥६४॥ शोणितौघा महानद्यः सद्यस्तत्र विसुस्रुवुः॥ मध्ये चासुरसैन्यस्य वारणासुरवाजिनां॥६५॥ क्षणेन तन्महासैन्यमसुराणां तथांबिका॥
निन्ये क्षयं यथा वह्निस्तृणदारुमहाचयं॥६६॥ स च सिंहो महानादमुत्सृजन्धुतकेसरः॥ शरीरेभ्यो मरारीणामसूनिव विचिन्वति॥६७॥ देव्या गणैश्च तै

Dr. BHAU DAJI MEMORIAL
Dr. BHAU DAJI MEMORIAL

स्तत्रकृतंयुद्धंतथासुरैः॥यथैषांतुष्टुवुर्देवाःपुष्पवृष्टिमुचोदिवि॥६८॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येमहिषासुरसैन्यवधः॥ ॥
ऋषिरुवाच॥ ॥निहन्यमानंतत्सैन्यमवलोक्यमहासुरः॥सेनानीश्चिक्षुरःकोपाद्ययौयोद्धुमथांबिकां॥१॥सदेवींशरवर्षेणववर्षसमरेसुरः॥यथामे
रुगिरेःशृंगंतोयवर्षेणतोयदः॥२॥तस्यछित्वाततोदेवीलीलयैवशरोत्करान्॥जघानतुरगान्बाणैर्यंतारंचैववाजिनां॥३॥चिछेदचधनुःसद्योध्वजंचा
तिसमुछ्रितं॥विव्याधचैवगात्रेषुछिन्नधन्वानमाशुगैः॥४॥सछिन्नधन्वाविरथोहताश्वोहतसारथिः॥अभ्यधावततांदेवीखड्गचर्मधरोसुरः॥५॥सिंह
माहत्यखड्गेनतीक्ष्णधारेणमूर्द्धनि॥आजघानभुजेसव्येदेवीमप्यतिवेगवान्॥६॥तस्याःखड्गोभुजेप्राप्यपफालनृपनंदन॥ततोजग्राहशूलंसकोपाद
रुणलोचनः॥७॥चिक्षेपचततस्तत्तुभद्रकाल्यांमहासुरः॥जाज्वल्यमानंतेजोभीरविबिंबमिवांबरात्॥८॥दृष्ट्वातदापतछूलंदेवीशूलममुंचत॥तछूलं
शतधातेननीतंसचमहासुरः॥९॥हतेतस्मिन्महावीर्येमहिषस्यचमूपतौ॥जगामगजारूढश्चामरस्त्रिदशार्द्दनः॥१०॥सोपिशक्तिंमुमोचाथदेव्या
स्तामंबिकाद्रुतं॥हुंकाराभिहतांभूमौपातयामासनिःप्रभां॥११॥भग्नांशक्तिंनिपतितांदृष्ट्वाक्रोधसमन्वितः॥चिक्षेपचामरःशूलंबाणैस्तदपिसाछिनत्
॥१२॥ततःसिंहसमुत्पत्यगजकुंभांतरेस्थितः॥बाहुयुद्धेनयुयुधेतेनोच्चैस्त्रिदशारिणा॥१३॥युध्यमानौततस्तौतुतस्मान्नागान्महींगतौ॥युयुधातेतिसंर
ब्धौप्रहारैरतिदारुणैः॥१४॥ततोवेगात्खमुत्पत्यनिपत्यचामृगारिणा॥करप्रहारेणशिरश्चामरस्यपृथक्कृतं॥१५॥उदग्रश्चरणेदेव्याशिलावृक्षादिभिर्ह राम ११३

तः॥दंतमुष्टितलैश्चैवकरालश्चनिपातितः॥१६॥देवीक्रुद्धागदापातैश्चूर्णयामासचोद्धतं॥बाष्कलंभिंदिपालेनबाणैस्ताम्रंतथांधकं॥१७॥उग्रास्य
मुग्रवीर्यंचतथैवचमहाहनुं॥त्रिनेत्राचत्रिशूलेनजघानपरमेश्वरी॥१८॥बिडालस्यासिनाकायात्पातयामासवैशिरः॥दुर्द्धरंदुर्मुखंचोभौशरैर्नि
न्येक्षमक्षयं॥१९॥एवंसंक्षीयमाणेतुस्वसैन्येमहिषासुरः॥माहिषेणस्वरूपेणत्रासयामासतान्गणान्॥२०॥कांश्चित्तुंडप्रहारेणखुरक्षेपैस्त
थापरान्॥लांगूलताडितांश्चान्यान्शृंगाभ्यांचविदारितान्॥२१॥वेगेनकांश्चिदपरान्नादेनभ्रमणेनच॥निश्वासपवनेनान्यान्पातयामासभूतले॥२२॥
निपात्यप्रमथानीकमभ्यधावतसोसुरः॥सिंहंहंतुंमहादेव्याःकोपंचक्रेततोंबिका॥२३॥सोपिकोपान्महावीर्यःक्षुरक्षुण्णमहीतलः॥शृंगाभ्यांपर्वता
नुच्चांश्चिक्षेपचननादच॥२४॥वेगभ्रमणविक्षुण्णामहीतस्यव्यशीर्यत॥लांगूलेनाहतश्चाब्धिःप्लावयामाससर्वतः॥२५॥धुतशृंगविभिन्नाश्चखंडंखंडं
ययुर्घनाः॥श्वासानिलास्ताःशतशोनिपेतुर्नभसोचलाः॥२६॥इतिक्रोधसमाध्मातमापतंतंमहासुरं॥दृष्ट्वासाचंडिकाकोपंतद्वधायतदाकरोत्
॥२७॥साक्षिप्त्वातस्यवैपाशंतंबबंधमहासुरं॥तत्याजमाहिषंरूपंसोपिबद्धोमहामृधे॥२८॥ततःसिंहोभवत्सद्योयावत्तस्यांबिकाशिरः॥छिनत्ति
तावत्पुरुषःखड्गपाणिरदृश्यत॥२९॥ततएवाशुपुरुषंदेवीचिछेदसायकैः॥तंखड्गचर्मणासार्द्धंततःसोभून्महागजः॥३०॥करेणचमहासिंहंतंच
कर्षजगर्जच॥कर्षतस्तुकरंदेवीखड्गेननिरकृंतत॥३१॥ततोमहासुरोभूयोमाहिषंवपुरास्थितः॥तथैवक्षोभयामासत्रैलोक्यंसचराचरं॥३२॥ततःक्रु

स्तत्र कृतं युद्धं तथासुरैः॥ यथैषां तुष्टुवुर्देवाः पुष्पवृष्टिमुचो दिवि॥६८॥ ॥इति श्रीमार्कंडेयपुराणे सावर्णिके मन्वंतरे देवीमहात्म्ये महिषासुरसैन्यवधः॥ ॥
ऋषिरुवाच॥ ॥निहंन्यमानं तत्सैन्यमवलोक्य महासुरः॥ सेनानीश्चिक्षुरः कोपाद्ययौ योद्धुमथांबिकां॥१॥ स देवीं शरवर्षेण ववर्ष समरेसुरः॥ यथा मे
रुगिरेः शृंगं तोयवर्षेण तोयदः॥२॥ तस्य छित्वा ततो देवी लीलयैव शरोत्करान्॥ जघान तुरगान्बाणैर्यंतारं चैव वाजिनां॥३॥ चिछेद च धनुः सद्यो ध्वजं चा
तिसमुछ्रितं॥ विव्याध चैव गात्रेषु छिन्नधन्वानमाशुगैः॥४॥ स छिन्नधन्वा विरथो हताश्वो हतसारथिः॥ अभ्यधावत तां देवीं खड्गचर्मधरोसुरः॥५॥ सिंह
माहत्य खड्गेन तीक्ष्णधारेण मूर्द्धनि॥ आजघान भुजे सव्ये देवीमप्यतिवेगवान्॥६॥ तस्याः खड्गो भुजे प्राप्य पफाल नृपनंदन॥ ततो जग्राह शूलं स कोपाद
रुणलोचनः॥७॥ चिक्षेप च ततस्तत्तु भद्रकाल्यां महासुरः॥ जाज्वल्यमानं तेजोभी रविबिंबमिवांबरात्॥८॥ दृष्ट्वा तदापतच्छूलं देवी शूलममुंचत॥ तच्छूलं
शतधा तेन नीतं स च महासुरः॥९॥ हते तस्मिन्महावीर्ये महिषस्य चमूपतौ॥ आजगाम गजारूढश्चामरस्त्रिदशार्दनः॥१०॥ सोपि शक्तिं मुमोचाथ देव्या
स्तामंबिका द्रुतं॥ हूंकाराभिहतां भूमौ पातयामास निःप्रभां॥११॥ भग्नां शक्तिं निपतितां दृष्ट्वा क्रोधसमन्वितः॥ चिक्षेप चामरः शूलं बाणैस्तदपि साछिनत्
॥१२॥ ततः सिंहः समुत्पत्य गजकुंभांतरे स्थितः॥ बाहुयुद्धेन युयुधे तेनोच्चैस्त्रिदशारिणा॥१३॥ युध्यमानौ ततस्तौ तु तस्मान्नागान्महीं गतौ॥ युयुधातेतिसंर
ब्धौ प्रहारैरतिदारुणैः॥१४॥ ततो वेगात्खमुत्पत्य निपत्य च मृगारिणा॥ करप्रहारेण शिरश्चामरस्य पृथक्कृतं॥१५॥ उदग्रश्च रणे देव्या शिलावृक्षादिभिर्ह

तः॥ दंतमुष्टितलैश्चैव करालश्च निपातितः॥१६॥ देवी क्रुद्धा गदापातैश्चूर्णयामास चोद्धतं॥ बाष्कलं भिंदिपालेन बाणैस्ताम्रं तथांधकं॥१७॥ उग्रास्य
मुग्रवीर्यं च तथैव च महाहनुं॥ त्रिनेत्रा च त्रिशूलेन जघान परमेश्वरी॥१८॥ बिडालस्यासिना कायात्पातयामास वै शिरः॥ दुर्द्धरं दुर्मुखं चोभौ शरैर्नि
न्ये यमक्षयं॥१९॥ एवं संक्षीयमाणे तु स्वसैन्ये महिषासुरः॥ माहिषेण स्वरूपेण त्रासयामास तान्गणान्॥२०॥ कांश्चित्तुंडप्रहारेण खुरक्षेपैस्त
थापरान्॥ लांगूलताडितांश्चान्यान्शृंगाभ्यां च विदारितान्॥२१॥ वेगेन कांश्चिदपरान्नादेन भ्रमणेन च॥ निश्वासपवनेनान्यान्पातयामास भूतले॥२२॥
निपात्य प्रमथानीकमभ्यधावत सोसुरः॥ सिंहं हंतुं महादेव्याः कोपं चक्रे ततोंबिका॥२३॥ सोपि कोपान्महावीर्यः खुरक्षुण्णमहीतलः॥ शृंगाभ्यां पर्वता
नुच्चांश्चिक्षेप च ननाद च॥२४॥ वेगभ्रमणविक्षुण्णा मही तस्य व्यशीर्यत॥ लांगूलेनाहतश्चाब्धिः प्लावयामास सर्वतः॥२५॥ धुतशृंगविभिन्नाश्च खंडं खं
डं ययुर्घनाः॥ श्वासानिलास्ताः शतशो निपेतुर्नभसोचलाः॥२६॥ इति क्रोधसमाध्मातमापतंतं महासुरं॥ दृष्ट्वा सा चंडिका कोपं तद्वधाय तदाकरोत्
॥२७॥ सा क्षिप्त्वा तस्य वै पाशं तं बबंध महासुरं॥ तत्याज माहिषं रूपं सोपि बद्धो महामृधे॥२८॥ ततः सिंहोभवत्सद्यो यावत्तस्यांबिका शिरः॥ छिनत्ति
तावत्पुरुषः खड्गपाणिरदृश्यत॥२९॥ तत एवाशु पुरुषं देवी चिछेद सायकैः॥ तं खड्गचर्मणा सार्द्धं ततः सोभून्महागजः॥३०॥ करेण च महासिंहं तं च
कर्ष जगर्ज च॥ कर्षतस्तु करं देवी खड्गेन निरकृंतत॥३१॥ ततो महासुरो भूयो माहिषं वपुरास्थितः॥ तथैव क्षोभयामास त्रैलोक्यं सचराचरं॥३२॥ ततः क्रु

ह्वाजगन्माताचंडिकापानमुत्तमं॥पपौपुनःपुनश्चैवजहासारुणलोचना॥३३॥ननर्दचासुरःसोपिबलवीर्यमदोद्धतः॥विषाणाभ्यांचविक्षेपचंडिकांप्रति
भूधरान्॥३४॥साचतान्प्रहितांस्तेनचूर्णयंतीशरोत्करैः॥उवाचतंमदोद्धूतमुखरागाकुलाक्षरं॥३५॥देव्युवाच॥गर्ज्जगर्ज्जक्षणंमूढमधुयावत्पिबाम्य
हं॥मयात्वयिहतेत्रैवगर्जिष्यंत्याशुदेवताः॥३६॥ऋषिरुवाच॥एवमुक्त्वासमुत्पत्यसारूढातंमहासुरं॥पादेनाक्रम्यकंठेचशूलेनैनमताडयत्॥३७॥
ततःसोपिपदाक्रांतस्तयानिजमुखात्ततः॥अर्द्धनिष्क्रांतएवातिदेव्यावीर्येणसंवृतः॥अर्द्धनिष्क्रांतएवासौयुध्यमानोमहासुरः॥तयामहासिनादेव्या
शिरश्छित्वानिपातितः॥३९॥ततोहाहाकृतंसर्वंदैत्यसैन्यंननाशतत्॥प्रहर्षंचपरंजग्मुःसकलादेवतागणाः॥४०॥तुष्टुवुस्तांसुरादेवींसहदिव्यैर्म
हर्षिभिः॥जगुर्गंधर्वपतयोननृतुश्चाप्सरोगणाः॥४१॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येमहिषासुरवधः॥ ॥ऋषिरुवाच॥
शक्रादयःसुरगणानिहतेतिवीर्येतस्मिन्दुरात्मनिसुरारिबलेचदेव्या॥तांतुष्टुवुःप्रणतिनम्रशिरोधरांसावाग्भिःप्रहर्षपुलकोद्गमचारुदेहाः॥१॥दे
व्यायाततमिदंजगदात्मशक्त्यानिःशेषदेवगणशक्तिसमूहमूर्त्या॥[redacted]तामंबिकामखिलदेवमहर्षिपूज्यांभक्त्यानताःस्मविदधा
तुशुभानिसान॥२॥यस्याःप्रभावमतुलंभगवाननंतोब्रह्माहरश्चनहिवक्तुमलंबलंच॥साचंडिकाखिलजगत्परिपालनायनाशायचाशुभभयस्यमतिं
करोतु॥३॥याश्रीःस्वयंसुकृतिनांभवनेष्वलक्ष्मीःपापात्मनांकृतधियांहृदयेषुबुद्धिः॥श्रद्धासतांकुलजनप्रभवस्यलज्जातांत्वांनताःस्मपरिपालयदे

विविश्वं॥४॥किंवर्णयामतवरूपमचिंत्यमेतत्किंचातिवीर्यमसुरक्षयकारिभूरि॥किंचाहवेषुचरितानितवातियानिसर्वेषुदेव्यसुरदेवगणादिके
षु॥५॥हेतुःसमस्तजगतांत्रिगुणापिदोषैर्नज्ञायसेहरिहरादिभिरप्यपारा॥सर्वाश्रयाखिलमिदंजगदंशभूतमव्याकृताहिपरमाप्रकृतिस्त्वमाद्या
॥६॥यस्याःसमस्तसुरतोरेसमुदीरणेनतृप्तिंप्रयातिसकलेषुमखेषुदेवि॥स्वाहासिवैपितृगणस्यचतृप्तिहेतुरुच्चार्यसेत्वमतएवजनैःस्वधाच॥७॥या
मुक्तिहेतुरविचिंत्यमहाव्रतात्वमभ्यस्यसेसुनियतेंद्रियतत्वसारैः॥मोक्षार्थिभिर्मुनिभिरस्तसमस्तदोषैर्विद्यासिसाभगवतीपरमाहिदेवि॥८॥शब्दा
त्मिकासुविमलर्ग्यजुषांनिधानमुद्गीथरम्यपदपाठवतांचसाम्नां॥देवीत्रयीभगवतीभवभावनायवार्त्ताचसर्वजगतांपरमार्त्तिहंत्री॥९॥मेधासिदेविवि
दिताखिलशास्त्रसारादुर्गासिदुर्गभवसागरनौरसंगा॥श्रीःकैटभारिहृदयैककृताधिवासागौरीत्वमेवशशिमौलिकृतप्रतिष्ठा॥१०॥ईषत्सहासममलंप
रिपूर्णचंद्रबिंबानुकारिकनकोत्तमकांतिकांतं॥अत्यद्भुतंप्रहृतमात्तरुषातथापिवक्त्रंविलोक्यसहसामहिषासुरेण॥११॥दृष्ट्वातुदेविकुपितंभ्रुकुटीकरा
लमुद्यच्छशांकसदृशच्छवियन्नसद्यः॥प्राणान्मुमोचमहिषस्तदतीवचित्रंकैर्जीव्यतेहिकुपितांतकदर्शनेन॥१२॥देविप्रसीदपरमाभवतीभवायसद्योविना
शयसिकोपवतीकुलानि॥विज्ञातमेतदधुनैवयदस्तमेतन्नीतंबलंसुविपुलंमहिषासुरस्य॥१३॥तेसंमताजनपदेषुधनानितेषांतेषांयशांसिनचसीद
तिधर्मवर्गः॥धन्यास्तएवनिभृतात्मजभृत्यदारायेषांसदाभ्युदयदाभवतीप्रसन्ना॥१४॥धर्म्याणिदेविसकलानिसदैवकर्माण्यत्यादृतःप्रतिदिनंसुकृतीक

ति॥स्वर्गंप्रयातिनततोभवतीप्रसादाल्लोकत्रयेपिफलदाननुदेवितेन॥१५॥दुर्गेस्मृताहरसिभीतिमशेषजंतोःस्वस्थैःस्मृतामतिमतीवशुभांददासि॥दारिद्र्य
दुःखभयहारिणिकात्वदन्यासर्वोपकारकरणायसदार्द्रचित्ता॥१६॥एभिर्हतैर्जगदुपैतिसुखंतथैतेकुर्वंतुनामनरकायचिरायपापं॥संग्राममृत्युमधिगम्य
दिवंप्रयांतुमत्वेतिनूनमहितान्विनिहंसिदेवि॥१७॥दृष्ट्वैवकिंनभवतीप्रकरोतिभस्मसर्वासुरानरिषुयत्प्रहिणोषिशस्त्रं॥लोकान्प्रयांतुरिपवोपिहिशस्त्रपूता
इत्थंमतिर्भवतितेष्वपितेतिसाध्वी॥१८॥खड्गप्रभानिकरविस्फुरणैस्तथोग्रैःशूलाग्रकांतिनिवहेनदृशोसुराणां॥यन्नागताविलयमंशुमदिंदुखंडयोग्यान
नंतवविलोकयतांतदेतत्॥१९॥दुर्वृत्तवृत्तशमनंतवदेविशीलंरूपंतथैतदविचिंत्यमतुल्यमन्यैः॥वीर्यंचहंतृहृतदेवपराक्रमाणांवैरिष्वपिप्रकटितैवदयात्व
येत्थं॥२०॥केनोपमाभवतुतेस्यपराक्रमस्यरूपंचशत्रुभयकार्यतिहारिकुत्र॥चित्तेकृपासमरनिष्ठुरताचदृष्टात्वय्येवदेविवरदेभुवनत्रयेपि॥२१॥त्रैलोक्य
मेतदखिलंरिपुनाशनेनत्रातंत्वयासमरमूर्द्धनितेपिहत्वा॥नीतादिवंरिपुगणाभयमप्यपास्तमस्माकमुन्मदसुरारिभवंनमस्ते॥२२॥शूलेनपाहिनोदेवि
पाहिखड्गेनचांबिके॥घंटास्वनेननःपाहिचापज्यानिःस्वनेनच॥२३॥प्राच्यांरक्षप्रतीच्यांचचंडिकेरक्षदक्षिणे॥भ्रामणेनात्मशूलस्यउत्तरस्यांतथेश्वरी
॥२४॥सौम्यानियानिरूपाणित्रैलोक्येविचरंतिते॥यानिचात्यर्थघोराणितैरक्षास्मांस्तथाभुवं॥२५॥खड्गशूलगदादीनियानिचास्त्राणितेंबिके॥करपल्लव राम
संगीनितैरस्मान्रक्षसर्वतः॥२६॥ऋषिरुवाच॥एवंस्तुतासुरैर्दिव्यैःकुसुमैर्नंदनोद्भवैः॥अर्चिताजगतोधात्रीतथागंधानुलेपनैः॥२७॥भक्त्यासमस्तैस्त्रिद ११५

शैर्दिव्यैर्धूपैस्तुधूपिता॥प्राहप्रसादसुमुखीसमस्तान्प्रणतान्सुरान्॥२८॥देव्युवाच॥व्रियतांत्रिदशाःसर्वेयदस्मत्तोभिवांछितं॥ददाम्यहमतिप्रीत्यास्तवैरेभिस्सु
पूजिता॥२९॥देवाऊचुः॥भगवत्याकृतंसर्वंनकिंचिदवशिष्यते॥यदयंनिहतःशत्रुरस्माकंमहिषासुरः॥३०॥यदिचापिवरोदेयस्त्वयास्माकंमहेश्वरि॥संस्मृता
संस्मृतात्वन्नोहिंसेथाःपरमापदः॥यश्चमर्त्यःस्तवैरेभिस्त्वांस्तोष्यत्यमलानने॥तस्यवित्तर्द्धिविभवैर्धनदारादिसंपदां॥३२॥वृद्धयेस्मत्प्रसन्नात्वंभवेथाःसर्व
दांबिके॥ऋषिरुवाच॥इतिप्रसादितादेवैर्जगतोर्थेतथात्मनः॥तथेत्युक्त्वाभद्रकालीबभूवांतर्हितानृप॥३३॥इत्येतत्कथितंभूपसंभूतासायथापुरा॥देवीदेव
शरीरेभ्योजगत्त्रयहितैषिणी॥३४॥पुनश्चगौरीदेहासासमुद्भूतायथाभवत्॥वधायदुष्टदैत्यानांतथाशुंभनिशुंभयोः॥३५॥रक्षणायचलोकानांदेवाना
मुपकारिणी॥तच्छृणुष्वमयाख्यातंयथावत्कथयामिते॥३६॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येमहिषासुरवधःसमाप्तः॥ ॥ऋषि
रुवाच॥ ॥पुराशुंभनिशुंभाभ्यामसुराभ्यांशचीपतेः॥त्रैलोक्यंयज्ञभागाश्चहृतामदबलाश्रयात्॥१॥तावेवसूर्यतांतद्वदधिकारंतथैंदवं॥कौबेरमथया
म्यंचचक्रातेवरुणस्यच॥२॥तावेवपवनर्द्धिंचचक्रतुर्वह्निकर्मच॥ततोदेवाविनिर्द्धूताभ्रष्टराज्याःपराजिताः॥३॥हृताधिकारास्त्रिदशास्ताभ्यांसर्वेनिरा
कृताः॥महासुराभ्यांतांदेवींसंस्मरंत्यपराजितां॥४॥तयास्माकंवरोदत्तोयथापत्सुस्मृताखिलाः॥भवतांनाशयिष्यामितत्क्षणात्परमापदः॥५॥इतिकृत्वा
मतिंदेवाहिमवंतंनगेश्वरं॥जग्मुस्तत्रततोदेवींविष्णुमायांप्रतुष्टुवुः॥६॥देवाऊचुः॥नमोदेव्यैमहादेव्यैशिवायैसततंनमः॥नमःप्रकृत्यैभद्रायैनियताःप्रण

मार्कं· ११६ ताःस्मतां॥७॥रौद्रायैनमोनित्यायैगौर्यैधात्र्यैनमोनमः॥ज्योत्स्नायैचेंदुरूपिण्यैसुखायैसततंनमः॥८॥कल्याण्यैप्रणतांवृध्यैसिद्ध्यैकूर्म्यैनमोनमः॥नैर्ऋत्यै
भूभृतांलक्ष्म्यैशर्वाण्यैतेनमोनमः॥९॥दुर्गायैदुर्गपारायैसारायैसर्वकारिण्यै॥ख्यात्यैतथैवकृष्णायैधूम्रायैसततंनमः॥१०॥अतिसौम्यातिरौद्रायैन
तास्तस्यैनमोनमः॥नमोजगत्प्रतिष्ठायैदेव्यैकृत्यैनमोनमः॥११॥यादेवीसर्वभूतेषुविष्णुमायेतिशब्दिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥
॥१२॥यादेवीसर्वभूतेषुचेतनेत्यभिधीयते॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥१३॥यादेवीसर्वभूतेषुबुद्धिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥१४॥
यादेवीसर्वभूतेषुनिद्रारूपेणसंस्थिता॥नमस्तस्यै॰नमः॥१५॥यादेवीसर्वभूतेषुक्षुधारूपेणसंस्थिता॥नमस्तस्यै॰नमः॥१६॥यादेवीसर्वभूतेषुछायारू
पेणसंस्थिता॥नमस्तस्यै॰नमः॥१७॥यादेवीसर्वभूतेषुशक्तिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥१८॥यादेवीसर्वभूतेषुतृष्णारूपेणसंस्थिता॥नमस्तस्यै॰न
मः॥१९॥यादेवीसर्वभूतेषुक्षांतिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२०॥यादेवीसर्वभूतेषुजातिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२१॥यादेवीसर्वभूतेषु
लज्जारूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२२॥यादेवीसर्वभूतेषुशांतिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२३॥यादेवीसर्वभूतेषुश्रद्धारूपेणसंस्थिता॥
नमस्तस्यै॰नमः॥२४॥यादेवीसर्वभूतेषुकांतिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२५॥यादेवीसर्वभूतेषुलक्ष्मीरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२६॥यादे राम
वीसर्वभूतेषुधृतिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२७॥यादेवीसर्वभूतेषुवृत्तिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥२८॥यादेवीसर्वभूतेषुस्मृतिरूपे ११६

णसंस्थिता॥नमस्तस्यै॰नमः॥२९॥यादेवीसर्वभूतेषुदयारूपेणसंस्थिता॥नमस्तस्यै॰नमः॥३०॥यादेवीसर्वभूतेषुतुष्टिरूपेणसंस्थिता॥नमस्तस्यै॰नमः
॥३१॥यादेवीसर्वभूतेषुपुष्टिरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥३२॥यादेवीसर्वभूतेषुमातृरूपेणसंस्थिता॥नमस्तस्यै॰नमः॥३३॥यादेवीसर्वभूतेषु
भ्रांतिरूपेणसंस्थिता॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥३४॥इंद्रियाणामधिष्ठात्रीभूतानामखिलेषुया॥भूतेषुसततंतस्यैव्याप्तिदेव्यैन
मोनमः॥३५॥चितिरूपेणयाकृत्स्नमेतद्व्याप्यस्थिताजगत्॥नमस्तस्यैनमस्तस्यैनमस्तस्यैनमोनमः॥३६॥स्तुतासुरैःपूर्वमभिष्टसंश्रयात्तथासुरें
द्रेणदिनेषुसेविता॥करोतुसानःशुभहेतुरीश्वरीशुभानिभद्राण्यभिहंतुचापदः॥३७॥यासांप्रतंचोद्धतदैत्यतापितैरस्माभिरीशाचसुरैर्नमस्यते॥
याचस्मृतातत्क्षणमेवहंतिनःसर्वापदोभक्तिविनम्रमूर्त्तिभिः॥३८॥ऋषिरुवाच॥एवंस्तवादियुक्तानांदेवानांतत्रपार्वती॥स्नातुमभ्याययौतोयेजह्नु
व्यानृपनंदन॥३९॥साब्रवीत्तान्सुरान्सुभ्रूर्भवद्भिःस्तूयतेत्रका॥शरीरकोशतश्चास्याःसमुद्भूताब्रवीच्छिवा॥४०॥स्तोत्रंममैतत्क्रियतेशुंभदैत्यनिराकृतैः
देवैःसमेतैःसमरेनिशुंभेनपराजितैः॥४१॥शरीरकोशाद्यत्तस्याःपार्वत्यानिःसृतांबिका॥कौशिकीतिसमस्तेषुततोलोकेषुगीयते॥४२॥तस्यांविनि
र्गतायांतुकृष्णाभूत्सापिपार्वती॥कालिकेतिसमाख्याताहिमाचलकृताश्रया॥४३॥ततोंबिकांपरंरूपंबिभ्राणांसुमनोहरं॥ददर्शचंडोमुंडश्चभृत्यौशुंभ
निशुंभयोः॥ताभ्यांशुंभायचाख्याताअतीवसुमनोहरा॥काप्यास्तेस्त्रीमहाराजभासयंतीहिमाचलं॥४५॥नैवतादृक्कचिद्रूपंदृष्टंकेनचिदुत्तमं॥ज्ञा

मतांकाप्यसौदेवीगृह्यतांवासुरेश्वर॥४६॥स्त्रीरत्नमतिचार्वंगीद्योतयंतीदिशस्त्विषा॥सातुतिष्ठतिदैत्येंद्रतांभवान्द्रष्टुमर्हति॥४७॥यानिरत्नानिमणयो
गजाश्वादीनिवैप्रभो॥त्रैलोक्येतुसमस्तानिसांप्रतंभांतितेगृहे॥४८॥ऐरावतःसमानीतोगजरत्नंपुरंदरात्॥पारिजाततरुश्चायंतथैवोच्चैःश्रवा
हयः॥४९॥विमानंहंससंयुक्तमेतत्तिष्ठतितेंगणे॥रत्नभूतमिहानीतंयदासीद्वेधसोद्भुतं॥५०॥निधिरेषमहापद्मःसमानीतोधनेश्वरात्॥किंजल्कि
नींददौचाब्धिर्मालामम्लानपंकजां॥५१॥छत्रंतेवारुणंगेहेकांचनस्रावितिष्ठति॥तथायंस्यंदनवरोयःपुरासीत्प्रजापतेः॥५२॥मृत्योरुत्क्रांतिदाना
मशक्तिरीशत्वयाहृता॥पाशःसलिलराजस्यभ्रातुस्तवपरिग्रहे॥५३॥निशुंभस्याब्धिजाताश्चसमस्तारत्नजातयः॥वह्निरपिददौतुभ्यमग्निशौचेच
वाससि॥५४॥एवंदैत्येंद्ररत्नानिसमस्तान्याहृतानिते॥स्त्रीरत्नमेषाकल्याणीत्वयाकस्मान्नगृह्यते॥५५॥ऋषिरुवाच॥निशम्येतिवचःशुंभःसतदा
चंडमुंडयोः॥प्रेषयामाससुग्रीवंदूतंदेव्यामहासुरं॥५६॥इतिचेतिचवक्तव्यासागत्वावचनान्मम॥यथाचाभ्येतिसंप्रीत्यातथाकार्यंत्वयालघु॥५७॥
सतत्रगत्वाशैलास्तेशैलोद्देशेतिशोभने॥सादेवीतांततःप्राहश्लक्ष्णंमधुरयागिरा॥५८॥दूतउवाच॥देविदैत्येश्वरःशुंभस्त्रैलोक्येपरमेश्वरः॥दू
तोहंप्रेषितस्तेनत्वत्सकाशमिहागतः॥५९॥अव्याहताज्ञःसर्वासुयःसदादेवयोनिषुनिर्जिताखिलदैत्यारिःसयदाहश्रृणुष्वतत्॥६०॥ममत्रैलोक्यम
खिलंममदेवावशानुगाः॥यज्ञभागानहंसर्वानुपाश्नामिपृथक्पृथक्॥६१॥त्रैलोक्येवररत्नानिममवश्यान्यशेषतः॥तथैवगजरत्नानिहृत्वादेवें

वाहनं॥६२॥क्षीरोदमथनोद्भूतमश्वरत्नंममामरैः॥उच्चैःश्रवससंज्ञंतत्प्रणिपत्यसमर्पितं॥६३॥यानिचान्यानिदेवेषुगंधर्वेषूरगेषुच॥रत्नभूता
निभूतानितानिमय्येवशोभने॥६४॥स्त्रीरत्नभूतांत्वांदेविलोकेमन्यामहेवयं॥सात्वमस्मानुपागच्छयतोरत्नभुजोवयं॥६५॥मांवाममानुजंवा
पिनिशुंभमुरुविक्रमं॥भजत्वंचंचलापांगिरत्नभूतासिवैयतः॥६६॥परमैश्वर्यमतुलंप्राप्स्यसेमत्परिग्रहात्॥एतद्बुध्यासमालोच्यमत्परि
ग्रहतांव्रज॥६७॥ऋषिरुवाच॥इत्युक्तासातदादेवीगंभीरांतःस्मिताजगौ॥दुर्गाभगवतीभद्रायययेदंधार्यतेजगत्॥६८॥देव्युवाच॥सत्यमुक्तंत्व
यानात्रमिथ्याकिंचित्त्वयोदितं॥त्रैलोक्याधिपतिःशुंभोनिशुंभश्चापितादृशः॥६९॥किंत्वत्रयत्प्रतिज्ञातंमिथ्यातत्क्रियतेकथं॥श्रूयतामल्पबुद्धित्वा
त्प्रतिज्ञायांकृतापुरा॥७०॥योमांजयतिसंग्रामेयोमेदर्पंव्यपोहति॥योमेप्रतिबलोलोकेसमेभर्ताभविष्यति॥७१॥तदागच्छतुशुंभोत्रनिशुंभो
वामहासुरः॥मांजित्वाकिंचिरेणात्रपाणिंगृह्णातुमेलघु॥७२॥दूतउवाच॥अवलिप्तासिमैवंत्वंदेविब्रूहिममाग्रतः॥त्रैलोक्येकःपुमांस्तिष्ठे
दग्रेशुंभनिशुंभयोः॥७३॥अन्येषामपिदैत्यानांसर्वेदेवानवैयुधि॥तिष्ठंतिसंमुखेदेविकिंपुनःस्त्रीत्वमेकिका॥७४॥इंद्राद्याःसकलादेवास्त
स्थुर्येषानसंयुगे॥शुंभादीनांकथंतेषांस्त्रीप्रयास्यसिसंमुखं॥७५॥सात्वंगच्छमयैवोक्तापार्श्वंशुंभनिशुंभयोः॥केशाकर्षणनिर्धूतगौरवामा
गमिष्यसि॥७६॥देव्युवाच॥एवमेतद्बलीशुंभोनिशुंभश्चातिवीर्यवान्॥किंकरोमिप्रतिज्ञामेयदनालोचितापुरा॥७७॥सत्वंगच्छमयोक्तंतेयदेतत्स

श्री

र्वमाहतः॥तदावस्थासु॰रेंद्रायसत्वयुक्तं करोतुयत्॥७८॥ ॥इतिमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेव्यादूतसंवादः॥ ॥ऋषिरुवाच॥ ॥
इत्याकर्ण्यवचोदेव्याःसदूतोमर्षपूरितः॥समाचष्टसमागम्यदैत्यराजायविस्तरात्॥१॥तस्यदूतस्यतद्वाक्यमाकर्ण्यासुरराट्ततः॥सक्रोधःप्राहदैत्यानामधि
पंधूम्रलोचनं॥२॥हेधूम्रलोचनाशुत्वंस्वसैन्यपरिवारितः॥तामानयबलाद्दुष्टांकेशाकर्षणविह्वलां॥३॥तत्परित्राणदःकश्चिद्यदिवोत्तिष्ठतेपरः॥
सहंतव्योमरोवापियक्षोगंधर्वएववा॥४॥ऋषिरुवाच॥तेनाज्ञप्तस्ततःशीघ्रंसदैत्योधूम्रलोचनः॥वृतःषष्ट्यासहस्राणामसुराणांद्रुतंययौ॥५॥सदृ
ष्ट्वातांततोदेवींतुहिनाचलसंस्थितां॥जगादोच्चैःप्रयाहीतिमूलंशुंभनिशुंभयोः॥६॥नचेत्प्रीत्याद्यभवतीमद्भर्तारमुपैष्यति॥ततोबलान्नयाम्येषाकेशा
कर्षणविह्वलां॥७॥देव्युवाच॥दैत्येश्वरेणप्रहितोबलवान्बलसंवृतः॥बलान्नयसिमामेवंततःकिंतेकरोम्यहं॥८॥ऋषिरुवाच॥इत्युक्तःसोभ्यधा
वत्तामसुरोधूम्रलोचनः॥हूंकारेणैवतंभस्मसाच्चकारांबिकाततः॥९॥अथक्रुद्धंमहासैन्यमसुराणांतथांबिकां॥ववर्षसायकैस्तीक्ष्णैस्तथाशक्तिप
रश्वधैः॥१०॥ततोधुतसटःकोपात्कृत्वानादंसुभैरवं॥पपातासुरसेनायांसिंहोदेव्याःस्ववाहनः॥११॥कांश्चित्करप्रहारेणदैत्यानास्येनचापरान्॥आक्रां
त्याचाधरेणान्यान्जघानसुमहासुरान्॥१२॥केषांचित्पाटयामासनखैःकोष्ठानिकेसरी॥तथातलप्रहारेणशिरांसिकृतवान्पृथक्॥१३॥विच्छिन्नबाहुशि राम
रसःकृतास्तेनतथापरे॥पपौचरुधिरंकोष्ठादन्येषांधुतकेसरः॥१४॥क्षणेनतद्बलंसर्वंक्षयंनीतंमहात्मना॥तेनकेसरिणादेव्यावाहनेनातिकोपिना॥ ११८

॥१५॥श्रुत्वातमसुरंदेव्यानिहतंधूम्रलोचनं॥बलंचक्षयितंकृत्स्नंदेवीकेसरिणाततः॥१६॥चुकोपदैत्याधिपतिःशुंभःप्रस्फुरिताधरः॥आज्ञाप
यामासचतौचंडमुंडौमहासुरौ॥१७॥हेचंडहेमुंडबलैर्बहुलैःपरिवारितौ॥तत्रगच्छतगत्वाचसासमानीयतांलघु॥१८॥केशेष्वाकृष्यबध्वावायदिवः
संशयोयुधि॥तदाशेषायुधैःसर्वैरसुरैर्विनिहंन्यतां॥तस्यांहतायांदुष्टायांसिंहेचविनिपातिते॥शीघ्रमागम्यतांबध्वागृहीत्वातामथांबिकां॥२०॥
॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येधूम्रलोचनवधः॥ ॥ऋषिरुवाच॥आज्ञप्तास्तेततोदैत्याश्चंडमुंडपुरोगमाः॥चतुरंग
बलोपेताययुरभ्युद्यतायुधाः॥१॥ददृशुस्तेततोदेवीमीषद्धासांव्यवस्थितां॥सिंहस्योपरिशैलेंद्रशृंगेमहतिकांचने॥२॥तेदृष्ट्वातांसमादातुमुद्य
मंचक्रुरुद्यताः॥आकृष्टचापासिधरास्तथान्येतत्समीपगाः॥३॥ततःकोपंचकारोच्चैरंबिकातानरीन्प्रति॥कोपेनचास्यावदनंमसीवर्णमभू
त्तदा॥४॥भ्रुकुटीकुटिलात्तस्याललाटफलकाद्द्रुतं॥कालीकरालवदनाविनिष्क्रांतासिपाशिनी॥५॥विचित्रखट्वांगधरानरमालाविभूषणा॥
द्वीपिचर्मपरीधानाशुष्कमांसातिभैरवा॥६॥अतिविस्तारवदनाजिह्वाललनभीषणा॥निमग्नारक्तनयनानादापूरितदिङ्मुखा॥७॥सावेगेना
भिपतिताघातयंतीमहासुरान्॥सैन्येतत्रसुरारीणामभक्षयततद्बलं॥८॥पार्ष्णिग्राहांकुशग्राहियोधघंटासमन्वितान्॥समादायैकहस्तेनमु
खेचिक्षेपवारणान्॥९॥तथैवयोधंतुरगैरथंसारथिनासह॥निक्षिप्यवक्त्रेदशनैश्चर्वयंत्यतिभैरवं॥१०॥एकंजग्राहकेशेषुग्रीवायामथचापरं॥

पादेनाक्रम्य चैवान्यमुरसान्यमपोथयत॥११॥ तैर्मुक्तानि च शस्त्राणि महास्त्राणि तथासुरैः॥ मुखेन जग्राह रुषा दशनैर्मथितान्यपि॥१२॥ ब
लिनां तद्बलं सर्वमसुराणां महात्मनां॥ ममर्द्दाभक्षयच्चान्यानन्यांश्चाताडयत्तथा॥१३॥ असिना निहताः केचित्केचित्खट्वांगताडिताः॥ जग्मुर्विना
शमसुरा दंताग्राभिहतास्तथा॥१४॥ क्षणेन तद्बलं सर्वमसुराणां निपातितं॥ दृष्ट्वा चंडोभिदुद्राव तां कालीमतिभीषणां॥१५॥ शरवर्षैर्महाभीमैर्भीमा
क्षीं तां महासुरः॥ छादयामास चक्रैश्च मुंडः क्षिप्तैः सहस्रशः॥१६॥ तानि चक्राण्यनेकानि विशमानानि तन्मुखं॥ बभुर्यथार्कबिंबानि सुबहूनि घनो
दरं॥१७॥ ततो जहासातिरुषा भीमं भैरवनादिनी॥ काली करालवक्त्रांतर्दुर्दर्शदशनोज्वला॥१८॥ उत्थाय च महासिंहं देवी चंडमधावत॥ गृहीत्वा चास्य
केशेषु शिरस्तेनासिनाछिदत्॥१९॥ अथ मुंडोभ्यधावत्तां दृष्ट्वा चंडं निपातितं॥ तमप्यपातयद्भूमौ सा खड्गाभिहतं रुषा॥२०॥ हतशेषं ततः सैन्यं दृष्ट्वा चं
डं निपातितं॥ मुंडं च सुमहावीर्यं दिशो भेजे भयातुरं॥२१॥ शिरश्चंडस्य काली च गृहीत्वा मुंडमेव च॥ प्राह प्रचंडाट्टहासमिश्रमभ्येत्य चंडिकां॥२२॥ मया
तवात्रोपहृतौ चंडमुंडौ महापशू॥ युद्धयज्ञे स्वयं शुंभं निशुंभं च हनिष्यति॥२३॥ ऋषिरुवाच॥ तावानीतौ ततो दृष्ट्वा चंडमुंडौ महासुरौ॥ उवाच कालीं
कल्याणी ललितं चंडिका वचः॥२४॥ यस्माच्चंडं च मुंडं च गृहीत्वा त्वमुपागता॥ चामुंडेति ततो लोके ख्याता देवी भविष्यसि॥२५॥ ॥इति श्रीमार्कंडेय राम
पुराणे सावर्णिके मन्वंतरे देवीमहात्म्ये चंडमुंडवधः॥ ॥ऋषिरुवाच॥ ॥चंडे च निहते दैत्ये मुंडे च विनिपातिते॥ बहुलेषु च सैन्येषु क्षयितेष्वसुरेश्वर ११९

॥१॥ ततः कोपपराधीनचेताः शुंभः प्रतापवान्॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह॥२॥ अद्य सर्वबलैर्दैत्याः षडशीतिरुदायुधाः॥ कंबूनां चतुराशीतिर्निर्यांतु स्व का
बलैर्वृताः॥३॥ कोटिवीर्याणि पंचाशदसुराणां कुलानि वै॥ शतं कुलानि धौम्राणां निर्गच्छंतु ममाज्ञया॥४॥ कालका दौर्हृदा मौर्याः कालकेयास्तथापरे॥ युद्धाय सज्जा
निर्यांतु आज्ञया त्वरिता मम॥५॥ इत्याज्ञाप्यासुरपतिः शुंभो भैरवशासनः॥ निर्जगाम महासैन्यसहस्रैर्बहुभिर्वृतः॥६॥ आयांतं चंडिका दृष्ट्वा तत्सैन्यमतिभी
षणं॥ ज्यास्वनैः पूरयामास धरणीगगनांतरं॥७॥ ततः सिंहो महानादमतीव कृतवान्नृप॥ घंटास्वनेन तन्नादानंबिका चोपबृंहयत॥८॥ धनुर्ज्यासिंहघंटानां ना
दापूरितदिङ्मुखा॥ निनादैर्भीषणैः काली जिग्ये विस्तारितानना॥९॥ तन्निनादमुपश्रुत्य दैत्यसैन्यैश्चतुर्दिशं॥ देवी सिंहस्तथा काली सरोषैः परिवारिताः॥ एतस्मिन्नं
तरे भूप विनाशाय सुरद्विषां॥ भवायामरसिंहानामतिवीर्यबलान्विताः॥११॥ ब्रह्मेशगुहविष्णूनां तथेंद्रस्य च शक्तयः॥ शरीरेभ्यो विनिष्क्रम्य तद्रूपैश्चंडिकां ययुः॥
॥१२॥ यस्य देवस्य यद्रूपं यथाभूषणवाहनं॥ तद्वदेव हि तच्छक्तिरसुरान्योद्धुमाययौ॥१३॥ हंसयुक्तविमानाग्रे साक्षसूत्रकमंडलुः॥ आयाता ब्रह्मणः शक्तिर्ब्रह्माणी
सानिधीयते॥१४॥ माहेश्वरी वृषारूढा त्रिशूलवरधारिणी॥ महाहिवलया प्राप्ता चंद्ररेखाविभूषणा॥१५॥ कौमारी शक्तिहस्ता च मयूरवाहना॥ योद्धुमभ्याययौ दैत्या
नंबिका गुहरूपिणी॥१६॥ तथैव वैष्णवी शक्तिर्गरुडोपरि संस्थिता॥ शंखचक्रगदाशार्ङ्गखड्गहस्ताभ्युपाययौ॥१७॥ यज्ञवाराहमतुलं रूपं या बिभ्रतो हरेः॥ शक्तिः सा
प्याययौ तत्र वाराही बिभ्रती तनुं॥१८॥ नारसिंही नृसिंहस्य बिभ्रती सदृशं वपुः॥ प्राप्ता तत्र सटाक्षेपक्षिप्तनक्षत्रसंहतिः॥१९॥ वज्रहस्ता तथैवैंद्री गजराजोपरि

मार्कं· संस्थिता॥प्राप्तासहस्त्रनयनायथाशक्रस्तथैवसा॥२०॥ततःपरिवृतःस्ताभिरीशानोदेवशक्तिभिः॥हंन्यंतामसुराःशीघ्रंममप्रीत्याहचंडिकां॥२१॥ततोदेवीशरीरात्तुवि
११९ निष्क्रांतातिभीषणा॥चंडिकाशक्तिरत्युग्राशिवाशतनिनादिनी॥२२॥साचाहधूम्रजटिलमीशानमपराजिता॥दूतत्वंगच्छभगवन्पार्श्वंशुंभनिशुंभयोः॥२३॥ब्रूहि
शुंभंनिशुंभंचदानवावतिगर्वितौ॥येचान्येदानवास्तत्रयुद्धायसमुपस्थिताः॥२४॥त्रैलोक्यमिंद्रोलभतांदेवाःसंतुहविर्भुजः॥यूयंप्रयातपातालंयदिजीवितुमि
च्छथ॥२५॥बलावलेपादथचेद्भवंतोयुद्धकांक्षिणः॥तदागच्छततृप्यंतुमच्छिवाःपिशितेनवः॥२६॥यतोनियुक्तोदौत्येनतयादेव्याशिवःस्वयं॥शिवदूतीतिलोकेस्मिं
स्ततःसांख्यातिमागता॥२७॥तेपिश्रुत्वावचोदेव्याःशर्वाख्यातंमहासुराः॥अमर्षापूरिताजग्मुर्यतःकात्यायनीस्थिता॥२८॥ततःप्रथममेवाग्रेशरशक्त्यृष्टिवृ
ष्टिभिः॥ववर्षुरुद्धतामर्षास्तान्देवीममरारयः॥२९॥साचतान्प्रहितान्बाणान्शूलशक्तिपरश्वधान्॥चिच्छेदलीलयाध्मातधनुर्मुक्तैर्महेषुभिः॥३०॥तस्याग्र
तस्तथाकालीशूलपातविदारितान्॥खट्वांगपोथितांश्चारीन्कुर्वंतीव्यचरत्तदा॥३१॥कमंडलुजलाक्षेपहतवीर्यान्हतौजसः॥ब्रह्माणीचाकरोच्छत्रून्येनयेन
स्मधावति॥३२॥माहेश्वरीत्रिशूलेनतथाचक्रेणवैष्णवी॥दैत्याञ्जघानकौमारी॥तथाशक्त्यातिकोपना॥३३॥ऐंद्रीकुलिशपाशेनशतशोदैत्यदानवाः॥पेतुर्विदारि
ताःपृथ्व्यांरुधिरौघप्रवर्षिणः॥३४॥तुंडप्रहारविध्वस्तादंष्ट्राग्रक्षतवक्षसः॥वराहमूर्त्यान्यपतितंश्चक्रेणचविदारिताः॥३५॥नखैर्विदारितांश्चान्यान्भक्षयंती राम
महासुरान्॥नारसिंहीचचाराजौनादापूर्णदिगंबरा॥३६॥चंडाट्टहासैरसुराःशिवदूत्यभिदूषिताः॥पेतुःपृथिव्यांपतितांस्तांश्चखादाथसातदा॥३७॥इतिमातृ १२०

गणंक्रुद्धंमर्दयंतंमहासुरान्॥दृष्ट्वाभ्युपायैर्विविधैर्नेशुर्देवारिसैनिकाः॥३८॥पलायनपरान्दृष्ट्वादैत्यान्मातृगणार्दितान्॥योद्धुमभ्याययौक्रुद्धोरक्तबी
जोमहासुरः॥३९॥रक्तबिंदुर्यदाभूमौपतत्यस्यशरीरतः॥समुत्पतिमेदिन्यांस्तत्प्रमाणोमहासुरः॥४०॥युयुधेसगदापाणिरिंद्रशक्त्यामहासुरः॥तत
श्चैंद्रीस्ववज्रेणरक्तबीजमताडयत्॥४१॥कुलिशेनाहतस्याशुतस्यसुस्रावशोणितं॥समुत्तस्थुस्ततोयोधास्तद्रूपास्तत्पराक्रमाः॥४२॥यावंतःपति
तास्तस्यशरीराद्रक्तबिंदवः॥तावंतःपुरुषाजातास्तद्वीर्यबलविक्रमाः॥४३॥तेचापियुयुधुस्तत्रपुरुषारक्तसंभवाः॥सममातृभिरत्युग्रशस्त्रपाता
तिभीषणं॥४४॥पुनश्चवज्रपातेनक्षतमस्यशिरोयदा॥ववाहरक्तंपुरुषास्ततोजाताःसहस्रशः॥४५॥वैष्णवीसमरेचैनंचक्रेणाभिजघानह॥गदया
ताडयामासऐंद्रीतमसुरेश्वरं॥४६॥वैष्णवीचक्रभिन्नस्यरुधिरस्रावसंभवैः॥सहस्रशोजगद्व्याप्तंतत्प्रमाणैर्महासुरैः॥४७॥शक्त्याजघानकौमारीवा
राहीचतथासिना॥माहेश्वरीत्रिशूलेनरक्तबीजंमहासुरं॥४८॥सचापिगदयादैत्यःसर्वाएवाहनत्पृथक्॥मातृःकोपसमाविष्टोरक्तबीजोमहासुरः॥४९॥
तस्याहतस्यबहुधाशक्तिशूलादिभिर्भुवि॥पपातयोवैरक्तौघस्तेनासंछतशोसुराः॥५०॥तैश्चासुरासृक्संभूतैरसुरैःसकलंजगत्॥व्याप्तमासीत्ततोदेवा
भयमाजग्मुरुत्तमं॥५१॥तान्विषण्णान्सुरान्दृष्ट्वाचंडिकाप्राहसत्वरा॥उवाचकालींचामुंडेविस्तरंवदनंकुरु॥५२॥मच्छस्त्रपातसंभूतान्रक्तबिंदून्महासुरान्
रक्तबिंदोप्रतीच्छत्वंवक्त्रेणानेनवेगिता॥५३॥भक्षयंतीचररणेतदुत्पन्नान्महासुरान्॥एवमेषक्षयंदैत्यःक्षीणरक्तोगमिष्यति॥५४॥भक्ष्यमाणास्त्वयाचो

ग्रानन्योसत्रंप्रतिचापरे॥इत्युक्त्वा तांततोदेवीशूलेनाभिजघानतं॥५५॥मुखेनकालीजगृहेरक्तबीजस्यशोणितं॥ततोसावाजघानाथगदयातत्रचंडिकां॥५६॥
नचास्यावेदनांचक्रेगदापातोल्पिकामपि॥तस्याहतस्यदेहात्तुबहुसुस्रावशोणितं॥५७॥यतस्ततस्तद्वक्त्रेणचामुंडासंप्रतीछति॥मुखेसमुद्गतायेस्यारक्तपा
तान्महासुरा॥५८॥तांश्चखादाथचामुंडापपौतस्यचशोणितं॥देवीशूलेनवज्रेणबाणैरसिभिरृष्टिभिः॥५९॥जघानरक्तबीजंतंचामुंडापीतशोणितं॥
सपपातमहीपृष्ठेशस्त्रसंघसमाहतः॥६०॥नीरक्तश्चमहीपालरक्तबीजोमहासुरः॥ततस्तेहर्षमतुलमवापुस्त्रिदशानृप॥६१॥तेषांमातृगणोजातोनन
र्त्तासृङ्मदोद्धतः॥६२॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमहात्म्येरक्तबीजवधः॥ ॥राजोवाच॥ ॥विचित्रमिदमाख्यातंभगवन्भवतामम॥
देव्याश्चरितमहात्म्यंरक्तबीजवधाश्रितं॥१॥भूयश्चेछाम्यहंश्रोतुंरक्तबीजेनिपातिते॥चकारशुंभोयत्कर्मनिशुंभश्चातिकोपनः॥२॥ऋषिरुवाच॥ ॥
चकारकोपमतुलंरक्तबीजेनिपातिते॥शुंभासुरोनिशुंभश्चहतेष्वन्येषुचाहवे॥३॥हन्यमानंमहासैन्यंविलोक्यामर्षमुद्वहन्॥अभ्यधावन्निशुंभो
थमुख्ययासुरसेनया॥४॥तस्याग्रतस्तथापृष्ठेपार्श्वयोश्चमहासुराः॥संदष्टौष्ठपुटाःक्रुद्धाहंतुंदेवीमुपाययुः॥आजगाममहावीर्यःशुंभोपिस्वब
लैर्वृतः॥निहंतुंचंडिकांकोपात्कृत्वायुद्धंतुमातृभिः॥६॥ततोयुद्धमतीवासीद्देव्याशुंभनिशुंभयोः॥शरवर्षमतीवोग्रंमेघयोरिववर्षतोः॥७॥चिछेदास्तां राम
श्छरांस्ताभ्यांचंडिकास्वशरोत्करैः॥ताडयामासचांगेषुशस्त्रौघैरसुरेश्वरौ॥८॥निशुंभोनिशितंखड्गंचर्मचादायसुप्रभं॥अताडयन्मूर्द्धिसिंहंदेव्यावा १२१

हनमुत्तमं॥९॥ताडितेवाहनेदेवीक्षुरप्रेणासिमुत्तमं॥निशुंभस्याशुचिछेदचर्मचाप्यष्टचंद्रकं॥१०॥छिन्नेचर्मणिखड्गेचशक्तिंचिक्षेपसोसुरः॥तामप्यस्यद्वि
धाचक्रेचक्रेणाभिमुखागतां॥११॥कोपाध्मातोनिशुंभोथशूलंजग्राहदानवः॥आयातंमुष्टिपातेनदेवीतच्चाप्यचूर्णयत॥१२॥आविध्याथगदांसोपिचिक्षे
पचंडिकांप्रति॥सापिदेव्यात्रिशूलेनभिन्नाभस्मत्वमागता॥१३॥ततःपरशुहस्तंतमायांतंदैत्यपुंगवं॥आहत्यदेवीबाणौघैरपातयतभूतले॥१४॥तस्मि
न्निपतितेभूमौनिशुंभेभीमविक्रमे॥भ्रातर्यतीवसंक्रुद्धःप्रययौहंतुमंबिकां॥१५॥सरथस्थस्तथात्युच्चैर्गृहीतपरमायुधैः॥भुजैरष्टाभिरतुलैर्व्याप्या
शेषंबभौनभः॥१६॥तमायांतंसमालोक्यदेवीशंखमवादयत॥ज्याशब्दंचापिधनुषश्चकारातीवदुःसहं॥१७॥पूरयामासककुभोनिजघंटास्वनेनच॥
समस्तदैत्यसैन्यानांतेजोवधविधायिना॥१८॥ततःसिंहोमहानादैस्त्याजितेभमहामदैः॥पूरयामासगगनंगांतथोपदिशोदश॥१९॥ततःकालीसमुत्पत्य
गगनेक्ष्मामताडयत॥कराभ्यांतन्निनादेनप्राक्स्वनास्तेतिरोहिताः॥२०॥अट्टाट्टहासमशिवंशिवदूतीचकारह॥तैःशब्दैरसुरास्त्रेसुःशुंभःकोपंपरंय
यौ॥२१॥दुरात्मंस्तिष्ठतिष्ठेतिव्याजहाराम्बिकायदा॥तदाजयेत्यभिहितंदेवैराकाशसंस्थितैः॥२२॥शुंभेनागत्ययाशक्तिर्मुक्ताज्वालातिभीषणा॥आयांतीवह्नि
कूटाभासानिरस्तामहोल्कया॥२३॥सिंहनादेनशुंभस्यव्याप्तंलोकत्रयांतरं॥निर्घातनिस्वनोघोरोजितवानवनीपते॥२४॥शुंभमुक्ताञ्छरान्देवीशुं
भस्तत्प्रहिताञ्छरान्॥चिछेदस्वशरैरुग्रैःशतशोथसहस्रशः॥२५॥ततःसाचंडिकाक्रुद्धाशूलेनाभिजघानतं॥सतदाभिहतोभूमौमूर्छितोनिपपातह

॥२६॥ ततो निशुंभः संप्राप्य चेतनामात्तकार्मुकः॥ आजघान शरैर्देवीं कालीं केसरिणं तथा॥२७॥ पुनश्च कृत्वा बाहूनामयुतं दनुजेश्वरः॥ चक्रायुधेन दितिज
श्छादयामास चंडिकां॥२८॥ ततो भगवती क्रुद्धा दुर्गा दुर्गार्तिनाशिनी॥ चिच्छेद तानि चक्राणि स्वशरैः सायकांश्च तान्॥२९॥ ततो निशुंभो वेगेन गदामादाय चं
डिकां॥ अभ्यधावत वै हंतुं दैत्यसेनासमावृतः॥३०॥ तस्यापतत एवाशु गदां चिच्छेद चंडिका॥ खड्गेन शितधारेण स च शूलं समाददे॥३१॥ शूलहस्तं तमा
यांतं निशुंभममरार्दनं॥ हृदि विव्याध शूलेन वेगाविद्धेन चंडिका॥३२॥ भिन्नस्य तस्य शूलेन हृदयान्निःसृतोऽपरः॥ महाबलो महावीर्यस्तिष्ठेति पुरु
षो वदन्॥३३॥ तस्य निष्क्रामतो देवी प्रहस्य स्वनवत्ततः॥ शिरश्चिच्छेद खड्गेन ततोऽसावपतद्भुवि॥३४॥ ततः सिंहश्च खादोग्रदंष्ट्राक्षुण्णशिरोधरान्॥ अ
सुरांस्तांस्तथा काली शिवदूती तथापरान्॥३५॥ कौमारीशक्तिनिर्भिन्नाः केचिन्नेशुर्महासुराः॥ ब्रह्माणीमंत्रपूतेन तोयेनान्ये निराकृताः॥३६॥ माहेश्वरी
त्रिशूलेन भिन्नाः पेतुस्तथापरे॥ वाराहीतुंडघातेन केचिच्चूर्णीकृता भुवि॥३७॥ खंडं खंडं च चक्रेण वैष्णव्या दानवाः कृताः॥ वज्रेण चैंद्रीहस्ताग्रविमुक्ते
न तथापरे॥३८॥ केचिद्विनेशुरसुराः केचिन्नष्टा महाहवात्॥ भक्षिताश्चापरे कालीशिवदूतीमृगाधिपैः॥३९॥ ॥इति श्रीमार्कंडेयपुराणे सावर्णिके
मन्वंतरे देवीमाहात्म्ये निशुंभवधः॥ ॥ऋषिरुवाच॥ ॥निशुंभं निहतं दृष्ट्वा भ्रातरं प्राणसंमितं॥ हन्यमानं बलं चैव शुंभः क्रुद्धोऽब्रवीद्वचः॥१॥ बलावले राम
पाद्दुष्टे त्वं मा दुर्गे गर्वमावह॥ अन्यासां बलमाश्रित्य युध्यसे याति मानिनी॥२॥ देव्युवाच॥ एकैवाहं जगत्यत्र द्वितीया का ममापरा॥ पश्यैता दुष्ट मय्येव १२२

DR. BHAU DAJI
MEMORIAL

विशंत्यो मद्विभूतयः॥२॥ ऋषिरुवाच॥ ततः समस्तास्ता देव्यो ब्रह्माणीप्रमुखा लयं॥ तस्या देव्यास्तनौ जग्मुरेकैवासीत्तदांबिका॥३॥ देव्युवाच॥ अहं विभू
त्या बहुभिरिह रूपैर्यदास्थिता॥ तत्संहृतं मयैकैव तिष्ठाम्याजौ स्थिरो भव॥४॥ ऋषिरुवाच॥ ततः प्रववृते युद्धं देव्याः शुंभस्य चोभयोः॥ पश्यतां सर्वदे
वानामसुराणां च दारुणं॥५॥ शरवर्षैः शितैः शस्त्रैस्तथास्त्रैश्चैव दारुणैः॥ तयोर्युद्धमभूद्भूयः सर्वलोकभयंकरं॥६॥ दिव्यान्यस्त्राणि शतशो मुमुचे
यान्यथांबिका॥ बभंज तानि दैत्येंद्रस्तत्प्रतीघातकर्तृभिः॥८॥ मुक्तानि तेन चास्त्राणि दिव्यानि परमेश्वरी॥ बभंज लीलयैवोग्रहुंकारोच्चारणादिभिः
॥९॥ ततः शरशतैर्देवीमाच्छादयत सोऽसुरः॥ सापि तत्कुपिता देवी धनुश्चिच्छेद चेषुभिः॥१०॥ छिन्ने धनुषि दैत्येंद्रस्तथा शक्तिमथाददे॥ चिच्छेद देवी च
क्रेण तामप्यस्य करे स्थितां॥११॥ ततः खड्गमुपादाय शतचंद्रं च भानुमत्॥ अभ्यधावत तां देवीं दैत्यानामधिपेश्वरः॥१२॥ तस्यापतत एवाशु खड्गं चिच्छे
द चंडिका॥ धनुर्मुक्तैः शितैर्बाणैश्चर्म चार्ककरामलं॥१३॥ अश्वांश्च पातयामास रथं सारथिना सह॥ हताश्वः स तदा दैत्यश्छिन्नधन्वा विसारथिः॥
॥१४॥ जग्राह मुद्गरं घोरमंबिकानिधनोद्यतः॥ चिच्छेदापततस्तस्य मुद्गरं निशितैः शरैः॥ तथापि सोऽभ्यधावत्तां मुष्टिमुद्यम्य वेगवान्॥१५॥ स मुष्टिं पा
तयामास हृदये दैत्यपुंगवः॥ देव्यास्तं चापि सा देवी तलेनोरस्यताडयत्॥१६॥ तलप्रहाराभिहतो निपपात महीतले॥ स दैत्यराजः सहसा पुनरेव तथो
त्थितः॥१७॥ उत्पत्य च प्रगृह्योच्चैर्देवीं गगनमास्थितः॥ तत्रापि सा निराधारा युयुधे तेन चंडिका॥१८॥ नियुद्धं खे तदा दैत्यश्चंडिका च परस्परं॥ चक्रतुः प्र

DR. BHAU DAJI
MEMORIAL

थमंसिद्धमुनिविस्मयकारकं॥१९॥ततोनियुद्धंसुचिरंकृत्वातेनांबिंकासह॥उत्पाट्यभ्रामयामासचिक्षेपधरणीतले॥२०॥सक्षिप्तोधरणींप्राप्य
मुष्टिमुद्यम्यवेगतः॥अभ्यधावतदुष्टात्मा चंडिकानिधनेछया॥२१॥तमायांतंततोदेवीसर्वदैत्यजनेश्वरं॥जगत्यांपातयामासभित्त्वाशूलेनवक्ष
सि॥२२॥सगतासुःपपातोर्व्यांदेवीशूलाग्रविक्षतः॥चालयन्सकलांपृथ्वींसाब्धिद्वीपांसपर्वतां॥२३॥ततःप्रसन्नमखिलंहतेतस्मिन्दुरात्मनि
जगत्स्वास्थ्यमतीवापनिर्मलंचाभवन्नभः॥२४॥उत्पातमेघाःसोल्कायेप्रागासंस्तेशमंययुः॥सरितोमार्गवाहिन्यस्तथासंस्तत्रपातिते॥२५॥
ततोदेवगणाःसर्वेहर्षनिर्भरमानसाः॥बभूवुर्निहतेतस्मिन्गंधर्वाललितंजगुः॥२६॥अवादयंस्तथैवान्येननृतुश्चाप्सरोगणाः॥२७॥ववुः
पुण्यास्तथावाताःसुप्रभोभूद्दिवाकरः॥जज्वलुश्चाग्नयःशांताःशांतदिग्जनितस्वनाः॥२८॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवी
महात्म्येशुंभवधः॥ ॥ऋषिरुवाच॥ ॥देव्याहतेतत्रमहासुरेंद्रेसेंद्रासुरावह्निपुरोगमास्तां॥कात्यायनींतुष्टुवुरिष्टलाभाद्विकासिवक्त्रास्तुविका
सिताशाः॥१॥देवीप्रसन्नार्तिहरेप्रसीदप्रसीदमातर्जगतोखिलस्य॥प्रसीदविश्वेश्वरिपाहिविश्वंत्वमीश्वरीदेविचराचरस्य॥२॥आधारभूताजगतस्त्व
मेकामहीस्वरूपेणयतःस्थितासि॥अपांस्वरूपस्थितयात्वयैतदाप्यायतेकृत्स्नमलंघ्यवीर्ये॥३॥त्वंवैष्णवीशक्तिरनंतवीर्याविश्वस्यबीजंपरमासिमा राम
या॥संमोहितंदेविसमस्तमेतत्त्वंवैप्रसन्नाभुविमुक्तिहेतुः॥४॥विद्याःसमस्तास्तवदेविभेदाःस्त्रियःसमस्ताःसकलाजगत्सु॥त्वयैकयापूरितमेत १२३

यितत्कातेस्तुतिस्तव्यपरापरोक्तिः॥५॥सर्वभूतायदादेवीस्वर्गमुक्तिप्रदायिनी॥संस्तुतास्तुतयेकावाभवंतुपरमोक्तयः॥६॥सर्वस्यबुद्धिरूपेणजनस्य
हृदिसंस्थिते॥स्वर्गापवर्गदेदेविनारायणिनमोस्तुते॥७॥कलाकाष्ठादिरूपेणपरिणामप्रदायिनि॥विश्वस्योपरतौशक्तेनारायणिनमोस्तुते॥८॥सर्व
मंगलमंगल्येशिवेसर्वार्थसाधिके॥शरण्येत्र्यंबकेगौरिनारा०॥९॥सृष्टिस्थितिविनाशानांशक्तिभूतेसनातनि॥ विश्वस्योपरतौ गुणाश्रयेगुणम
येनारा०॥१०॥शरणागतदीनार्तपरित्राणपरायणे॥सर्वस्यार्तिहरेदेविनारा०॥११॥हंसयुक्तविमानस्थेब्रह्माणीरूपधारिणि॥कौशांभःक्षरिकेदेविनारा०
॥१२॥त्रिशूलचंद्राहिधरेमहावृषभवाहिनि॥माहेश्वरीस्वरूपेणनारा०॥१३॥मयूरकुक्कुटवृतेमहाशक्तिधरेनघे॥कौमारीरूपसंस्थानेनारा०॥१४॥शंखचक्र
गदाशार्ङ्गगृहीतपरमायुधे॥प्रसीदवैष्णवीरूपेनारा०॥१५॥गृहीतोग्रमहाचक्रेदंष्ट्रोद्धृतवसुंधरे॥वराहरूपिणिशिवेनारा०॥१६॥नृसिंहरूपेणोग्रेणहंतुंदै
त्यान्कृतोद्यमे॥त्रैलोक्यत्राणसहितेनारा०॥१७॥किरीटिनिमहावज्रेसहस्रनयनोज्ज्वले॥वृत्रप्राणहरेचैंद्रिनारा०॥१८॥शिवदूतीस्वरूपेणहतदैत्यमहाब
ले॥घोररूपेमहारावेनारा०॥१९॥दंष्ट्राकरालवदनेशिरोमालाविभूषणे॥चामुंडेमुंडमथनेनारायणिनमोस्तुते॥२०॥लक्ष्मिलज्जेमहाविद्येश्रद्धेपुष्टिस्व
धेध्रुवे॥महारात्रिमहाविद्येनारा०॥२१॥मेधेसरस्वतिवरेभूतिबाभ्रविनामसि॥नियतेत्वंप्रसीदेशेनारा०॥२२॥सर्वतःपाणिपादांतेसर्वतोक्षिशिरोमुखे॥सर्व
तःश्रवणघ्राणेनारायणिनमोस्तुते॥२३॥सर्वस्वरूपेसर्वेशेसर्वशक्तिसमन्विते॥भयेभ्यस्त्राहिनोदेविदुर्गेदेविनमोस्तुते॥२४॥एतत्तेवदनंसौम्यंलोचन

त्रयभूषितं॥पातुनःसर्वभूतेभ्यःकात्यायनिनमोस्तुते॥२५॥ज्वालाकरालमत्युग्रमशेषासुरसूदनं॥त्रिशूलंपातुनोभीतेर्भद्रकालीनमोस्तुते॥२६॥हिनस्तिदैत्यते
जांसिस्वनेनापूर्ययाजगत्॥साघंटापातुनोदेविपापेभ्योनःसुतानिव॥२७॥असुरासृग्वसापंकचर्चितस्तेकरोज्वलः॥शुभायखड्गोभवतुचंडिकेत्वांनतावयं॥२८॥
रोगानशेषानपहंसितुष्टारुष्टातुकामान्सकलानभीष्टान्॥त्वामाश्रितानांनविपन्नराणांत्वामाश्रिताह्याश्रयतांप्रयांति॥२९॥एतत्कृतंयत्कदनंत्वयाद्यधर्म
द्विषांदेविमहासुराणां॥रूपैरनेकैर्बहुधात्ममूर्त्तिंकृत्वांबिकेतत्प्रकरोतिकान्या॥३०॥विद्यासुशास्त्रेषुविवेकदीपेष्वाद्येषुवाक्येषुचकात्वदन्या॥ममत्वगर्त्तेतिमहां
धकारेविभ्रामयत्येतदतीवविश्वं॥३१॥रक्षांसियत्रोग्रविषाश्चनागायत्रारयोदस्युबलानियत्र॥दावानलोयत्रतथाब्धिमध्येतत्रस्थितात्वंपरिपासिविश्वं॥३२॥वि
श्वेश्वरीत्वंपरिपासिविश्वंविश्वात्मिकाधारयसीतिविश्वं॥विश्वेशवंद्याभवतीभवंतिविश्वाश्रयायेत्वयिभक्तिनम्राः॥३३॥देविप्रसीदपरिपालयनोरिभीतेर्नित्यं
यथासुरवधादधुनैवसद्यः॥पापानिसर्वजगतांप्रशमंनयाशुउत्पातपाकजनिताश्चमहोपसर्गान्॥३४॥प्रणतानांप्रसीदत्वंदेविविश्वार्त्तिहारिणि॥त्रैलोक्य
वासिनामीड्येलोकानांवरदाभव॥३५॥देव्युवाच॥वरदाहंसुरगणावरंयंमनसेच्छथ॥तंवृणुध्वंप्रयच्छामिजगतामुपकारकं॥३६॥देवाऊचुः॥सर्वबाधा
प्रशमनंत्रैलोक्यस्याखिलेश्वरि॥एवमेवत्वयाकार्यमस्मद्वैरिविनाशनं॥३७॥देव्युवाच॥वैवस्वतेंतरेप्राप्तेअष्टाविंशतिमेयुगे॥शुंभोनिशुंभश्चैवान्यावुत्प राम
त्स्येतेमहासुरौ॥३८॥नंदगोपगृहेजातायशोदागर्भसंभवा॥ततस्तौनाशयिष्यामिविंध्याचलनिवासिनी॥३९॥पुनरप्यतिरौद्रेणरूपेणपृथिवीतले॥अवतीर्य १२४

हनिष्यामिवैप्रचित्तांस्तुदानवान्॥४०॥भक्षयंत्याश्चतानुग्रान्वैप्रचित्तान्महासुरान्॥रक्तादंताभविष्यंतिदाडिमीकुसुमोपमाः॥४१॥ततोमांदेवताःस्वर्गे
मर्त्यलोकेचमानवाः॥स्तुवंतोव्याहरिष्यंतिसततंरक्तदंतिकां॥४२॥भूयश्चशतवार्षिक्यामनावृष्ट्यामनंभसि॥मुनिभिःसंस्तुताभूमौसंभविष्याम्य
योनिजा॥४३॥ततःशतेननेत्राणांनिरीक्षिष्यामियन्मुनीन्॥कीर्त्तयिष्यंतिमनुजाःशताक्षीमितिमांततः॥४४॥ततोहमखिलंलोकमात्मदेहसमुद्भवैः
भरिष्यामिसुराःशाकैरावृष्टेःप्राणधारकैः॥४५॥शाकंभरीतिविख्यातिंतदायास्याम्यहंभुवि॥तत्रैववचवधिष्यामिदुर्गमाख्यंमहासुरं॥४६॥दुर्गादे
वीतिविख्यातंतन्मेनामभविष्यति॥पुनश्चाहंयदाभीमंरूपंकृत्वाहिमाचले॥४७॥रक्षांसिभक्षयिष्यामिमुनीनांत्राणकारणात्॥तदामांमुनयः
सर्वेस्तोष्यंत्यानम्रमूर्त्तयः॥४८॥भीमादेवीतिविख्यातंतन्मेनामभविष्यति॥यदारुणाख्यस्त्रैलोक्येमहाबाधांकरिष्यति॥४९॥तदाहंभ्रामरंरूपं
कृत्वासंख्येयषट्पदं॥त्रैलोक्यस्यहितार्थायवधिष्यामिमहासुरं॥५०॥भ्रामरीतिचमांलोकास्तदास्तोष्यंतिसर्वतः॥इत्थंयदायदाबाधादानवोत्था
भविष्यति॥५१॥तदातदावतीर्याहंकरिष्याम्यरिसंक्षयं॥५१॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेवीवरप्रदानं॥ ॥ ॥
देव्युवाच॥ ॥एभिःस्तवैश्चमांनित्यंस्तोष्यतेयःसमाहितः॥तस्याहंसकलांबाधांशमयिष्याम्यसंशयं॥१॥मधुकैटभनाशंचमहिषासुरघातनं
कीर्त्तयिष्यंतियेतद्वद्वधंशुंभनिशुंभयोः॥२॥अष्टम्यांचचतुर्दश्यांनवम्यांचैकचेतसः॥श्रोष्यंतिचैवयेभक्त्याममामाहात्म्यमुत्तमं॥३॥नतेषांदुष्कृ

मार्कं· १२५

तेंकिंचिदुष्कृतोत्थानचापदः॥भविष्यतिनदारिद्र्यंनचैवेष्टवियोजनं॥४॥शत्रुतोनभयंतस्यदस्युतोवानराजतः॥नशस्त्रानलतोयौघात्कदाचित्संभविष्यति॥
॥५॥तस्मान्ममैतन्माहात्म्यंपठितव्यंसमाहितैः॥श्रोतव्यंचसदाभक्त्यापरंस्वस्त्ययनंमहत्॥६॥उपसर्गानशेषांस्तुमहामारीसमुद्भवान्॥तथात्रिविधमुत्पातंमा
हात्म्यंशमयेन्मम॥७॥यत्रैतत्पठ्यतेसम्यङ्नित्यमायतनेमम॥सदानतद्विमोक्ष्यामिसान्निध्यंतत्रमेस्थितं॥८॥बलिप्रदानेपूजायामग्निकार्येमहोत्सवे॥स
र्वंममैतच्चरितमुच्चार्यंश्राव्यमेवच॥९॥जानताजानतावापिबलिपूजांतथाकृतां॥प्रतीक्षिष्याम्यहंप्रीत्यावह्निहोमंतथाकृतं॥१०॥शरत्कालेमहापूजाक्रि
यतेयाचवार्षिकी॥तस्यांममैतन्माहात्म्यंश्रुत्वाभक्तिसमन्वितः॥११॥सर्वबाधाविनिर्मुक्तोधनधान्यसुतान्वितः॥मनुष्योमत्प्रसादेनभविष्यतिनसंशयः॥१२॥
श्रुत्वाममैतन्माहात्म्यंतथाचोत्पत्तयःशुभाः॥पराक्रमंचयुद्धेषुजायतेनिर्भयःपुमान्॥१३॥रिपवःसंक्षयंयांतिकल्याणंचोपपद्यते॥नंदतेचकुलंपुंसांमाहात्म्यं
ममशृण्वतां॥१४॥शांतिकर्मणिसर्वत्रतथादुःस्वप्नदर्शने॥ग्रहपीडासुचोग्रासुमाहात्म्यंशृणुयान्मम॥१५॥उपसर्गाःशमंयांतिग्रहपीडाश्चदारुणाः॥दुःस्व
प्नंचनृभिर्दृष्टंसुस्वप्नमुपजायते॥१६॥बालग्रहाभिभूतानांबालानांशांतिकारकं॥संघातभेदेचनृणांमैत्रीकरणमुत्तमं॥१७॥दुर्वृत्तानामशेषाणांबलहानि
करंपरं॥रक्षोभूतपिशाचानांपठनादेवनाशनं॥१८॥सर्वंममैतन्माहात्म्यंममसंनिधिकारकं॥पशुपुष्पार्घधूपैश्चगंधदीपैस्तथोत्तमैः॥१९॥विप्राणांभोज राम
नैर्होमैःप्रोक्षणीयैरहर्निशं॥अन्यैश्चविविधैर्भोगैःप्रदानैर्वत्सरेणया॥२०॥प्रीतिर्मेक्रियतेसास्मिन्सकृत्सुचरितेश्रुते॥श्रुतंहरतिपापानितथारोग्यंप्रयच्छति॥२१॥ १२५

रक्षांकरोतिभूतेभ्योजन्मनांकीर्त्तनंमम॥युद्धेषुचरितंयन्मेदुष्टदैत्यनिबर्हणं॥२२॥तस्मिन्छ्रुतेवैरिकृतंभयंपुंसांनजायते॥युष्माभिःस्तुतयोयाश्चया
श्चब्रह्मर्षिभिःकृताः॥२३॥ब्रह्मणाचकृतास्तास्तुप्रयच्छंतिशुभामतिं॥अरण्येप्रांतरेवापिदावाग्निपरिवारितः॥२४॥दस्युभिर्वावृतःशून्येगृहीतोवापिश
त्रुभिः॥सिंहव्याघ्रानुयातोवावनेवावनहस्तिभिः॥२५॥राज्ञाक्रुद्धेनवाज्ञप्तोवध्योबंधगतोपिवा॥आघूर्णितोवावातेनस्थितःपोतेमहार्णवे॥पतत्सुचा
पिशस्त्रेषुसंग्रामेभृशदारुणे॥सर्वाबाधासुघोरासुवेदनाभ्यर्दितोपिवा॥स्मरन्ममैतच्चरितंनरोमुच्येतसंकटात्॥ममप्रभावात्सिंहाद्यादस्यवोवैरि
णस्तथा॥२८॥दूरादेवपलायंतेस्मरतश्चरितंमम॥ऋषिरुवाच॥इत्युक्त्वासाभगवतीचंडिकाचंडविक्रमा॥पश्यतामेवदेवानांतत्रैवांतरधीयत॥तेपिदेवा
निरातंकाःस्वाधिकारान्यथापुरा॥३०॥यज्ञभागभुजःसर्वेचक्रुर्विनिहतारयः॥दैत्याश्चदेव्यानिहतेशुंभेदेवरिपौयुधि॥जगद्विध्वंसिनितस्मिन्महोग्रे
तुल्यविक्रमे॥निशुंभेचमहावीर्येशेषाःपातालमाययुः॥३२॥एवंभगवतीदेवीसानित्यापिपुनःपुनः॥संभूयकुरुतेभूपजगतःपरिपालनं॥३३॥तयैत
न्मोह्यतेविश्वंसैवविश्वंप्रसूयते॥सायाचिताविज्ञानंतुष्टाऋद्धिंप्रयच्छति॥३४॥व्याप्तंतयैतत्सकलंब्रह्मांडंमनुजेश्वर॥महाकाल्यामहाकालेमहामा
रीस्वरूपया॥सैवकालेमहामारीसैवसृष्टिर्भवत्यजा॥स्थितिंकरोतिभूतानांसैवकालेसनातनी॥३६॥भवकालेनृणांसैवलक्ष्मीर्वृद्धिप्रदागृहे॥सैवा
भावेतथालक्ष्मीर्विनाशायोपजायते॥३७॥स्तुतासंपूजितापुष्पैर्धूपगंधादिभिस्तथा॥ददातिवित्तंपुत्रांश्चमतिंधर्मेतथाशुभां॥३८॥इतिश्रीमार्कंडे

यपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येदेवीप्रभावकथनंनामद्वादशोध्यायः॥ ॥ऋषिरुवाच॥ ॥एतत्तेकथितंभूपदेवीमाहात्म्यमुत्तमं॥एवंप्रभावा
सादेवीययेदंधार्यतेजगत्॥१॥विद्यातथैवक्रियतेभगवद्विष्णुमायया॥तयात्वमेषवैश्यश्चतथैवान्येविवेकिनः॥२॥मोह्यंतेमोहिताश्चैवमो
हमेष्यंतिचापरे॥तामुपैहिमहाराजशरणंपरमेश्वरीं॥३॥आराधितासैवनृणांभोगस्वर्गापवर्गदा॥मार्कंडेयउवाच॥इतितस्यवचःश्रुत्वासु
रथःसनराधिपः॥४॥प्रणिपत्यमहाभागंतमृषिंशंसितव्रतं॥निर्विण्णोतिममत्वेनराज्यापहरणेनच॥५॥जगामसद्यःस्तपसेसचवैश्योमहा
मुने॥संदर्शनार्थमंबायानदीपुलीनमास्थितः॥६॥सचवैश्यस्तपस्तेपेदेवीसूक्तंपरंजपन्॥तौतस्मिन्पुलिनेदेव्याःकृत्वामूर्त्तिंमहीमयीं॥७॥
अर्हणांचक्रतुस्तस्याःपुष्पधूपाग्नितर्पणैः॥निराहारौयताहारौतन्मनस्कौसमाहितौ॥८॥ददतुस्तौबलिंचैवनिजगात्रासृगुक्षितं॥एवंसमारा
धयतोस्त्रिभिर्वर्षैर्यतात्मनोः॥९॥परितुष्टाजगद्धात्रीप्रत्यक्षंप्राहचंडिका॥देव्युवाच॥यत्प्रार्थ्यतेत्वयाभूपत्वयाचकुलनंदन॥मत्तस्तत्प्रा
प्यतांसर्वंपरितुष्टाददामितत्॥मार्कंडेयउवाच॥ततोवव्रेनृपोराज्यमविभ्रंश्यन्यजन्मनि॥११॥अत्रैवचनिजंराज्यंहतशत्रुबलंबलात्॥सोपि
वैश्यस्ततोज्ञानंवव्रेनिर्विण्णमानसः॥१२॥ममेत्यहमितिप्राज्ञःसंगविच्युतिकारकं॥देव्युवाच॥स्वल्पैरहोभिर्नृपतेस्वंराज्यंप्राप्स्यतेभवान्॥ राम
१३॥हत्वारिपून्स्खलितंतवतत्रभविष्यति॥मृतश्चभूयःसंप्राप्यजन्मदेवाद्विवस्वतः॥१४॥सावर्णिकोनाममनुर्भवान्भुविभविष्यति॥वैश्य १२६

वर्यत्वयायश्चवरोस्मत्तोभिवांछितः॥१५॥तंप्रयच्छामिसंसिध्यैतवज्ञानंभविष्यति॥मार्कंडेयउवाच॥इतिदत्त्वातयोर्देवीयथाभिलषितंवरं॥बभूवांतर्हि
तासद्योभक्त्याताभ्यामभिष्टुता॥१७॥एवंदेव्यावरंलब्ध्वासुरथःक्षत्रियर्षभः॥सूर्याज्जन्मसमासाद्यसावर्णिर्भविताममनुः॥१८॥ ॥इतिश्रीमार्कंडेयपुरा
णेसावर्णिकेमन्वंतरेदेवीमाहात्म्येसुरथवैश्ययोर्वरप्रदानंनामत्रयोदशोध्यायः॥ ॥पथ्याहारोरजःजलमुचांयोचयोपंकजानांमित्रामित्रौवरद
हविषांदायकग्राहकौयौ॥यौगंधस्यप्रजनवहनौतानहंतुष्टिहेतोरष्टौवंदेत्रिभुवनतनोर्मूर्त्तिभेदांस्तथैतान्॥ ॥राजोवाच॥ ॥भगवन्भवतारामेचंडि
कायास्त्वयोदिताः॥एतेषांप्रकृतिंब्रह्मन्यथावद्वक्तुमर्हसि॥१॥आराध्यंयन्मयादेव्याःस्वरूपंयेनतत्द्विज॥विधिनाब्रूहिसकलंयथावत्प्रणतस्यमे॥
ऋषिरुवाच॥ ॥इदंरहस्यंपरमंमनाख्येयंप्रचक्ष्यते॥भक्तोसीतिनमेकिंचित्तवावाच्यंनराधिप॥सर्वस्याद्यामहालक्ष्मीस्त्रिगुणासकलेश्वरी॥लक्ष्याल
क्ष्यस्वरूपासाव्याप्यकृत्स्नंव्यवस्थिता॥मातुलिंगंगदांखेटंपानपात्रंचबिभ्रती॥नागंयोनिंचलिंगंचबिभ्रतीनृपमूर्द्धनि॥तप्तकांचनवर्णाभातप्तकां
चनभूषणा॥शून्यंतदखिलंलोकंपूरयामासतेजसा॥शून्यंतदखिलंलोकंविलोक्यपरमेश्वरी॥बभाररूपमपरंतमसाकेवलेनहि॥साभिन्नांजनसं
काशादंष्ट्रांचितवरानना॥विशाललोचनानारीबभूवतनुमध्यमा॥खड्गपात्रशिरःखेटैरलंकृतमहाभुजा॥कबंधहारंशिरसाबिभ्राणाहिशिरःस्रजं॥
साप्रोवाचमहालक्ष्मींतामसीप्रमदोत्तमा॥नामकर्मचमेमातर्देहितुभ्यंनमोनमः॥तांप्रोवाचमहालक्ष्मीतामसींप्रमदोत्तमां॥~~नामकर्माणिमे~~ददामि

मार्कं·
१२७

तवनामानियानिकर्मोणितानिते॥महामायामहाकालीमहामारीक्षुधातृषा॥निद्रातृष्णाचैकवीराकालरात्रीदुरत्यया॥इमानितवनामानिप्रतिपाद्यानि
तामसि॥एभिःकर्माणितेज्ञात्वायोधीतेसोश्नुतेसुखं॥तामित्युक्त्वामहालक्ष्मीःस्वंरूपमपरंनृप॥सत्वाख्येनविशुद्धेनपुण्येनेंदुप्रभंबुधो॥अक्षमालां
कुशधरावीणापुस्तकधारिणी॥साबभूवमहामारीअस्यानामानिसाददे॥महाविद्यामहामारीभारतीवाक्सरस्वती॥आर्याब्राह्मीकामधेनुर्वेदगर्भाच
धीश्वरी॥अथोवाचमहालक्ष्मीर्महाकालींसरस्वतीं॥युवांजनयतंदेव्योमिथुनेस्वानुरूपतः॥इत्युक्त्वातेमहालक्ष्मीःससर्जमिथुनंस्वयं॥हिरण्यगर्भोरु
चिरौस्त्रीपुंसौकमलासनौ॥ब्रह्मन्विधेविरंचेतिधातरित्याहतंनरं॥श्रीःपद्मेकमलेलक्ष्मीत्याहमातास्त्रियंचतां॥महाकालीभारतीचमिथुनेऽसृजत
स्मये॥एतयोरपिरूपाणिनामानिचवदामिते॥नीलकंठंरक्तबाहुंश्वेतांगंचंद्रशेखरं॥जनयामासपुरुषंमहाकालीसितांस्त्रियं॥सरुद्रःशंकरःस्थाणुः
कपर्दीचत्रिलोचनः॥त्रयीविद्याकामधेनुःसास्त्रीभाषाक्षरास्वरा॥सरस्वतीस्त्रियंगौरींकृष्णंचपुरुषंनृप॥जनयामासनामानितयोरपिवदामिते॥वि
ष्णुःकृष्णोहृषीकेशोवासुदेवोजनार्दनः॥उमागौरीसतीचंडीसुंदरीसुभगाशिवा॥एवंयुवतयःसद्यःपुरुषत्वंप्रपेदिरे॥चक्षुष्मंतोनुपश्यंतिनेतरेऽ
तद्विदोजनाः॥ब्रह्मणेप्रददौपत्नींमहालक्ष्मीर्नृपत्रयीं॥रुद्रायगौरींवरदांवासुदेवायचश्रियं॥सतयासहसंभूयविरिंचोंडमजीजनत्॥बिभेदभगवा राम
न्रुद्रस्तद्गौर्यासहवीर्यवान्॥अंडमध्येप्रधानादिकार्यजातमभून्नृप॥महाभूतात्मकंसर्वंजगत्स्थावरजंगमं॥पुपोषपालयामासतल्लक्ष्म्यासहकेश १२७

वः॥संजहारजगत्सर्वंसहगौर्यामहेश्वरः॥महालक्ष्मीरेवसर्वंराजन्सर्वमयीश्वरी॥निराकारासस्साकारासैवनानाभिधानभृत्॥नामांतरैर्निरूप्येषा
नाम्नानान्येनकेनचित्॥३०॥ ॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीश्रीभगवतीमाहात्म्येप्राधानिकंनाम॥ ॥ऋषिरुवाच॥ ॥त्रिगुणा
तामसीदेवीसात्विकीयात्रिधोदिता॥साशर्वाचंडिकादुर्गाभद्राभगवतीसती॥योगनिद्राहरेश्चैषामहाकालीतमोगुणा॥मधुकैटभनाशार्थंयांतु
ष्टावांबुजासनः॥ऋषिरुवाच॥ ॥दशवक्त्रादशभुजादशपादांजनप्रभा॥विशालयाराजमानात्रिंशल्लोचनमालया॥स्फुरद्दशनदंष्ट्रासाभीम
रूपापिभूमिप॥रूपसौभाग्यकांतीनांसाप्रतिष्ठामहाश्रियं॥खड्गबाणगदाशूलशंखचक्रभुशुंडिभृत्॥परिघंकार्मुकंशीर्षंनिश्चोतद्रुधिरंदधौ॥ए
षासावैष्णवीमायामहाकालीदुरत्यया॥आराधितावशीकुर्यात्पूजाकर्तुश्चराचरं॥ऋषिरुवाच॥सर्वदेवशरीरेभ्योयाविर्भूतामितप्रभा॥त्रिगुणा
सामहालक्ष्मीसाक्षान्महिषमर्दिनी॥श्वेताननानीलभुजासुश्वेतस्तनमंडला॥रक्तमध्यारक्तपादानीलजंघोरुरुन्मदा॥सुचित्रजघनाचित्रमाल्यां
बरविभूषणा॥चित्रानुलेपनाकांतिरूपसौभाग्यशालिनी॥अष्टादशभुजापूज्यासासहस्रभुजासती॥आयुधान्यत्रवक्ष्यंतेदक्षिणाधःकरक्रमात्॥
अक्षमालाचकमलंबाणोऽसिःकुलिशंगदा॥चक्रंत्रिशूलंपरशुःशंखोघंटाचपाशकः॥शक्तिर्दंडश्चर्मचापंपानपात्रंकमंडलुः॥अलंकृतभुजामेभि
रायुधैःकमलासनां॥सर्वदेवमयीमीशांमहालक्ष्मीमिमांनृप॥पूजयन्सर्वलोकानांदेवानांप्रभुर्भवेत्॥गौरीदेहात्समुद्भूतायासत्वैकगुणाश्रया॥सा

मार्कं॰ १२८

क्षात्सरस्वतीप्रोक्ताशुंभासुरनिबर्हणी॥दधौचाष्टभुजाबाणंमुशलंशूलचक्रभृत्॥शंखंघंटांलांगलंचकार्मुकंवसुधाधिप॥एषासंपूजिताभक्त्यासर्वज्ञत्वं
प्रयच्छति॥निशुंभमथनीदेवीशुंभासुरनिबर्हणी॥इत्युक्तानिस्वरूपाणिमूर्तीनांतवपार्थिव॥उपासनंजगन्मातुःपृथगासांनिशामय॥महालक्ष्मीर्य
दापूज्यामहाकालीसरस्वती॥दक्षिणोत्तरयोःपूज्येपृष्ठतोमिथुनत्रयं॥विरंचिःस्वरयोर्मध्येरुद्रोगौर्याश्चदक्षिणे॥वामेलक्ष्म्याहृषीकेशंपुरतोदेव
तात्रयं॥अष्टादशभुजामध्येवामेचास्यादशानना॥दक्षिणेष्टभुजालक्ष्मीर्महतीतिसमर्च्यते॥अष्टादशभुजाचैकायदापूज्यानराधिप॥दशानना
चाष्टभुजादक्षिणोत्तरयोस्तथा॥दशाननायदापूज्यावामदक्षिणयोस्तदा॥कालमृत्यूचसंपूज्यौसर्वारिष्टप्रशांतये॥यदाचाष्टभुजापूज्याशुंभासुरनि
बर्हिणी॥तदस्यांशक्तयःपूज्यास्तदारुद्रविनायकौ॥ततोदेव्याइतिस्तोत्रैर्महालक्ष्मींसमर्चयेत्॥अवतारत्रयार्चायांस्तोत्रमंत्रास्तदाश्रयाः॥अष्टादश
भुजाचैकापूज्यामहिषमर्दिनी॥महालक्ष्मीर्महाकालीसैवप्रोक्तासरस्वती॥ईश्वरीपुण्यपापानांसर्वलोकमहेश्वरी॥महिषांतकरीयेनपूजितासजगत्प्र
भुः॥पूजयेज्जगतांधात्रींचंडिकांभक्तवत्सलां॥अर्घ्यादिभिरलंकारैर्गंध धूपैस्तथाक्षतैः॥धूपैर्दीपैश्चनैवेद्यैर्नानाभक्ष्यसमन्वितैः॥रुधिराक्तेनबलि
नामांसेनसुरयानृप॥प्रणामाचमनीयेनचंदनेनसुगंधिना॥सकर्पूरैश्चतांबूलैर्भक्तिभावसमन्वितैः॥वामभागेग्रतोदेव्याछिन्नशीर्षंमहासुरं॥ राम
पूजयेन्महिषंयेनप्राप्तंसायोज्यमीशया॥दक्षिणेपुरतःसिंहंसमग्रंधर्ममीश्वरं॥वाहनंपूजयेद्देव्याधृतंयेनचराचरं॥ततःकृतांजलिर्भूत्वास्तुवी १२८

तन्चरीतैः रिमैः॥एकेनवामध्यमेनएकेनेतरयोरिह॥चरिताईचनजपेज्जपंश्छिद्रमवाप्नुयात्॥स्तोत्रमंत्रैःस्तुवीतेशांयदिवाजगदात्मिकां॥दक्षिणेननम
स्कारंकृत्वामूर्ध्निकृतांजलिः॥क्षमापयेज्जगद्धात्रींमुहुर्मुहुरतंद्रितः॥प्रतिश्लोकेचजुहुयात्पायसंमधुसर्पिषा॥जुहुयात्स्तोत्रमंत्रैश्चचंडिकायैशुभंहविः॥
भूयोनामपदैर्देवींपूजयेत्सुसमाहितः॥प्रयतःप्रांजलिर्भूत्वाप्राणानारोप्यचात्मनि॥सुचिरंभावयेदीशांचंडिकांतन्मयोभवेत्॥एवंयःपूजयेद्भक्त्याप्र
त्यहंपरमेश्वरीं॥भुक्त्वाभोगान्यथाकामंदेवीसायुज्यमाप्नुयात्॥योनपूजयतेभक्त्याचंडिकांभक्तवत्सलां॥भस्मीकृत्यास्यपुण्यानिनिर्दहेत्तमपीश्वरी
तस्मात्पूजयभूपालसर्वलोकमहेश्वरीं॥यथोक्तेनविधानेनचंडिकांसुखमाप्स्यसि॥ ॥४०॥ ॥इतिश्रीमार्कंडेयपुराणेदेवीमाहात्म्येवैकृतिकंनाम॥ ॥
ऋषिरुवाच॥ ॥नंदाभगवतीमायायाभविष्यतिनंदजा॥सास्तुतापूजिताभक्त्यावशीकुर्याच्चराचरं॥कनकोत्तमकांतिःसासुकांतिःकनकांबरा॥देवीकनक
वर्णाभाकनकोत्तमभूषणा॥कमलांकुशपाशाब्जैरलंकृतचतुर्भुजा॥इंदिराकमलालक्ष्मीःसाश्रीरुक्मांबुजासना॥यारक्तदंतिकानामदेवीप्रोक्ताम
यानघ॥तस्याःस्वरूपंवक्ष्येतेशृणुपापभयापहं॥रक्तांबरारक्तवर्णारक्तसर्वांगभूषणा॥रक्तायुधारक्तनेत्रारक्तकेशातिभीषणा॥रक्ततीक्ष्णन
खारक्तरसनारक्तदंष्ट्रिका॥पतिंनारीवानुरक्तादेवीभक्तंभजेज्जनं॥वसुधेवविशालासासुमेरुयुगलस्तनी॥दीर्घौलंबावतिस्थूलौतावतीवमनोह
रो॥कर्कशावतिकांतौतौसर्वानंदपयोनिधी॥भक्तान्संपाययेद्देवीसर्वकामदुघौस्तनौ॥खड्गंपात्रंचमुसलंलांगलंचबिभर्तिसा॥आख्यातारक्तचामुं

मार्कं· उदेवीयोगेश्वरीतिच॥अनयाव्याप्तमखिलंजगत्स्थावरजंगमं॥इमांयः पूजयेद्भक्त्यासह्याप्नोतिचराचरं॥अधीतेयइमंनित्यंरक्तदंत्यावपुस्तवं॥तेषांपरिच
१२९ रेद्देवीपतिंप्रियमिवांगना॥शाकंभरीनीलवर्णानीलोत्पलविलोचना॥गंभीरनाभिस्त्रिवलीसुविभूषिततनूदरी॥सुकर्कशसमोत्तुंगवृत्तपीनघनस्त
नी॥मुष्टिंशिलीमुखापूर्णंकमलंकमलालया॥पुष्पपल्लवमूलादिफलादिशाकसंचयं॥काम्यानंतरसैर्युक्तं क्षुत्तृन्मृत्युजरापहं॥कार्मुकंचस्फुरत्कांतिबि
भ्रतीपरमेश्वरी॥शाकंभरीशताक्षीसासैवदुर्गाप्रकीर्तिता॥उमागौरीसतीचंडीकालिकासाचपार्वती॥शाकंभरींस्तुवन्ध्यायन्जपन्संपूजयन्नमन्॥
अक्षय्यमश्नुतेशीघ्रमन्नपानमृतंजलं॥भीमाचनीलवर्णासादंष्ट्रादशनभासुरा॥विशाललोचनावृत्ततुंगपीनपयोधरा॥चंद्रहासंचडमसंशिरः
पात्रंचबिभ्रती॥एकवीराकालरात्रीसैवोक्ताकामदासदा॥तेजोमंडलदुर्द्धर्षाभ्रामरीचित्रकांतिभृत॥चित्रभ्रमरपाणिस्थभ्रामरीतिनिगद्यते॥इत्येता
मूर्त्तयोदेव्याव्याख्यातावसुधाधिप॥जगन्मातुश्चंडिकायाःकीर्तिताःकामधेनवः॥इदंरहस्यंपरमंनवाच्यंकस्यचित्त्वया॥व्याख्यानंदिव्यमूर्त्तीनांमध्वी
ष्वावहितःस्वयं॥इतिश्रीमार्कंडेयपुराणेसावर्णिकेमन्वंतरेदेवीमाहात्म्येभगवत्यारहस्यंनाम॥ ॥श्रीमार्कंडेयउ॥सावर्णिकमिदंप्रोक्तंअष्टमंमन्वंतरंतव॥ मन्व ३
तत्रैवदेवीमाहात्म्यंमहिषासुरनाशनं॥उत्पत्तयश्चयादेव्यामातृणांचमहाहवे॥तथैवसंभवोदेव्याश्चामुंडायास्तथाभवं॥शिवदूत्याश्चमाहात्म्यंवधः राम
शुंभनिशुंभयोः॥रक्तबीजवधश्चैवसर्वमेतन्मयोदितं॥श्रूयतांमुनिशार्दूलसावर्णिकमथापरं॥दक्षपुत्रस्तुसावर्णिर्भावीयोनवमोमनुः॥ध्या १२९

तु२

मिमनोस्तस्ययेदेवामुनयोनृपाः॥परामरीचिगर्भाश्चसुधर्माणस्तथापरे॥तैस्त्रिधाभविष्यंतिसर्वेद्वादशकागणाः॥तेषामिंद्रोभविष्यस्तुसहस्राक्षो
महाबलः॥अद्भुतोनामकुलिशीगजेंद्रवरवाहनः॥सांप्रतंकार्त्तिकेयोयोवह्निपुत्रःषडाननः॥अद्भुतोनामभावीसातस्यमन्वंतरेमनोः॥मेधातिथि
र्वसुःसत्योज्योतिष्मान्वसुमांस्तथा॥सप्तर्षयोऽन्यःसवनस्तथान्योहव्यवाहनः॥धृष्टकेतुर्दीप्तिकेतुःपंचहस्तोनिरामयः॥वृषश्रवास्तथार्चिष्मान्
भूरिद्युम्नोबृहद्भयः॥एतेनवसुतास्तस्यदक्षपुत्रस्यवैनृपाः॥मनोस्तुदशमंयच्चशृणुमन्वंतरंद्विज॥मन्वंतरेतुदशमेब्रह्मपुत्रस्यधीमतः॥सुवा
सिनोविरुद्धाश्चद्विप्रकाराःसुराःस्मृताः॥शतसंख्यान्वितैर्देवाभविष्यास्तत्रवैमनोः॥तस्युत्राणांशतंभावितद्देवानांतदाशतं॥शांतिरिंद्रस्तदाभावीस
र्वैरिंद्रगुणैर्युतः॥सप्तर्षींस्तुनिबोधत्वंयेभविष्यंतिवैतदा॥आपोमूर्त्तिर्हविष्मांश्चसुकृतीसत्यएवच॥नाभागोप्रमितिश्चैववसिष्ठश्चैवसप्तमः॥
सुक्षित्रश्चोत्तमौजाश्चभूरिश्रेणश्चवीर्यवान्॥शतानीकोथवृषभोअनिमित्तोजयद्रथः॥भूरिद्युम्नःसुवर्चाश्चतस्यैतेतनयामुने॥भविष्योधर्म
पुत्रस्तुसावर्णिश्चांतरंशृणु॥विहंगमाःकामगानिर्वाणपतयस्तथा॥त्रिःप्रकाराभविष्यंतिएकैकशस्त्रिंशकोगणाः॥मासत्तुदिवसायेतुनिवातेशन
यस्तुतैर्विहंगमास्तत्रयोश्चमुहूर्त्ताकामगोगणाः॥इंद्रोवृषाख्योभवितातेषांप्रख्यातविक्रमः॥हविष्मांश्चवशिष्ठश्चअरुणिस्तथारुणिः॥विश्वरश्वा
नवश्चैववृष्टिश्चान्योमहामुनिः॥सप्तर्षयोऽतरेतस्मिन्अग्नितेजाश्चसप्तमे॥सर्वानुगःसुशर्माचदेवानीकःपुरूद्रहः॥हेमधन्वादृढायुश्चविभावसु

धिर

सुताः नृपाः॥ द्वादशे रुद्रपुत्रस्य प्राप्ते मन्वंतरे मनोः॥ सावर्ण्याख्यस्य ये देवा मुनयश्च शृणुष्व तान्॥ सुकर्माणः सुमनसो हरिता रोहितास्तथा॥ सुपाराश्च सुरास्तत्र यत्रैवै
दशको गणः॥ तेषामिंद्रस्तु विज्ञेयः ऋतुधामा महाबलः॥ सर्वैरिंद्रगुणैर्युक्तः सप्तर्षीन् अपि मे शृणु॥ द्युतिस्तपस्वी सुतपास्तपोमूर्त्तिस्तपोनिधिः॥ तपोरतिस्तथैवान्यः
सप्तमस्तु तपोधृतिः॥ देववानुपदेवश्च देवश्रेष्ठो विदूरथः॥ मित्रवान् मित्रविंदुश्च भाविनस्तत्सुता नृपाः॥ ९७॥ इति श्रीमार्कंडेयपुराणे॥ ॥श्रीमार्कंडेय उ॰॥ त्रयोद
शस्य पर्य्याये रौच्यस्य च मनोः सुरान्॥ सप्तर्षींश्च नृपांश्चैव गदतो मे निशामय॥ सुधर्माणः सुरास्तत्र सुकर्माणस्तथापरे॥ सुशर्माणः सुराश्चैते समस्ता मुनिसत्त
म॥ महाबलो महावीर्य्यस्तेषामिंद्रो दिवस्पतिः॥ भविष्यत्यथ सप्तर्षीन् गदतो मे निशामय॥ धृतिमानव्ययश्चैव तत्त्वदर्शी निरुत्सुकः॥ निर्मोहः सुतपाश्चान्यो निःप्र
कंपश्च सप्तमः॥ चित्रसेनो विचित्रश्च नयभृन्निर्भयो दृढः॥ सुनेत्रः क्षत्रवृद्धिश्च सुरथश्चैव तत्सुताः॥ ५॥ ॥इति श्रीमार्कंडेयपुराणे रौच्यमन्वंतरे॥ ॥श्रीमार्कंडे
य उ॰॥ रुचिः प्रजापतिः पूर्वं निर्म्ममो निरहंकृतिः॥ यत्रास्तमितशायी च चचार पृथिवीमिमां॥ अनग्निमनिकेतनमेकाहावसथाश्रयं॥ विमुक्तसंगतं दृष्ट्वा प्रोचुः स्व
पितरो मुनिं॥ ॥पितर ऊचुः॥ वत्स कस्मात्त्वया पुण्यो न कृतो दारसंग्रहः॥ स्वर्गापवर्गहेतुत्वाद्बंधस्तेनानिशं विना॥ गृही समस्तदेवानां पितॄणां च तथार्हणां॥ ऋषी
णामतिथीनां च कुर्वन् लोकाननुपाश्नुते॥ स्वाहोच्चारणतो देवान् स्वधोच्चारणतः पितॄन्॥ विभजत्यन्नदानेन भूतान्यानतिथीनपि॥ सत्वं दैवादृणाद्बंधं बंधमस्मदृणा
दपि॥ अवाप्नोषि मनुष्यर्षिभूतेभ्यश्च दिने दिने॥ अनुत्पाद्य सुतान् देवान् संतर्प्य पितरस्तथा॥ भूतादींश्च कथं मौढ्यात् सुगतिं गंतुमिच्छसि॥ क्लेश एव हि के पुत्र मन्यामो

त्र भवेत्तव॥ मृतस्य नरकं नूनं क्लेश एवान्यजन्मनि॥ रुचिरुवाच॥ ॥परिग्रहोतिदुःखाय पापायाधोगतिस्तथा॥ भवत्यतो मया पूर्वं न कृतो दारसंग्रहः॥
आत्मनः संयमो योयं क्रियतेऽक्षनियंत्रणात्॥ विमुक्तिहेतुर्न भवत्यसावपि परिग्रहात्॥ प्रक्षाल्यते नु दिवसं यदात्मनि परिग्रहे॥ ममत्वपंकदिग्धोपि
चितो भोगिभिर्वरं हि तत्॥ अनेकभवसंभूतकर्मपंकांकितो बुधो॥ आत्मा तद्वासनातोयैः प्रक्षाल्यो नियतेंद्रियैः॥ पितर ऊचुः॥ ॥युक्तं प्रक्षालनं कर्तुमा
त्मनो नियतेंद्रियैः॥ किंतु येनापायमार्गेयं यत्र त्वं पुत्र वर्त्तसे॥ पंचवर्णदानेरशुभं नुद्यते ऽनभिसंधिभिः॥ फलैस्तथोपभोगैश्च पूर्वकर्मशुभाशुभैः॥ एवं न
बंधो भवति कुर्वतः कारणं विना॥ न च बंधाय तत्कर्म भवत्यनभिसंधितं॥ पूर्वकर्मकृतं भोगैः क्षीयते हर्निशं तथा॥ सुखदुःखात्मकं वत्स पुण्यापुण्यपोक्तं
नृणां॥ एवं प्रक्षाल्यते प्राज्ञैरात्मा बंधाच्च रक्ष्यते॥ न त्वेवमविवेकेन पापपंकेन लिप्यते॥ रुचिरुवाच॥ ॥अविद्या पठ्यते वेदे कर्ममार्गः पितामहाः॥ तत्कथं
कर्मणो मार्गं भवंतो योजयंति मां॥ पितर ऊचुः॥ ॥अविद्यासत्यमेवैतत्कर्म नैतत्त्वयावचः॥ किंतु विद्यापरिप्राप्तौ हेतुः कर्म न संशयः॥ विहिताकरणा
त्पुंभिरसद्भिः क्रियते तु यः॥ संयमो मुक्तये नोसौ प्रत्युताधोगतिप्रदः॥ प्रक्षालयामीति भवान् वत्सात्मानं तु मन्यते॥ विहिताकरणोद्भूतैः पापैस्त्वं तु
विलिप्यते॥ अविद्याप्युपकाराय विषवज्जायते नृणां॥ अनुष्ठिताभ्युपायेन बंधायान्यायतो हि सा॥ तस्माद्वत्स कुरुष्व त्वं विधिवद्दारसंग्रहं॥ मा जन्म
विफलं ते स्तु असंप्राप्यान्यलोकिकं॥ रुचिरुवाच॥ वृद्धोहं सांप्रतं को मे पितरः संप्रदास्यति॥ भार्यां तथा दरिद्राय दुःकरो दारसंग्रहः॥ पितर ऊचुः॥ ॥अस्मा

मार्कं· केपतनंवत्सभवतश्चाप्यधोगतिः॥नूनंभाविभवित्रीवनाभिनंदतिनोवचः॥श्रीमार्कण्डेयउ०॥इत्युक्त्वापितरस्तस्यपश्यतोमुनिसत्तम॥बभूवुःसहसा
१३१ दृश्यादीपावातहताइव॥सतेनपितृवाक्येनभृशमुद्विग्नमानसः॥कन्याभिलाषीविप्रर्षिःपरिबभ्राममेदिनीं॥कन्यामलभमानोसौपितृवाग्निदी
प्तिः॥चिंतामवापमहतीमतीवोद्विग्नमानसः॥किंकरोमिक्कगच्छामिकथंमेदारसंग्रहः॥क्षिप्रंभवेत्पितृणांममाभ्युदयकारकः॥इतिचिं
तयतस्तस्यमतिर्जातामहात्मनः॥तपसाराधयाम्येनंब्रह्माणंकमलोद्भवं॥ततोवर्षशतंदिव्यंतपस्तेपेसवेधसं॥दिदृक्षुःसुचिरंकालंमहर्षि
र्नियमस्थितः॥ततंस्वंदर्शयामासब्रह्मालोकपितामहः॥उवाचचप्रसन्नोस्मिब्रूहियत्तेभिवांछितं॥ततोसौप्रणिपत्याहब्रह्माणंजगतांपतिं॥
पितृणांवचनात्तेनयत्कर्त्तुमभिवांछितं॥ब्रह्मावाहरुचिंविप्रंश्रुत्वातस्याभिवांछितं॥प्रजापतिस्त्वंभवितास्रष्टव्याभवताप्रजाः॥सृष्ट्वाप्रजाःसु
तान्विप्रसमुत्पाद्यक्रियास्तथा॥कृतकृत्याधिकारस्त्वंततःसिद्धिमवाप्स्यसि॥२५॥सत्वंयथोक्तंपितृभिःकुरुदारपरिग्रहं॥कामंचेममभिध्यायक्रि
यतांपितृपूजनं॥तएवतुष्टापितरःप्रदास्यंतितवेप्सितं॥पत्नींसुतांश्चसंतुष्टाःकिंनदद्युःपितामहाः॥श्रीमार्कंडेयउ०॥इत्यृषिर्वचनंश्रुत्वाब्रह्मणो
ऽव्यक्तजन्मनः॥नद्याविविक्तेपुलिनेचकारपितृतर्पणं॥तुष्टावचपितॄन्विप्रःस्तवैरेभिस्तथादृतः॥एकाग्रःप्रयतोभूत्वाभक्तिनम्रात्मकंधरः॥रुचि राम
रुवाच॥नमस्येहंपितॄन्भक्त्यायेवसंत्यधिदैवतं॥देवैरपिहितर्प्यंतियेश्राद्धेषुस्वधोत्तरैः॥नमस्येहंपितॄन्स्वर्गेसिद्धाःसंतर्प्पयंतियान्॥श्राद्धेषुदिव्यैः १३१

सकलैरुपहारैरनुत्तमैः॥नमस्येहंपितॄन्सर्वेतृप्यंतेयेमहर्षिभिः॥श्राद्धैर्मनोरमैर्भक्त्याभुक्तिमुक्तिमभीप्सुभिः॥नमस्येहंपितॄन्भक्त्यायेऽर्च्यंतेगुह्यकैर्दिवि॥त
न्मयत्वेनवांछद्भिःऋद्धिमात्यंतिकींपरां॥नमस्येऽहंपितॄन्मर्त्यैरर्च्यंतेभुवियेसदा॥श्राद्धेषुश्रद्धयाभीष्टलोकपुष्टिप्रदायिनः॥नमस्येहंपितॄन्विप्रैरर्च्यंतेभु
वियेसदा॥वांछिताभीष्टलाभायप्राजापत्यप्रदायिनः॥नमस्येहंपितॄन्येवैतर्प्यंतेऽरण्यवासिभिः॥वन्यैःशाकफलाहारैस्तपोनिर्धूतकल्मषैः॥नमस्येहं
पितॄन्विप्रैर्नैष्ठिकव्रतचारिभिः॥येःसंयतात्मभिर्नित्यंसंतर्प्यंतेसमाधिभिः॥नमस्येहंपितॄ[illegible]श्राद्धैराजन्यास्तर्प्पयंतियान्॥कव्यैरशेषैर्विधिवल्लोकद्वय
फलप्रदान्॥नमस्येहंपितॄन्वैश्यैरर्च्यंतेभुवियेसदा॥स्वकर्माभिरतैर्नित्यंपुष्पधूपान्नवारिभिः॥नमस्येहंपितॄन्श्राद्धेयेशूद्रैरपिभक्तितः॥संतर्प्यंतेजग
त्यत्रनाम्नाख्याताःसुकालिनः॥नमस्येहंपितॄन्श्राद्धेपातालेयेमहासुरैः॥संतर्प्यंतेसुधाहारास्त्यक्तदंभमदैःसदा॥नमस्येहंपितॄन्श्राद्धैरर्च्यंतेयेरसा
तले॥भोगैरशेषैर्विधिवन्नागैःकामानभीप्सुभिः॥४२॥नमस्येहंपितॄन्श्राद्धेसर्प्पैःसंतर्पितान्सदा॥तत्रैवविधिवन्मंत्रैर्भोगसंपत्समन्वितैः॥पितॄन्न
मस्येनिवसंतिसाक्षात्येदेवलोकेथमहीतलेवा॥तथांतरिक्षेचसुरादिपूज्यास्तेसंप्रतीच्छंतुमयोपनीतं॥पितॄन्नमस्येपरमात्मभूतायेवैविमानेनि
वसंतिमूर्त्ताः॥यजंतियानस्तमलैर्मनोभिर्योगीश्वराःक्लेशविमुक्तिहेतून्॥पितॄन्नमस्येदिवियेचमूर्त्ताःस्वधाभुजःकाम्यफलाभिसंधौ॥प्रदानसक्ताःसक
लेप्सितानांमुक्तिदायेनभिसंधितेषु॥तृप्यंतुतेस्मिन्पितरःसमेताःइच्छावतांयेप्रदिशंतिकामान्॥सुरत्वमिंद्रत्वमतोधिकंवावस्वात्मजान्क्षमामबलोगृहा

मार्कं॰
१३२

णि॥सूर्य्यस्ययेरश्मिषुचेंदुबिंबेषुशुक्केविमानेचसदावसंति॥तृप्यंतुतेस्मिन्पितरोऽन्नतोयैर्गंधादिनापुष्टिमितोव्रजंतु॥येषांहुतेग्नौहविषाचतृप्तिर्येभुं
जतेविप्रशरीरसंस्थाः॥येपिंडदानेनमुदंप्रयांतितृप्यंतुतेस्मिन्पितरोऽन्नतोयैः॥येषङ्गमांसेनसुरैरभीष्टैःकृष्णैस्तिलैर्दिव्यमहोरगैश्च॥कालेनशाके
नमहर्षिवर्य्यैःसंप्रीणितास्तेमुदमत्रयांतु॥कव्यान्यशेषाणिचयान्यभीष्टान्यतीवयेषाममरार्च्चितानां॥तेषांतुसांनिध्यमिहास्तुपुष्पगंधांऽबुभोज्येषुम
याहृतेषु॥दिनेदिनेयेप्रतिगृह्णतेर्च्चांमासांतपूज्याभुवियेऽष्टकासु॥येवत्सरांतेऽभ्युदयेचपूज्याःप्रयांतुतेमेपितरोऽत्रतुष्टिं॥पूज्याद्विजानांकुमुदेंदुभा
सायेक्षत्रियाणांचनवार्कवर्णाः॥तथाविशांयेकनकावदातानीलीनिभाःशूद्रजनस्ययेच॥तेस्मिन्समस्ताममपुष्पगंधधूपान्नतोयादिनिवेदनेन॥त
थाग्निहोमेनचयांतुतृप्तिंसदापितृभ्यःप्रणतोस्मितेभ्यः॥येदेवपूर्वाण्यतितृप्तिहेतोरश्नंतिकव्यानिशुभाहृतानि॥तृप्ताश्चयेभूतिसृजोभवंतितृप्यंतुते
स्मिन्प्रणतोस्मितेभ्यः॥रक्षांसिभूतान्यसुरांस्तथोग्रान्निर्नाशयंतस्त्वशिवंप्रजानां॥आद्याःसुराणाममरेशपूज्याःप्रयांतुतेमेपितरोऽत्रतुष्टिं॥अग्निष्वा
त्ताबर्हिषदआज्यपाःसोमपास्तथा॥व्रजंतुतृप्तिंश्राद्धेस्मिन्पितरस्तर्पितामया॥अग्निष्वात्ताःपितृगणाःप्राचींरक्षंतुमेदिशं॥तथाबर्हिषदःपांतुयाम्यांये
पितरं[redacted]स्थिताः॥प्रतीचीमाज्यपास्तद्वदुदीचीमपिसोमपाः॥उर्द्ध्वतस्त्वर्य्यमारक्षेत्कव्यवाडनलोप्यधः॥विश्वोविश्वभुगाराध्योधन्योधर्मःसनातनः॥भूति राम
दोभूतिकृद्भूतिःपितृणांयेगणानव॥कल्याणःकल्यदःकर्त्ताकल्यःकल्यतराश्रयः॥कल्यनाहेतुरनघः॥षडिमेतेगणाःस्मृताः॥महान्महात्मामहितोम १३२

हिमावमहाबलः॥गणाःपंचतथैवैतेपितॄणांपापनाशनाः॥सुखदोधनदश्चान्योधर्मदोऽन्यश्चभूतिदः॥पितॄणांकथ्यतेचैतत्तथागणचतुष्ट[illegible]॥विंश
तपितृगणागणायैर्व्याप्तमखिलंजगत्॥तएवात्रतृप्तास्तुष्यंतुयच्छंतुसदाहितं॥श्रीमार्कंडेयउ०॥एवंतुस्तुवतस्तस्यतेजोराशिरुपस्थितः॥प्रादुर्बभूवस
हसागगनव्याप्तिकारकः॥तंदृष्ट्वातुमहत्तेजःसमाच्छाद्यस्थितंजगत्॥जानुभ्यामवनिंगत्वारुचिःस्तोत्रमिदंजगौ॥रुचिरुवाच॥अमूर्त्तानांसमूर्त्तानां
पितॄणांदीप्ततेजसां॥नमस्यामिसदातेषांध्यानिनांदिव्यचक्षुषां॥इंद्रादीनांजनेतारोदक्षमारीचयोस्तथा॥सप्तर्षीणांतथान्येषांतान्नमस्यामिकाम
दान्॥मन्वादीनांजनेतारःसूर्यचंद्रमसोस्तथा॥तान्नमस्याम्यहंसर्वान्पितृनःस्वर्णवेषुच॥नक्षत्राणांग्रहाणांचवाय्वग्न्योर्नभसस्तथा॥द्यावापृथि
व्योश्चतथानमस्यामिकृतांजलिः॥नमोगणेभ्यःसप्तभ्यस्तथालोकेषुसप्तसु॥स्वयंभुवेनमस्यामिब्रह्मणेयोगचक्षुषे॥सोमाधाराःपितृगणायोग
मूर्त्तिधराहिते॥नमस्यामिततःसोमंपितरंजगतामहं॥अग्निरूपांस्तथैवान्यान्नमस्यामिपितॄनहं॥अग्नीषोममयंविश्वंयतएतदशेषतः॥येतुतेजसि
येचैतेसूर्यसोमाग्निमूर्त्तयः॥जगत्स्वरूपिणश्चैवतथाब्रह्मस्वरूपिणः॥तेभ्योखिलेभ्योयोगिभ्यःपितृभ्योयतमानसः॥नमोनमोनमस्तेमेप्रसीदंतुस्व
धाभुजः॥श्रीमार्कंडेयउ०॥एवंस्तुतास्ततस्तेनतेजसोमुनिसत्तम॥निश्चक्रमुस्तेपितरोभासयंतोदिशोदश॥निवेदितंचयत्तेनपुष्पगंधानुलेपनं॥तद्भूषि
तान्समस्तान्तान्ददृशेपुरतःस्थितान्॥प्रणिपत्यसैवभक्त्यापुनरेवकृतांजलिः॥नमस्तुभ्यंनमस्तुभ्यमित्याहपृथगादृतः॥ततःप्रसन्नाःपितरस्तमूचु

DR. BHAU DAJI MEMORIAL
DR. BHAU DAJI MEMORIAL

मुनिसत्तम॥वरंवृणीष्वेतिसतानुवाचनतकंधरः॥सांप्रतंसर्गकर्तृत्वमादिष्टंब्रह्मणाामम॥तस्मादिच्छामिपत्नींवैसाध्वींगुणसमाहितां॥पितरउचुः॥
प्राप्स्यसित्वंमहाभागभार्यांविनयभूषणां॥तस्यांचपुत्रोभविताभवतोमुनिसत्तम॥मन्वंतराधिपोधीमांस्त्वन्नाम्नैवोपलक्षितः॥रुचेरौच्यइतिख्यातिं
प्रयास्यतिजगत्त्रये॥तस्यापिबहवःपुत्रामहाबलपराक्रमाः॥भविष्यंतिमहात्मानःपृथिवीपरिपालकाः॥त्वंचप्रजापतिर्भूत्वाप्रजाःसृष्ट्वाचतुर्विधाः॥
क्षीणाधिकारोधर्मज्ञस्ततःसिद्धिमवाप्स्यसि॥स्तोत्रेणानेनचनरोयोस्मांस्तोष्यतिभक्तितः॥तस्यतुष्टावयंभोगान्दास्यामोज्ञानमुत्तमं॥शरीरारोग्यमै
श्वर्यंपुत्रपौत्रादिकंतथा॥वांछद्भिःसततंस्तव्यास्तोत्रेणैतेनयत्नतः॥श्राद्धेचयइमंभक्त्याअस्मत्प्रीतिकरंस्तवं॥पठिष्यतिद्विजाग्र्याणांभुंजतांपुरतःस्थितः॥
स्तोत्रश्रवणसंप्रीत्यासंनिधानेपरेकृते॥अस्माकमक्षयंश्राद्धंतद्भविष्यत्यसंशयं॥यद्यप्यश्रोत्रियंश्राद्धंयद्यप्युपहतंभवेत्॥अन्यायोपात्तवित्तेनयदिवाकृत
मन्यथा॥अश्राद्धैर्यैस्तथाद्रव्यैरुपहारैस्तथाकृतं॥अकालेप्यथवादेशेविधिहीनमथापिवा॥अश्रद्धयावापुरुषैर्दंभमाश्रित्ययत्कृतं॥अस्माकंतृप्तयेश्राद्धं
तथाप्येतदुदीरणात्॥यत्रैतत्पठ्यतेश्राद्धेस्तोत्रमस्मत्सुखावहं॥अस्माकंजायतेतृप्तिस्तत्रद्वादशवार्षिकी॥हेमंतेद्वादशाब्दानितृप्तिमेतत्प्रयच्छति॥शिशिरे
द्विगुणाब्दानितृप्तिंस्तोत्रमिदंश्रुतं॥वसंतेषोडशसमास्तृप्तयेश्राद्धकर्मणि॥ग्रीष्मेचषोडशैवैतत्पठितंतृप्तिकारकं॥विकालेपिकृतेश्राद्धेस्तोत्रेणानेनशोधि राम
ते॥वर्षासुतृप्तिरस्माकंअक्षयाजायतेरवे॥शरत्कालेपिपठितंश्राद्धकालेप्रयच्छति॥अस्माकमेतत्पुरुषैस्तृप्तिंपंचदशाब्दिकीं॥यस्मिन्गृहेपिलिखितंति १३३
मेतन्

ष्ठतिनित्यशः॥सन्निधानंकृतेश्राद्धेतत्रास्माकंभविष्यति॥तस्मादेतद्ब्रूयात्श्राद्धेविप्राणांभुंजतांपुरः॥श्रावणीयंमहाभागअस्माकंपुष्टिहेतुकं॥९८॥
इतिश्रीमार्कंडेयपुराणेरौच्यमन्वंतरे॥ ॥श्रीमार्कंडेयउ॰॥ततस्तस्मान्नदीमध्यात्समुत्तस्थौमनोरमा॥प्रम्लोचानामतन्वंगीतत्समीपंवराप्सरा॥साचोवा
चमहात्मानंरुचिंसमधुराक्षरं॥प्रश्रयावनतासुभ्रूःप्रम्लोचावैवराप्सरा॥प्रम्लोचोवाच॥अतीवरूपिणीकन्यामत्सुतावदतांवर॥जातावरुण
पुत्रेणपुष्करेणमहात्मना॥तांगृहाणमयादत्तांभार्यार्थेवरवर्णिनीं॥मनुर्महामतिस्तस्यांसमुत्पत्स्यतितेसुतः॥मार्कंडेयउ॰॥तथेतितेनसा
प्युक्तातस्मात्तोयाद्वपुष्मतीं॥उज्जहारततःकन्यांमालिनींनामनामतः॥नद्याश्चपुलिनेतस्मिन्समुनिर्मुनिसत्तम॥जग्राहविधिवत्पाणिंसमा
साद्यमहामुनीन्॥तस्यांतस्यसुतोजज्ञेमहावीर्योमहामतिः॥रौच्योभवत्पितुर्नाम्नाख्यातोऽत्रवसुधातले॥तस्यमन्वंतरेदेवातथासप्तर्षयश्च
ये॥तनयाश्चनृपाश्चैवतेसम्यक्कथितास्तव॥धर्मवृद्धिस्तथारोग्यंधनधान्यसुतोद्भवं॥नृणांभवत्यसंदिग्धमस्मिन्मन्वंतरेश्रुते॥पितृस्तवंत
थाश्रुत्वापितृणांचतथागणान्॥सर्वान्कामानवाप्नोतितत्प्रसादान्नरोमुने॥ ॥इतिश्रीमार्कंडेयपुराणेरौच्यमन्वंतरंसमाप्तम्॥ ॥श्रीमार्कंडेय
उ॰॥ ॥अतःपरंतुभौत्यस्यत्वमुत्पत्तिंनिशामय॥देवानृषींस्तथापुत्रान्तथैववसुधाधिपान्॥बभूवांगिरसःशिष्योभूतिर्नामातिकोपनः॥चंड
शापप्रदोल्पेपिमुनिरागस्यसौम्यवाक्॥तस्याश्रमेमातरिश्वानचवात्यतिनिष्ठुरः॥नातितापंरविश्चक्रेपर्जन्योनातिकर्दमं॥नातिशीतंचशीतांशु

परिपूर्णोपिरश्मिभिः॥चकारभीत्यावैतस्यकोपनस्यातितेजसः॥ऋतवश्चऋतुहेलाद्वृक्षेष्वाश्रमजन्मसु॥तस्यपुष्पफलंचक्रुराज्ञयासार्वकामि
कं॥उदूरापश्चछंदेनतस्याश्रमसमीपगाः॥कमंडलुगताश्चैवतस्यभीतामहात्मनः॥नातिक्लेशसहोविप्रःसोभवद्भृशकोपनः॥अपुत्रश्चमहा
भागःसतपस्यकरोन्मनः॥पुत्रकामोजिताहारःशीतवातानिलाहतः॥तस्यासीतिचिंताथतपस्येवमनोदधे॥तस्येंदुर्नातिशीतायनातितापा
यभास्करः॥अववनवन्मातरिश्वाचववौनातिमहामुने॥अपीड्यमानोद्वंद्वैश्चसभूतिर्मुनिसत्तम॥अनवाप्याभिलषितंतपसःसन्यवर्त्तत॥
तस्यभ्रातासुवर्चाभूद्यज्ञेतेननिमंत्रितः॥क्रियासुशांतिनामानंशिष्यमाहमहामतिं॥प्रशांतमत्युत्तमंविनीतंगुरुकर्मणि॥मदोक्तंकुसदा
चारमुदारंमुनिसत्तम॥भूतिरुवाच॥अहंयज्ञंगमिष्यामिभ्रातुःशांतेसुवर्चसः॥तेनाहूतस्त्वयाचेहयत्कर्त्तव्यंशृणुष्वतत्॥प्रतिजागरणं
वह्नेस्त्वयाकार्यंममाश्रमे॥तथातथाऽप्रमत्तेनयथाग्निर्नशमंव्रजेत्॥इत्याज्ञाप्यातथेत्युक्तःसतुशिष्येणशांतिना॥जगामयज्ञंतंभ्रातुराहू
तःसनर्यवीयसा॥सतुशांतिर्वनाद्यावत्समित्पुष्पफलादिकं॥उपानयतिहस्यर्थंगुरोस्तस्यमहात्मनः॥अन्यच्चकुरुतेकर्मगुरुभक्तिवशा
नुगः॥प्रशांतस्तावदनलोयोऽसौभूतिपरिग्रहः॥तंदृष्ट्वासोऽनलंशांतंशांतिरत्यंतदुःखितः॥भीतश्चभूतेर्बहुधाचिंतयन्समहामतिः॥किंकरोमि राम
कथंवात्रभवश्चागमनंगुरोः॥मयाद्यप्रतिपत्तव्यंकिंकृतेसुकृतंभवेत्॥प्रशांताग्निमिमंधिक्ष्यंयदिपश्यतिमेगुरुः॥ततोमामविषह्येद्यव्यसने १३४

संनियोक्ष्यति॥यद्यन्यमग्निमात्रोहमग्निस्थानेकरोमितत्॥सर्वप्रत्यक्षदृक्भस्मसोऽवश्यंमांकरिष्यति॥सोहंपापंगुरोस्तस्यनिमित्तंकोपपा
पयोः॥तथात्मानंनशोचामियथायादृक्कृतंगुरोः॥दृष्ट्वाप्रशांतमनसंनूनंप्राप्स्यसिमांगुरुः॥अथवापावकंकुद्धस्तथावीर्योहिसद्विजः॥
तस्यप्रकोपाद्बिभ्यंतेदेवास्तिष्ठंतिशासने॥कृतागसंसमांमुक्त्वाकयानाद्यशपिष्यति॥२४॥मार्कंडेयउ॥बहुधैवंविचिंत्यासौभीतस्तस्यम
हागुरोः॥ययौमतिमतांश्रेष्ठःशरणंजातवेदसं॥सचकारतदास्तोत्रंसम्यक्संयतमानसः॥सत्वेकचित्तोमेदिन्यांन्यस्तजानुःकृतांजलिः॥
शांतिरुवाच॥ॐनमःसर्वभूतानांसाधनायमहात्मने॥एकत्रिपंचधिष्ण्यायराजसूयेषडात्मने॥ततःसमस्तदेवानांवृत्तिदायसुवर्चसे॥
शुक्ररूपायजगतामशेषाणांस्थितिंप्रति॥त्वंमुखंसर्वदेवानांत्वयात्तंभगवान्हविः॥प्रीणयत्यखिलान्देवान्त्वत्प्राणाःसर्वदेवताः॥हुतं
हविस्त्वयानलमेघत्वमुपगच्छति॥ततश्चजलरूपेणपरिणाममुपैतितत्॥तेनाखिलौषधीजन्मभवत्यनिलसारथे॥औषधीभिरशेषा
सुखंजीवंतिजंतवः॥वितन्वतेनरायज्ञान्नत्वत्सृष्टास्वौषधीषुच॥यज्ञैर्देवास्तथादैत्यास्तद्वद्रक्षांसिपावक॥आप्यायंतेचतेयज्ञास्त्वदाधाराहु
ताशनः॥अतःसर्वस्ययोनिस्त्वंवह्नेसर्वमयस्तथा॥देवतादानवायज्ञादैत्यगंधर्वराक्षसाः॥मानवाःपशवोवृक्षामृगपक्षिसरीसृपाः॥आप्या
यंतेत्वयासर्वेसंवर्ध्यंतेचपावक॥त्वत्तएवोद्भवंयांतित्वय्यंतेचतथालयं॥अपःसृजसिदेवत्वंत्वमग्नेपुनरेवताः॥पच्यमानास्त्वयायास्ताश्चप्रा

णिनां पुष्टिकारणं॥ देवेषु तेजोरूपेण कांत्या सिद्धेष्ववस्थितः॥ विषरूपेण नागेषु वायुरूपेण पत्रिषु॥ मनुजेषु भवान् क्रोधो मोहः पशुमृगादिषु॥ अव
ष्टंभोसि तरुषु काठिन्यं त्वं महीगतः॥ जले द्रवत्वेन भवान् जवरूपी तथानिले॥ व्यापित्वेन तथैवाग्ने नभसि त्वं व्यवस्थितः॥ त्वमग्ने सर्वभूतानां
मंतश्चरसि पावक॥ त्वामेकमाहुः कवयस्त्वामाहुस्त्रिविधं पुनः॥ त्वामष्टधा कल्पयित्वा यज्ञवाहमकल्पयन्॥ त्वया सृष्टमिदं विश्वं वदंति परमर्ष
यः॥ त्वदृते हि जगत्सर्वं सद्यो नश्येत् हुताशन॥ तुभ्यं कृत्वा द्विजाः पूज्यं स्वधर्मविहितां गतिं॥ प्रयांति हव्यकव्याद्यैः स्वधास्वाहाद्युदीरणात्॥ परिणा
मात्मवीर्योसि प्राणिनाममरार्चितं॥ दहति सर्वभूतानां त्वत्तो निःक्रम्य हायनाः॥ जातवेदस्त्वया चेदं विश्वं सृष्टं महाद्युते॥ तथैव वैदिकं कर्म स
र्वभूतात्मकं जगत्॥ नमस्तेऽनल पिंगाक्ष नमस्तेस्तु हुताशन॥ त्वमेव सर्वभूतानां पावनार्द्धिश्च पावकः॥ सस्यानां पाककर्तृत्वात् पोष्टा त्वं जग
तां तथा॥ त्वमेव मेघस्त्वं वायुस्त्वं बीजं सस्यहेतुकं॥ पावकाऽग्य नमस्तेस्तु नमस्ते हव्यवाहन॥ पोषाय सर्वभूतानां भूव्यस्त्वं तथा ह्यसि॥ त्वं ज्योतिः स भूत
र्वभूतेषु त्वमादित्यो विभावसुः॥ त्वमहस्त्वं तथा रात्रिरुभे संध्ये तथा भवान्॥ हिरण्यरेतास्त्वं वह्ने हिरण्योद्भवकारणं॥ हिरण्यगर्भश्च भवान् हिरण्य
सदृशप्रभः॥ त्वं मुहूर्त्तः क्षणस्त्वं च त्वं त्रुटिस्त्वं तथा लवः॥ कलाकाष्ठानिमेषादिरूपेणासि जगत्प्रभो॥ त्वमेव तदखिलं कालः परिणामात्मको भवान्॥ राम
याजिह्वा भवतः काली कालनिष्ठाकरी प्रभो॥ तया नः पाहि पापेभ्य ऐहिकाच्च महाभयात्॥ करालीनाम या जिह्वा महाप्रलयकारिणी॥ तया नः पाहि पापेभ्यो १३५

ऐहिकाच्च महाभयात्॥ मनोजवा च या जिह्वा लघिमागुणलक्षणा॥ तया नः पाहि पापेभ्यो ऐहिकाच्च महाभयात्॥ करोति नाशं भूतेभ्यो या ते जिह्वा सुलोहिता॥
तया नः पाहि पापेभ्यो ऐहिकाच्च महाभयात्॥ धूम्रवर्णा तु या जिह्वा मता सकलपिंगला॥ तया नः स्फुलिंगिनी च या जिह्वा समासं करत्न पिंगला॥ तया नः०॥
या ते विश्वसृजां जिह्वा प्राणिनां शमदायिनी॥ तया नः० पिंगाक्ष लोहितग्रीव कृष्णवर्त्मन् हुताशन॥ पाहि मां सर्वदोषेभ्यो संसाराद्दुद्धरस्व मां॥ प्रसीद
वह्ने सप्तार्चिः कृशानो हव्यवाहन॥ अग्ने पावक शक्राद्यैर्नामानामष्टभिः स्तुत॥ अग्नेऽग्रे सर्वभूतानां समुद्भूतो विभावसो॥ प्रसीद हाद्य सदाग्निरभि
ष्टुत मया व्यय॥ त्वमक्षयं कोप्यवर्चिंत्यरूपं समृद्धिमान् दुःसहो तितीव्रः॥ तथाव्ययं भीममशेषलोकसंवर्त्तकं भाति तवाति वीर्य्यं॥ त्वमुत्तमं तत्त्वमशे
शासत्वहृत्पुंडरीकस्थमनंतवीर्य्यं॥ त्वया ततं सर्वमिदं चराचरं हुताशनैको बहुधा त्वमत्र॥ त्वमक्षयः सगिरिवरा वसुंधरा त्वमंबरं सारनिशाकरादिकं॥
महाद्धेर्जठरगतश्च वाडवो भवान्॥ विभुः पिवसि पयांसि पावकः॥ हुताशनस्त्वमिति सुपूज्यसे सदा महाक्रतो नियमपरैर्महात्मभिः॥ अभिष्टुतः पिबसि
च सोममध्वरे वषट्कृतान्यपि च हवींषि भूतये॥ त्वं विप्रैः सततमिह पूज्यसे फलार्थं वेदांतेष्वपि सकलेषु गीयसे॥ त्वद्धेतोर्यजनपरायणा द्विजेंद्रा वेदांगा
न्यवगमयंति सर्वकालं॥ त्वं ब्रह्मा यजनपरस्तथैव विष्णुर्भूतेशः सुरपतिरर्यमा जलेशः॥ सूर्येंदु सकलसुरासुराश्च सर्वे ते प्यभिमतफलान्यवाप्नु
वंति॥ अर्चिभिः परममहापथात् दुष्टसंस्पृष्टं तव शुचि जायते समस्तं॥ स्नानानां परममतीव भस्मनाय त्स्नानं तन्मुनिभिरतीव सेव्यते॥ तत्त्वाग्नि

वं१

मार्कं. दिवमवाप्नुवंतिलोकात्वद्भक्त्याश्चभवतितापससमूहगीतः॥प्रसीदवह्नेशुचिनामधेयप्रसीदवायोरमलादिदीप्ते॥प्रसीदमेपावकवेद्यकृताक्षप्रसी
१३६ दहव्याशनपाहिमांत्वं॥यस्तेवह्नेशिवंरूपंयाश्चतेसप्तहेतयः॥ताभिःपाहिनःस्तुतोदेवपितापुत्रमिवौरसं॥४०॥ ॥इतिश्रीमार्कंडेयपुराणेभौतिमन्वंत
रेअग्निस्तवं॥श्रीमार्कंडेयउ०॥एवंस्तुतस्ततस्तेनभगवान्हव्यवाहनः॥ज्वालामालावृततनुस्तस्यासीदग्रतोमुनेः॥देवोविभावसुःप्रीतःस्तोत्रेणा
नेनतंद्विज॥तंशांतिमाहप्रणतंमेघगंभीरवागथ॥परितुष्टोस्मितेविप्रभक्त्यायत्तेस्तुतिःकृता॥वरंददामिभवतःप्रार्थ्यतांयत्तवेप्सितं॥शांतिरुवा०
भगवन्कृतकृत्योस्मियस्त्वांपश्यामिरूपिणं॥तथापिभक्तिनम्रस्यभवताश्रूयतांमम॥भ्रातुर्यज्ञेगतोदेवममाचार्योनिजाश्रमात्॥आगतस्याश्रमे
धिष्ण्यंत्व[illegible]नाथंसपश्यतु॥ममापराधात्संत्यक्तंपत्तेधिष्ण्यंविभावसो॥तत्त्वयाधिष्ठितंसोद्यपूर्ववत्पश्यतांद्विज॥अथान्यदर्पितेदेवेप्रसादंकु व
रुषेयदि॥पुत्रोविशिष्टोभवतुनिरपत्यस्यमेगुरोः॥तथाचमैत्रीतनयेसकरिष्यतिमेगुरुः॥तथासमस्तसत्त्वेषुभवत्वस्यमनोमृदु॥यश्चत्वांस्तोष्यते
नेनप्रीतिंयातोसिमेऽनघ॥स्तोत्रेणतस्यवरदोभवेथामत्प्रसादतः॥श्रीमार्कंडेयउ०॥ ॥एतच्छ्रुत्वावचस्तस्यतमाहद्विजसत्तमं॥स्तोत्रेणाराधितो
नगुरुभक्त्याचपावकः॥अग्निरुवाच॥गुरोरर्थेयथाब्रह्मन्याचितंतेवरद्वयं॥नात्मार्थेतेनमेप्रीतिस्त्वय्यतीवमहामुने॥भविष्यत्येतदखिलंगुरो राम
यत्प्रार्थितंत्वया॥मैत्रीसमस्तभूतेषुपुत्रश्चास्यभविष्यति॥१२॥मन्वंतराधिपःपुत्रोभौत्योनामभविष्यति॥महाबलोमहावीर्योमहाप्राज्ञोगुरोस्तव॥ १३६

५२

अनेनयःस्तोत्रेणस्तोष्यतेमांसमाहितः॥तस्याभिलषितंसर्वंपुण्यंचाग्र्यंभविष्यति॥यज्ञेषुपर्वकालेषुतीर्थेज्याहोमकर्मसु॥धर्मार्थपठतामेतन्ममतु
ष्टिकरंपरं॥अहोमकालदेशावाअयोगेपरथबाकृतः॥येषांदोषास्तानिदंसद्यःशमयिंतिसंश्रुतं॥पौर्णमास्याममावास्यांपर्वस्वन्येषुतुस्तवं॥मयाबद्धि
श्रुतोमन्त्रैर्भवितापापनाशनः॥श्रीमार्कंडेयउ०॥ ॥इत्युक्त्वाभगवानग्निःपश्यतस्तस्यवैमुनेः॥बभूवादर्शनंस[illegible]यःप्रदीपार्चिर्यथा॥सचशांति
गतेवह्नौपरितुष्टेनतेजसा॥जातशांतिर्महातेजाःप्रविवेशाश्रमंगुरोः॥जाज्वल्यमानंददृशेगुरोर्धिष्ण्येहुताशनं॥पूर्णचंद्रमिवप्रायंततःसपरमांमु
दं॥तस्मिन्नंतरेसोपिगुरुस्तस्यमहात्मनः॥भ्रातुर्यज्ञात्समायातात्ताराजगामस्वमाश्रमं॥तस्यागतस्यशिष्योसौचक्रेपादाभिवंदनं॥गृहीतासनपूजश्च
तमाहसतदागुरुः॥वत्साधिहार्दंत्वयिमेतथान्येषुचजंतुषु॥नवेद्मिकिमिदंत्वंचेत्त्वंवेत्थतत्कथयाशुमे॥ततःसशांतिस्तत्सर्वंआचार्यायमहात्मने॥
अग्निनाशादिकंविप्रसमाचष्टयथातथं॥तच्छ्रुत्वासंपरिष्वज्यस्नेहार्द्रनयनोगुरुः॥शिष्यायप्रददौवेदान्सांगोपांगान्महामुने॥भौत्योनाममनुस्तस्यपु
त्रोभूतेरजायत॥तस्यमन्वंतरेदेवान्टषीन्भूपानष्टएद्यमे॥भविष्यस्यभविष्यांस्तुगदतोममविस्तरात्॥देवेंद्रोयश्चभवितायश्चविख्यातकर्मणः॥
चाक्षुषाश्चकनिष्ठाश्चपवित्राभ्राजिरास्तथा॥राजावृकाश्चइत्येतेते[illegible]पंचदेवगणाःस्मृताः॥शुचिरिंद्रस्तथातेषांत्रिदशानांभविष्यति॥महाबलोम
हावीर्यःसर्वैरिंद्रगुणैर्युतः॥अग्नीध्रश्चाग्निबाहुश्चशुचिर्युक्तोथमाधवः॥शुक्रोजितश्चसप्तैतेतदासप्तर्षयःस्मृताः॥गुरुर्गभीरोबृध्नश्चगरश्चानुग्रप

वि२ ८१

वच॥ स्वारोचिषस्य॥ ... ॥स्त्रीमानीच प्रवीरश्च विष्णुः संक्रंदनस्तथा॥ तेजस्वीसुबलश्चैव भौत्यस्यैते मनोः सुताः॥ चतुर्दशं मयैतत्ते मन्वंतमुदाहृतं॥ श्रुत्वा मन्वंतराण्येवं क्रमे
णमुनिसत्तम॥ पुण्यमाप्नोति च तथा क्षीणपापश्च संततिं॥ श्रुते मन्वंतरे पूर्वे धर्ममाप्नोति मानवः॥ स्वारोचिषस्य श्रवणात्सर्वकामानवाप्नुयात॥ उत्तमे
धनमाप्नोति ज्ञानं चाप्नोति तामसे॥ रैवते च श्रुते बुद्धिं सुरूपां विंदते स्त्रियं॥ आरोग्यं चाक्षुषे पुंसां श्रुते वैवस्वते बलं॥ गुणवत्पुत्रपौत्रं च सूर्यसावर्णिके
श्रुते॥ महात्म्यं ब्रह्मसावर्णे ईर्मसावर्णिके श्रुते॥ श्रुतिमाप्नोति मनुजो रुद्रसावर्णिके श्रुते॥ ज्ञातिश्रेष्ठो गुणैर्युक्तो वेदसावर्णिके श्रुते॥ निशाजयश्चारिव
लं रौच्यं श्रुत्वा मनोहरं॥ देवप्रसादमाप्नोति भौत्यमन्वंतरे श्रुते॥ यथाग्निदीप्तिः पुत्रांश्च गुणयुक्तानवाप्नुति॥ सर्वाण्यनुक्रमाद्यस्तु शृणोति मुनिसत्त
म॥ मन्वंतराणि तस्यापि श्रूयतां फलमुत्तमं॥ तत्र देवानृषीन्विप्रान्मनूंस्तत्तनयान्नृपान्॥ इंद्रांश्च श्रुत्वा सर्वेभ्यः पापेभ्यो विप्रमुच्यते॥ देवेंद्रर्षिनृपाश्चान्ये
ये तन्मन्वंतराधिपाः॥ ते प्रीयंते तथा प्रीताः प्रयच्छंति शुभां मतिं॥ ततः शुभां गतिं प्राप्य कृत्वा कर्म तथा शुभं॥ शुभां गतिमवाप्नोति यावदिंद्राश्चतुर्दश॥ सर्वस्य
ऋतवः क्षेम्याः सर्वे सौम्यास्तथा ग्रहाः॥ भवंत्यसंशयं श्रुत्वा क्रमान्मन्वंतरस्थितिं॥ ॥४४॥ इति श्रीमार्कंडेयपुराणे मन्वंतरवर्णनो नामाध्यायः॥ ॥क्रौष्टुकिरु॥
भगवन्कथिता सम्यङ्मम मन्वंतरस्थितिः॥ क्रमाद्विस्तरतस्तत्त्वं मया चैवावधारिता॥ ब्रह्माद्यमखिलं वंशं भूभुजां मुनिसत्तम॥ श्रोतुमिच्छामि तं राम
सम्यग्भगवन्प्रब्रवीहि मे॥ श्रीमार्कंडेय उ॥ शृणु वत्स नृपाणां त्वमशेषाणां समुद्भवं॥ चरितं च जगन्मूलमादौ कृत्वा प्रजापतिं॥ अयं वंशो हि भूपाले रने १३७

ककुत्कर्तृभिः॥ संग्रामजिद्भिर्ईर्मज्ञैः शतसंख्यैरलंकृतः॥ श्रुत्वा चैषां नरेंद्राणां चरितानि महात्मनां॥ समुत्पत्तिश्च पुरुषः सर्वपापैः प्रमुच्यते॥ मनुर्य
त्र तथेक्ष्वाकुरनरण्यो भगीरथः॥ अन्ये च शतशो भूपाः सम्यक्पालितभूमयः॥ धर्मज्ञा यज्विनः शूराः सम्यक्परमवेदिनः॥ श्रुत्वा चैनं पुमान्वंशं
पापौघाद्विप्रमुच्यते॥ तदयं श्रूयतां वंशो जाता वंशाः सहस्रशः॥ भिद्यंते मनुजेंद्राणां मत्वरोहा यथा वटात्॥ ब्रह्मा प्रजापतिः पूर्वं सिसृक्षुर्विविधाः प्रजाः॥
अंगुष्ठाद्दक्षिणाद्दक्षमसृजन्मुनिसत्तम॥ वामांगुष्ठाच्च तत्पत्नीं जगत्सूतिकरीं प्रभुः॥ स सर्ज्ज भगवान्ब्रह्मा जगतां कारणं परं॥ अदितिस्तस्य दक्ष
स्य कन्या जायत शोभना॥ तस्यां च कश्यपो धीमान्मार्त्तंडं समजीजनत॥ ब्रह्मस्वरूपं जगतामशेषाणां परायणं॥ आदिमध्यांतभूतं च सर्गस्थित्यंतक
र्मसु॥ यतोऽखिलमिदं यस्मिन्नशेषं च स्थितं द्विज॥ यत्स्वरूपं जगच्चेदं सदेवासुरमानुषं॥ यः सर्वभूतः सर्वात्मा परमात्मा सनातनः॥ आदित्यश्चाभवद्ब्र
ह्मा न्पूर्वमाराधितस्तया॥ क्रौष्टुकिरु॥ ॥भगवन्श्रोतुमिच्छामि यत्स्वरूपं विवस्वतः॥ यत्कारणं चादिदेवोऽभवत्कश्यपात्मजः॥ कथं चाराधितो दे
व्याऽदित्या कश्यपेन च॥ आराधितेन चोक्तं यत्तेन देवेन भास्वता॥ प्रभावं चावतीर्णस्य यथावन्मुनिसत्तम॥ भवता कथितं सम्यक् श्रोतुमिच्छाम्य
शेषतः॥ मार्कंडेय उ॥ विसृष्टा परमा विद्या द्योतिर्भाशाश्वती स्फुटा॥ केवलं ज्ञानमाविर्भूः प्राकाश्यं संविदे वच॥ बोधकश्च मतिश्चैव स्मृतिर्विज्ञा
नमेव च॥ एतद्दारीनि रूपाणि तस्या रूपस्य भास्वतः॥ श्रूयतां च महाभाग गदतो मम विस्तरं॥ यत्स्पष्टवानसि रवेराविर्भावो यथाभवत॥ निःप्रभेऽस्मिन्नि

राल्लोके सर्वतस्तमसावृते॥ बृहदंडमभूदेकमक्षरं कारणं परं॥ तद्विभेद ततं तस्मो भगवान्प्रपितामहः॥ पद्मयोनिः स्वयं ब्रह्मा यस्य सृष्टं जगतो प्रभुः॥ तन्मुखा
दहमिति महानभूच्छद्बो महामुने॥ ततो भूर्भुवस्तस्मात्ततश्च स्वरनंतरं॥ एता व्याहृतयस्तिस्रः स्वरूपं तद्विवस्वतः॥ ॐमित्यस्मात्स्वरूपाच्च सूक्ष्मं रू
पं रवेः परं॥ ततो महानिति स्थूलं ततः स्थूलं परं तपः॥ ततस्ततः सत्यमिति मूर्त्तान्येतानि सप्तधा॥ नित्यस्य तस्य रूपाणि भवंति न भवंति च॥ अभावं भाव
मन्भावं यतो गछत्यसंशयं॥ आद्यं तु यत्परं सूक्ष्मं स्वरूपं रूपसंज्ञितं॥ ॐमित्युक्तं मया विप्र तत्परं ब्रह्म तद्वपुः॥ श्रीमार्कंडेय उ॥ तस्मादंडाद्विभिन्नात्तु ब्र
ह्मणो व्यक्तजन्मनः॥ ऋचो बभूवुः प्रथमे प्रथमाद्वदनान्मुने॥ जपापुष्पनिभाः सद्यस्तेजोरूपा ह्यसंहताः॥ पृथक् पृथग्विभिन्नाश्च रजोरूपा महा
त्मनः॥ यजूंषि दक्षिणाद्वक्त्रादनिवद्धानि कानि चित्॥ यादृक् वर्णान्यसंहतिचराणि वै॥ पश्चिमं यद्विभोर्वक्त्रं ब्रह्मणः परमेष्ठिनः॥ आविर्भूतानि सामानि
नव ततः कुंदशिम्नान्यथ॥ अथर्वाणमशेषेण भिन्नांजय प्रभं॥ घोराघोरस्वरूपं तदभिचारिक शांतिमत्॥ ऋचो रजोगुणाः सत्वं यजुषां स्वगुणो मुने॥ तमोगु
णानि सामानि तमस्तत्वमथर्वसु॥ एतानि ज्वलमानानि तेजसा प्रतिभेन वै॥ पृथक् पृथगवस्थासु स्थानं पूर्वमिवाभवत्॥ ततस्तदाद्यं यत्तेजः ॐमि
त्युक्तातिशिष्यते॥ तस्यानुतादृक्तेजस्तत्समावृत्योपसंस्थितं॥ तथा यजुर्मयं तेजो यच्च साम्नां महामुने॥ एकत्वमुपयातानि परे तेजसि संश्रयं॥ शांति
कं पौष्टिकं चैवं तथा चैवाभिचारिकं॥ ऋगादिषु लयं ब्रह्मन्त्रितयं त्रिमथा गमत्॥ ततो विश्वमिदं सद्यस्तमोनाशात्सुनिर्मलं॥ बभाव तीव विप्रर्षे तिरश्चोर्द्ध

मधस्तथा॥ ततस्तन्मंडलीभूतं छांदसं तेज उत्तमं॥ धारणं तेजसा ब्रह्मन् एकत्वमुपगम्य च॥ आदित्यसंज्ञामगमदाद्यावेवयतो भवत्॥ विश्वस्यास्य महाभाग
कारणं चाव्ययात्मके॥ प्रातर्मध्ये दिने चैव तथा चैवापराह्णिके॥ त्रयी तपति सा काले ऋग्यजुः सामसंज्ञका॥ ऋचस्तपंति पूर्वाह्णे मध्याह्ने च यजूंषि च॥ सा
मानि चापराह्णे वै तपंति मुनिसत्तम॥ शांतिऋक्षु पूर्वाह्णे यजुर्मध्ये च पौष्टिकं॥ अपराह्णे स्थितं नित्यं सामस्वेवाभिचारिकं॥ सृष्टौ च ऋग्मयो ब्रह्मा स्थितौ
विष्णुर्यजुर्मयः॥ रुद्रः साममयो येन तस्मात्तस्याशुभिर्ध्वनिः॥ तदेवं भगवान्भास्वान्वेदात्मा वेदसंस्थितिः॥ वेदविद्यात्मकश्चैव परः पुरुष उच्यते॥ सर्ग
स्थित्यंतहेतुः स रजःसत्वादिकैर्गुणैः॥ आदित्य ब्रह्म विष्ण्वादि संज्ञामभ्येति शाश्वतः॥ देवैः स चेद्यः सतु देवमूर्त्तिरमूर्त्तिराद्यो खिल विश्वमूर्त्तिः॥ विद्याश्रयं ज्योति
रवद्य धर्माधर्मा वरातः परमः परेभ्यः॥ ४७॥ इति श्रीमार्कंडेयपुराणे॥ ॥ श्रीमार्कंडेय उ॥ तस्य संतान्यमाने तु तेजसो ईमधस्तथा॥ सिसृक्षुश्चिंतयामास पद्मयो
निः पितामहः॥ सृष्टिः कृतापि संनाशं प्रयास्यति तेन तेजसा॥ भास्वतः सृष्टिसंहारस्थितिहेतोर्महात्मनः॥ अप्राणाः प्राणिनः सर्वे आपः शुष्यंति तेजसा॥ न चांभ
सा विना सृष्टिर्विश्वस्यास्य भविष्यति॥ इति संचिंत्य भगवान्स्तोत्रं भगवतो रवेः॥ चकार तन्मयो भूत्वा ब्रह्मा लोकपितामहः॥ ब्रह्मा उ॥ नमामि यन्मयं सर्वमेत
त्सर्वमयश्च यः॥ विश्वमूर्त्तिः परं ज्योतिः यत्तध्यायंति योगिनः॥ स ऋग्मयो यो यजुषां निधानं साम्नां च यो यो निराचिंत्यशक्तिः॥ त्रयीमयः स्थूलवया ईमात्रा
परस्वरूपोगुतया प्रयोज्यः॥ तं सर्वहेतुं परमं च वेद्यं आद्यं परं ज्योतिरथात्मरूपं॥ स्थूलं च देवात्मतया नमस्ये नास्वं तमाद्यं परमं परेभ्यः॥ सृष्टिं करोति य

मार्कं· दहंतवशक्तिराद्यातत्वेरितंजलमहीपवनाग्निरूपं॥देहादिकंसकलदेहवतामशेषमात्मीयात्ययास्थितिलयावपितद्दरेव॥वह्निस्त्वमेवजलशोषणतः
१३९ पृथिव्यां॥सृष्टिंकरोषिजगतांचतथाविपाकं॥अपीत्थमेवगगनंपवनस्वरूपंवध्वात्वंपंचधाजगदिदंपरिपासिसृष्टं॥यज्ञैर्यजंतिपरमार्थविदोभवं
तंविष्णुस्वरूपमखिलेष्टिमयंविवस्वन्॥ध्यायंतिवापियतयोनियतात्मचित्ताः॥सर्वेश्वरंपरपरात्तिविमुक्तिकामाः॥नमस्तेदेवरूपाययज्ञरूपा
यतेनमः॥परंब्रह्मस्वरूपायचिंत्यमानाययोगिभिः॥उपसंहरतेजोयत्तेजसःसंहतिस्तव॥सृष्टेर्विघातायविभोसृष्टेचाहंसमुद्यतः॥ ॥इतिश्रीमार्कं
डेयपुराणे॥ ॥मार्कंडेयउ॥इत्येवंसंस्तुतोभास्वान्ब्रह्मणासर्गधारिणा॥उपसंहृतवान्तेजःपरंस्वल्पमधारयत॥चकारचततःसृष्टिंजगतःपद्मसं
भवः॥यथान्येषुमहाभागपूर्वकल्पांतरेषुवै॥देवासुरादिमर्त्यांश्चपश्वादीन्वृक्षवीरुधः॥ससर्जपूर्वंवब्रह्मानरकांश्चमहामुने॥सृष्ट्वाजगदि
दंब्रह्माप्रविभागोस्तथाकरोत्॥वर्णाश्रमसमुद्रादिद्वीपानांपूर्ववद्यथा॥देवदैत्योरगादीनांरूपस्थानानिपूर्ववत्॥देवेभ्यएवभगवान्करोत्कम
मलासनः॥ब्रह्मणस्तनयोभूत्तुमरीचिरितिविश्रुतः॥कश्यपस्तस्यपुत्रोभूत्कश्यपपौत्सकाशपः॥दक्षस्यतनयाब्रह्मन्तस्यभार्यास्त्रयोदश॥बहव
स्तत्सुताश्चासन्देवदैत्योरगादयः॥अदितिर्जनयामासदेवांस्त्रिभुवनेश्वरान्॥दैत्यान्दितिर्दनुश्चोग्रान्दानवान्भूरिविक्रमान्॥गरुडारुणौच राम
विनतायक्षरक्षांसिवैषगान्॥कद्रूसुषुवे नागांश्चगंधर्वान्सुषुवेमुनिः॥क्रोधायाजज्ञिरेकन्याऽरुष्टायाश्चाप्सरोगणाः॥ऐरावतादीन्मातंगान् १३९

सु ३

इलाचसुषुवेद्विज॥ताम्राचसुषुवेश्येनीकन्याकांद्विजसत्तम॥ताम्रा शुकीचभासीचप्रमुखाःकन्यकाद्विज॥यासांप्रसूताःखगमाःश्येनभास
शुकादयः॥इलायाःपादपाजाताः॥अथायाश्चाप्सरोगणाः॥द्वितीयावैसमुत्पन्नाकश्यपस्येतिसंततिः॥तस्याथपुत्रदौहित्रैःपौत्रदौहित्रकादिभिः॥व्या
प्तमेतज्जगत्सर्वंतेषांतासांचवैमुने॥तेषांकश्यपपुत्राणांप्रधानादेवतागणाः॥सात्विकाराजसस्त्वन्येतामसश्चमुनेगणाः॥देवान्यज्ञभुजश्च
क्रेतथात्रिभुवनेश्वरान्॥ब्रह्माब्रह्मविदांश्रेष्ठःपरमेष्ठीप्रजापतिः॥ततस्तेसहिताःसर्वेसयक्षादैत्यदानवाः॥राक्षसाश्चततोयुद्धंतेषामासीत्सु
दारुणः॥दिव्यंवर्षसहस्रंतुतत्राजीयंतदेवताः॥जयिनश्चाभवन्विप्रबलिनोदैत्यदानवाः॥ततोनिराकृतान्पुत्रान्दैत्यैर्येदनिवैस्तथा॥हृत
त्रिभुवनंदृष्ट्वाअदितिर्मुनिसत्तम॥आच्छिन्नयज्ञभागांश्चक्षुधासंपीडितान्भृशं॥आराधनायसवितुःपरंयत्नंप्रचक्रमे॥एकाग्रानियताहा
रापरंनियममास्थिता॥तुष्टावतेजसांराशिंगगनस्थंदिवाकरं॥अदितिरु॥नमस्तुभ्यंपरंसूक्ष्मंसौषुप्तंबिभ्रतेऽतुलं॥धामधामवतामीशधा
म्नामाधारशाश्वत॥जगतामुपकारायतथायस्तवगोपते॥आददानस्ययद्रूपंतीव्रंतस्मैनमाम्यहं॥गृहीतमष्टमासेनकालेनेंदुमयंरसं॥बिभ्र
तस्तवयद्रूपमतीतीव्रंनतास्मितत्॥तमेवमुंचतःसर्वरूपंवैवर्णाश्रयं॥रूपमाप्यायिकंभास्वत्तस्मैमेघायतेनमः॥वायूत्सर्गविनिष्पन्नम
घाघंचौषधीगणं॥पुष्टवतस्तवयद्रूपंभास्करंतंनमाम्यहं॥यच्चरूपंतवातीवहिमोत्सर्गादिशीतलं॥कालेसस्यादिपोषायतरणोतन्नमाम्यहं॥ना

तितीव्रंचयद्रूपंनातिशीतंचयत्तव॥वसंतर्तौरवेःसौम्यंतस्मैदेवनमस्तव॥आप्यायकमशेषाणांदेवानाममलात्मकं॥पितृणांचनमस्तुभ्यंसम्यक्
यूज्ञैकहेतवे॥यद्रूपंधारणायोवींवीरुधाममृतात्मकं॥पीयतेदेवपितृभिस्तस्मैसोमात्मनेनमः॥आप्यायदाहरूपाभ्यांरूपंविश्वमिदंतव॥समेतमग्नि
सौमाभ्यांपीतस्तस्मैगुणात्मने॥यद्रूपंऋग्यजुःसाम्नामैक्येनतपतेतव॥विश्वमेतत्त्रयीसंज्ञंनमस्तस्मैविभावसो॥यत्त्वेतस्मात्परंरूपंॐमित्युक्त्वाति
शब्दितं॥अस्थूलंस्थूलमणुचनमस्तस्मैसनातन॥श्रीमार्कंडेयउ॥एवंसानियतादेवीचक्रेस्तोत्रमहर्निशं॥निराहाराविवस्वंतंआरराधयिषुर्मुने॥ततः
कालेनमहताभगवांस्तपनोमुने॥प्रत्यक्षतामगात्तस्यादाक्षायिण्याद्विजोत्तम॥सादर्दर्शमहाकूटेतेजसोंबरसंस्थितं॥भूमौचसंस्थितंभास्वत्ज्वालामा
लातिदुःसहं॥तंचदृष्ट्वाततोदेवीसाध्वसंपरमंगता॥जगदाद्यप्रसीदेतिनत्वापश्यामिगोपते॥यथादृष्टवतीपूर्वंअंबरस्थंसुदर्शनं॥संघातंतेजसस्तस्मा
दिहपश्यामिभूतले॥प्रसादंकुरुपश्येयंयद्रूपंतेप्रभाकर॥भक्तानुकंपकविभोभक्तांपाहिमेभवान्॥त्वंधाताविसृजसिचविश्वमेतद्देवस्त्वंपातास्थिति
करणायसंप्रवृत्तः॥त्वय्यंतेलयमखिलंप्रयातित्वत्तोन्यानहितपनास्तिसर्वभूतात॥त्वंब्रह्माहरिहरसंज्ञितस्त्वमिंद्रोवित्तेशःपितृपतिरंबुरःसमीरः॥
सोमोग्निर्गगनमहीधरांदिभूयःकिंरूप्यंतवसकलात्मरूपधाम्नः॥यज्ञेस्त्वामनुदिनमात्मकर्मयुक्तास्तन्वंतेविविधपदेर्द्विजायजंति॥ध्यायंतोनियमि राम
तचेतसोभवंतंयोगस्थाःपरमपदंप्रयांतिमर्त्याः॥तपसिपचसिविश्वंपासिभस्मीकरोषिप्रकटयसिमयूखैर्ह्लादयस्यंबुगर्भैः॥सृजसिसकलजन्मापा १४०

लयस्यवृहताक्षःक्षपयसिमयूखैर्युगांतेरुद्ररूपस्त्वमेकः॥४१॥ ॥इतिश्रीमार्कंडेयपुराणेअदितिकृतसूर्यस्तवः॥श्रीमार्कंडेयउ॥ ॥ततःसतेजस
स्तस्मादाविर्भूतोविभावसुः॥अदृश्यततथादित्यस्तप्ततांम्रोपमप्रभः॥अथतांप्रणतांदेवींतस्यसंदर्शनान्मुने॥प्राहसास्माद्वृणुष्वेष्टंवरंमत्तोयमि
च्छसि॥प्रणताशिरसासाचजानुपीडितमेदिनी॥प्रत्युवाचविवस्वंतंवरदंसमुपस्थितं॥देवप्रसीदपुत्राणांहृतंत्रिभुवनंमम॥यज्ञभागाश्चदैत्येयैर्दा
नवैश्चवलाधिकैः॥तन्निमित्तंप्रसादंत्वंकुरुष्वममगोपते॥अंशेनतेषांभ्रातृत्वंगत्वानाशयतद्रिपून्॥यथामेतनयाभूयोयज्ञभागभुजःप्रभो॥भ
वेयुरधिपाश्चैवत्रैलोक्यस्यदिवाकरं॥तथानुकंपांपुत्राणांसुप्रसन्नारवेमम॥कुरुप्रपन्नार्तिहरणंस्थितिकर्त्ताध्वमुच्यसे॥श्रीमार्कंडेयउ॥ततस्तामा
हभगवान्भास्करोवारितस्करः॥प्रणतामदितिंविप्रप्रसादसुमुखोविभुः॥सहस्रांशेनतेगर्भेसंभूयाहमशेषतः॥त्वत्पुत्रशत्रूनदितेनाशयाम्याशु
अनिर्वृतः॥इत्युक्त्वाभगवान्भास्वानंतर्द्धानमुपागमत्॥निवृत्तासापितपसःसंप्राप्ताखिलवांछिता॥ततोरश्मिसहस्रेषुसुषुम्नाख्योरवेःकरः॥विप्र
प्रवेशेंसंचक्रेदेवमातुरथोदरे॥कृच्छ्रचांद्रायणादीनिसाचक्रेतुसमाहिता॥शुचिःसंधारयाम्येनंदिव्यंगर्भमितिद्विज॥ततस्तांकश्यपःप्राहकिंचित्कोप
प्लुताक्षरं॥किंमारयसिगर्भांडमितितिनित्योपवाशिनि॥साचतंप्राहगर्भांडमेतत्पश्यतिकोपन॥नमारितंविपक्षाणांमृत्युंचेदंभविष्यति॥इत्युक्त्वातंततागर्भ
र्भमुत्ससर्जसुरारिणं॥जाज्वल्यमानंतेजोभिःप्रत्युर्वचनकोपिता॥तंदृष्ट्वाकश्यपोगर्भमुद्यत्भास्करवर्चसं॥तुष्टावप्रणतोभूत्वाऋग्भिराद्याभिरादरात्

मार्कं.
१४१

संभूयमानः सतदागर्भांडात्प्रकटोऽभवत्॥ पद्मपत्रसवर्णाभस्तेजसाव्याप्तदिङ्मुखः॥ अथांतरिक्षाद्गंभीरां कश्यपं मुनिसत्तमं॥ सतोयमेघगंभीरावा
गुवाचाशरीरिणी॥ मारितं तेयतः प्रोक्तमेतदंडं वयोदितें॥ तस्मिन्मुने सुतस्ते यं मार्त्तंडाख्यो भविष्यति॥ सूर्याधिकारं च विभुर्जगत्येष करिष्यति॥ ह
निष्यत्यसुरांश्चायं यज्ञभागहरानरीन्॥ देवा निशम्येति वचो गगनात्समुपागतं॥ प्रहर्षमतुलं याता दानवाश्च हतौजसः॥ ततो युद्धाय दैतेयानाजुहा
व शतक्रतुः॥ सह देवैर्मुदा युक्ता दानवाश्चतमभ्ययुः॥ तेषां युद्धमभूद्घोरं देवानामसुरैः सह॥ शस्त्रास्त्रदीप्तिसंदीप्तसमस्तभुवनांतरं॥ तस्मिन्युद्धे भ
गवता मार्त्तंडेन निरीक्षिताः॥ तेजसा दह्यमानास्तु भस्मीभूता महासुराः॥ ततः प्रहर्षमतुलं प्रापुः सर्वे दिवौकसः॥ तुष्टुवुस्तेजसां योनिं मार्त्तंडमदितिं
तथा॥ भगवानपि मार्त्तंडः स्वाधिकारमथाकरोत्॥ कदंबपुष्पवद्भानुरधश्चोर्ध्वं च रश्मिभिः॥ वृत्तोग्निपिंडसदृशो दध्रेनातिस्फुटं वपुः॥ ३७॥ इति श्रीमार्कं
डेयपुराणे जैमिनिसंवादे मार्त्तंडोत्पत्तिर्नामाध्यायः॥ ॥श्रीमार्कंडेय उ०॥ ॥अथ तस्मै ददौ कन्यां संज्ञां नाम विवस्वते॥ प्रसाद्य प्रणतो भूत्वा विश्वकर्मा
प्रजापतिः॥ विवस्वतस्तु संभूतौ मनू द्वौ चरितं तयोः॥ पूर्वमेव तथाख्यातं मयैतदखिलं तव॥ त्रीण्यपत्यान्यसौ तस्यां जनयामास गोपतिः॥ द्वौ पुत्रौ
सुमहाभागौ कन्यां च यमुनां मुने॥ मनुर्वैवस्वतो ज्येष्ठः श्राद्धदेवः प्रजापतिः॥ तेषां यमो यमी चैव यमलौ संबभूवतुः॥ तत्तेजोऽप्यधिकं चैव मार्त्तंड
स्य विवस्वतः॥ तेनातिताप यामास त्रींल्लोकान्सचराचरान्॥ गोलाकारं तु तं दृष्ट्वा संज्ञा रूपं विवस्वतः॥ असहंती तु तत्तेजः स्वां छायां वीक्ष्य साब्रवीत्

राम
१४१

DR. BHAU DAJI MEMORIAL

अहं यास्यामि भद्रं ते स्वकं च भवनं पितुः॥ निर्विकारे त्वयाप्यत्र स्थेयं मच्छासनाच्छुभे॥ समौ च बालकौ मह्यं कन्या च वरवर्णिनी॥ संभाव्या नैव
चाख्येयमिदं भगवते त्वया॥ छाया उ०॥ आकेशग्रहणाद्देवि आशापान्नैव कर्हिचित्॥ आख्यास्यामि मतं तुभ्यं गम्यतां यत्र वांछितं॥ इत्युक्ता छायया संज्ञा ज
मपितृमंदिरं॥ तत्रावसान्पितृगेहे किंचित्कालं शुभेक्षणा॥ भर्त्तुः समीपं याहीति पित्रोक्ता सा पुनः पुनः॥ अगच्छद्वडवा भूत्वा कुरूनथोत्तरांस्तथा॥
तत्र तेपे तपः साध्वी निराहारा महामुने॥ पितुः समीपं यातायाः संज्ञाया वाक्यतत्परा॥ तद्रूपधारिणी छाया भास्करं समुपस्थिता॥ तस्यां च भगवान्सूर्यः
संज्ञेयमिति चिंतयन्॥ तथैव जनयामास द्वौ पुत्रौ कन्यकां तथा॥ पूर्वजस्य मनोस्तुल्यः सावर्णिस्तनयोऽभवत्॥ यस्तयोः प्रथमं जातः पुत्रयोर्द्विजसत्तम॥
द्वितीयोऽत्राभवद्यश्चान्यः सग्रहोभूच्छनैश्चरः॥ कन्या च तपती यातां वव्रे संवरणो नृपः॥ संज्ञा तु पार्थिवी तेषामात्मजानां यथाकरोत्॥ स्नेहं न पूर्वजातानां त
थाकृतवती सती॥ मनुस्तत्क्षांतवांस्तस्या यमश्चास्या न चक्षमे॥ बहुशो यास्यमानस्तु पितुः पत्न्या सुदुःखितः॥ स वै कोपस्य बाहुल्याद्भाविनोर्थस्य वै बला
त्॥ पदा संतर्जयामास छायासंज्ञां तदा यमः॥ तं शशाप ततः क्रुद्धा संज्ञा सा पार्थिवी भृशं॥ छाया उ०॥ पदा तर्जयसे यन्मां पितृभार्यां गरीयसीं॥ तस्मात्तवै
ष चरणः पतिष्यति न संशयः॥ यमस्तु तेन शापेन भृशं पीडितमानसः॥ मनुना सह धर्मात्मा सर्वं पित्रे न्यवेदयत्॥ यम उ०॥ स्नेहेन तुल्यमस्मासु माता देव न
वर्त्तते॥ विसृज्य ज्यायसोप्यस्मान्कनीयांसं बुभूषति॥ तस्या मयोद्यतः पादो न तु देहे निपातितः॥ बाल्याद्वा यदि वा मोहात्तद्भवान्क्षंतुमर्हसि॥ शप्तोहं ता

DR. BHAU DAJI MEMORIAL

मार्कं॰ १४२ तकोपेनजनन्यानानयोयतः॥ततोनममेयंजननीसानवेत्तपतांवर॥निर्गुणेष्वपिपुत्रेषुनमाताविगुणाभवेत॥यादस्तेपततोपुत्रकथमेतत्भवष्यति॥त
वप्रसादाच्चरणौनभवेद्भूवनंयथा॥मात्रिशापादयंमेद्यतथाचिंतयगोपते॥रविरुवाच॥॥असंशयमिदंपुत्रभविष्यत्यत्रकारणं॥येनत्वामविशत्क्रोधोध
र्मज्ञेसत्यवादिनि॥सर्वेषामेवशापानांप्रतिघातोहिविद्यते॥नतुमात्राभिशप्तानांक्वचिच्छापनिवर्त्तनं॥नशक्यमेतन्मिथ्यातुकर्त्तुंमातुर्वचस्तव॥किंचि
त्तेनुविधास्यामिपुत्रस्नेहात्स्वनुग्रहं॥कृमयोमांसमादाय प्रयास्यंतिमहीतले॥कृतेनतस्याःवचःसत्यंत्वंचस्वस्थोभविष्यति॥मार्कंडेयउ॥आदित्यस्त्व
थ्अब्रवीच्छायांकिमर्थंतनयेषुच॥तुल्येष्वभ्यधिकस्नेहएकत्रक्रियतेत्वया॥नूनंनैषात्वंजननीसंज्ञाकापित्वमागता॥विगुणेष्वपिह्यपत्येषुमाताशा
पेनदास्यति॥मार्कंडेयउ॥सातत्परिहरंतीचनाचचक्षेविवस्वतः॥सचात्मानंसमाधायमुक्तस्तत्वमवेक्ष्यत॥तंशप्तुमुद्यतंदृष्ट्वाछायासंज्ञादिवस्पतिं॥
भयेनकंपिताब्रह्मन्यथावृत्तंन्यवेदयत्॥विवस्वांस्तुततःक्रुद्धःश्रुत्वाश्वसुरमभ्ययात्॥सचापितंयथान्यायंअर्चयित्वादिवाकरं॥निर्द्दग्धुकामंरो
षेणसांत्वयामाससुव्रत॥विश्वकर्मोवाच॥तवापितेजसाव्याप्तंमिदंरूपंसुदुःसहं॥असहंतीतुतत्संज्ञावनेचरतिवैतपः॥द्रक्ष्यतेतांभवानद्यस्वांभा
र्यांशुभचारिणीं॥रूपार्थंभवतोरण्येचरंतींसुमहत्तपः॥मतंमेब्रह्मणोवाक्यात्यदिवोदेवरोचते॥रूपंनिवर्त्तयाम्यद्यतवकांतंदिवस्पते॥श्रीमार्कंडेय राम १४२
उवाच॥यतोहिभास्वतोरूपंप्रागासीत्परिमंडलं॥ततस्तथेतितंप्राहत्वष्टारंभगवान्विभुः॥विश्वकर्माभ्यनुज्ञातःसतदावैविवस्वतः॥भ्रमिमारोप्यतत्तेजः

शातनायोपचक्रमे॥भ्रमतोशेषजगतांअभिभूतेनभास्वता॥समुद्राद्रिवनोपेताआरुरोहमहीभ्रमं॥गमनंचाखिलंविप्रसचंद्रग्रहतारकं॥
भ्रमिंगतंमहाभागबभूवाक्षिप्तमाकुलं॥विक्षिप्तसलिलाःसर्वेबभूवुश्चतथाब्धयः॥व्यभिद्यंतमहाशैलाःशीर्णसानुनिबंधनाः॥ध्रुवाधाराण्य
नेकानिधिष्ण्यानिमुनिसत्तम॥भ्राम्यरश्मिनिबद्धानिअधोजग्मुःसहस्रशः॥वेगभ्रमणसंजातवायुक्षिप्ताःसमंततः॥विशीर्य्यंतमहामेघाघो
राराववीराविणः॥भास्वद्भ्रमणविभ्रांतस्वर्गाकाशमहीतलं॥जगदाकुलमत्यर्थंतदासीन्मुनिसत्तम॥त्रैलोक्येसकलेविप्रभ्रममाणेसुरर्षयः।
देवाश्चब्रह्मणासार्द्धंभास्वंतमभितुष्टुवुः॥आदिदेवोसिदेवानांजातमेवस्वयंतव॥स्वर्गस्थित्यंतकालेषुत्रिधादेहेषुतिष्ठति॥स्वस्तितेस्तुजगन्नाथ
घर्मवर्षहिमाकर॥इंद्रस्त्वांभिष्टौदेवंलिख्यमानमथाब्रुवन्॥जयदेवजगद्व्यापिन्हेशाश्वतजगत्पते॥ऋषयश्चततःसप्तवशिष्ठर्षिपुरोगमाः॥
तुष्टुवुर्विविधेस्तोत्रैःस्वस्तिस्वस्तीतिवादिनः॥वेदोक्ताभिरथोद्युग्निर्वालखिल्याश्चतुष्टुवुः॥अग्निराद्यंहिभास्वंतंलिख्यमानंमुदायुताः॥त्वंना
थयोगिनांमोक्षोध्येयस्त्वंध्यायिनांपरः॥त्वंगतिःसर्वभूतानांकर्मकांडप्रवर्त्तिनां॥शंप्रजाभ्यस्तुदेवेशापूज्यस्तुजगतांपते॥त्वन्नोविद्याधरगणा
यक्षराक्षसपन्नगाः॥कृतांजलिपुटाःसर्वेशिरोभिःप्रणतारविं॥ऊचुरेवंविधावाचोमनःश्रोत्रसुखावहाः॥मह्यंभवतुतेतेजोभूतानांभूतभा
वन॥ततोहाहाहुहुश्चैवनारदस्तुंबुरुस्तथा॥उपगातुंतुगांधर्वकुशलाआजग्मूरविं॥षड्जमध्यमगांधारग्रामत्रेयविशारदाः॥मूर्छनाभिश्चता

श्वतरा१

मार्कं· ल्लैश्चसुप्रयोगैःसुखप्रदं॥उर्व्वश्यथतिलोत्तमा॥मेनकासहजन्याचरं भावारुतरांबरा॥नन्नृतुर्ज्जगतामीशे भ्राम्यमानेविभावसौ॥हावभावविलासा
१४३ न्याकुर्वन्त्योभिनयान्बहून्॥प्रावाद्यंतस्ततस्तत्र वीणावाद्यानिदुर्दुराः॥पणवाःपुष्कराश्चैव मृदंगपटहानकाः॥देवदुंदुभयःशंखाःशतशोथसहस्र
व शाः॥गायद्भिश्चैगंधर्वैर्नृत्यद्भिश्चाप्सरोगणैः॥तूर्य्यवादित्रघोषैश्चसर्वंकोलाहलीकृतं॥ततःकृतांजलिपुटाभक्तिनम्रात्ममूर्त्तयः॥सहस्रांशुंप्रणे
स्तो॰४ स्पा॰४ मुःसर्वेदेवताःगणाः॥ततःकोलाहलेतस्मिन्सर्वदेवसमागमे॥तेजसःशातनंचक्रेविश्वकर्माशनैःशनैः॥इतिदिनकरस्यमखकर्म्मकालहेतोःकम
लासनविष्णुसंस्तुतस्य॥तनुपरिलिखनंनिशम्यसम्यक्व्रजतिदिवाकरलोकमायुषांते॥६६॥ ॥इतिश्रीमार्कंडेयपुराणेतेजसःशांतनंनाम॥ ॥श्री
मार्कंडेयउ॰॥लिख्यमानतनोस्तत्रविश्वकर्मप्रजापतिः॥उद्भूतपुलकःस्तोत्रमिदंचक्रेविवस्वतः॥भास्वतेप्रणतजनानुकंपिनेमहात्मनेसमज
वसप्तसप्तये॥सुतेजसेकमलकुलावबोधिने॥नमस्तमःपटलकपाटपाटिने॥पावनाऽतिशयपुण्यकर्मणे॥नैककामविषयप्रदायिने॥भास्क
रामलमयूषमालिनेसर्वभूतहितकारिणेनमः॥अजायलोकत्रयभावनायसुखात्मनेगोपतयेवृषाय॥नमोमहाकारुणिकोत्तमायसूर्य्यायच
क्षुःप्रभवालयाय॥विवस्वतेज्ञानभृतांतरात्मने॥जगत्प्रतिष्ठायजगद्धितैषिणे॥स्वयंभुवेनिर्मललोकचक्षुषे॥सुरोत्तमायाऽमिततेजसेनमः॥क्षणमु राम
छायावलमौलिरुचिःसुरगणगीतगरिष्ठगुणः॥त्वंगुरुमयूषसहस्रवपुर्जगतिविभासितमांसितुदन्॥भूतिमिरतोऽस्तिनिशास्तमयेभवतिविलो १४३

कितविग्रहतामिहिरविभासितथासुतरांत्रिभुवनमात्रधररथ्यमधिरुह्यसमानजवंरुचिरविकल्पितदिव्यहयं॥सततमस्मिन्नतथाभगवंश्चरसि
जगद्धितबद्धरसः॥अमृतमयेनरसेनसमंविविधपितॄनपितर्पयसे॥अरिगणसूदनतेनतवप्रणतमुपैत्यलिखामिवपुः॥शुकसमवर्णहिय
ग्रथितंतवपदपांशुपवित्रतमं॥नतजनवत्सलमांप्र[illegible]णतंत्रिभुवनपावनपाहिरवे॥इतिसकलजगत्प्रसूतिभूतंत्रिभुवनभावनधामहे
तुमेकं॥रविमखिलजगत्प्रदीपभूतंत्रिदशवरप्रणतोस्मिसर्वदाहं॥१०॥ ॥इतिश्रीमार्कंडेपुराणेविश्वकर्मणोर्कस्तोत्रंसंपूर्णं॥श्रीमार्कंडेयउ॰॥
एवंतस्यस्तवंकुर्वन्विश्वकर्मादिवस्पतेः॥तेजसःषोडशंभागंमंडलस्थमधारयत्॥शांतितैस्तेजसोभागैर्दशभिःपंचभिस्तथा॥अतीवकांतिम
त्वाच्चभानोरासीत्तदावपुः॥शांतितंचास्ययत्तेजस्तेनचक्रेविनिर्म्मितं॥विष्णोःशूलंतुशर्वस्यशिबिकाधनदस्यच॥दंडःप्रेतपतेःशक्तिर्देवसेना
पतेस्तथा॥अन्येषांचैवदेवानांआयुधानिसविश्वकृत्॥चकारतेजसाभानोर्भासुराण्यरिशांतये॥इतिशातिततेजास्तुस्वर्सुरेणातिशोभनं॥वपुर्द्दारमा
र्त्तंडिं पुष्पन्वापमनोहरं॥सददर्शसमाधिस्थांतांभार्यांवडवाकृतिं॥अपायांसर्वभूतानांतपसासंयमेनच॥उत्तरांश्चकुरून्गत्वाभूत्वाश्वोभानुरात्मना॥
प्रवर्त्तःसतुसर्गायतांमुखेनसभावयत्॥साचदृष्ट्वातमायंतंपरपुंसोभिशंकया॥जगामसंमुखंतस्यपृष्टरक्षणतत्परा॥ततश्चनासिकायोगंतयोस्त
त्रसमेतयोः॥नासत्यदस्रौतनयौतस्यवक्राद्विनिर्गतौ॥रेतसोंतेचरेवंतःखड्गीधन्वीतनुत्रधृक्॥अश्वारूढःसमुद्भूतोबाणतूणसमन्वितः॥ततःस्वरू

शापाँधर्मदृष्टिरभूत्सुतः। रुमयोमांसमादाय पारतस्तेमहीतलं।पतिष्यतीति शार

मार्कं॰ पमरविस्तंदर्शयामासभानुमान्॥सोम्मंतुसासमोलोकय्स्वरूपंमुदमाददे॥स्वंरूपंधारिणींचैनामानिनायनिजालयं॥संज्ञांभार्य्यांप्रीतिमतींभास्करोवारि
१४४ तस्करा॥ततःपूर्वंतुयस्तस्याःसोभूद्वैवस्वतोमनुः॥द्वितीयश्चैवयमःशापांतंतस्यचक्रेपितास्वयं॥धर्मदृष्टिर्यमश्चासोसमोमित्रेतथाहिते॥ततोनियो
गेतेयाम्येचकारतिमिरापहः॥यमुनांचनदींचक्रेकलिंदांतरवाहिनीं॥अश्विनौदेवभिषजौकृतौपित्रामहात्मना॥गुह्यकाधिपतित्वेचरेवंतोविनियोजितः॥
रेवंतमप्याहततोभगवाल्लोकभावनः॥त्वमप्यथास्यलोकस्यपूज्योवत्सभविष्यसि॥अरण्येपलंमहादावेवैरिदस्युभयेषुच॥त्वांस्मरिष्यंतियेमर्त्यामोक्ष्यं
तितेमहापदः॥क्षेमवृद्धिंसुखंराज्यंआरोग्यंकीर्त्तिमुन्नतिं॥नराणांयाहितुष्टिस्त्वंपूजितःसंप्रदास्यसि॥छायासंज्ञासुतश्चापिसावर्णिःसुमहायशाः॥भाव्यो
